CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनोरमा

मासिकसंस्कृतपत्रिका

पञ्चमवर्षीया

सम्पादकः—श्री अनन्तत्रिपाठि शर्मा

मूल्यं—रूप्यकषट्कम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0: Agamnigam Digital Preservation Foundation, Chandigarh

Bharatiya vidya Bhavan's
Sanskrit Department
New Delhi

BVB Sri Sankaracharya Sanskrit ...
820

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयसूची

विषयः	लेखकः	पुटसंख्या
१। सुभाषितानि	—	१, ४१, ७७, १४६ २१७, २६७, ३२६
२। आत्मकथा	सम्पादकः	२
३। विश्वावसो स्वागतम्	श्री हरिसूनु माधव शर्माआणे M P.	३
४। उत्तररामचरित समालोचना	श्री अनन्तत्रिपाठिशर्मा M P.	५,४२,७८,११८,१५०,२६७
५। कर्मफलम्	श्री रवीन्द्रनाथ ठक्कुरः	८,४६,८५,११७,
६। प्रेमैव शान्तमनसा परिचिन्तयामः	श्री प्रेमानन्दः स्वामी	२१
७। भारतीयं ज्यौतिषम्	श्री वायिकोलि ज्यौतिषविशारदः	२२,२०३ २६१
८। श्री नीलाद्रिनाथ शतकम्	श्री पुरुषोत्तम मिश्रः कविरत्नः	३३,६१,१४५,३६३
९। का नाम समता ?	श्री स्वामी आत्मानन्दमुनिः	३७,६५,१७०,२३३,२८१
१०। मनोरमाप्रशस्तिः	श्री गोस्वामी भैरवगिरिः	३७,१४२
११। गौतमबुद्धबोधाः	श्री विश्वनाथ सोमशर्मा साहित्य विद्याप्रवीणः	५२,३७५
१२। गीतसीतावल्लभम्	श्री शि[illegible] कविः	[illegible],१०१,२३६
१३। आधुनिक संस्कृत परिसंवादः	सागरविश्वविद्यालयः	[illegible]३
१४। अपकारिण उपकारः	श्री विश्वनाथसोमशर्मा साहित्यविद्या प्रवीणः	[illegible]

Bhagawan's Sri Sankaracharya Sanskrit Mahavidyalaya
820

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषय:	लेखक:	पृष्टसंख्या
१५। सुमतिशतकम्	श्री ति. गु. वरदाचार्य: M.A.	११०
१६। सुखस्य दुःखस्य न कोऽपिदाता	श्री गोपिनाथ पाणिग्राही उभयभाषाप्रवीण आयुर्वेदाचार्य:	१२०
१७। श्रीविमलाष्टकम्	श्री जगन्नाथ रथ शर्मा विद्याभूषण:	१३५
१८। वैदिका देवा:	श्री दुःखिश्याम पट्टनायकः	१३६,२११
१९। अनुभूति शतकम्	श्री जगन्नाथ रथशर्मा विद्याभूषण:	१७५
२०। यज्ञेषु हिंसा निवारणम्	श्री विश्वनाथ सोमशर्मा साहित्यविद्याप्रवीण:	१८०
२१। धैयाज्जयं शास्त्रिणाम्	श्री रामकृष्ण मिश्र: न्यायचार्यं:	१८७
२२। अरुशे: स्वप्नविलसितम्	श्री श्रद्धाकर सूपकार: M.P.LLB. साहित्याचार्य:--	१८८
२३। वेमनशतमम्	श्री ति. गु. वरदाचार्य: M.A	२४९
२४। भारतीयं तपोननम्	श्रीमती केतकी देवी M.A.	२४०,३१६
२५। नारदकामराजीयम्	श्री श्रद्धाकर सूपकार: M.A LIB. साहित्याचार्य:	२४९,३८५
२६। पणस्य आदानं प्रदानं च	श्री रवीन्द्रनाथ ठक्कुर:	२७८
२७। दाशरथिशतकम्	श्री ति गु वरदाचार्य: M.A	३१३
२८। समाप्ति:	श्री रवीन्द्रनाथ ठक्कुर:	३४१
२९। मद्यपान-मांसाशन चौर्यनिरोध:	श्री विश्वनाथसोमशर्मा साहित्यविद्याप्रवीण:	३७९
३०। श्री वेङ्कटेशाष्टकम्	,,	३७३
३१। हनूमत्सन्देशम्	श्री मधुसूदन तर्कवाचस्पति:	४१२
३२। अनुवादकस्य आत्मकथा	सम्पादक:	१–४
३३। पुरुषोत्तममिश्र:	श्री अनन्त त्रिपाठिशर्मा	१–१२
३४। बह्वारम्भो लघु: क्रिया (Much Ado About Nothing)	श्री अनन्तत्रिपाठिशर्मा	१–११६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री मनोरमा

मासिक संस्कृत पत्रिका

ललितैः पदविन्यासैर्विचित्रैर्भावबन्धनैः ।
भावुकानामन्तरङ्गे प्रतिभातु मनोरमा ॥

पञ्चमो वर्षः } १८८७ शकाब्दम, चैत्रो मासः April 1965 { प्रथमा सञ्चिका

सुभाषितानि

नास्ति विद्यासमं चक्षुर्नास्ति विद्यासमं बलम् ।
नास्ति रोगसमं दुःखं नास्ति त्यागसमं सुखम् ।१।

विनयेन विना का श्रीः ? का निशा शशिना विना ?
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता ? ।२।

अविद्यः पुरुषः शोच्यः शोच्यं मिथुनमप्रजम् ।
निराहाराः प्रजाः शोच्याः शोच्यं राष्ट्रमराजकम् ।३।

श्रद्धानुसारिणी विद्या कीर्त्तिस्त्यागानुसारिणी ।
उत्साहसारिणी सम्पद् बुद्धिर्धर्मानुसारिणी ।४।

गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो मेघः ।
नीचो वदति न कुरुते वदति न सुजनः करोत्येव ।५।

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।६।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आत्मकथा

मनोरमायाः पञ्चमो वत्सरो मार्गशीर्षमासादारभ्यतेति गतसंचिकायां प्रकटितमासीत् । तत्र केचन प्रतिवादा मम करतलमुपनीताः । प्रतिवादकाश्च चैत्रमासादारभ्य अस्या वर्षारम्भो भवत्विति इङ्गितमपि दत्तवन्तः । तेषां प्रस्तावश्च मम मनस्तुष्ठये सम्पद्यते । चान्द्रमानमानेन अमान्तो मास इति वादिनां मते चैत्रकृष्णामावास्यया सह वर्षस्य परिसमाप्तिर्भवति, नूतनवत्सरश्च प्रतिपदि प्रारभते । पूर्णिमान्तो मास इति मते चैत्रकृष्णप्रतिपत्तः प्रारभते ; सेयं तिथिरेप्रेलमास एव आपतति । सुतरां तेषां प्रस्तावो मया नतेन शिरसा सभाजितः । तत एवेयं मनोरमा वासन्तीमभिख्यामाधाय सहृदयानां पुरत उपतिष्ठते । सर्वथेयमुपलालनीया सहृदयैः सुधीभिरिति निवेदयामि ।

समुचिताः प्रबन्धा नाद्यापि मे करगता भवन्ति । समुचितानां प्रबन्धरत्नानां प्रेषणेन नवीनेयं प्रसाधनीया भवति ।

नवीनमुत्साहं सहृदयानां वाचकानां शुभामाशिषं च संवलं कृत्वा यथायथं तूलिकामुदञ्चयितुं न कदापि पश्चात्पदो भवामीति सप्रश्रयं निवेदयामि ।

'मनोरमा' सर्वकाराणां दृष्टिमाक्रष्टुं प्राभवदिति कोऽपि प्रमोदः संजातः । सर्वकारसंस्कृतसमितिस्तदर्थमभिनन्दनीया भवति । तदर्थं मनोरमा अव्याजां कृतज्ञतां दर्शयति प्रतिजानीते च प्रतिमासं यथासमयमात्मानं प्रकाशयितुम् ।

विनीतः सम्पादकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विश्वावसो ! स्वागतम्

लेखकः—श्री हरिसूनुर्माधवशर्मा आगे M.P.

विश्वावसो, गृहाणेमां सपर्यां वाङ्मयीं मम ।
क्रोधिनि त्रस्तचित्तस्य नवाब्दे प्रथमेऽह्नि । १ ।

गताब्दसंकटोत्पातैर्निराशातिमिरावृताः ।
वयं प्रमुदिताः सर्वे नवाशाभरितास्त्वयि । २ ।

नीतो लोकाग्रणीः स्वर्गं सर्वलोकहिते रतः ।
नेहुरुः क्रोधिना तेन हिताय स्वर्गवासिनाम् । ३ ।

दैव्यासुरीमानुषीभिरापद्भिर्जर्जरा धरा ।
क्लिश्यते स्मपरं दीना सति क्रोधिनि शासके । ४ ।

उत्पातेन हताः प्रचण्डलहरीकल्लोलमग्ना जना
याम्याब्धेरधुना त्रिखण्डविदिते श्रीक्षेत्ररामेश्वरे ।
ग्रामास्तत्र तटस्थिताश्च सकलाः सुप्ता निधावम्भसां
तत्स्थाने प्रसृतं सरोऽतिविशदं क्षारोदकैः संप्लुतम् । ५ ।

चेरुश्चाष्टदिशासु भारतभुवि क्षुत्पीडिता मानुषा-
दुर्भिक्षं कुरुते भयप्रदमिह प्राणान्तकं ताण्डवम् ।
न काप्यस्ति हितप्रधानघटना लोकस्य यच्छासने
स क्रोधी परिवत्सरोऽद्य विलयं कालप्रभावाद् गतः । ६ ।

प्रवृद्धं दौर्जन्यं दुरितमिव मूर्तं समुदितम्
अतिक्रान्ता सीमा कपट पटुभि र्भारतभुवः ।
मदक्रोधद्वेषज्वलित हृदयैश्चीन पिशुनै-
रणुद्रव्यस्फोट प्रकटितजगद्ध्वंसमतिभिः । ७ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा पङ्क्तिस्थानेऽभवदयुवखानः कुटिलधी–
स्तदध्यक्षो द्वेष्टा जगति गणतन्त्रस्य परमः ।
विलीनः काश्मीरो प्रकृतिनृपतीनामनुमतै–
र्यथाशास्त्रं राष्ट्रे भरतनृपसंज्ञे सुविदिते । ८ ।

निबद्धं तं दृष्ट्वा सुफलभरितं भारततरो
तदासक्तो नित्यं विहितसमयोल्लंघनमतिः ।
विनिन्दत्यस्माकं विषमवचनै राष्ट्रगुरुवान्
अपायांश्चानन्तान् भरतकुलराष्ट्रस्य कुरुते । ९ ।

विश्वावसो ! सहृदयोऽसि गुणैरुदारो
धीरः समस्त वसुदेव गणेषु पूज्यः ।
संवत्सरो नव उदेषि सुकीर्तिसान्द्र–
स्तस्माद्वयं प्रमुदिताः प्रणमाम तुभ्यम् । १० ।

विश्वावसो गृहाण त्वं प्रार्थनां विनयान्विताम्
सुधावृष्टिभिरस्माकं धरामुज्जीवितां कुरु । ११ ।

धेहि नूत्नं बलं धैर्यं साहसं बिभत्रं तथा
यैः शत्रून्त चिरात्कुर्मो विजयैर्नः पदानतान् । १२ ।

तव प्रसादादस्माकं जननी भारती स्थिरा
धनधान्ययुता पूर्णा सच्छीलैर्नृभिस्तथा । १३ ।

विनश्यतु च दुर्भिक्षं गच्छत्वेव रसातलम् ।
दौरात्म्यं दुर्जनानां च, धर्मराज्यं चकास्तु नः । १४ ।

नाम्ना ते हृदयङ्गमेन महता संजातहर्षोधनाः
कार्येणापि च ते सदा जनहितार्थेन प्रलुब्धाशयाः ।
शक्त्या चासमया तवापि विविधाशापाशग्रस्तान्तरा
हार्दं भक्तिभृतं तवाद्य तनुमो विश्वावसो स्वागतम् । १५ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तररामचरित समालोचना

(अनुवृत्ता)

लेखकः श्री अनन्तत्रिपाठि शर्म्मा

सौधातकिदण्डायनसम्वादः

सोऽयं सम्वाद उत्तररामचरितस्य चतुर्थाङ्कस्य प्रारम्भे मिश्रविष्कम्भकरूपेण तिष्ठति। विष्कम्भकस्य लक्षणं तु पूर्वमुक्तम्। अत्र अतीतस्य ऋष्यशृङ्गस्य द्वादशवार्षिकयज्ञसमाप्तिरूपस्य वशिष्ठारुन्धत्यधिष्ठितानां दशरथमहिषीणां वाल्मीक्याश्रमागमनरूपस्य जनकागमनरूपस्य च वृत्तान्तस्य आगामिनश्च तेषां परस्परमेलनरूपस्य संक्षेपेण निर्देशस्त्वादयं विष्कम्भको भवति। तत्रापि संस्कृतप्राकृतमिश्रिततत्वात् अयं मिश्रविष्कम्भक इत्यभिधीयते। अत्र हि भगवतो वाल्मीकेः प्रौढ़ः शिष्यो दण्डायनः संस्कृतभाषया सौधातकिना नवोपनीतेन वटुना आलपति। सौधातकिश्चाव्युत्पन्नत्वात् प्राकृतभाषया आलपति।

अत्र हि अङ्के वल्मीक्याश्रमे वशिष्ठाधिष्ठितैर्महाराजदशरथदारैःसह तत्रभवतो जनकस्य मिलनं तदवसरे च मेध्याश्व रक्षाप्रसङ्गेन समागतस्य लक्ष्मणपुत्रस्य चन्द्रकेतोरागमनमाश्वमेधिकस्य चाश्वस्य तत्रोपस्थितिरित्येतद्वर्णितमास्ते। अतोऽयं विष्कम्भक आश्रमवासिनौ द्वौ ब्रह्मचारिणावेव परिकल्प्य कविना संयोजितः।

उभावपि नैव रामायणवर्णितौ भवतः। कविना स्वयमेव कल्पितौ। अनयोः कल्पनायां समुचितमौचित्यं परिलक्ष्यते। अस्माकं कविर्भवभूतिस्तैत्तिरीयः पंक्तिपावनो वैदिकशिरोमणिर्भवति। अतस्तदुचिताचारव्यहारैरेव आश्रममुपगतानां वशिष्ठाधिष्ठितानां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महाराजदशरथदाराणां जनकस्य च समावेशं सूचयति। सूचनायामपि किमपि कौशलं प्रदर्शितं कविना। भगवान् वशिष्ठोऽनिवृत्तमांसो गृहमेधी, जनकस्तु निवृत्तमांस इति उभयोर्भेदं प्रदर्शयन् सीतायास्तादृशदैवदुर्विपाकस्य श्रवणाद्वैखानसस्य जनकस्य निवृत्तमांसत्वं समर्थयति।

रामायणे हि अभिषेकानन्तरं जनकस्य न कोऽपि संवादो दृष्टिपथमायाति, अत्र तु कविर्जनकं यथार्थजनकत्वेन चित्रयितुं बद्धपरिकरो वर्तते। अतएव तस्य प्रस्थानेन विमनायमानायाः सीतायाः परिसान्त्वनार्थं धर्मासनाद्वासगृहमागच्छता रामभद्रेण नाटकस्य प्रारम्भः कृतः। अनेन च सीतायास्तादृशदैवदुर्विपाकश्रवणेन वैखानसः सम्पन्न इति प्रतिपादितमास्ते। तेन जनकस्य पितुर्दुहितरि सीतायां समधिकः स्नेहोऽवर्ततेति प्रतीयते। जनकस्य चरित्रं च पूर्णाङ्गतामापद्यते।

विष्कम्भकेनानेन वाल्मीकेरातिथेयत्वमपि प्रकटितं भवति। भगवान् वाल्मीकिर्यस्य यादृशः सत्कारो धर्मशास्त्रानुमोदितः, तं तादृशेन सत्कारेण समाजयतीति प्रकारान्तरेण प्रतिपादितं वर्तते।

अत्रेयमाशङ्का जायते। कलौ तावत् "अश्वालम्भं गवालम्भं सन्न्यासं पलपैतृकं देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्" इति गवालम्भो निषिद्धोऽस्ति। तत्कथं भवभूतिनाऽत्र अतिथिसत्कारे गवालम्भो वर्णित इति। परन्तु तत्त्वचिन्तायां न किमप्यनौचित्यं वर्तते। भवभूतिर्हि कलिकालिकोऽपि रामायणकालीयं त्रेतायुगीयमितिवृत्तं वर्णयतीति तत्प्रसङ्गे गवालम्भस्य वर्णनं समुचितमेव। अपि च कलौ अश्वमेधयागः, गोमेधयागश्च निषिद्ध इति अश्वालम्भगवालम्भशब्दाभ्यां प्रतीयते। वत्सतरीप्रोक्षणस्य चाचारसिद्धत्वात् तथावर्णनं नैव दोषाय भवति। अपि चापस्तम्बधर्मसूत्रे गोमांसं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भद्यत्वेन निर्दिष्टमास्ते । तस्मादापस्तम्बसूत्रानुसारी भवभूतिस्तथा वर्णयतीति युक्तमेवोत्पश्यामः । अतएव 'तं हि धर्मसूत्रकाराः समामनन्ति' इति दण्डायनमुखेन प्रत्यपादयत् ।

अपि चास्य मिश्रविष्कम्भकस्य कोऽपि विशेषो वर्तते । समग्रेऽपि उत्तर रामचरिते अयमंश एव हास्यरसानुप्राणितो दृश्यते । दण्डायनस्य प्रौढस्य व्युत्पन्नस्य ब्रह्मचारिणः सम्मुखे सौधातकेरव्युत्पन्नमनेस्तथा जल्पनं हास्यरसविच्छुरितं भवति । करुणविप्रलम्भप्रधाने चोत्तररामचरिते विरुद्धस्य हास्यरसस्यावतरणं दोषायेति वक्तुं न शक्यते । आलङ्कारिका हि अङ्गित्वेन विरुद्धरसस्यावतरणं गर्हयन्ति । आङ्गतया वाध्यतया स्मर्यमाणतया च विरुद्धरसस्य समावेशं बहुमन्यन्ते । अतोऽत्र अङ्गतया हास्यरसस्यावतरणं सहृदयानां पाठकानां मनसो विनोदायेति युक्तमुत्पश्यामः ।

तृतीये चाङ्के करुणो रसो निपुणं चित्रितः, पञ्चमे चाङ्के वीर रसस्यावतरणं करिष्यते । अन्ते च शृङ्गारेण परिसमाप्तिः । अत्र च हास्यरसस्यावतरणमिति कवे रसचित्रणे काऽपि परिपाटी प्रतीयते ।

अयं च संवादो यद्यपि आधिकारिकस्येतिवृत्तस्य न कस्मो अपि प्रयोजनाय प्रकल्पते, तथापि तत्प्रसङ्गे समापतितस्य प्रासङ्गिकस्य वशिष्ठजनकादिचरितस्य परमुपकरोति ।

(सावशेषम्)

कर्मफलम्

लेखकः—श्री रवीन्द्रनाथ टकुरः

प्रथमः परिच्छेदः

अद्य सतीशस्य मातृस्वसा सुकुमारी मातृस्वसुर्भर्ता शशधरश्च समायातौ । सतीशस्य माता विधुमुखी व्यस्तसमस्ता तयोरभ्यर्थनायां प्रयता । 'आर्ये, आगच्छ, उपविश क्रियतां पु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जाने तत्रभवतो रायमहाभागस्य दर्शनमुपगतम्। आर्याया आगमनमन्तरा तत्रभवतो दर्शनं दुर्लभमभविष्यत्।

शशधरः—तावत्तैव तत्र आर्यायाः शासनं कियत्कठोरं प्रतीयते। नक्तन्दिवं चक्षुषोर्विषय एव स्थापयति।

सुकुमारी—यत्सत्यमेतादृशस्य रत्नस्य गृहे स्थापने न सुखं लभ्यते।

विधुमुखी—किं नासिकाया आक्रन्दनेन ?

सुकुमारी—तात सतीश ! धिक् धिक् किमिदं वसनं परिदधासि ! किमिति त्वमेतादृशं वसनं परिधाय पाठशालां गच्छसि ? विधुमुखि, मया यत्कञ्चुकं क्रीत्वा अस्मै दत्तं, किं तस्य समजनि ?

विधुमुखी—कः कालस्त्रुटितस्य तस्य !

सुकुमारी—अवश्यं त्रुटितं भवेत्। एकमेव कञ्चुकं बालकस्य शरीरे कियन्तं वा कालं स्थास्यति अत्रुटितम ? किमिति नापरं नवीनं कञ्चुकं न प्रस्तुतम् ? तव गृहे सकलमपि विप्रतीपं भाति।

विधुमुखी—जानास्येव आर्ये जानासि। स तावत्कुमारस्य शरीरे सभ्योचितं परिच्छदं दृष्ट्वा हुताशनायते। यद्यहं नास्थास्यं, तदा स, मन्ये रिक्तशरीरमेनं कौपीनं परिधाप्य पाठशालां प्रेरयिष्यत्। मातर्जीवामि—नैतादृशं विसदृशमाचरितं नान्यस्य दृष्टपूर्वम्।

सुकुमारी—नानृतमेतत्। एक एव वत्सः। किमेनं भद्रतया सज्जयितुं नेच्छति ! एतादृशो जनको न कदाचिद् दृष्टचरः ! वत्स सतीश ! परश्वो रविवासरो भवति। सकृन्मम आवसथमायाहि। अहं त्वदर्थं पूर्णमेकं परिच्छदं विपणित आनीय स्थापयिष्यामि। किम् ? अहो वैचित्र्यम् किं बालानां समीचीनवस्त्रेषु लालसा न भवति !

सतीशः—आर्ये मातृस्वसः, किं मम एकेन परिच्छदेन कार्यम्। भोटुडिमहोदयस्य पुत्रो मया साकमेकत्र पठति। स तु मामामन्त्र-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य गृहं गन्तुं 'पिंप' क्रीडनाय। मम तु नास्ति तादृशो राजपट्टपरिच्छदो येनाहं तत्र गच्छेयम्।

शशधरः—तात सतीश! तादृशस्थलं प्रति निमन्त्रणेन गमनं नैव समुचितं भवति।

सुकुमारी—तिष्ठतु तावत्प्रणयः। न तत्र वक्तृतायाः काऽपि आवश्यकता वर्तते। यदा अस्येव तव वयो भवेत्—तदा—

शशधरः—तदा अस्मै बोधयितुमन्यो जनः सम्भवेत्—वृद्धस्य मातृस्वसृभर्तुरवसरो नैव भवेत

सुकुमारी—अस्तु नाम, कतृतादानाय तत्र भाग्ये यदि नान्यो जनो लभ्येत, तदा तत्र कीदृशी दशा आपतेत्, क्षणं विचारय।

शशधरः—किं तावता लभ्यते। सैषा अवस्था कल्पनायामेव पर्यवस्यतु।

सतीशः—(नेपथ्याभिमुखमालोक्य) नहि नहि नात्र आनेतव्यम्। अयमहमागच्छामि

(त्वरया प्रस्थितः)

सुकुमारी— विधुमुखि, सतीशः किमिति तथाऽव्यस्तः पलायत?

विधुमुखी—तस्य फलाहारं स्थाल्यामानयतीति तव सम्मुखे तस्य लज्जा-समजनि!

सुकुमारी—यत्सत्यं, हतभाग्यस्य लज्जैव जायेत। वत्स सतीश शृणु शृणु। तव मातृस्वसृभर्ता त्वां तेलटिगृहे 'आइसक्रीमं' भोजयेत्, गच्छ तेन साकम्। अये, सकृदनेन साकं गच्छ। चालोऽयं—

सतीशः—मातभर्तृस्वसः, कं परिच्छदं परिधाय गच्छामि?

विधुमुखी—किमिति, तत्र चण्डातकं वर्तते।

सतीशः—अत्यन्तं विसदृशं तत्

सुकुमारी—यथा वाऽस्मद् भवतु। तव पुत्रो भाग्यवशान्नैव पैतकीं रुचिं लभते, येन त्वं भाग्यवती भवसि। यत्सत्यं चण्डातक-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दर्शनेन पाचकानां यात्रादलस्य वालस्य कथा स्मृतिपथमापतति नैतादृशम् असभ्योचितमन्यत्परिधेयं वर्तते।

शशधरः-- एतादृशानि वचनानि--

सुकुमारी--किं तूष्णीमभिधेयानि ? केन ? कुतो वा भेतव्यम् ? मन्मथस्तावत स्वकीयामभिरुचिमनु स्वपुत्रं सज्जयेत् ! किं वयं कथामपि न कुर्याम !

शशधरः- एतत्सर्वम् -

सुकुमारी- तूष्णीं वक्तव्यम् ! कुतः ? कुतो वा भेतव्यम ? मन्मथः स्वकीयामभिरुचिमनु पुत्रं सज्जयेत् । अथचास्माभिः तूष्णीं स्थातव्यम् !

शशधरः- अत्याहितम् ! न वक्तव्यमिति नाहं वदामि । किन्तु सतीशस्य पुरत एतादृशमालोचनं -

सुकुमारी- साधु साधु आस्ताम् । प्रथमतस्त्वं बालकं 'पेलेटि' मिष्टान्न भाण्डागारं प्रापय ।

सतीशः- मा तावत् मातृष्वसः, नाहमिमं परिच्छदं परिधाय तत्र गन्तुं प्रभवामि ।

सुकुमारी- अये मन्मथस्तावुदापतितः । इदानीं बहुविधैर्विसंष्टुलैः शासनैर्वत्सं व्याकुलं कुर्यात् । बालोऽयं कोमलमतिः । पितुस्तिरस्काराघातेन न क्षणमपि शान्तिं भजति । वत्स सतीश, त्वं मया साकमागच्छ । इतो निष्क्रामामः ।

(सुकुमारी प्रस्थिता)

मन्मथस्य प्रवेशः

विधुमुखी- सतीशः खलु वारम्वारं घण्टा घण्टेति मामस्थिरां करोति स्म । आर्या मे स्वसा तामिमां घण्टां तस्मा उपहृतवती । त्वमस्मै कोपिष्यसीति मया प्रथमतः तस्या उक्तमेव ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

मन्मथः—कोऽपि यामीति प्रथमत एवोक्तम्। प्रातः शशधर, सेयं घण्टा त्वया प्रतिनेया।

शशधरः—त्वं तावदद्भुतः प्रतिभासि। नेष्यामि परन्तु को वा मां परित्रातुं विघ्नेन?

मन्मथः—नेदं परिहासविजृम्भितम्। यत्सत्यं नैतादृशो व्यवहारो मे रोचते।

शशधरः—न रोचतां नाम, परन्तु सहनीयम्। भूमण्डले न केवलं त्वत्कृत एव एतादृशं विधानम्।

मन्मथः—मत्सम्पृक्तश्चेदहं तूष्णीं स्थातुं प्रभवामि परन्तु स्वपुत्र-मुच्छन्नं कर्तुं न पारयामि। योऽयं बाल ईप्सितमात्रेण समीहितं लभते यश्च ईप्सितप्रकटनात् प्रागपि समीहितं लभते, स खलु दुर्भगतमो भवति। यः खलु स्वेच्छां न नियमयति, स कदापि सुखी न सम्पद्यते। धैर्येण प्रवृत्ति-नियमनरूपां विद्यां तनुजाय दातुमिच्छामि, न पुनर्घण्टां नापि तद्घटितां शृङ्खलाम्।

शशधरः—अवितथमाह। परन्तु तवैवेच्छया संसारस्य सकला अपि बाधा नैव धूलिसात् भवेयुः। सर्वेषामपि यदि तवेव सद्बुद्धिरभविष्यत्, तदा न किमपि विचारणीयमभविष्यत् न च तथा वर्तते। अतः साधीयान् संकल्पोऽपि शारीरिक-बलेन नैव कार्यकारी सम्पद्यते, धैर्यमावश्यकम्। सर्वथा स्त्रीणामभिरुचेर्वैपरीत्येन गमने विपद उच्चावचा आपतन्ति-तदपेक्षया देशकालानुसारेण पार्श्वं परावर्त्य मार्गान्वेषणे सुफलं सम्भवति। वात्या यदा प्रतिकूला वहति तदा, पोतस्य पट्टिका अधः क्रियते, अन्यथा चलनं नैव सम्भवति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्मथः—तदिति मन्ये, गृहिण्याः सकलेषु व्यापारेषु विनीतेन भाव्यम्। तदेतद्भीरुताया निदर्शनं भवति।

शशधरः—तवैव मम नास्त्यसमं साहसम्। यस्या गृहचालनेन नक्तं दिवमवस्थेयं, ततो न भेतव्यं चेत्कुतो वा भेतव्यम्? स्वस्य दारेषु वीरत्वप्रदर्शनेनालम्। आघाते कृते कष्टं भवति। तदपेक्षया तर्कवेलायां गृहिण्या मतमग्राह्यं स्वीकृत्य अनुष्ठानावसरे स्वमतानुसरणं श्रेयसे सम्पद्यते। प्रथमतो निराकरणे कष्टमापतति।

मन्मथः—जीवनं चेत्सुदीर्घमभविष्यत्, नवोपदेशो ग्रहणीयोऽभविष्यत्। परन्तु तदल्पमात्रम्।

शशधरः—तदर्थं भ्रातः सुविवेच्य करणीयम्। सम्मुखे वृहतः प्रस्तरखण्डस्यावस्थाने ततः परावर्त्य गमनापेक्षया तस्य निस्सारणानन्तरं गमने अभीप्सिते विलम्बो नियतमापतति सकलोऽप्युपदेशस्त्वयि निरर्थको भाति। प्रत्यहं प्रतार्यसे तथापि न शिक्षयसि। कथं वा उपदेशः कार्यकारी भवेत? त्वं तथा येन स्वभार्याया अस्तित्वमपि विस्मरसि, अथच सा विद्यते इत्यत्र तव संशयस्यावकाशो नास्ति।

द्वितीयः परिच्छेदः

"दम्पत्योः कलहे चैव बह्वारम्भो लघुः क्रिया" एवं तावत् शास्त्रे विलिखितमास्ते। परन्तु सम्प्रतिस्थलविशेषेषु अस्य व्यतिक्रमो भवतीति अभिज्ञा नैव अस्वीकर्तुं प्रभवन्ति। मन्मथबाबोः स्वभार्यया सह तदा तदा ये वादप्रतिवादाः सङ्घटन्ते, ते नियतं कलहा एव। तथापि तयोरारम्भो नैव बहुर्भवति, नापि क्रिया लघुर्भवति। अतएव अजायुद्धेन नासौ कलहं स्तुवयितुं शक्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कतिपयैर्निदर्शनैर्विषयोऽयं प्रमीयेत।

मन्मथः—तव कुमारं वैदेशिकेन परिच्छदेन प्रसाधयितुमारभसे, नैतत् मे रोचते।

विधुमुखी—रुचिस्तावत् न केवलं तवैवास्ते! अधुना तु सर्वेऽपि वैदेशिक-परिच्छदेन प्रसाधयन्ति।

मन्मथः—(विहस्य) यदि सकलैः सह चलितुं तवाभिरुचिः, तर्हि सकलान् विहाय किं मामेकमेव परिणीतवत्यसि?

विधुमुखी—त्वं यदि स्वमनेनैव चलितुं बद्धपरिकरः, तर्हि किमिति मां परिणेतुं समुत्सुकोऽभूः?

मन्मथः—स्वमतस्य परिचालनायापि अन्यस्य साहाय्यमपेक्षितं भवति।

विधुमुखी—यात्रकस्य स्वभारवहनाय गर्दभस्यापेक्षा भवति। परन्तु नाहं—

मन्मथः—(जिह्वां संदश्य) अये! शान्तं पापम्। त्वं तावन् मम संसारमरुभूमेः आरण्यो घोटको भवसि। तिष्ठतु साम्प्रतं तस्य प्राणिनश्चर्चा। तव कुमारं नैव साहेवं परिकल्पय।

विधुमुखी—कुतो न परिकल्पयामि? किमहं तं कर्षकं परिकल्पयामि?

(एवमुक्त्वा सा गृहाद्बहिरगच्छत्)

विधुमुख्या विधवा याता गृहमधितिष्ठन्ती दीर्घं निश्वस्य मन्यते स्म दम्पत्योरहसि कोऽपि प्रेमालापः समजनि।

तृतीयः परिच्छेदः

मन्मथः—अये, तव कुमारं केनाभ्युचितवत्यसि?

विधुमुखी—नैव मोहमधिगच्छ। न किमप्यत्याहितम्। यत्किञ्चित् पन्नीरजलम्—तदपि न वैदेशिकम्, तवैव देशे प्रस्तुतम्।

मन्मथः—अहं त्वामसकृद्बोधयामि। न त्वं कुमारमेतादृशैर्विलासव्य-सनैरभ्यस्तं कर्तुमर्हसि।

विधुमुखी—अस्तु, तव प्रमोदनाय श्वः प्रभृति मौमतैलेन एरण्डतैलेन वा प्रसाधयामि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्मथः - सोऽपि निरर्थको व्ययो भवेत्। यस्याभावेऽपि कार्यं चलति, तस्याभ्यसनं नैव समुचितम्। भौमतैलेन एरण्डतैलेन शरीरस्य मस्तकस्य च प्रसाधनं मम दृष्ट्या अनावश्यकम्।

विधुमुखी-- कति वा पदार्थास्तत्र आवश्यकश्रेण्यां वर्तन्ते--नाहं जानामि। अहमपि अनावश्यका तत्र परिहरणीया भवेयम्।

मन्मथः – तत्र परिहारे वादाः प्रतिवादाश्च समूलं नश्येयुः। एतावान् दैनिकोऽभ्यासः अकस्मात् कथं वा परिहर्तुं शक्येत! मन्ये नैव सहनीयो भवेत्। यथा वा भवतु. प्रथमत आरभ्यैव त्वां बोधयन् तिष्ठामि, त्वं स्वकुमारं साहेबं कलय, नवाबं कल्पय, अथवोभयात्मकं खेचरान्नं कलय, तदर्थं व्ययो न मया दीयेत। मम मरणानन्तरं स किञ्च यदधिगच्छेत्, तत्तादृशाय व्ययाय नैव पर्याप्तं भवेत्!

विधुमुखी--सम्यगेव जानामि तत्र। तवार्थे यदि मे आस्था समभविष्यत, तर्हि कुमारं कौपीनवन्तमकरिष्यम्।

मन्मथो विधुमुख्याः सावज्ञैः परुषैर्वचनैर्मर्मण्यभिहतोऽपि क्षणमात्मानं नियम्य अवोचत्- "अहमपि तज्जानामि। तव भगिनीपती शशधर एव तव आस्थाशरणं च। सः अपुत्रक इति त्वमाशास्से स सकलामपि सम्पदमन्तिमेऽनुशासने तव कुमाराय दास्यति। तदर्थमेव तदा तदा स्वकुमारं साहेबप्रसाधनेन सज्जितं पन्नीरेण च सुरभितं कृत्वा तस्याशावर्द्धनार्थं प्रेरयसि। अहं तु दारिद्र्यस्य लज्जामनायासेन सोढुं प्रभवामि, परन्तु समृद्धपरिवारस्य सौभाग्ययाचनलज्जां नैव सोढुं शक्नोमि."

सोऽयं भावो मन्मथस्य मनसि बहोः कालात्पूर्वं पदमाधत्त। परन्तु समधिकं कठोरो भवेदिति न कदाचिदवादीत्। विधुमुखी मन्यते स्म--तस्याः स्वामी तदीयं निगूढम-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भिप्रायं नैव बोद्धुं प्राभवत, जात्यैव स्वामिनः स्वस्त्रीणां मनस्तत्त्वावधारणे नितान्तं मूढा भवन्ति। परन्तु अद्य मन्मथो प्रयतमानस्तदीयं केशं ग्रहीतुं प्राभवदिति झटित्यवबुध्य मर्मस्वाहता बभूव विधुमुखी।

मुखमारक्तं विधाय विधुमुखी अवोचत् कुमारस्य मातृस्वसुरन्तिके प्रेषणमपि यस्य सहनीयं न भवति, तादृशस्य मानिनो गृहे तिष्ठामीति न मया पूर्वमवबुद्धम्।"

एतदवसरे विधवा याता प्रविश्य अभिहितवती - "धन्या यूयम्! सप्तदशसु वत्सरेष्वतीतेष्वपि नैवालापा अवसिता भवन्ति! रात्रिर्न पर्याप्ता, अन्ते दिवाऽपि परस्परं रहस्यालापाः! विधाता युष्माकं जिह्वाग्रेषु कुतो वा एतावन्मधु आदाय संघटयति, नाहं विभावयामि। 'वत्स देवर, नाहं युष्माकं मधुरेषु आलापेषु व्याघातं जनयितुमागता, केवलं द्वित्रान् निमेषान् यातुः सकाशात् 'सीवनकलामरुयातुमेवागतास्मि"

चतुर्थः परिच्छेदः

सतीशः—ज्येष्ठमातः!

ज्येष्ठमाता—किं वत्स,

सतीशः—अद्य माता भादुडिसाहेबस्य पुत्रं 'चा' पानेन सन्तर्पयितुमामन्त्रितवती। शृणु तदवसरे न त्वया तत्रोपस्थितया भवितव्यम्।

ज्येष्ठमाता—का मे तत्रगमनस्य आवश्यकता वत्स सतीश!

सतीशः—यदि वा गच्छसि, नैतेन वस्त्रेण गन्तव्यम्।

ज्येष्ठमाता—वत्स, न तव भयस्य कारणमास्ते। अहमस्मिन्नेव गृहे आवद्धा स्थास्यामि यावत् चापानमवसितं भवति, नपुनः बहिर्गमिष्यामि।

सतीशः—ज्येष्ठमातः, अहं मन्ये, तव अस्मिन्नेव गृहे 'चा' पान व्यवस्था समुचिता भवेत्। अन्ये गृहा बहुभिर्वस्तुभिः परिपूर्णा वर्तन्ते लोकानां प्रचारोऽपि बहुलो भवति। 'चा' पानस्य आहारस्योप-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योगि न किमपि गृहं दृश्यते । मातुः शयनागारे तु बहूनि पेटिकादीनि वस्तूनि वर्तन्ते । तत्र भद्रलोकस्य नयनं लज्जायै प्रकल्पेत ।

ज्येष्ठमाता—ममाप्यत्र गृहे बहूनि वस्तूनि ।

सतीशः—तानि सर्वाणि अद्य इतो निस्सरणीयानि । विशेषतस्तत्र पीठासनजपमालादिकं कुत्रापि निभृतं स्थापनीयम् । नान्या गति र्वर्तते ।

ज्येष्ठमाता—किमर्थम् ? किं तेषां गृहे एतादृशानि वस्तूनि न सन्ति ? किमिति लज्जा जायेत ?

सतीशः—ज्येष्ठमातः सन्ति उत न सन्ति-नाहं जाने । 'चा' पानोद्देशे तु एषा मत्रस्थानं मर्यादाविरोधि । एतानि दृष्ट्वा नरेन्द्रो नियतं हसिष्यति, गत्वा च स्वभगिन्याः पुरतश्चर्चां करिष्यति ।

ज्येष्ठमाता—वत्स, सकृदवधारय । पीठासनादिकं सर्वदा गृह एव तिष्ठति । न तदादाय कापि चर्चा मया श्रुतपूर्वा ।

सतीशः—ज्येष्ठमातः, त्वया अन्यदप्येकं कार्यं करणीयम् । अस्माकं नन्दो यथा अनावृतगात्रस्तत्र न प्रविशेत्, तत्र त्वया सावधानया स्थातव्यम् । सं निरुद्धश्चामेषः । स तु न मे वचनं श्रोष्यति । अनावृतगात्रोऽकस्मात् तत्रावस्थितो भवेत् ।

ज्येष्ठमाता—अस्तु, तथैव संनिरोत्स्यामि । परन्तु तव पिता अनावृतगात्रो यदि –

सतीशः—तदर्थं प्रथमत एव मातृस्वसा अनुरुद्धा । सा तावत् पितरं पिष्टकखादिकार्यामन्त्रितवती । पिता तु न किमप्यत्र विषये जानाति ।

ज्येष्ठमाता—यथा ते रोचते, तथा कुरु । परन्तु मम गृहे तत्र यानि आहारोपकरणानि—

सतीशः—तानि सर्वाणि सम्यगेव सम्मार्ज्य स्थापयामि ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षष्ठः परिच्छेदः

सतीशः—मातः, कथमेतत् प्रचलतु ?

विधुमुखी- किम् ? किंवाऽभवत् ?

सतीशः–चन्द्रकञ्चुकं चण्डातपं च परिधाय परिभ्रमणं लज्जाकरं सम्पद्यते । तदा भादुडिमहोदयस्य गृहे सान्ध्याहारस्य गोष्ठी प्रावर्तत । केवलं कतिचन विहाय अन्ये सर्वेऽपि पाश्चात्यपरिच्छदेन प्रसाधिता अवर्तन्त । एतादृशेन वसनेन तत्रोपस्थितोऽहं परमप्रतिभ आसम् । पिता वस्त्रार्थं यत्किमपि धनं ददाति, तेन भद्रता नैव रक्षिता भवति ।

विधुमुखी–वत्स सतीश, जानास्येव पितरम् । स यदिच्छति, न ततो जुगुप्सते । कियद्भि रूप्यकैस्तवाभिमतः परिच्छदः प्रस्तुतः क्रियेत ?

सतीशः–मातः, प्रातःकालीनस्य वैनोदनिकस्य परिच्छदस्य मूल्यमेकशतं रूप्यकाणां भवेत्, सायंकालिकस्य च परिच्छदस्य मूल्यं सार्द्धशतरूप्यकेभ्यो नावहीयेत ।

विधुमुखी –अये किमुच्यते ! प्रायशो रूप्यकत्रिशती । एतावन्ति रूप्यकाणि !--

सतीशः– अयमेव युष्माकं प्रमादः । सन्यासिनं कर्तुमभिलषत, कुरुत, समीचीनं भवेत् । न हि यदि भद्रसमाजे सञ्चरमभिलषत, तर्हि एवं द्विधाभावो न शोभते । भद्रतायाः संरक्षणार्थं व्ययोऽवश्यं विधेयो भवति, नोपायान्तरं वर्तते । अन्यथा सुन्दरवनं वरं प्रेरय,न तत्र कापि परिच्छदस्यापेक्षा भवति ।

विधुमुखी–जानामि वत्स जानामि । परन्तु साधु । तव मातृस्वसुर्भर्ता तव जन्मदिवसे नवीनं परिच्छदमुपहरति । आगामिनि जन्मदिवसे एकं निमन्त्रणपरिच्छदं तत आदातुं प्रयतस्व । प्रसङ्गक्रमेण मातुःस्वसुः सम्मुखे सकृदुल्लेखे कार्यं सेत्स्यति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सतीशः-- तत् विना आयासं कर्तुं शक्यते । परन्तु जनको यदि जानीयादहं मातृष्वसृभर्तुः सकाशादेनं परिच्छदमग्रहीषं, तर्हि ततो रक्षा नैव सम्भवेत् !

विधुमुखी-- भवतु न भेतव्यम् । तत्राहं समाधास्ये ।

(सतीशः प्रस्थितः)

भादुडीसाहेवस्य कुमार्या सह यदि वत्सस्य विवाहः सम्पद्येत, तर्हि बहुधाऽहं निश्चिन्ता भवेयम् । भादुडिसाहेवः असाधारणः प्राड्विवाको भवति । प्रतिदिनं शतानि रूप्यकाणामायं लभते । बाल्यादारभ्य सतीशस्तस्य गृहमापतति । कन्या तावन्नैव पाषाणो भवति, अवश्यमस्माकं सतीशं कामयमाना भवेत् । सतीशस्य पिता तु एतादृशे विषये नैव मनो व्यापारयति यदाकदाचिदुच्येत, अग्निदेवः सम्पद्यते । वत्सस्य भविष्यत् मयैव निर्धारणीयं भवति !

सप्तमः परिच्छेदः

भादुडिसाहेवस्यावासः, 'टेनिस्' क्रीडाक्षेत्रम्

नलिनी । सतीश ! किमेतत् ! कुतो वा पलायसे ?

सतीशः--अद्य तवावासे टेनिसक्रीडा प्रचलतीति नाज्ञासिषम्, नाहं तदुचितेन परिच्छदेन समायातः ।

नलिनी-- सकलानां गवां समानवर्णस्य चर्म न सम्भवति । भवतु नाम, त्वं प्राकृत इत्यभिधीयेथाः, भवतु, अहं तव सौकर्यं विदधामि । महाभाग नन्दिन् ! तत्राभ्यासे मम किमपि निवेदनं वर्तते ।

नन्दी--किमिति निवेदनम्--आज्ञेति वक्तुमर्हति तत्रभवती । अहं तु तत्रभवत्याः सेवार्थं सन्नद्ध एवास्मि !

नलिनी-- यद्येतत् भवद्भिरसाध्यं नैवावबुध्यते, तर्हि अयं सतीशो भवतां क्षमणीयो भवतु, नासौ टेनिस्क्रीडनोचितेन परिच्छदेन समायातः ! सुमहत्येषा दुर्घटना !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नन्दी-- तत्रभवत्या अभियोगेन हत्यां कपटलेखं किमुत गृहादाहमपि क्षन्तुं प्रभवामि । टेनिसक्रीडनोचितं परिच्छदं परिधाय न समागत इति यदि तत्रभवती दयनीयमेनं कलयति, तर्हि अहं मदीयं टेनिसपरिच्छद मस्मै सुभगाय सतीशाय अर्पयित्वा तस्यैतं पपिच्छदं — किमभिधं वदामि ? सतीश, कोऽथं ते परिच्छदः ? खेचरान्नपरिच्चद इत्येव वक्तव्यं भवति — तमिमम- मस्य खेचरान्नपरिच्छदं परिधाय प्रत्यहं तत्रभवत्याअन्ति- कमुपगच्छामि । मां प्रति यदि स्वर्गस्य सर्वाअपि ग्रहतारकाः सूर्यचन्द्रादयो वाक्यविहीना अवलोकयेयुस्तथापि नैव लज्जितो भवेयम् । सतीश ! तवेमं परिच्छदं दातुं यद्यापत्तिः स्यात्तस्य परिच्छदप्रणेतुः सीवकस्य संकेतं ब्रूहि । सुरुचिकल्पितस्य परिच्छनस्यापेक्षया तत्रभवत्या भादुडिकुमार्याः प्रसादं बहुमूल्यं कलयामि ।

नलिनी — शृणु सतीश, शृणु । मनस्यत्रधेहि । न केवलं परिच्छद- परिपाटीं वचन परिपाटीमपि त्वमितो नन्दमहाभागाच्छिक्षितु- मर्हसि । एतादृशो नान्य उपलभ्यते । विदेशावस्थानसमयेऽसौ प्रभून् प्रभुपत्नीश्च विहाय नान्यैः सह कथोपकथनं कुर्वन्नासीत् । महाभाग नन्दिन्, तव विदेशावस्थानसमये लण्डननगरे कति वा वङ्गीया अवर्तन्त ?

नन्दी — न मया वङ्गीयैः साकं कदाचित् संश्रवः स्थापितः

नलिनी — श्रुतं सतीश ! यथायथसभ्यतासम्पादनाय कियता सावधानेन स्थातव्यं भवति । त्वं यदि प्रयतेथाः, अवश्यं शक्नुयाः । टेनिसपरिच्छदविषये तव सूक्ष्मतत्त्वज्ञानस्य विमर्शनेन तादृशी धारणा जायते । (अन्यत्र प्रस्थिता)

सतीशः — (दीर्घं निश्वस्य) अद्यावधि नैषा नलिनी अवबुद्धा । मन्ये, मम दर्शने अन्तर्हसति मम दौर्भाग्यम् — अत्रास्थाने न

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कदाचित् मनसि सुखं लभे । केवलं विभावयामि मम कण्ठावरणं किञ्चिदिवोच्छूनं त्रिसदृशम् । मम अधस्तनपरिच्छदोऽपि कुत्रचित् संकुचितः सञ्जातः । कदा मे सौभाग्यमुदीयात्, येनाहं नन्दोत्र सुपरिच्छद एवं निर्भीकः साडम्बरं —

नलिनी—(प्रविश्य) भद्र सतीश, नैतावताऽपि तव मानसिकोऽवसादो विलयं गतः ! टेनिसपरिच्छदस्य विरहे तव हृदयं विदीर्यते। तादृशपरिच्छदविरहखेदः कुत्र वा अग्नेयो विना सीवकस्य सीवनागारम्!

सतीशः—नलिनि ! यदि मे साम्प्रतिकीं हृतयस्यावस्थितिं जानीयाः, तर्हि नैवं वक्तुं प्रभवेः ।

नलिनी—(सकरतालम्) साधु साधु ! महाभागस्य नन्दिन आदर्शेन मधुरालापाभ्यास इदानीमेवारब्धः, विश्वसिमि प्रश्रयलाभे सम्यगेव समुन्नतिर्भविष्यति । आगच्छ, एकं केकपिष्टकं भुङ्क्त्वा व्रज, मधुरालापस्य पुरस्कारो मिष्टाहारो भवति ।

सतीशः—तिष्ठतु, नाहं भक्षयामि । मम शरीरं —

नलिनी—सतीश, मम वचनमवधारय- टेनिसपरिच्छदाभावखेदेन नात्मनः शरीरं नाशय । अशनशयनत्यागो नैव शोभेत अवश्यं समुचितः परिच्छदः स्पृहणीयो भवति परन्तु नगण्यस्यास्य शरीरस्याऽभावे सोऽयं कुत्र स्थानं लभताम् !

(सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रेमैव शान्तमनसा परिचिन्तयामः ।

लेखकः -स्वामी श्री प्रेमानन्दः

पश्येयं गिरिशेखरात्प्रचलिता स्रोतस्विनी सर्वतो
पारावारसमागमप्रणयिनी प्रोन्मादिनी धावति ।
मार्गान् कोवशतातिगान् बहुविधानुल्लङ्घ्य वीतश्रमा
लक्ष्यं साधयितुं कृतप्रयतना न क्वापि विश्रास्यति ।१।
पश्यायं तरणिः करानगणितान् दिक्षु क्षिपत्यश्रमं
सर्वेषु स्थिरजङ्गमेषु च समं निष्पक्षपातं सदा ।
सर्वान् तर्पयते प्रकाशयति च ब्रह्माण्डभाण्डोदरं
प्रत्येकं दिवसेषु निश्चिततया, श्रान्तो न वै लक्ष्यते ।२।
तद्वन्मानसिकी प्रवृत्तिरपि नः स्रोतस्विनीव द्रुतं
निर्बाधं प्रखरा चलत्वविरतं देवप्रसादार्थिनी ।
चण्डांशोः किरणो यथा प्रकटयत्यस्माकमास्यं स्फुटं
प्रेमा भागवतस्तथा प्रकुरुतादस्मान् सदाप्यायितान् ।३।

तस्माद्वयं सकललोकगुरोः प्रसादात्-
प्रेम्णि प्रभोः सुविमले विलयं भजेम ।
तस्यैव दीप्तिमसकृत्पुरतो निधाय
स्वान्तं तदीयकरुणावलये क्षिपामः ।४।
प्रेमी यथा हि कमते दयितां स्वकीयां
माता यथा कलयते स्वमपत्यजातम् ।
तद्वद्वयं भगवतः परमेश्वरस्य
प्रेमैव शान्तमनसा परिचिन्तयामः । ५ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारतीयं ज्यौतिषम्

अनुवृत्तम्

लेखकः—श्रीवायिकोलि ज्यौतिष विशारदः

भारतस्य प्रायशः सर्वेष्वपि प्राचीनेषु ग्रन्थेषु ज्यौतिषस्योल्लेखो दृश्यते। भारतीयानां संस्कारादि क्रियाकलापा अद्यावधि ज्यौतिषेण नियन्त्रिता भवन्ति।

बहोः कालात्पूर्वं भारतस्य वैदेशिकैः सम्पर्कः अवर्तत। परन्तु पारसीकाधीश्वरस्य डेरायासस्य भारताक्रमणाद्बहुतरां वृद्धिं गतः। स तावत् ख्रीष्ट पूर्वेषु ५२२—४८६ वर्षेषु पारसीकं शशास। स समग्रमपि गान्धार प्रदेशं (इदानीं काश्मीर बेलुचीस्थानाफ्गनिस्थानत्वेन परिचितम्) विजित्य स्वस्य राज्यस्याङ्गीभूतं चकार। अस्मिन् युद्धे तस्य सुबहु धनम् असंख्याश्च जना क्षयं गताः। अत्र एव पुनरपरं भारतस्य भूभागं जेतुं नैव साहसमकरोत्। तदा-गान्धारो देशो बहुभिः क्षुद्रक्षुद्रैः राज्यैर्विभक्त आसीदिति जेतुं सुकर आसीत्।

डेरायासो बहून्, भारतीयान् सैनिकान् स्वसेनायां न्ययुङ्क्त। कृतविद्यान् मनीषिणोऽपि स्वसभायां नियोजितवान्। ज्ञाने विज्ञाने व्यवसाये च भारतस्य पारसीकस्य च परस्परं भावानामादान-प्रदानैः सुमहती अभ्युन्नतिरजायत। फलेन अस्माकं ज्योतिःशास्त्रं चिकित्साशास्त्रम् अस्त्रशस्त्रविद्या च तं देशं प्रासरत्। तस्माद्देशाच्च शिल्पकला, दाहकानि तैलानि, बहुविधानि च प्रसाधनानि अस्मद्देशं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसृतानि *ततः अलकसान्द्रः (Alexandar) पारसीकराज्यं विजित्य भारतमपि आचक्राम। स गान्धारेण साकं सिन्धुदेशमपि व्यजयत। प्रबलप्रतापेण पुरुणा प्रतिरुद्धो नन्दवंशस्य प्रबलां प्रतिरोधशक्तिमुपश्रुत्य ततः परवर्तिनं भूभागमाक्रमितुं नैव कृताग्रहः समजनि स्वदेशं च प्रतिनिववृते। स प्रत्यावर्तनसमये बहून् भारतीयान् सैनिकान् पण्डितांश्च जग्राह। कल्याणो नाम कश्चनासाधारणः पण्डितो मध्येमार्गं केनापि कारणेनात्महत्यां चकार। सोऽपि मध्येमार्गमुपरतः। तेन साकं समायाता ऐतिहासिका भारतविषये बहूनि विवरणान्यलिखन्।

अलकसान्द्रेण विजितानि राज्यानि तस्य सेनापतेः शीलकेशस्य हस्तं गतानि। सोऽपि खीष्टपूर्वं ३०७ वत्सरे भारतमाचक्राम। तदानीं चन्द्रगुप्तो भारतस्य सम्राड्वर्तत। स शीलकेशं पराजित्य समग्रं गान्धारदेवमुदमोचयत्। शीलकेशः पराजितः स्वां दुहितरं चन्द्रगुप्ताय विवाहविधिना प्रायच्छत्। मेघास्थनिसनामा कश्चन पारसीकः मौर्यस्य चन्द्रगुप्तस्य संसदि राजदूतत्वेन संस्थापितः। भारतीयोऽपि राजदूतः पारसीकसंसदि सरोपितः। एष मेगास्थनिसः 'इण्डिका' नामके स्वप्रणीते बहुभिर्विवरणैः साकमुल्लिखति स्म यद्वर्षस्य प्रारम्भदिवसे हिन्दवः सम्मिलिताः आगामिनो वर्षस्य शुभाशुभवार्तां वृष्टयादिकं भविष्यद्वाणीरूपेण शुश्रुवुः। इदानीमपि

* ताजिकाः प्राचीनाः पारसीकस्य बुद्धिशालिनोऽधिवासिनः। तेषां ज्यौतिषगणना ताजिकशास्त्रत्वेन भारते प्रथिता। एकादश-शताब्दीयो महाकविर्विह्लणः स्वकीयस्य विक्रमाङ्कदेवचरित-महाकाव्यस्य नवमे सर्गे पारसीकतैलस्य समधिकां दाहकशक्ति-मुदलिखत्। इयं हि तदुक्तिः—

"असूत यत्पत्रिषु पारसीकतैलाग्निमेतस्य परःप्रमनोभूः"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दोलापूर्णिमायां मेषसंक्रमणे वर्षारम्भदिवसे च सोऽयं क्रमः परिपालितो भवति, पञ्जिकाश्रवणं च क्रियमाणं सम्पद्यते ।

मेगास्थनिसविवरणान्यनुसृत्य शर्मण्यदेशीय 'आलवेक्त ओऐकारनामा मनीषी भारतीयं वैदिकसाहित्यं आसिरीयान्मिशरीयाद्वा साहित्यात् नानीतमिति स्वप्रर्णते 'भारतीय साहित्यस्येतिहास' इति पुस्तके उल्लिखति स्म । मेगास्थनिसेन बहुधोल्लिखिता प्रशंसिता च भारतीया सभ्यता कियत्प्राचीनेति निर्णेतुं न किमपि साधनं वर्तते ।

बौद्धज्यौतिषप्रसङ्गे चीनपरिव्राजकहुयेनसाङ्गो नितान्तं प्रमुग्ध आसीदिति तदीय विवरणीतः प्रतीयते ।

आरवीयः सीनापति महम्मदवीनकाशीमः ७१२ खीष्टाब्दे भारतमाचक्राम, सिन्धुप्रदेशं च विजिग्ये । फलेन आरवेण साकं भारतस्य सम्पर्को बहुधा वृद्धिं गतः । आरवीया विद्वांसो देशस्थास्य ज्योतिर्विद्यया चिकित्सा शास्त्रेण शिल्पकलया च हृतान्तरङ्गाः समभवन् । भारतीया ज्योतिर्विद आरवदेशे वहुधा सम्मानमापेदिरे । आरव देशस्य सुविख्यातो ज्योतिर्विद् बहुशास्त्रपारदर्शी आलवारुणिः १०१७--१०३१ वत्सर पर्यन्तं भारतेऽवस्थाय संस्कृतं गणितशास्त्रं ज्योतिर्विद्यां चाधीतवान् । महम्मदगजनिना साकं भारतं विजेतुं स किल भारतमाजगाम । परन्तु भारतस्य विद्यास्तं प्रमुषितान्तरङ्गं व्यदधुः । स भारतविषये बहुभिस्तथ्यैः संवलितं 'किताव अल-हिन्दु' नामकं पुस्तकं व्यरचयत् । तत्रैकत्र कृतोल्लेखमेतदास्ते--

"अहं बहुभिर्भाषाभिर्निबद्धान् बहून् ग्रन्थानपठम् । परन्तु भारतादन्यत्र सहस्रसंख्यातोऽधिकां संख्यां न प्रापम् । भारतीया हिन्दवोऽष्टादशानां संख्यास्थानानां मूल्यं जानन्ति । तामिमां च संख्यां 'परार्द्ध'मिति व्यपदिशन्ति । भारतीयं गणितशास्त्रं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वतन्त्रं न च कुतश्चित्प्रत्याहृतम् । तदिदं मौलिकं परमुपादेयं च" इति ।१

तदानीं भारते ये नाम ग्रन्था लब्धप्रचारा आसन्निति तेनोल्लिखितम्, तेभ्य इदानीं सूर्यसिद्धान्तः, पञ्चसिद्धान्तिका, ब्रह्मस्फुट सिद्धान्तः वटेश्वरसिद्धान्त इत्येव ग्रन्था इदानीं यावत् प्रकाशिता उपलभ्यन्ते । ब्राह्मस्फुटसिद्धान्तस्य बहवः सिद्धान्ता बटेश्वरसिद्धान्ते परिमार्जिता इति तेन प्रतिपादितम् ।२ इतः प्रतीयते—स तान् ग्रन्थानपठदिति ।

तस्यायं ग्रन्थः शार्मण्यदेशीयेन Edward Sachau नामकेन पण्डितेन आङ्गलभाषयाऽनूदितो वर्तते । तस्य पठनेन आलवारूणेरन्य-धर्मं प्रति उदारभावस्वस्य अगाधपाण्डित्यस्य च परिचयः प्रतीयते । भारतस्य समृद्धेः संस्कृतेश्च परमपरिपन्थिनो महम्मदगजनिसुल्-तानस्य कर्मचारिणाऽपि एतादृश आशयः प्रकटीकृत इति नितरां श्रद्धेयं भवति । तस्य प्ररोचनया महम्मदगजनिप्रवर्तित मुद्रासु

---

1 I have studied the names of the orders of the number in various languages with all kinds of people with whom I have been in contact and have found that no nation goes beyond thousands + + + the.e however wh go beyond the thousand in this numerals are the Hindus. + + + The eighteenth order is called Perardho"

(Alberuni's India by Dr. Adward Sachau Vol. I I pages 174-175.

२ वटेश्वरः केवलं द्वेषपेरवशो ब्रह्मगुप्तस्य मतानि खण्डयागासैति सिद्धन्तिनः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संस्कृतमपि पदमाधत्तेति सुमहतो गौरवस्य विषयः । सोऽयमालवारुणिः ९७३ खीष्टाब्दे खीजराज्ये जन्म परिजग्राह, १०४७ खीष्ठाब्दे च गजनिनगरे प्राणान् तत्याजेति विहितचरमेव इतिहासं पर्यालोचयताम् ।

इटालयन्तर्गतपिसावास्तव्यो गाणितिको लियनार्डः मिश्रदेशे, सिरियायां ग्रीशदेशे इटाल्यां च वर्तमानानि शिक्षाकेन्द्राणि पर्यवेक्ष्य सिद्धन्तितवान् हिन्दूनां संख्याक्रमोऽतिविशुद्धोऽन्येषां च स प्रमादपूर्ण इति ।*

खीष्टीये चाष्टादशे शतके पाश्चात्यदेशेषु संस्कृतस्य प्रसारे संजाते पाश्चात्यानां विदुषां दृष्टिः ज्यौतिष ग्रन्थेषु पतिता एसिएटिक् रिसर्चपत्रिकायां Sir W. Jones, Colebrooke, Devis प्रभृतयः पाश्चात्या मनीषिणः ज्योतिःशास्त्रं सम्यक् परिशील्य चान्द्रमानमास-नक्षत्रतत्त्व-राशि-चक्रविभागायनचलनादिकं भारतीयज्ञं मौलिकमिति स्वीकृतवन्तः । ते च वेदाङ्गस्य ज्यौतिषस्य कालं खीष्टपूर्वं पञ्चदशशताब्दीं मन्यन्ते ।

प्राच्यज्योतिर्वेत्ता M. Bailly महाभागः Astronomie Indienne नामके स्वग्रन्थे प्राचीनात्कालादारभ्य भारतीया ज्योतिविदः स्थूलयन्त्राणां साहाय्येन ग्रहनक्षत्रादीनां गतिस्थितिगणनां यथायथरूपेण कर्तुं समर्था आसन्निति उदलिखत् । स तावत् हिन्दूनां कलियुगारम्भ समये (खीष्टपूर्व ३१०२ वर्षे) भारतीयैः रूपवर्णितग्रहस्थितेरिदानीं सूक्ष्मं गणनया निर्धारितायां ग्रहस्थितेश्च सामञ्जस्यमवलोक्य परं विस्मितोऽभवत् । स तावत् Alfonso, Copernicus, Tycho, Kepler Bouillond, Riccioli, Cassini प्रभृतीनां पाश्चात्यानां ज्योतिर्विदां मतानि पर्यालोच्य तुलयित्वा च भारतीय-

१ Ancient and Mediaeual India Vol. पुस्तकस्य ३७४ पुटं द्रष्टव्यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्योतिर्विद्याया भूयसीं प्रशंसां कृतवान्। स च बहुभिर्युक्तिभिर्भारतीय-ज्यौतिषं नैव पाश्चात्योपज्ञमिति संसाध्य भारतीयं ज्यौतिषं भारतोपज्ञं मौलिकमभ्रान्तं चेति सिद्धान्तितवान्। भारतीयज्यौतिषस्य चान्यत्र प्रभावोऽपि तेन सुमहता प्रबन्धेन प्रदर्शितः।१

श्रीप्लाङ्कटः स्वप्रणीते Ancicent Calendars and Coustellations नामके ग्रन्थे व्यलिखत्–यद् ग्रीकपण्डिताः ख्रीष्टपूर्वचतुर्थ-शताब्दीतो भारतीयां ज्योतिर्विद्यां प्रत्याकृष्टाः। ख्रीष्टपूर्व प्रथम-

---

१ वेलिमहाभागेनोक्तस्य कश्चनाङ्गलभाषानुवादः सहृदय वाचकानामवबोधाय मनागत्र प्रदर्शितः—

We do not know whether Hermes, so celebrated in antiquity, was a Hindu but we see that the observations atributed to him are reckoned in the Hindu manner and we conclude that they were made by the Hindus, who therefore, were able to make all the observations we have enumerated and which we find noted in their tables.

× × × ×

Foreign epochs either unknown or useless to the Hindus. × × ×

All these astronomical elements, differing more or less with the Greeks of Alexandria, the Arabs, the Persians and the Tartars exhibit no resemblance what ever with those of the Hindus. The latter therefore, borrow nothing from their neighbours.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शतके च अपलोनियासो (Applonius of tyna) भारतीयेभ्यो ज्योतिर्विद्यामधीतवान् ।१

वर्नेरकेलर: (Werner kellar) तस्य ग्रन्थे Bible of History नामके श्री प्लाङ्कटस्य मतं सर्वथा अनुसृतवान् । (२)

पीठगोरस: खीष्टपूर्वे ५६९–४७० समये ज्योतिर्विद्यामध्येतुं कालदीयाद्वारा वाराणसी माजगाम । प्रत्यावर्तनसमये मिश्रदेशद्वारा शिशिलिमनुप्राप्त. तत्र ज्योतिर्गणित विद्यालयं स्थापयामास । पीठगोरस: प्लेटश्च अहिंसापुनर्जन्मादिविषयेषु भारतमादर्शं चक्रतुरिति मनीयरवलिराम साहेव: 'Indian wisdom' नामके ग्रन्थे प्रत्यापादयत् । आथेन्सनगर्यां दार्शनिकस्य सेक्रेटिसस्य भारतीयै: पण्डितै: सह शास्त्रालोचना समभूदिति ग्रीकसाहित्यात् प्रतीयते। पीठगोरसादय: पाश्चात्या विद्वांसो जैना आहोखित् जैनधर्मप्रभाविता वा

---

(१) The Opinion of the Greek writers at the beginning of the Christian era may be quoted as showing the high estimate in which Indian Astronomy was held In the life of Appolonius of Tyna the Greck Astrologer and Phliosopher, written by Philostratus about 200 A. D. the wisdom and learning of Appolonius are set high above his contemporaries because he had studied Astronomy, Astrology with the sages of India.

(२) Philostratus in his life of Appolonius of Tyna (Book iii—Chap XIII) states that great as was the wisdom of Appolonius yet he learnt Astronomy from the sages of India. This was in A. D210. He adds that the Greeks were beholden to the Indians for much of their Astronomical Knowledge (Vide Encyclopaedia Brittana Vol II, 14th edition, Page, 113. ")

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आसन् । अतएव भारतीयदर्शनतत्त्वावधारणे समर्था आसन्निति वक्तुं शक्यते । १

हेच, हेरास: The Rev Fr. H Heres S J. P of. s॰or of Indian History and Archaeology. St. Xaviers College, Bombay) 'मोहञ्जदोरा'त उपलब्धाभिमुंद्राभि: ज्योतिस्तत्वा–लोचनेन वसन्त सम्पात: ख्रीष्ट पूर्व ६५०० वर्षे मार्गशीर्ष मासे समजायतेति प्रमाणितवान् । आसु च मुद्रासु मेषादिद्वादशराशीनां नामान्युल्लिखितानि । (१)

मोहञ्जदोरातो ध्वंसावशेषादुपलब्धे एकस्मिन् चित्रफलके एकस्मिन् वृक्षे समासीन: पिप्पलं फलं चाश्नन् तथा अनश्नंश्च द्वौ पक्षिणौ चित्रितौ दृश्येते । सोऽयं जीवात्मपरमात्मनो: संश्रव ऋग्वेद उपवर्णित: । तस्मात्तदीया सभ्यता ऋग्वेदादर्वाचीनेति । (२)

वेदेषु ज्तोतिःशास्त्रे च विश्वस्य तथा जीवजगत: क्रमनिर्माण-तत्त्व मुल्लिखितमास्ते । एतदवलोकनेन प्रसिद्धो विद्वान् जाकोलियट: स्वकीये Bible in India नामके पुस्तके उदलिखत् पृथिव्या-मिदानीं यावदुपलब्धेषु ईश्वरविषयकेषु ग्रन्थेषु केवलं वेद एव यद्विश्वस्य क्रमनिर्माणतत्त्वमुल्लिखितं तदिदानीन्तनवैज्ञानिकतथ्येन संवदति (३)

---

१ A Magazine, May 460 पत्रिकायां Dr. Roch and Antiquity of Hindu Astrology' नामक: Cyrus Abayakoon नामकेन लिखित: प्रबन्धो द्रष्टव्य: ।

२ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरेक: पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ।।
ऋग्वेद:

३ Bible of India नामकस्य पुस्तकस्यायमंश: सकृत् परिशीलनीय: ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'हेतरिदोमायकोल वुक' नामा कश्चन पाश्चात्यमनीषी १९०१ खीष्टवत्सरे कलिकतानगर्यां उच्चतमन्यायालयस्य अधिकरणिक आसीत्। असौ भारतीयां गणितविद्यां ज्योतिर्विद्यां च सम्यगेवाधीतवान्। लक्षाधिकेन स्वव्ययेन संकृते अप्रकाशिता बहवो ग्रन्था अनेन संकलिताः। भारतीयज्योतिर्विद्यायाः प्राचीनताविषये मौलिकताविषये चानेन बहवः उत्तमा प्रबन्धा एसियटिकरिसचपत्रिकायां प्रकाशिताः (Vol. 9,12 द्रष्टव्यम्) असौ न केवलं भारतीयज्योतिषस्य, परन्तु आरवीयज्यौतिषस्यापि चर्चां करोति स्म। तस्य विवरणीतः प्रतीयते भारतादेको ज्योतिर्वेत्ता अब्बासिद्खलिपा अलस सूरस्य सभायां स्वस्याभ्रान्तया गणनया अत्यन्तं सम्मानित आसीत्।१।

अध्यापको वलिसेनः (Professor Wilson) भारतीयज्यौतिषस्य बहुषु विषयेषु चर्चामकरोत्। सप्तानां वाराणां कल्पनाविषये सत्स्वपि मतभेदेषु सोऽपिप्रौ ति स्म हिन्दव एव अस्याःकल्पनायाः सूत्रधाराः। ग्रीग्देशीयाः रोमकाश्च एतद्विषये सम्पूर्णतया अज्ञा एवासन्। भारतादेव ते वाराणामुत्पत्तिक्रममजानन्। ज्योतिर्विदो क्रेनाण्डस्य मते हिन्दूनां गणना सम्पूर्णतया वैज्ञानिकी विशुद्धा च।

एवं सत्स्वपि संख्यातीतेषु बाह्येष्वाभ्यन्तरेषु च प्रमाणेषु हिटनि–जि.आर–काणे बेण्टलि–वेरिप्रभृतयः पाश्चात्या विद्वांसः

"Astonishing fact. The Hindu revolution (Veda) is of all revelutions. The only one whose ideas are in perfect harmony with modern Science as it proclaims the slow and graded formation of the world"

१ Hindu Algebra by Colebroke पुस्तकस्य ६४ पृष्ठं द्रष्टव्यम्।

Funding by IKS-MoE

BVRSSMV
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारतीयज्योतिष सिद्धन्ता नैव मौलिकाः प्रत्युत रोमकसिद्धान्तेभ्यः समाहृता इत्यभिप्रयन्ति । एतेषामेतादृशविश्वासे ग्रीग्गणनैव सर्वप्राचीनेति अन्धो विश्वासो भारतोयज्यौतिषग्रन्थानामनवगाहनमेव मूलमिति दृढं प्रतिपादयितुं शक्यते ।

श्रीमान् नारायण आयङ्गारमहोदयः अध्यापकः श्री रङ्गाचार्यश्च विविधैः कारणैः पश्चात्यानां विदुषां सिद्धान्तान् निराकृतवन्तौ ।

भारतीयो ज्योतिर्वेत्ता अध्यात्मवादी भारतीय स्वाधीनतासंग्रामस्याग्रणी बाल गङ्गाधर तिलकमहाभागः स्वेन प्रणीते Orion or Researches in the Antiquity of the Vedas नामके ग्रन्थे मृगशीर्षनक्षत्रे वासन्तिकं विषुवं स्थिरीकरोति स्म । तेन मान्दालेवन्दिशालावस्थानसमये Vedic Chronology and Vedang Jyotisha नामकमपरमपि पुस्तकं लिखितम् । उभयोरपि ग्रन्थयोः तेन पाश्चात्यानां प्राच्यानां च सिद्धान्तानां पुंखानुपुङ्खतया विमर्शः कृतः । सिद्धान्तितं च तेन भारतीयज्यौतिषं सम्पूर्णतया पाश्यात्यज्योतिषाद्भिद्यत इति । उभयोर्भेदस्तावदधोविषयेषु सम्पगेत्रीपर्णितो दृश्यते—

१ । भारतीय गणना सम्पूर्णतया भूकेन्द्रिका, ग्रीगगणा तु अंशतः सौरकेन्द्रिका ।

२ । ग्रहाणां नामकरणे विभिन्नरीतयोऽनुसृताः ।

३ । ग्रहाणां कक्षभ्रमणे दूरतायां च प्रभेदः

४ । हिन्दूनां राशिनक्षत्रविचारः पाश्चात्यविचाराद्भिद्यते ।

५ । हिन्दूनां गणना बीजमूलिका (Algebrical) ग्रीग्गणना तु ज्यामितिकी (Geometrical) मीक्षमूलरभट्टः India what Can it Teach us नामक पुस्तके भारतीयज्योतिर्विद्याया बहुधा विमर्शनमकरोत् । प्रमाणैर्बहुभिःतेन सिद्धान्तितं यद् भारतीयानां ग्रहमण्डलाकाशमण्डल तथ्यानि मौलिकान्येव न च पाश्चात्येभ्य आहृतानि ।

Funding by IKS-MoE
820

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आङ्गलविश्वकोषे विलिखितमास्से राशिचकं नक्षत्रपद्धतिश्च हि दूनां निजं स्वम् । सेयं पद्धतिर्हिन्दुभिः खीष्टपूर्व २३०० वत्सरात्प्रागविष्कृता । तदानीं कृत्तिकानक्षत्रे वासन्तिकं विषुवसंक्रमणमासीत् । मतमिदं व्रीबरमहाभागेनापि स्वप्रणीतस्य History of Indian Literature ग्रन्थस्य २५५ पुटे व्यलिखत् ।

India Through the Ages नामके "ग्रन्थे Flora Annie Steel नामकेन पाश्चात्यविदुषा एवमुल्लिखितम् "वयं भारतीयप्रतिभाया मूल्यमवबोद्धुं सर्वथा न प्रभवामः । तेषां बीजगणितरेखागणितादिदर्शने विस्मयो जायते ।"

चीनदेशीये इतिहासे Out lines of Chinise History लि. उङ्ग् नामकेन मनीषिणा स्थिरीकृतं यद् बौद्धधर्मं माध्यमेन भारतीया संस्कृतिश्चैनसंस्कृतिं दृढं प्रभावितवती । सोऽयं प्रभावः चैनवर्णमालाया उच्चारणे गणितविद्यायां ज्योतिःशास्त्रे, संगीते, रूपकर्माणि च सुस्पष्टमवगम्यते ।

ज्योतिषशास्त्रस्य नक्षत्रविभागस्तत्सम्पक्ता दशागणना पृथिव्यां भारतादन्यत्र न दृश्यते । तदिदं भारतोपज्ञमतिसूक्ष्मं च ।१

सूर्यस्योदयास्तमिते न स्त इति वेदेषु पुराणेषु च विलिखितं दृष्ट्वा डा हौगनामा पाश्चात्यो मनीषी परं विस्मयमाप ।

एवं भारतवर्षस्य प्राचीनं गौरवं समृद्धिं च विभावयता मोक्षमूलरभट्टेन यदभिहितं तत्सहृदयपाठकेभ्य उपहरामः । इयं हि तदुक्तिः—

मम विमर्शे समग्रेऽपि भूमण्डले भारतवर्षमेव प्राकृतिकसाधनैः परिपूर्णं, सुषमया शक्त्या सम्पत्त्या चासाधारण्या समलंकृतम्" इति ।

(सावशेषम् ।)

---

१ The Hindus have records of the influence of every six minutes of judic. European Astrology has not yet more than barely delineated the nature and infleunce of the twelve signs (1991 Dec. A.M.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री नीलाद्रिनाथ शतकम्

अनुवृत्तम्

लेखकः—श्री पुरुषोत्तम मिश्रः

यदि कर्मणा पतदभूर्न विभ्रतां
नरके शरीरमणकेन हेतुना।
दयसे त्वमौपनिषदोऽपि नःश्रियो
नरकेशरीर मणकेन हेतुना ।५१।

अन्वयः—हे श्रियो रमण, अणकेन कर्मणा नरके पतत् शरीरं बिभ्रतां नः यदि नः दयसे, तदा औपनिषदः ना अपि त्वं केन हेतुना नरकेशरी अभूः।

व्याख्या—हे श्रियो महालक्ष्म्या रमण नाथ जगन्नाथ, अणकेन निन्दनीयेन कर्मणा कार्येण नरके निरये पतत् पतनशीलं शरीरं देहं बिभ्रतां धारयतां नः अस्माकं यदि न दयसे अनुकम्पसे तदा औपनिषदः उपनिषत्सु वेदान्तेषु प्रतिपादितः ना पुरुषः परमात्माऽपि त्वं केन हेतुना केन कारणेन नरकेशरी नृसिंहः अभूः अभवः। अस्मादृशानां दयनार्थमेव ते नरसिंहावतार इत्यर्थः। अत्र द्वितीय-चतुर्थपादयोर्यमकालङ्कारः ।५१।

विहिताऽर्चा बलिना स्म येन ते नं
नयसे वामन सारसम्पदेन।
किमधस्त्वं सितमीशता स्वतन्त्रा
नयसेवामनसाऽरसं पदेन ।५२।

अन्वयः—हे ईन हे वामन नयसेवामनसा येन बलिना ते पदे सारसम्पदा न अरसम् अर्चा बिहिता, तं सितं किम् अधः नयसे स्म। ईशता स्वतन्त्रा।

व्याख्या—हे ईन प्रभो हे वामन धृतवामनावतार जगन्नाथ, नयो नीतिः सेवा भक्तिश्च तयोर्मतो मानसं यस्य तादृशेन येन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बलिना ते तव पदे चरणे सारसम्पदा विशिष्टसम्पदा सर्वस्वार्पण-पूर्वकमित्यर्थः न अरसं सानुरागम् अर्चा पूजा विहिता, तं बलिं तन्नामकं दैत्यं किं किमिति सितं बद्धं कृत्वेति शेषःअधः पातालं नयसे स्म प्रप्ययसि स्म । समाधत्ते—ईशता प्रभुता स्वतन्त्रा निरङ्कुशाः । निराङ्कुश प्रभव इत्यर्थः । अत्रापि द्वितीयचतुर्थपादयोर्यमकमलङ्कारः । ५५ ।

भुवनानि तेऽर्थिनि पदं त्रयीविदो
बलिना पदत्रयममायिना त्वयि ।
विहितं त्रिविक्रम भुवः किमुत्तरं
बलिनाऽऽपदत्त ममायिना त्वयि ।५३।

अन्वयः—अयि त्रिविक्रम यमम् आयिना, अमायिना बलिना अर्थिनि त्वयि भुवः पदत्रयं बलिना विहितम् । तु ते पदं भुवनानि आपत् । अत्र त्रयोविदः ते किमुत्तरम् ?

व्याख्या—अयि त्रिविक्रम वामनावतार जगन्नाथ, यमं नियममायिना प्राप्तवता अमायिना अविदितकैतवेन बलिना वैरोचनिना दैत्येन अर्थिनि याचके त्वयि वलिना पूजया सह भूवो भूमेः पदत्रयं पादत्रयं विहितं दत्तम् । तु किन्तु ते पदं पादः भुवनानि ब्रह्माण्डानि आपत् व्याप्तौत् । अत्र अस्मिन् विषये त्रयीविदः विदितवेदत्रयस्य ते तव किमुत्तरं न किमप्युत्तरमस्ति । अत्रापि द्वितीयचतुर्थ पादयोर्यमकालङ्कारः ।५३।

आचार्यते परशुना चरणे नराज्ञा
दैर्लङ्घिताऽस्त्रनिगमेषु तथैवदेषाम् ।
आचार्यतेऽपरशुना चरणेन राज्ञा—
मातं न मार्गव शिर भुवि किं त्वया सा ।५४।

अन्वयः—हे भार्गव हे अस्त्रनिगमेषु आचार्य, ते नराज्ञा यैः लङ्घिता, तेषां शिरः रणे त्वया यथा एतत् अपरशुना चरणेन आचार्यते स्म, तथा किं न ...

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या–हे भार्गव जामदग्न्य हे अस्त्रेषु अस्त्रविद्यासु निगमेषु वेदेषु च आचार्य अध्यापक जगन्नाथ ते तव नराज्ञा नररूपस्याप्यादेशः यैराजभिर्लङ्घिता अनादृता, एषां कार्तवीर्यादीनां राज्ञां शिरो मस्तकं त्वया रणे युद्धे यथा अपरशुना नीचकुक्कुरेण भुवि पृथिव्यां पतितं सदिति शेषः चरणेन पादेन आचार्यते स्म उद्घ्रियते स्म तथा परशुना स्वशस्त्रेण किं न अस्तं क्षिप्तम् अपितु क्षिप्तमेवेति भावः। अत्र प्रथम तृतीयपाद योर्यमकालङ्कारः ।५४।

कण्ठे लतां स्वजननीं सुगुणैर्जगत्सु–
हारेऽणु काञ्चन गराग्रगुरारजन्तीम्।
हा रेणुकां च न गिरा व गुरो रजन्तीं
छित्त्वाऽपि जीवयसि धर्म्यथात्म राम ।५५।

अन्वयः–हे राम, गुरोः गिरा सुगुणैः जगत् रजन्तीं, च धर्म्य-थात् अणु न अजन्तीं स्वजननीं रेणुकां हा काञ्चनगिरौ अगुरोः लतां व सुहारे कण्ठे छित्त्वा पुनः जीवयसि स्म।

व्याख्या–हे राम धृतपरशुरामवतार जगन्नाथ, त्वं गुरोः पितुर्गिरा वचनेनादेशेनेत्यर्थः सुगुणैः सौशील्यपातिव्रत्यादिभिर्गुणैः जगद् भुवनं रजतीं रञ्जयन्तीं च तथा धर्म्यपथात् न्याय्यमार्गात् स्वल्पमपि न अजन्तीं न चलन्तीं स्वजननीमात्मनः प्रसवित्रीं रेणुकाँ तन्नाम्नीं स्वमातरं काञ्चनगीरौ स्वर्णाद्रौ सुमेरावित्यर्थः अगुरोर्लतामिव सुहारे समीचीनहारयुक्ते कण्ठे गले छित्त्वा कर्तयित्वा पुनर्जीवयसि स्म उज्जीवयसि स्म। अत्र द्वितीयतृतीयपादयो-र्यमकालङ्कारः ।५५।

देवराघवतामुक्ते रिन्द्राण्याः स्वीकृता त्वया।
देव राघवता मुक्ते देवानामप्यजन्मना ।५६।

अन्वयः–हे इन्द्राण्या देवर हे देव अजन्मना अपि त्वया देवानाम् उक्तेः, अधवतां मुक्तेश्च राघवता स्वीकृता।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—हे इन्द्रण्या शचीदेव्या देवर इन्द्रानुजेत्यर्थः हे देव जगन्नाथ, नास्ति जन्मोत्पत्ति र्यस्य तादृशनापि त्वया देवानां देवतानामुवतेर्वचनात्प्रार्थनयेत्यर्थः तथा अघवतां पापिनां मुक्तेर्मोचिनार्थं च राघवता रघुवंशीयश्रीरामचन्द्र रूपता स्वीकृता अङ्गीकृता। अत्र प्रथमतृतीयपादयो र्यमकालङ्कारः।२६।

नमयामास चापेना युवा क्षत्रान्तकं भवान्।
नमयामास चापे ना द्युगत्या राघवौजसा।२७।

अन्वयः- हे राघव, अयुवा अपि भवान् क्षत्रान्तकं रामम् चापेन नमयामास। स ना मया अमा द्युगत्या ओघसा च न आपे।

व्याख्या—हे राघव धृतरामावतार जगन्नाथ, अयुवा अतरुणः शिशुरपि भवान् क्षत्राणां क्षत्रियाणामन्तकं यमं नाशयतारं रामं परशुरामं चापेन धनुषा नमयामास नम्रमकार्षीत्। स त्वया पराजितो नाः परशुरामः मया लक्ष्म्या अमा सह द्युगत्या स्वर्गगमनेन ओजसा पराक्रमेण च न आपे विरहित आसीदित्यर्थः। अत्र प्रथमतृतीयपादयोर्यमकालङ्कारः।२७।

सा राम मन्थराज्यं पित्रादत्तं न किन्तु तद्भक्तीः
सारा ममन्थ राज्यं धर्म्यमतेस्ते हि विज्ञासु।२८।

अन्वयः—हे राम विज्ञासु सारा सा मन्थरा आज्यं पित्रा दत्तं राज्यं न ममन्थ किन्तु धर्म्यमतेः ते तद्भक्तीः ममन्थ हि।

व्याख्या—हे राम रामावतार जगन्नाथ विज्ञासु पण्डितासु सारा उत्कृष्टा सा प्रसिद्धा मन्थरा कैकेयीधात्री आज्यमजसम्बन्धि पैतामहं पित्रा जनकेन दशरथेन दत्तं राज्यं न ममन्थ आलोडयामास किन्तु धर्म्या धर्मादनपेता मतिर्यस्य तादृशस्य ते तव तद्भक्तीः ममन्थ। अत्रापि प्रथमतृतीयपादयोर्यमकालङ्कारः।२८।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

का नाम समता ?

(अनुवृत्ता)

लेखकः—श्रीस्वामी आत्मानन्दमुनिः ।

समतयाः साधनानि

प्रागस्माभिः समतायाः स्वरूपमुपवर्णितम् । इदानीं समतायाः प्रकृतानि साधनानि प्रदर्शयामः ।

वेदस्तावत् कर्मकाण्डोपासनाकाण्डज्ञानकाण्डत्वेन त्रिधा विभक्तः । त्रीण्यपि काण्डानि परस्परं पृथक् न भिद्यन्ते परन्तु साध्यसाधनरूपेण परस्परं संश्लिष्यन्ते । संक्षेपत इदं वक्तुं शक्यते यत्प्रथमसोपानं परमार्थस्य: शुभं सकामं कर्म, अर्थात् आत्मनः, तत्सम्पर्केण समापततां मनुष्यस्य स्वार्थानां च समतासम्पादनं तथा आत्मस्वार्थानां परस्वार्थानां च परस्परमविद्वेषश्च शुभस्य सकामस्य कर्मणो लक्षणम् । एतादृशादेव शुभात् सकामात् कर्मणः दृढेनाभ्यासबलेन निष्कामकर्मण उत्पत्ति भवति । निष्कामकर्मणो दृढेनाभ्यासेन भगवद्भक्तेरुद्बोधो भवति । हृदये भगवद्भक्तेः संचरणे सांसारिकेषु भावेषु वीतस्पृहता वैराग्यापरपर्याया संजायते । वैराग्यस्य दृढतायां ज्ञानमुदेति, ज्ञानेन च समतापादनपूर्वकं संसारबन्धनान्मोक्षो भवति ।

यथा विद्यार्थी प्रथमकक्षायामनुत्तीर्य द्वितीयकक्षायां द्वितीयकक्षाया-मनुत्तीर्य तृतीयकक्षयां, तृतीयपक्षायामनुत्तीर्थ चतुर्थकक्षायां प्रवेष्टुं न शक्नोति, एवमिव शुभे सकामे कर्मणि दृढाभ्यासं बिना न निष्कामकर्मणि, निष्कामकर्मणि च दृढाभ्यासं विना भक्तिकर्मणि, भगवद्भक्तौ च दृढाभ्यासं विना वैराग्ये, वैराग्ये च दृढाभ्यासं विना ज्ञाने, ज्ञाने च दृढाभ्यासं विना न मोक्षे प्रवेष्टुं प्रभवति । यथा पुष्पस्य परिपक्वतायां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

फलस्योदयः तथा प्रथमस्तरस्य परिपक्वतायामेव तत्परस्तरस्योदयो भवति । पूर्वपूर्वस्य च स्तरस्य सर्वथा बिलयः सम्पद्यते । सर्वत्रापि दृढमभ्यसनमावश्यकम् । एवं प्रकारेण कर्मोपासनाज्ञानरूपाणि त्रीणि साधनानि अन्तःकरणस्थितं मलं विक्षेपमावरणं च क्रमशो नाशयन्ति ।

सोऽयं वेदप्रतिपादितो मार्गः परमार्थलाभस्य प्रकृतं साधनम् । परन्तु सम्प्रदायवादिनः स्वस्वसम्प्रदायधर्मेषु नियन्त्रिता निष्कामधर्ममुपासनां वा परमार्थस्यान्तिमं साधनं कलयन्ति । ते तु यथार्थं परमार्थं लब्धुं न प्रभवन्ति । ते हि अन्तिमं स्तरं नैवारोढुं शक्नुवन्ति, प्रत्युत पश्चादेव धावन्ति । अग्रेसरणं तदा सम्भवति, यदा अग्रेवर्तिनि सोपाने आस्था स्थाप्यते, श्रद्धा च क्रियते । परन्तु अन्तिमसोपानारोहरणात् प्राक् पूर्ववर्ति सोपानं योऽन्तिमं भावयति, सोऽयं प्रकृतिराज्ये अन्यैः साकं विद्वेषमाचरति । तत एव स्वकीयेऽपि सोपाने दृढमवस्थातुं न प्रभवति ।

(सावशेषम्)

मनोरमा प्रशस्तिः

श्री मदनन्त त्रिपाठि शर्मसु

बन्धो, कृता कुतुकिनी करयोर्नमस्या,
मावात्मकैरपचितिः सुमनोभिरेषा, ।
देशार्थमुद्यततया, ततयायुषश्च
श्रुत्याः भवान् जयति तन्विक सेवयापि ।
साक्षाद्विधातुमशकं नगरे न दिल्ल्यां,
नापारयं चलितुमङ्ग विचारगोष्ठ्याम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्माद् भवन्तमभिनन्दितुकाम एष
काले ततेऽपि समया प्रहिणोमि पत्रम् ।
जानामि लक्ष्मणपुरे भवतः कराब्जा-
दालोकिता परिचिता च मनोरमा सा ।
तत्साधने विरचितो भवतः प्रयासः
कस्याथ चेतसि न गौरवमातनोति ?
यद् 'द्वादशी रजनि' रित्यमिधीयमानं
प्राकाशि नाटकमनूदितमांग्लनाट्यात्
तत्र स्फुटा सरसता, मधुरा च शैली,
भाषाप्यथोल्लसति मौलिकता च गीतेः ।
यो नांग्लवाचमवगच्छति तस्य हेतो-
राह्लादहेतुरयमस्ति महान् प्रवादः
पाश्चात्यरत्नमुपनीय विधीयमानः
प्राचां निधेरुपचयो रुचिमादधाति ।
आलोचनाऽथ भवभूतिकवेः कृता या
सा विस्मये प्रणिदधाति मनः कविनाम्
चेतश्चयमत्कृतिकरा अपि सूलयस्ता
या मासिकं दलमिदं स्वयमारभन्त ।
क्षेमेन्द्र काव्य रचनासु कृताथ चर्चा
रम्यावगम्भ्रमपि भारतयुद्ध – तन्त्रम्
पद्यानि सिंहलकवे रुचिराणि पूर्णा
नन्दस्य चापि यतिनः शुचिसुन्दराणि
ध्यात्वा कठोपनिषदं यदि चात्मविद्यां
कश्चिद्विपश्चिदनुशीलयितुं प्रवक्ति-
कर्माण्युदन्त निर पेक्षतया विधातुं
वेद्योऽपरः कलित भारत गीतिरेति ।
नैवांगला मवितुमर्हति, नापि हिन्दी,
स्यात् संस्कृतैव भुवि भारतराजभाषा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतद् विमृश्य स हि लोकसमासदस्य:
कान्त: सतां सदसि कान्ततरो विभाति ।
चिन्तामणे र्विकिरतीह नवं प्रयोग
वन्द्यो विधेश्च किरणं कविभूषणोऽयम्
अर्चि:पथस्य यतिराजकृती रहस्यं
सन्दिश्य भक्तभुवने प्रियतामुपैति ।
यत् प्रांजलाश्च सरलाश्च समे निबन्धा:
सन्धाय तर्पितुमलं सुधियो भवन्ति
तत् कामये—भवतु वाणि मनोरमैषा
साध्वी चिराय जगत: परमार्थबन्धु: ।
पण्यांगनायित—गिरां ग्रहणे सलीलं
कामं भवन्तमवगम्य बिलासशीलम् ।
चेत: प्रसीदतितरां, विविधास्तु वाधा
निस्तीर्य सीदति, विनिन्दितलोकलीलाम् ।
एकत्र लोकसदसो गुरुकार्यभार:,
लेखाविभक्ति;रपरत्र सुलेखकानाम्
अन्यत्र पत्रविषयास्ततय: कृतीना-
मस्यां स्थितौ कठिनता भवतोऽनुमेया ।
एवं स्थिते पुलकमंगचये दधान:
कामं वहन्नुरसि चात्यसहानुभूतिम् ।
साहाय्यमर्थयितुमेष विशेषलेखं
संप्रापयेऽत्रभवते विदुषां विधेय: ।

इति
निवेदयते

चिन्तामणि औषधालय: गोस्वामी भैरवगिरि:
मुजफ्फरपुरम् (बिहार:)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री मनोरमा

मासिक संस्कृतपत्रिका

ललितैः पदविन्यासैर्विचित्रैर्भावबन्धनैः ।
भावुकानामन्तरङ्गे प्रतिभातु मनोरमा ।।

पञ्चमो वर्षः } १८८७ शकाब्दम्, वैशाखो मासः May 1965 { द्वितीया सञ्चिका

सुभाषितानि

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ।१।

न हीदृशं संवननं त्रिषु लोकेषु विद्यते ।
दया मैत्री च भूतेषु दानं च मधुरा च वाक् ।२।

उत्तमा आत्मना ख्याताः पितुः ख्याताश्च मध्यमाः
अधमा मातुलात् ख्याताः श्वशुराच्चाधमाधमाः ।३।

सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ।४।

आत्मबुद्धिः सुखायैव गुरुबुद्धिर्विशेषतः ।
परबुद्धिं विनाशाय स्त्रीबुद्धिः प्रलयङ्करी ।५।

शीलभारवती कान्ता पुष्पभारवती लता ।
अर्थभारवती वाणी भजते कामपि श्रियम् ।६।

गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत्
वर्तमानेन कालेन वर्तयन्ति विचक्षणाः ।७।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तररामचरित समालोचना

अनुवृत्ता

लेखकः- श्री अनन्त त्रिपाठिशर्म्मा

लवचन्द्रकेत्वोः सम्प्रहारः

उत्तररामचरिते पञ्चमे षष्ठे चाङ्के अवतारितो लवेन सह चन्द्रकेतोः सम्प्रहारः सर्वथा भवभूतेः कल्पनायाः विलासः । सोऽयं सम्प्रहारो रामायणे नैव दृश्यते । तत्र हि आश्वमेधिकस्य अश्वस्य संरक्षकत्वेन लक्ष्मणः सम्प्रेषितः । आश्वमेधिकश्च यागो नैमिषारण्ये परिकल्पितः । तत्र च लङ्कासमरसुहृदो राक्षसाः प्लवङ्गमाः, राजर्षयो ब्रह्मर्षयश्च आमन्त्रिताः । तदर्थं कृतामन्त्रणो भगवान् वाल्मीकिः कुशलवाभ्यां सह तत्रोपस्थितो भवति कुशलवौ च तत्र रामायण गातुं नियोजयति । तौ च तन्त्रीलयसमन्वितं रामायणं सर्वेषां पुरतो गायतः । सर्वे च तयोर्गानेन विहृतान्तरङ्गा भवन्ति रामभद्रोऽपि तयोर्गानेन प्रमुषितान्तरङ्गः सर्वात्मना प्रशंसति, कालक्रमेण च तौ सीतागर्भसम्भवौ विदित्वा परमं प्रमोदमवाप्नोति । सीतां च विधृत शरीरां विज्ञाय सर्वेषां सदेवासुरगन्धर्वरक्षोमहर्षीणां पुरतः कृतशपथां ग्रहीष्यामीति बाल्मीकिसविधं दूतान् प्रहिणोति । प्रहृष्टश्च भगवान् वाल्मीकी रामभद्रस्य कार्यमनुमनुते । पति देवतां च कषायवसनां सीतामादाय तत्रोपस्थितःस्वयं सीतायाः पातिव्रत्यविषये शपथं करोति, सीतां च शपथ करणाय नियोजयति । सीता च 'रामादन्यं न कामये इति शपथं कृत्वा तदेषा माधवी देवी विवरं दातुमर्हती'ति प्रार्थयते । ततः पातालात् दिव्यं सिंहासनमुदेति । भगवती भूतधात्री च सीतां भुजाभ्यामादाय तत्र निवेश्य पातालं नयति । शोकाभिभूतः क्रुद्धो रामभद्रो बलेन पातालात्सीतां-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समानेतुं प्रक्रमते, श्वश्रूं च सीता निर्यात्यतामिति अनुरुन्धे । तदा पितामहेनोद्बोधितः शान्तिमापद्यते । पुत्रौ हिरण्ययीं सीतां चादाय अश्वमेधयागं समाप्यायोध्यां प्रत्यावर्तते। एष एव हि रामायणस्य विषयः कवि शेखरेण भवभूतिना सर्वथा परिवर्तितः। तथा परिवर्तनस्य कारणानीदानीं विमृशामः । तत्र प्रथमतश्चन्द्रकेतुना साकं लवस्य सम्प्रहारं विषयीकुर्मः । रामायणे हि रामः केवल मसाधारण-प्रजापालकत्वेन चित्रितः। तदर्थं तस्य विशुद्धाया अपापाया धर्मपत्न्यास्त्यागोऽप्यकिञ्चित्कर आसीत् । भवभूतिस्तु रामचन्द्रं न केवलमसाधारण प्रजापालकत्वेन परन्तु आदर्शजनकरूपेण आदर्शगृहस्थरूपेण च चित्रयितुं लेखनीं व्यापारयामासेति प्रागवोचाम । अतएव राम आत्मतुल्यपराक्रमौ पुत्रौ बहुमनुते, प्राणधिकां च सीतां स्वीकरोति।

रामायणे हि कुशलवौ केवलं रामायणस्य गायकरूपेणास्माकं पुरत उपतिष्ठेते । भगवता वाल्मीकिना कृतसंस्कारयो रघुवंश-धुरन्धरयोस्तयोरन्येषां गुणानां न कोऽपि परिचयो भगवता वाल्मीकिना प्रदत्तः। अस्माकं भवभूतिस्तु तावादर्शपुत्रत्वेनास्माकं पुरत उपस्थापयति । पुत्रयोर्जृम्भकास्त्रलाभेन तत्रभवती सीता आत्मानं पुत्रवतीं मन्यते । भगवती भागीरथी भूतधात्री च रामभद्रतुल्यौ ते पुत्रकौ जाताविति तामभिनन्दतः। लव कुशयो वीर्यातिशयं वर्णयितुमेव कविः प्रथमत एवाश्वमेधयाग रक्षकत्वेन लक्ष्मणं न प्रेषयति, परन्तु तस्य द्वितीयं पुत्रं चन्द्रकेतुं नियुङ्क्ते । लक्ष्मणस्य हि द्वौ पुत्रावास्तांम् अङ्गदश्चन्द्रकेतुश्च । रामायणे हि तयोर्नामोल्लेखमन्तरा नान्यत्किमपि गुणानामवतरणं दृश्यते । सीतायां पाताल-लोकं विशन्त्यां च बहोः कालादनन्तरं रामभद्रो लक्ष्मणं स्वपुत्रयोरङ्गद चन्द्रकेत्वो रभिषेचनाय समीचीनं स्थानमन्वेष्टुं नियोजयति, तेन चानुबोधितस्तौ द्वयो राज्ययोरभिषेचयति । अत्र तु चन्द्रकेतोः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सविशेषतया गुणानां वर्णनं कवेश्चिकीर्षितं दृश्यते । रामचन्द्रस्य कुमारयोर्लवकुशयोः प्रभावातिशयवर्णनं कवेरभिप्रेतम् । कविस्तु कुशं पृष्ठतः कृत्वा लवस्य प्रभावं वर्णयति । रामायणे हि लक्ष्मणोऽश्वमेधयागस्य रक्षकत्वेन नियोजितः । लक्ष्मणस्य किमासीदिति न कोऽप्युल्लेखो दृश्यते । अत्र तु कविर्लवं पुत्रस्थानीयं न लक्ष्मणस्य प्रतिद्वन्द्विरूपेण चित्रयति, परन्तु तदीयस्य द्वितीयस्य पुत्रस्य चन्द्रकेतोः । विवादश्च विवाहश्च समयोरेव शोभते इति लौकिकी वस्तुस्थितिः । अत एवासदृशयोर्लवलक्ष्मणयोः सम्प्रहारवर्णनापेक्षया लवचन्द्रकेत्वोः सप्रहारं बहुमनुते । एतदर्थं दत्तदिव्यास्त्रसम्प्रदायः लक्ष्मणपुत्रोऽनुप्रेषित इत्यात्रेयीमुखेन कविरस्माकं पुरतः प्रथमत एवोपस्थापितवान् ।

प्रसङ्गेऽस्मिन् इदं सहृदयानां पुरत उपस्थापयामः । रामायणे च भरतस्य द्वयोः पुत्रयोस्तक्षपुष्कलयोर्नामोल्लेखो दृश्यते लक्ष्मणस्य च प्रथमपुत्रस्याङ्गद इति नाम निर्दिष्टमास्ते । अत्र तु कविस्तान् त्रीनपि विहाय चन्द्रकेतुं लवस्य प्रतिद्वन्द्विरूपेण अवतारितवान् । किं तत्र बीजमिति मार्गणीयं भवति ।

रामायणे हि भरतो भ्रातृभक्तेः परमप्रतीकत्वेन सम्यगेव चित्रितः राज्यशासने तदीयं प्रावीण्यं प्रभावातिशश्च सम्यगेवोपवर्णितः । रामचन्द्रश्च राजसूयं यागं कर्तुं व्यवसितोऽपि भ्रातुर्भरतस्य परामर्शेनाश्वमेधं क्रतुं कर्तुं निश्चिन्वन्नसाधारणं गौरवं भ्रतरि प्रदर्शयति । तदीयौ पुत्रावपि रामचन्द्रो गन्धर्वराज्ये संस्थाप्य परं कृतज्ञतां प्रकटयति । गन्धर्वराज्यजयश्च भरतस्य पराक्रमेण ससाधित इति च वर्णितमास्ते । एवमनुजे भरते, तदीय पुत्रयोश्चासाधारणं स्नेहं प्रदर्शयन् भरत चरितं तत्रैवोप संहृतवान् वाल्मीकिः । अनुजः शत्रुघ्नश्च मथुराधिपतित्वेनाभिषेचितः । अतोऽवशिष्टस्य लक्ष्मणस्यैव चरितमुत्कर्षश्च वर्णनीयतया आपतति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लवचन्द्रकेत्वोः सम्प्रहारस्यौचित्यं विमृशाम । एकतो हि विशालैः सैनिकैरावेष्टितश्चन्द्रकेतुः, अपरतश्च आश्रममात्रवासपरिचयैर्बालैः परिवृतो धनुष्पाणिर्लवः । रामलक्ष्मणाभ्यां दत्तदिव्यास्त्रसम्प्रदायः सुमन्त्रेण च सारथिना नुद्यमानरथारूढश्चन्द्रकेतुर्यावदपूर्वारण्यसुषमाक्षिप्तहृदयोऽरण्ये विचरति, तदा मुनिदारकैरपूर्वसत्त्वदर्शनोद्दीपितकुतूहलैरागत्य जनकादिभिः क्रियमालयंलापो लवः तेभ्य आच्छिद्य नीतोऽश्वं पश्यन्नेव आश्वमेधिकोऽयमश्व इति व्यजानात्, अश्वसंरक्षकाणां च सैनिकानां सन्दीपनानि वचनान्यसहमानोऽश्वं निगृह्य सैनिकैः सह योद्धुं प्रवृत्तः। प्रवृत्ते च संग्रामे चन्द्रकेतुः संवादमिमं श्रुत्वैव त्वरित सुमन्त्रनुद्यमानेन रथेन त्वरितं लवस्य पुरत उपस्थितः, सैनिकानवमर्दयन्तं लवं सैनिकप्रमथनाद्विरम्य तेन साकं द्वन्द्वसम्प्रहारं कर्तुं प्रार्थयत । तस्य च प्रसन्नकर्कशया वाचा आवर्जितान्तःकरणो लवो यावद्भग्नान् चमूपतीन् अवज्ञाय चन्द्रकेतुना साकं मिलितुं प्रस्थितः, तावत्प्रतिनिवृत्तैरपि चमूपतिभिः पुनरुपद्रुतः वीरसंवादविघ्नकारिणस्तान् जृम्भकास्त्रैः प्रतिष्टभ्य चन्द्रकेतोः पुरतः समायातः । चन्द्रकेतुश्च पादचारिणा तेनैकेन लवेन रथारूढस्य तस्याभियोगमनुचितं मन्यमानः सुमन्त्रस्यानुज्ञामादाय रथादवततार । अनन्तरं परस्परसम्भाषणैः स्फुरितक्रोधौ तौ विमर्दनक्षमां भूमिं प्रविश्य तुमुलमायोधनं कर्तुं प्रवृत्तौ ।

रामायणे हि महाराजस्य दशरथस्याष्टौ मन्त्रिण उपवर्णिताः । बालकाण्डस्य सप्तमे सर्गे ह्येव मुल्लेखो दृश्यते—

"तस्यामात्या गुणैरासन्निक्ष्वाकोरस्तु महात्मनः
मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः ।
अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धृष्टिर्जयन्तो बिजय: सुराष्ट्रो राष्ट्रवर्धन:

अशोको मन्त्रपालश्च सुमन्त्रश्चाष्टमोऽभवत् इति ।

अष्टसु च मन्त्रिषु सुमन्त्रोऽन्यतम: प्रधानश्च । एष हि राज्ञो दशरथस्यात्यन्तमभिमत आस्त । सनत्कुमारप्रभृतिभ्यो दशरथस्य भाविनं सकलमपि वृत्तान्तं जानाति स्म, दशरथेन च सकलेष्वपि आत्मनाऽनुष्ठेयेषु कार्येषु नियोज्यमान आसीत् । पुत्रेष्टियाग करणार्थं सर्वेऽपि राजानो ब्रह्मर्षयो जानपदाश्चानेनैव समावेशिता: । जनकस्य पुरमपि सुमन्त्रसारथिरेव दशरथो ययौ । रामचन्द्रस्य यौवराज्य-सम्भारान् प्रकल्पयितुमेष एव नियुक्त: । एतत्सारथिनैव रथेन रामचन्द्र: सह सीतालक्ष्मणाभ्यां वनं प्रस्थित: । दशरथे उपरतेऽपि एष स्वां मर्यादामक्षुण्णामस्थापयत । पट्टाभिषेकानन्तरं रामचन्द्रोऽपि अस्मिन् बहुमानभावस्त । उत्पन्नदोहदाया: सीताया मनोविनोदनाय आश्रमगमनाय रथं सज्जीकर्तुमयमेव रामभद्रेण नियोजित: । अवश्यमुत्तररामचरिते किञ्चिदेव परिवर्तितमास्ते । रामायणे हि लक्ष्मण: सुमन्त्राधिष्ठितरथेन सीतमादाय भागीरथीतीरं गच्छति, भागीरथीतीरे च सरथं सुमन्त्रं स्थापयित्वा सीतामपरं तीरं पारयति, तत्र च रामस्य दारुणं सन्देशं श्रावयित्वा तां परित्यज्य सुमन्त्राधिष्ठितरथेन परावर्त्य रामाय सकलं वृत्तान्तं सीतायाश्च करुणं सन्देशं निवेदयति । उत्तररामचरिते तु रामचन्द्र: प्रेयस्या भागीरथ्या मवगाहने पुण्याश्रमदर्शने चोत्पन्नं दोहदं पूरयितुं लक्ष्मणमस्खलितसुखसम्पातं रथमानेतुमादिशति, अनन्तरं च सीताया स्तादृशमपवादं दुर्मुखमुखादुपश्रुत्य तेनैव व्याजेन तां भागीरथीतीरे विवासयितुमादिशति । लक्ष्मणश्च स्वयमेव रथेन तां तत्र नयति । सीतानिर्वासने सुमन्त्रस्य गुरुस्थानीयस्य तूष्णीं तथा रामादेशपरिपालनं समुचितं नैव भवेदिति तस्याज्ञातसारमेव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
सीताया निर्वासनं वर्णयन् कविः सुमन्त्रे किमपि गौरवं स्थापयति। एतदेव च कविना चन्द्रकेतु मुखेन प्रकटीकृतं दृश्यते। चन्द्रकेतुना रथादवतरितुमभ्यर्थितः सुमन्त्रो लवस्य तादृशविक्रम दर्शनेन कदाचिद्-त्याहितं भवेदिति

कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु ?
कथं वाप्यनुज्ञानातु साहसैकरसां क्रियाम् ? विचारयति,

तदा चन्द्रकेतुः कथयति—

'यदा पितुः प्रियसखं त्वामर्थसंशयेषु आर्यतातपदा अपि परामृशन्ति तत्किमित्यार्यो विमृशसि इति, तदानो सुमन्त्रस्त मनुमनुते ❀

एवं सर्वैः सर्वथा सम्भावितः सुमन्त्रो नैव निरपराधाया निष्पापायाः गर्भस्थितपवित्ररघुकुलसन्तानायाः सीताया विवासन मनुमन्यतेति सकलोपि संपर्कः परिहृतः कविना। एतावता सुमन्त्रस्य न गौरवं हीयते, प्रत्युत अभिवर्धत एव।

एतादृशो विश्वस्तः सकलकार्य साधनसमर्थः द्वादशवार्षिकस्य दत्तदिव्यास्त्रसंप्रदायस्य आश्वमेधिकाश्व संरक्षकत्वेन प्रहितस्य चन्द्रकेतोः सारथित्वेन कविना परिकल्पित इति युक्तमुत्पश्यामः।

अवस्थाचक्रेण अकाण्डरणताण्डवप्रवृत्तयोस्त्वनयोः प्रकृति-सिद्धा काचन प्रवृत्ति दर्शनमात्र एव परस्परमाकर्षति, स्नेहेन च परस्परं

❀ "एष सांग्रामिको न्याय्य एष धर्मः सनातनः
इयं हि रघुवंश्यानां वीर चारित्रपद्धतिः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बध्नाति । परन्तु अपरक्षण एव दारुणरसो वीररसंवादरूममिमं स्नेह-प्रसरं वाधते, उभौ च युद्धाभिमुखौ भवतः । तत्र चन्द्रकेतुर्लवस्य अत्यन्तंस्पृहणीयस्यगुणातिशयस्यदर्शनेन विमुग्धहृदयस्तं प्रियसखत्वेन निर्दिश्य "तत्किं निजे परिजने कदनं करोषि, नन्वेष दर्पनिकस्तव चन्द्रकेतु"रिति द्वन्द्वसंप्रहारायाह्वयति । चन्द्रकेतोर्वीरवचनेन प्रसन्नकर्कशेनावर्जितस्वान्तो लवो रथादवतरन्त-मवलोक्य रथस्थ एव योद्धुमर्हसीति ब्रूते, तदा चन्द्रकेतुः 'तर्हि महाभागोऽप्यन्यं रथमलंकरोत्वित्यभ्यर्थयते, तदा 'आर्य प्रत्यारोपय रथोपरि राजपुत्रम्, इति सुमन्त्रमनुरुणद्धि । सुमन्त्रोऽपि 'त्वमप्यनुरुध्यस्व वत्सस्य चन्द्रकेतोर्वचनमिति प्रतिवक्ति लवस्य च "को विचारः खेषु उपकरणेषु । किन्त्वरण्यसदो वयमनभ्य-स्तरथचर्याः" इति दर्पसौजन्यभरितां वाचमुपश्रुत्य तमभिनन्दन् 'यदि त्वामीदृशमैक्ष्वाको राजा रामचन्द्रः पश्येत्तदाऽस्य हृदयं स्नेहेना-भिष्यन्देत' इति रामचन्द्रं प्रशंसति तेन क्षुब्धहृदयो लवः स्पृहणीये यज्ञकर्मणि विघ्नमाचरन्तमात्मानमपराधिनं प्रतिपादयन् अश्वानुयायिनां तादृशं सकलक्षत्रपरिभवनपरां वाचं सोढुमशक्नुवान एव युद्धं कर्तुं सन्नद्धइति प्रतिपादयति, तदा सुमन्त्रः परशुरामविजयेन रामचन्द्रस्य प्रशस्तिं गायति, लवश्च ब्राह्मणस्य वाग्वीरस्य शस्त्रग्राहिणः परशुरामस्य विजये न कोऽपि तस्य राज्ञः प्रशस्तिर्भवितुमर्हतीत्याक्षिप्य राम-चन्द्रस्य सुन्दस्त्रीहननं, खरायोधने पश्चात्पदत्वयानुधावनमिन्द्रसूनोश्च निधने निभृततया अवस्थानं सर्वथा अनुचितमित्युपहसति । तदानीं तातापवादभिन्नमर्यादस्य लवस्योपरि चन्द्रकेतोः समधिकः संरम्भो जायते, लवश्च 'अये मय्येव भ्रुकुटिधीरः सम्पन्न ।' इत्युद्दीपन् युद्धाय प्रवर्तते । ततश्च तयोर्भुवनभीमम् आयोधनं प्रवर्तते ।

(सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मफलम्

अनुवृत्तम्

लेखकः - श्री रवीन्द्रनाथ ठक्कुरः

शशधरः — भ्रातर्मन्मथ, सतीशस्योपरि अत्यन्तं निष्ठुरमाचरितुं व्यवसितोऽसि । इदानीमस्य वयः परिपक्वम् । एतस्य एतादृशं निष्ठुरं शासनं न शोभते ।

विधुमुखी — किं करोमि रायमहाभागाः, बहुधा मया विबोधितोऽपि न शृणोति ।

मन्मथः - अपराधद्वयं युगपदारोपितम् —एको वदति —निर्दयोऽहम्, अन्या वदति निर्बोधोऽहम् । यया हृतमानसोऽहं तदुक्तिं सोढुं सन्नद्धोऽस्मि, तस्याः भगिन्या उक्तावपि नाहं प्रतिवादं करोमि । तदिति तस्या भगिनीपतेरपि वचनं नैव सहनीयं भवेत् ! कथं मम व्यवहारः कठोर इति श्रोतुमिच्छामि ।

शशधरः —सतीशहतकस्य सुपरिच्छदे लालसा आस्ते । स किल भद्रलोकानां गृहं याति । त्वं तावदेनं रौप्यपरिच्छदं —

मन्मथः—न मया रौप्यपरिच्छदो व्यवहर्तुमादिष्टः । वैदेशिकपरिच्छदधारणं मम चक्षुषोर्विषमिव प्रतिक्रियां जनयति । वस्त्रमुत्तरीयं चण्डातकं कञ्चुकमित्यादीनां धारणं नैव लज्जायै प्रकल्पेत ।

शशधरः —सतीशो यदि वयस्यस्मिन् स्वकीयां लालसां न पूरयति, तर्हि वृद्धे वयसि किं वा करोतु, तदानीं समधिकं हासाय प्रकल्पेत । किञ्चिद्विचारय । बाल्यादारभ्य या सभ्यतेति शिक्षिता, हठात् तस्या आक्रमणं नैव ससमञ्जसं भवति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्मथः- यस्तथा सभ्यो भवितुमभिलषति, स तादृशसभ्यताया व्ययभारं वहतु । यतः सभ्यता प्रसरति, न ततोऽर्थः समापतति, प्रत्युत इतस्तत्र याति ।

विधुमुखी—रायमहाभागाः नैनं बोधयितुं शक्नुयुः । देशकथायां प्रस्तुतायामयमस्थिरो भवति ।

शशधरः—भ्रातर्मन्मथ, अहमपि तत्सर्वं जानामि। तदिति बालानां लालनं नैव प्रत्याख्यातुं शक्यते। सतीशस्तावत् भादुडीपरिवारेण साकं मिलितुमारभते। उपयुक्त परिच्छदस्याभावे मनसि खेदो जायेत। तदर्थं मया रास्किन सहकारिकेन्द्रात्—

(भृत्यस्य वैदेशिक परिच्छदेन साकं प्रवेशः)

भृत्यः—सोऽयं परिच्छदो रास्किनसहकारिकेन्द्रादुपलब्धः।

मन्मथः- इतोऽपसारय एतम्, इतोऽपसारय एतम् । (विधुमुखीं प्रति) सतीशं यद्यहमनेन परिच्छदेन परिहितं पश्यामि, तर्हि नाहं तं गृहेऽवस्थातुमनुजानीयाम्, छात्रावासं प्रेरयेयम । तत्र स यथेष्टं स्थातुमर्हति (द्रुतं प्रास्थितः)

शशधरः—सर्वमत्यद्भुतम् !

विधुमुखी—रायमहाभागाः, किं वा भवतां पुरतो वक्तव्यम् ? मम जीवनं नैव सुखाय। पुत्रस्योपरि पितुरेतादृशी निरनुक्रोशता न कदाचित् दृष्टपूर्वा ।

शशधरः—मां प्रत्यपि तस्य व्यवहारो नैव स्पृहणीयः प्रतिभाति । मदुक्तिमववारय । तस्य उदरदोषो वर्तते, सम्यगेनं भोजय। यथा वाऽसौ प्रलपतु नाम समीचीनैरुपकरणैरुपस्कृतं व्यञ्जनादिकं यदि दीयते, अरुचिर्नैव भविष्यति, अजीर्णं ताऽपि नैव सम्भवेत् । कियन्ति दिनानि यदि त्वं सम्यग् भोजयेथा तर्हि स तव वचनं शृणुयात् । एतद्विषये तव भगिनी त्वत्तः समधिकं जानाति। (प्रस्थितः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(विधुमुखी क्रन्दति)

विधवा जाता (प्रविश्य आत्मगतम्) कदा रोदनम् कदा वा हासः । प्रेम्णो विचित्रा गतिः । (दीर्घं निश्वस्य) किं मानागारे तिष्ठसि ! भवतु, देवरं प्रेरयामि । मानभञ्जन-प्रहसनं प्रचलतु ।

अष्टमः परिच्छेदः

नलिनी—किमर्थमाहूतोऽसि—वदामि, मा अभिमानं कुरु ।

शतीशः—किमहमहृदयो येन तवाह्वानेनाभिमानं करवाणि ।

नलिनी—मा भूदति प्रसङ्गः । सर्वेषु विषयेषु नन्दिसाहेवस्य शिष्यत्वं न कुरु, ब्रूहि—मम जन्मदिवसे किमर्थमेतादृशं महार्घं वस्तु उपायनीकृतवानसि ।

सतीशः—यस्यै समर्पितम्, तस्यास्तुलनया नैतद्बहुतरं भवति ।

नलिनी—अये पुनरपि नन्दिनमनुकरोषि !

सतीशः—जानान एव तमनुकरोमि यतो व्यक्तिविशेषस्य तस्मिन् पक्षपातः—

नलिनी—तर्हि गच्छ । न त्वामालपामि ।

सतीशः—अस्तु, मर्शय माम् । जोषमास्थाय शृणोमि ।

नलिनी—पश्य सतीश, नन्दिमहाभागो निबोध इव एकं बहुमूल्यं केयूरं प्राहिणोत्, त्वं निर्बोधतायां तमतिशय्य ततोऽप्यधिकं हारं प्रहितवानसि ।

(सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ॐ

गौतम बुद्धबोधाः

लेखकः—श्री विश्वनाथ सोमशर्मा साहित्यविद्या प्रवीणः

यद्यपि अस्मदीये भारतदेशे वेदकालादारभ्य बहूनि मतानि संति, तथापि, चिरातसुप्रतिष्ठितं, जनैर्बहुभिरादृत मद्याप्यादृियमाणं च मतं गौतमबुद्धसंबंध्येकमेवेति निर्विवादम्। द्वैत, विशिष्टाद्वैता-द्वैत वैदिकधर्माणां सत्त्वेऽपि, विशिष्टैः कर्मकाण्डैः बहुभिर्नियमैश्च बद्धतया, लाघवं सौकर्यंचापेक्षमाणानां जनानां बौद्धधर्माश्रयणे न किमप्याश्चर्यम्।

श्रीमान् गौतमबुद्धोऽपि,अस्मदादयइव अस्मद्भारतदेशएवोत्पन्नः, वृद्धिं गतः, निर्वाणं च प्राप। गौतममत मवलंब्यैवअशोकोऽपि महाकीर्ति-संपन्नोऽभूत्। एवमेव बहवो नेतारः बौद्धमतावलम्बनेनैव देशस्य संघस्यापि महोपकारं चक्रुः। अद्यास्माभिः परिदृश्यमानाः, रथ्याः, वृक्षाः, देवालयाः, परिषदः, वैद्यालयाः, विश्वविद्यालयाः धर्मसभाश्च, गौतमबुद्धोपज्ञा एव, अतएव तन्मतस्य मतांतरेभ्य अद्याप्यन-वच्छिन्ना प्रतिष्ठा।

गौतमबुद्धमते "बुद्धं शरणं व्रज धर्मं शरणं व्रज संघं शरणं व्रज इति त्रीणि मुख्यसूत्राणि। तैस्सह चान्योऽपि पंचशीलादिनिर्णयश्च दुःखनिवारणोपायतया कृतस्तेन महात्मना।

तत्र हिंसा, चौर्य, व्यभिचारासत्य,सुरापानानामभावः (मकरणं) पंचशीली)।

दुष्टान्नभोजनाभावः, सुगन्धद्रव्येष्वनासक्तिः, भूमौ कटमा-स्तीर्य शयनमिति त्रयाणां मेलने अष्टशीली।

नाट्यदर्शन, गानश्रवणादिषु अभिलाषाभावः स्वर्ण रजता दिष्वनासक्तिरिति द्वयमेलने दशशीली—शीलदशकेन सह "करुणा,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मैत्र, मुदितो,पेक्षाऽशुभभावनाः इति भावनापञ्चकमपि कृतवान् । ईदृशान् सदाशयान् प्रकटीकृत्य शाश्वतीं कीर्तिमाप श्री गौतमबुद्धः । प्राय स्सर्वेषां जनानामावश्यकतया पञ्चशीलाद्याचरणम् अधुनातनानां भारतीयानामत्यं तावश्यकमिति महताताशयः ।

कपिलवस्तुनगरप्रान्तीयलंबनि वने मायादेव्या गर्भात् आविरभूत् । जैन बौद्धधर्मेषु प्रधानो धर्मः अहिंसा । तत्प्रतिष्ठापनाय धर्मसंस्थापनार्थाय स महात्मा प्रथमतः लोके सर्वत्र परिदृश्यमानं, मृगया, कुटुम्ब, यात्रा, यज्ञ, निमित्तक हिंसाचतुष्टयं निरूप्य, तन्निवारणपूर्वक-महिंसां निरूपितवान् ।

तत्रादौ मृगयाहिंसां प्रथमतः निरूप्य तन्निवारणपूर्वकम् अहिंसां स्थापयति ।

अथ कदाचिदागर्भश्रीमान् स महात्मा स्ववयस्यै र्देवदत्तादिभि-स्सह विहारार्थं हिमवत्पर्वत प्रांत मगात् । तत्र तरुलतादीनां शोभां, गिरिशिखराणां रामणीयकं, गिरिगुहाभ्यः सानुषु प्रवहतां निर्झराणां मनोहरान् शब्दान् , एकतः हस्तैः वृक्षशाखा अवलंब्य पल्लवान् भक्षयतो मत्तेभान् , अन्यत्र सैकतस्थलीषु यथेच्छं विहरतः वनशूकरान् अपरतः लताकुञ्जेषु इतस्ततः स्वेच्छया प्लवतः मृगशिशून् , अन्यत्र पुष्पितेषु तरुगुल्मलतादिषु यथेच्छं कलकलारावान् कुर्वतः पक्षिसंघान् , अपरत आदृष्टिपातमतिजवेन धावतः मृगसंघांश्च पश्यतः चेतसि अतीवसंतोषस्समजनि । एवं दृष्टि मनोहरान् तत्रत्यान् विषयान् पश्यतो गच्छतस्तस्य विहायसा गच्छन्ती हिमवन्नगकंठलग्ना शंखमालेव हंस पंक्तिः दृष्टिविषयतां गता । अतीवौत्सुक्येन स्ववयस्यै-स्सह तां पश्यति तस्मिन् महात्मनि तन्मध्यात् देवदत्त नामा कश्चन वयस्यः बाणेन तन्मध्यप्रदेशं जघान । स च बाणेन हतः अतीव करुणं रुदन् बाणघातेन रक्तं वमन् भूमौ पपात । तादृशं भूमौ पतितं चञ्चुपुटं प्रसार्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पक्षौ विरन्तौ कृत्वा पादाभ्यां परस्परं ताडयन्तं हंसं दृष्ट्वा संजातकरुणस्स महात्मा सत्वरं हस्तेन गृहीत्वा, प्रसारिते तस्य चञ्चुपुटे जलबिन्दून् कांश्चिन्निक्षिप्तवान्। सतमङ्कमारोप्य लालयन् तस्य हृदयलग्नं शरं शनैरुत्पाटयामास शरोत्पाटनावसरे अतीव वेदनामनुभवतस्तस्यावस्थां दृष्ट्वा करुणार्द्रहृदयः औषधिरसैर्वनमल्लिकारसैश्च बाधापनुत्तये व्रणचिकित्सामकरोत्। अत्रांतरे देवदत्तेन प्रेषितः कश्चन भृत्यस्समागत्य अस्मदीयोऽयं हंसो मह्यं दीयतामित्यवोचत्। तच्छ्रुत्वा गौतमः सस्मितं आः किमेव मुच्यते, यदि भवतो बाणेन हतः प्राणैर्वियुक्तस्स्यात्, तदा भवदीय एवैष हंसः, न च प्राणैर्वियुक्त एषः, तत्कथं भवदीयो भवितेति। स गत्वा गौतमवाक्यं देवदत्तायाकथयत्।

ततः क्रुद्धो देवदत्तः त्वरितमागत्य मृगयाधर्ममनुसृत्य मया बाणेनाहतोऽयं हंसः मदीयएव, तं मह्यं देहीत्यवोचत्। तदा, गौतमः वयस्य त्वया बाणेनास्य विहायसा गमनशक्तिरपहृता, न तु प्राणाः, अतः तदीया गमनशक्तिरेव भवदीया, न तु प्राणैर्युक्त एष हंसः, तदाकर्ण्य दास्यसि वा न वेति कलहं कुर्वति तस्मिन्, गौतमः प्राह, किमावयोः वृथा कालहरणेन, अस्मद्राजसभायां अस्मत्तो वृद्धाः पण्डिताश्च संति बहवः, तान् गत्वा पृच्छावः, ते यथा वदिष्यन्ति, तथा करिष्याव इति। तत्तु तेनाप्यङ्गीकृतम्। राजसभां गत्वा हंसवृत्तांतमवोचताम्। तच्छ्रुत्वा तन्मध्यादेकः पण्डितः निष्पक्षपातया बुद्ध्या एवमवादीत्। वत्सौ, युवां द्वावपि युवानौ, प्रायः धर्मनिर्णयानभिज्ञौ। अतोऽहं भवतोस्संदेहनिवृत्तिं करोमि। लोके सर्वेषां प्राणिनां प्राणाः मुख्यतमाः। तादृशान् प्राणान् दत्वा यः प्राणिनं रक्षति, तस्मिन् प्राणिन्याधिपत्यमपि तस्यैव, नान्यस्य, नास्त्यत्र संदेहः। सर्वैरस्मभिरत्र-त्ययमङ्गीकार्यश्च। यस्तावत्करुणाविहीनः तं हंतुमुद्युक्तस्तस्य कथंवा तस्मिन् आधिपत्यं भवति। अनुमन्यतामिदं सभासदैः। एष सिद्धार्थः दयया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एनं ररक्ष । तस्य बाधामपनीय आहारपानीये ददौ । औषधिरसैः व्रणबाधां निवारयामास, उत निष्करुणतया हन्तुमुद्युक्तस्य भवतःसंबन्धी भवतैवोच्यतां तावत् । एवं महोपकारिणस्तस्य सम्बन्धी भवत्येषः । अपिच मृगयायां शरेण विद्धो जंतुः यावत्प्राणैं र्धृतो भवति तावत्स्तृण-योर्न भवति, सर्वेषां ज्ञातपूर्व एवैष विषयः । अतः राज्ञ स्सिद्धार्थस्यैष हंसः, न भवत इतिस्पष्टवादीत् । धर्मयुक्तानि तानि वचनानि श्रुत्वा शुद्धोदनः स्वपुत्रस्य करुणार्द्रहृदयस्य धर्मतत्परतायाम् अतीव हृष्टः विदुषः धर्मनिर्णयं प्रशशंस । तदारभ्य यस्य कस्यापि प्राणिनः हिंसा महान् पापमिति, अहिंसैव सर्वधर्मेभ्यः उत्तमो धर्म इति लोके यः कोऽपि जीवो मनोवाकायकर्मभिः यं कमपि जीविनं मा हिंस्यादिति प्रबोधितवान् –

गीतसीतावल्लभम्

श्री शितिकण्ठ कविकृतम्

यौ मातापितरौ समस्तजगतां, यौ स्तौति शम्भुर्मुदा,
याभ्यां भूमितलं महार्ध्यमभवत्, याभ्यां क्षिती रोचते ।
याभ्यां मोक्षसुखं, ययोः कृतिरिदं सर्वं, ययोर्लीयते
सीताराघवयोः पवित्रयतु मे चित्रं चरित्रं तयोः ।१।

नीलाम्बरीयपदपङ्कजयुग्मशश्वन्निर्यद्द्रस प्रसरलोलुपचित्तभृङ्गः ।
श्रीरामचन्द्र चरितामृतसान्द्र गर्भमेतं करोति शितिकण्ठ कविः प्रबन्धम् ।२
यदि मतिर्नरतापसमुद्धृतौ यदि रति दुरितौघनिराकृतौ ।
लसदलङ्कृति मञ्जु पदध्वनिं शृणु तदा शितिकण्ठसरस्वतीम् ३।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बाचः श्रीकविचन्द्रवक्त्रगलिताः पीयूषवत्तोषदाः ।
चञ्चद्गाङ्गतरङ्ग सञ्चरि जगन्नाथस्य तावद्वचः ।
काशीनाथ कवेर्गिरश्चिरतरं ध्येयाः सदावासिनी
बाणी कापि च नीलकण्ठ कलिता विद्वन्मनोहारिणी ४॥

विरचितमीनतनो हृतवानसि शङ्खम्
जलधितलाहित वासम्
शङ्कर धुतस्वं तवेद ।

कपटकमठ कठिने धरणी तव पृष्ठे
मिलित तिलालिवदस्ति घरट्टे
धृतक्षिति गुरुभार ।

किरिवररदन मुखे तव राजति धात्री
रजतगिराविव नूतन धात्री
सलीलोद्धृत विश्व ।

तदयति तव नृहरे रिपुहृन्ननखवृन्दम्
रवि घृणिगता इव पद्ममरन्दम्
धृतभीषणरूप ।

कलयसि चरणतले छलवामन मात्रं
दिवमपि हृतबलिमान पवित्रां
धृतभिक्षुकरूप

तव जगतीम यतो जगतां-पतिनाम्नां
परशुपतनमुदितं कृतसाम्नां
हृत धरणि विषाद ।

दशमुखमुखदमुजां स्त्वयि रामरणेऽल्पे
त्रिदश मुखानपि कलयसि कल्पे
हृतशत मख दुःख

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हलधर जलद सखे वसने कुलकेतोः
रुचि रुचिता तव भूशुभ हेतोः
हृतकर्वलिकलमाल

पशुपति भाव्यसुदे तव बुद्धि नं जाता
श्रुतिरपि कल्पित वहुपशुघाता
धृत सकरुण रूप ।

कलयसि कल्किततनो लसदुज्ज्वलखड्गं
म्लेच्छगलावलि रञ्जन षिङ्गम्
राघव ! कृतवीर शरीर विधिनुत
इति शितिकण्ठ कवेर्नवमुक्ति विशेषम्
वलय सुखप्रद.मुज्झित दोषम् । राघव
कृत दशविध रूप । विधिनुत पाहि हरे । १०
वेदोद्धारधुरन्धरं क्षितिधरं दंष्ट्राग्रचंन्चद्धरं
रक्षोभिन्नखराजितं वलिजितं क्षत्रक्षयभ्राजितम् ।
लङ्केशान्तकरं प्रलम्वकपरं कारुण्यनिष्टं परं
म्लेच्छोच्छेदमतिं दशाकृतिर्रतं तं नौमि सीतापतिम् ।

मङ्गलगुर्जरी रागः

मुनिवर विघ्न निवारण । सवकरण
करसरसिज धृतनाग । जय जय दाशरथे ।१।
जनक मनोरथ दायक । नृपनायक
कृतहरकार्म्मुकभङ्ग ।
भृगुपतिमान विनाशन । रिपुशासन
धृतगुरुतर हरिचाप ।
वनगमनाहित मानस । श्रिततापस
विहित धराधर वास ।
कृत दयिता परिमार्गण । धृतमार्गण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वहुविध कलित विलाप ।
कृतगुरु शाल विभेदन । खलसूदन
निजसख सौख्यनिदान ।
पदतल नम्र विभीषण । हृतदूषण
समर दलित दशकण्ठ ।
इति शितिकण्ठ समीरित ।
रचयतु रघुपतिगीतम् ।

पद्मासनस्य रतये मुनिवर्य दीक्षा-
रक्षार्थं माधि दलनाय च मैथिलस्य ।
सुग्रीव वायुज विभीषण भूतयेऽभूद्
यो वालि रावणवधाय च सोऽवतान्न ॥

वसन्तं वैकुण्ठे वरवितरणव्यक्त करुणं
विधि विश्वक्सेनं विरसवहुवर्हिमुं खवृतः ।
वदिष्यन् विस्रब्धं वलदलन विद्विट् वधविधिम्
वरप्राप्त्यावृत्तं विषयमवतादद्रावणभवम् ॥

वसन्तरागः ।

लघुगमनं चलिताखिलमूलमुदेति न कलय समीरे
सुरपर परम मनोहर कानन कम्पन साध्वस धीरे ।
विहरति वलवति जगति दशास्ये
केशव सचिव गणेन समं वलिकलित मदस्फुटहासे । ध्रुवा ।
उन्नत शिखरि शिलाशत सतत भिदाकृति विलसति नाकें
पटुतर रोचिर चिररुचि सम्पदा कम्पितर्ता पुधृत तर्के ॥
दितिज यशोऽधिक निजरुचि सञ्चय विलसन मञ्चति नायम् ।
विधुरपि दधदति भीतिमिलितमति रुपचित कालिमकायम् ॥
मलयज शीतलमवयवमञ्चति कलय समीरणमित्रम्
प्रलय मिहिर करराजि समर कर रुचिभर चित्र चरित्रम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्रिभुवन जीवनिबह दहनोद्यमयमकर मण्डन दण्डम्
विगलित रुचिमवलोकय धृतदय बलिकुल खण्डनचण्डम् ॥
रणमरणाश्रित तरुणम कौणपगण नहनाकृत नाशम्
तृणनिभमहह निभालय सकरुण वरुण श्रयाश्रय पाशम् ॥
धनदमनादरसहमिह मानद निधन भयादिव मन्ये
वलरिपु रपि वलहीन इवापदि मज्जति किं पुनरन्ये ॥
श्री शितिकण्ठलपितमिह रमयतु विवुधमनांसि सन्देहम्
रघुकुलचन्द्र विषयरसवर्ण्णनमपहृत भवदव खेदम् ॥
न तपति पतिरह्नां वाति वाते न भीतो
ज्वलति न शुचिरुच्चैः सान्द्ररश्मिर्न चन्द्रः ॥
यम वरुणधनेशाः स्यन्दितुं देव नेशाः
हरिरपि परिभूतो रावणे राजमाने ॥
उन्मीलत्तपसा विशालमहसा तेनातिभूमौजसा
प्रीतः श्रीगजजं तदन्तिकपदं यातोहमत्यादरात् ?
भट्टिवानरवानरानवरयत्सर्वामरत्वं वरं
रक्षो भक्ष्यधिया न तानगणयत्तैरस्तु तस्य क्षयः ।९।
अद्याभ्यर्ण्णगतान् विवर्ण वदनान् वेदान् विदीर्ण्णान्तरान्
शीर्ण्णान् पालयितुं कृपा यदि हरे तत्तूर्ण्ण माकर्ण्णय ।
मेदिन्यां जनवत्सलो दशरथ श्छिन्नारिरत्युत्सवः
स्वच्छः सत्सवकृत् स वाञ्छति किलापद्यस्व तत् सूनुताम् ।१०।
अजेरितानीति निशम्य केशव श्चतुर्विधं दाशरथित्वमाप सः
समाधिभङ्गाधिकृताधिवाधितोऽथ गाधिजन्मा वसुधाधिपेऽर्थ्यभूत् ।

रामकिरी रागः

सद्गुण सञ्चय चञ्चदचञ्चल चित्त विचिन्तित विष्णो
दानव सङ्गर सङ्गत मङ्गल तुङ्गिमतोषित जिष्णो । १ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जय जय वीर धराधिपते । यशोभर मुपचिनु धर्म रते । ध्रु वा ।
तेजसि भास्वति भास्वति ते रविवंशजमौक्तिक शङ्के
श्रीरिह नृत्यति नित्यमशङ्कित मस्तजले गतपङ्के ।२।
अर्जुन मञ्जमुपेक्ष्य रमा तव कीर्त्तिरुचा कुमुदाभम्
त्वन्मुख मन्दिर मध्यगता सुखमेति हि तद्गुण लाभम् ।३।
मार्गणवर्गविवर्जनकार्यपि नोज्झसि मार्गणमेकम्
पुण्यजनावलिभेद्यपि नेच्छसि पुण्यजनं भुवनेकम् ।४।
नखर नगोन्नतसौधशिखाश्रित चेलकुलं बिलसत्ते
नीति दवज्वलदिति दवोज्झित धूमधियं मम धत्ते ।
पूरय शूर ममेप्सितमाश्रित दूरगते रविकल्पम्
कल्पशतैरपि जल्पतु कोऽपि न कल्पतरोस्तवमल्पम् ।।
अर्पय तर्पित यातकसञ्चय राममम् कुलकेतुम्
स्वल्पदिनान्यपि कल्पित मद्व्रत विघ्न निवारण हेतुम् ।
श्रीशितिकण्ठ गदितमिदमद्भुत राघव बाल चरित्रम् ।
पिष्टपकष्टमनिष्ट समुद्भवमाशु भिनत्तु पवित्रम् ८ ।
विश्वेषां हृदयानि सद्गुण गणैर्बध्नास्यदभ्रायाण्यहो
तच्चैषां शुक्लावतंस नविवौ विरें श्रीरामरत्नं द्रुतम्
प्रायश्चित्तमतोऽस्तु निर्म्मलतरं नाघं यशोनाशनं
निर्विघ्नं मम जायतामतितरां तेनैव दीक्षाविधिः ।।

इति श्री गीतसीतावल्लभे महाकाव्ये विश्वामित्रसमागमो नाम प्रथमः सर्गः ।।

(सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
अनुवृत्तम
लेखकः–श्री पुरुषोत्तम मिश्रः

रामाद्रिरं टु विपिनेष्वनुत्या
सीताचलन्ती व्रतमाचचार ।
शीताचलं तीव्रतमा चचार
विधावमृद्वी च रमाऽपि केऽन्ये ।५६।

अन्वयः–हे राम, अमृद्वी चारविधौ न तीव्रतमा सीता रमा अपि विपिनेषु त्वाम् अनुचलन्ती शीताचलम् आरोढुं व्रतम् आचचार । अन्ये के ?

व्याख्या–हे राम राघवावतार जगन्नाथ, न विद्यते मृद्वी तदपेक्षयाऽधिककोमला यस्या स्तादृशी अत्यन्तं मृदुलेत्यर्थः चारविधौ संचरणकार्ये न तीव्रतमा न शीघ्रं गतिमती मन्दगमनेत्यर्थः सीता-जनकस्य पुत्रिका वैदेहीत्यर्थः रमा लक्ष्मीरपि विपिनेष्वरण्येषु त्वामनु-चलन्ती त्वामनुसरन्ती शीतांचलं हिमालयमधिरोढुमारोढुं व्रतं नियममाचर कृतवती अन्ये के अन्येषां का कथेत्यर्थ । लक्ष्मीरपि यदा त्वदनुसरणं कृतवती, तदर्थं महान्तं क्लेशमपि स्वीकृतवती, तदा सर्वैरपि त्वदनुसरणं कर्तव्यमित्यर्थः । अत्र द्वितीयतृतीयपादयो-र्यमकमलङ्कारः ।५६।

नखरेण विदारिता ययाते—
रघुवीरासि समेन सा चलेन ।
न खरेण विदारिता यया ते
न मनोऽस्याक्षि वधूस्त्वयाऽनु चेन ।६४।

अन्वयः— यया ते विदारिता सा ते वधूः ययातेः समेन येन चलेन खरेण नखरेण विदारिता, अनु नमतः अस्य अक्षि न असि ?

व्याख्या—हे रघुवीर, रघुवंशश्रेष्ठ रामचन्द्रावतार जगन्नाथ, यया सीतया ते तव विदारिता विशिष्टदारवत्ता विशिष्टपत्नीवत्त्व-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मित्यर्थः । सा वधूः पत्नी सीता यद्याते समेन ययातिमहाराज-सदृशेन येन बलेन काकेन खरेण तीक्ष्णेन नखरेण नखेन विदारिता खण्डिता, अनु विदारणानन्तरं नमःतः शरणागति पूर्वकं न्वतादयोः पततोऽस्य काकस्य अक्षि नेत्रमेकमित्यर्थः त्वमा किं नासि न क्षिप्त-मपितु क्षिप्तमित्यर्थः । अत्र प्रथमतृतीय पादयोर्यमकमलङ्कारः ।६०।

त्वदृतेहि दयालुरेव धीमान्
अवनौ कः सुततां करोति चापे ।
त्वदृते रामहि यस्य कीर्तिमैश्यं
न वनौकःसु ततां करोति चापे । ६ ।

अन्वयः—हे राम त्वद् ऋते कः स धीमान् वनौकःसु ततां सुततां करोति ? यस्य करः अतिचापे कीर्तिम् आपे, यस्य च इह अवनौ ऐश्यम् । तादृशः त्वम् दयालुः ऐक्षि ।

व्याख्या – हे राम रामाभावतार जगन्नाथ, त्वदृते त्वां विना कः सः धीमान् बुद्धिमान् वनौकःसु वानरेषु ततां प्रसिद्धां सुततां पुत्रतां करोति न कोपीत्यर्थः । यस्व करो हस्तः अतिचापे अति-शयिते धनुषि कीर्तिमापे यशो लेभे, यस्य च तव इह पृथिव्यः मैश्यं प्रभुत्वं वर्तते । स भवान् दयालु र्दयावान् ऐक्षि जनैर्दृष्टः । अत्र द्वितीयचतुर्थपादपादयोर्यनेकमलङ्कारः । ३१ ।

क्षिप्तैर्धरैरविधनोहे--
नाविलं वलताऽऽमृगैः ।
स्थलता ते भयाद्राम
नाविलम्ब लतामृगैः ॥६२॥

अन्वयः—हे राम, आमृगैः अविलम्बलतामृगैः क्षिप्तैः धरैः अनादिलं वलता अब्धिना ते भयात् स्थलता ऊहे, धरैः न ऊहे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—हे राम रामावतार जगन्नाथ आसम·ततः मृगः अन्वेषणं येषां तादृशै, नास्ति विलम्बः कालक्षेपो येषां तादृशैर्लतामृगै-र्वानरैः क्षिप्तैर्निक्षिप्तैर्धरैः पर्वतैः अनाविलमकर्दमितं वलता चलता अब्धिना ते तव भयात् भीतेः स्थलता ऊहे धृता, धरैः पर्वतै-स्तु नेत्यर्थः। वानराः क्षिताभिः शिलाभिः सेतुमाबध्य समुद्रं स्थ-लवच्चक्रुः। समुद्रश्च ते भीतभीतः केवलं निश्चल आसीदिति भावः। अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः। ६२।

स मेघनादेन सितेऽ—
ह्यस्त्रान्मग्नेन किं हरीट्।
समे घनादेनसि ते
ङ्गेऽरोदीत्क्रीडितं हि तत्। ६३।

अन्वयः—हे राम एनसि मग्नेन मेघनादेन समे ते अङ्गे अह्यस्त्रात् सिते स हरीट् किम् अरोदीत्। हि तत् ते क्रीडितम्।

व्याख्या—हे राम रामावतार जगन्नाथ, एनसि पापे मग्नेन मेघनादेन इन्द्रजिता रावणपुत्रेण समे समचतुरश्रे ते तव अङ्गे अवयवे शरीरे वा घनान्निरन्तरात् अह्यस्त्रान्नागास्त्रात्तद्बकेनेत्यर्थः सर्पैः सिते बद्धे स तव मित्रं हरीणां वानराणामीट् प्रभुः सुग्रीवः किमरोदीदक्रन्दत्। हि यस्मात् तद्बन्धनं ते क्रीडितं विलास खेलन-रूपम् अकिञ्चित्करमिति भावः। तादृश बन्धनस्याकिञ्चित्करत्वात् सुग्रीवस्य रोदनं निरर्थकमित्यर्थः। अत्र प्रथम तृतीय पादयोर्यमक-मलङ्कारः। ६३।

सरोहितै रावण मुत्तमाङ्ग-
हीनं त्व महोऽपि विधातु मीश मे।
स रोहितै रावण मुत्तमाङ्ग—
युतं न वन्धं विलुनासि किं हरे। ६४।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः--हे हरे हे ईश सरोहितैरावणमुग्राङ्गयुतं, रावणं रोहितैः उत्तमुत्तमाङ्गहीनं कर्तुम् अर्हः अपि स त्वं किं मम बन्धं न विलुनासि ?

व्याख्याः-हे हरे विष्णो हे ईश प्रभो जगन्नाथ, सरः स्वक्रीडावापी तत्राहितः प्रेरित ऐरावण इन्द्रगजो येन तादृशम् अङ्गानां हस्त्यश्वरथपदातीनां समूहमाङ्गं, तेन युतं रावणम् उत्तमाङ्गैः शिरोभिर्हीनं विरहितमतएव रोहितेः रक्तैरुत्तं सिक्तं उन्दीधातो र्निष्ठायामुत्तमिति रूपम् । विधातुं कर्तुमर्हः समर्थोऽपि स प्रसिद्धस्त्वं किं किमिति मे मम बन्धं सांसारिकं बन्धनं न विलुनासि हिनत्सि अवश्यं मे संसारबन्धनं छेत्तुमर्हसीति भावः अत्रापि प्रथमतृतीयपादयोर्यमकमलङ्कारः । ६४ ।

कुरु नगरं हसितेन
श्रेयो मयि कामपाल सीरेण
कुरु नगरं हसितेन
प्रोत्कूलितं धनलोप्सया दीने । ६५ ।

अन्वयः:- अङ्ग कामपाल, येन (शीरेण) कुरुनगरं हसितेन प्रोत्कूलितम् ,तेन शीरेण धनलीप्सया नगरं हसि दीने मयि श्रेयः कुरु ।

व्याख्याः-अङ्ग कामपाल कृतबलभद्रावतार जगन्नाथ येन शीरेण लाङ्गलेन कुरुनगरं कुरूणां राजधानीं हस्तिनापुरं हसितेन हासमात्रेणानायासेनेत्यर्थः प्रोत्कूलितं विध्वंसितं सुलक्षणाहरणे इत्यर्थः । तेन शीरेण धनलीप्सया धनलाभेच्छया नगरं हसि लजेषु पर्वतष्वपि रंहो वेदोयस्य तादृशे दीने आर्ते मयि श्रेयो नगेषु कुरु धेहीत्यर्थः । अत्रापि प्रथमतृतीयपादयोर्यमकमलङ्कारः ।६२।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

का नाम समता ?

(अनुवृत्ता)

लेखकः—श्री स्वामी आत्मानन्दमुनिः ।

परमार्थपदं जिगमिषूणां द्वेषस्तावन्महानन्तरायो भवति । द्वेषाविष्टः मध्येमार्गं बहुषु विश्रामस्थानेषु रात्रीर्यापयति । यदि बदरीनारायणाश्रमं प्रतिष्ठमाना जना मध्येमार्गं धर्मशालासु विश्रम्य गच्छन्ति, न तु कुत्रापि चिरमधिवसन्ति, चिरमधिवसन्तश्च द्वेषाविष्टा उच्छृङ्खलमपभाषन्ते, न च गन्तव्यस्थानं गन्तुं प्रभवन्ति, एवमेव ते गन्तव्यं परमपदं न लभन्ते । अतः प्रकृत्या कोऽपि नियमः परिकल्पितः । अन्तिमलक्ष्यलाभात्पूर्वं नान्तरा विश्रामः करणीयः । तादृशि प्रमादे कृते नान्तिमं लक्ष्यं लभ्यत इति । यथा नद्याः प्रबलो प्रवाहः मध्येमार्गं महता शैलेन प्रतिहतः पश्चादभिमुखो भवति, तथैव मध्येमार्गं द्वेषेण परितो जनः पश्चाद्गन्तुं प्रवर्तते ।

प्रकृतिराज्ये क्रियाचेष्टाया महत्त्वं किमपि नास्ति, किन्तु महत्त्वं वर्तते केवलं क्रियायाः कर्तुरान्तःकरणभावस्य । तस्यैव महत्त्वेन साधारणी चेष्टाऽपि महत्त्वशालिनी भवति । भावस्य च ह्रासे महत्त्वशालिनी चेष्टाऽपि निरर्थिका परिणमति । अस्मिन् प्रसङ्गे निष्कामकर्मणः स्वरूपं विचारयामः । सत्त्वरजस्तमसां सम्पर्कान्निष्कामं कर्म त्रिधा विभक्तुं शक्यते ।

(क) तदेव सत्यं सात्त्विकं निष्कामं कर्म यथा लोकसेवा-जातिसेवा प्रभृति । सा सा सेवा प्रथमतस्तत्तद्विषयेषु प्रवृत्ता परिणामे भगवत्सेवारूपेण परिणमति । अर्थात् भगवत्सेवेति धियैव जनस्ता दृशीं सेवां करोति । स चाहं लोकानुद्धरामि, जातिमुद्धरामीति भावनाया दूरे तिष्ठति । कामनाविरहितः केवलं भगवत्सेवैव क्रियत

Funding by IKS-MoE

इति धिया करोति। प्रतिदिनं च तस्य तादृशो भावः प्रौढ़त्वमधिगच्छति। 'सोऽयं देव एव मे हृदयस्यान्तर्वर्तमानस्तादृशसेवाया अवकाशं ददाति, स एव एवं विराड्रूपेण प्रकटितो दृश्यते। अतो मया आत्मनः सौभाग्यस्य सफलीकरणाय स मां यां प्रेरणां ददाति, सा सा सूत्रधारस्य सङ्केतेन नृत्यन्त्या काष्ठपुत्तलिकयेव पूरणीया। कोऽहं संसारस्य विप्रतीपं मार्गं रोद्धुम्, यतोऽयं संसारोऽस्य लीलामात्रम् न चास्य लीलायां मम स्वत्वमस्ति, न च संसारस्य विप्रतीपो मार्गो मया समाधातुं शक्यत' इति विचारमति। स्वयं भगवतः श्रीमुखस्यायं निर्देशः—

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥

(गीता-१८-४६)

इदमेव प्रकृतं सात्त्विकं कर्मोच्यते। इदमेव सात्त्विकं कर्म वारंवार मावर्तनैः हृदये सात्त्विकीं भक्तिं संचारयति। सेयं च भक्तिर्जिज्ञासुं वैराग्यज्ञानसम्पादनपूर्वकं मुक्तिरूपां समतां प्रापयति। मुक्तिरूप फलदानं विना नास्याः कदापि विलयो भवितुमर्हति। संसारतरण भावनां विनैवेयं भक्तं संसारात् तारयति।

(ख) गौरवं वर्धेतेति धिया यल्लोकसेवादि कर्म क्रियते, तत्सर्वं राजसम्। अत्र भगवत्सेवाऽपेक्षया मनुष्यस्य लोकसेवायामेव संरम्भः। संसारं च सत्यं मन्यमानस्य अस्य राजसकर्मिणः सांसारिकप्रमादापनोदनार्थं दृढा कटिबद्धता दृश्यते। अस्य पक्षे वस्तुतो ज्ञानस्य व विलासः, तत्त्वदृष्ट्या संसारस्य संशोधनमपि अज्ञानं भवति। उत्पन्नस्य वस्तुनः संशोधनं सम्भवति। अत्र आकाशकुसुमायमानस्य उत्पत्तिर्नास्ति, कुतो वा संशोधनमिति तदेतदज्ञानमन्तरा नान्यद् भवितुमर्हति, संसारस्तु नैवोत्पद्यते, स्थित एवास्ते। अतएव

Funding by IKS-MoE

सृष्टेरारम्भादद्य यावत् श्रीराम शङ्कर प्रभृतयो बहवोऽवतारा:, श्रीवशिष्ठ व्यासवाल्मीक्यादयो महर्षय: प्रादुर्भूता: । इदानीमपि लोकमान्यतिलक-महात्मगान्धि प्रभृतयश्च प्रादुर्भवन्ति । संसारस्तु यथायथ एवास्ते । परन्तु उन्नतिस्थाने ऽवनत:, शान्तिस्थानेऽशान्तिश्च अत्र परिलक्ष्यते इत्युक्तौ न किमपि प्रतिबन्धकमास्ते । मद्यं, द्यूतं, चौर्यं व्यभिचार परद्रव्यापहरणादीनि च प्रत्यहं वर्धन्ते । प्रथमतोऽस्माभिरिदमेवात्रधेयं किं तावत्संसारस्य मूलं कथं च तस्योच्छेद: करणीय इति । धनैश्वर्यं-स्वार्थकामनाभोगविलासाद्यर्थं स्त्रीपुरुषयोरुच्छृङ्खला प्रवृत्ति:, सर्वेषां च धार्मिकभावानां समुच्छेद: किमुन्नतिपदेनाभिधीयेत ? किमेषा प्रवृत्तिरेव सुखमित्युच्यते ? तेषां संशोधनापेक्षया समुच्छेद: करणीय: । तथा पश्यतामेतावदवधि न कापि उन्नति: संजाता । वस्तुतो विचारे जीवानां प्राक्तनकर्माणि संस्काररूपेण प्रारब्धरूपं चित्रस्थानीयं संजायते । चलचित्रमिव भगवतस्तत्र रूपस्य प्रकाशे सकलोऽयं संसार: तस्य चित्रस्य प्रतिबिम्बमेव । यदि संशोधनीय: तर्हि स कर्मसंस्कारो, न तु संसार: । कर्मसंस्कार विहाय संसारस्य संशोधनार्थं प्रयत्न: मुखं विहाय दर्पणे प्रतिबिम्बितस्य मुखस्य प्रसाधनमिव । न तेन कोऽप्यर्थ: सम्भवति । कर्मसंस्कारस्य संशोधनं तदा भवति, यदा प्रथम कक्षायां सात्त्विकं निष्कामं कर्म स्वायत्तं क्रियते । तदयं निर्गलितार्थ:—यद्यपि राजसं निष्कामं कर्म कुर्वन् जन: स्वप्रकृत्या संसारस्य संशोधनं जीवनस्य कर्त्तव्यमिति भावयति, मानं सम्मानं च परिहरन् सेवा भावापन्नो भवति । स तु अखण्डं पुण्यं लभेत, परन्तु सत्याया भगवत्प्रेमभक्तेर्वञ्चितो भवति । ज्ञानवैराग्यप्राप्तेश्च कथैव नास्ति । अतएवोक्तम्—

धूमो रात्रिस्तथा कृष्ण: षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ इति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अर्थात् दक्षिणायनमार्गेण गच्छन् चान्द्रमसेन ज्योतिषा स्वर्गमुपगतः क्षीणे पुण्ये मर्त्यलोकं पुनरावर्तते ।

आत्मनः प्रवृत्त्या स्वकीयलक्ष्यानुसारेण यद्यप्यसौ कियता परिमाणेन लोकसंशोधने सफलकामो भवति, तदिदं सफलत्वं चिरं तिष्ठेदिति वक्तुं न शक्यते। यतो मायाराज्ये न किमपि स्थिरं स्थातुं शक्नोति निर्गलितार्थस्त्वयम्—मनुष्यो यथा यथा प्रकृतेः प्रभावात् रागद्वेषयोरभिवृद्धिर्भवति, तथा तथाऽसौ निष्कामकर्मणः कक्षातोऽवनमति । यदि सात्त्विकनिष्कामकर्मणो नियमानुसारेण कर्मभिर्भगवतोऽभ्यर्चनां करोति, तदा प्रेमभक्तिज्ञान वैराग्यमार्गैः प्रवर्तते । परन्तु यदि रजसः प्रभावेण तादृशं विचेष्टमानोऽपि केवलं भावस्य न्यूनतया स तन्मार्गे विमुखो भवति ।

एवमसौ यद्यपि कर्मभिर्भगवतोऽर्चनपूर्वकं सिद्धिं न लभते, तथापि यदि स विशुद्धेनान्तरात्मना भगवते आत्मनः कर्मणां फलमर्पयति, तदा भक्तिमार्गे प्रचलितुं शक्नोति । परन्तु प्रकृतेः प्रभावात् कर्मफलसमर्पणं तदा सम्भवति, यदा लोकसंशोधनस्य वासना शिथिला संजायते । एतद्विपरीततया यथा यथा लोकसंशोधनस्य आग्रहो बर्धते, तथा तथा फलसमर्पणस्य वासना घटत इति नियमः । अर्थात् यदा लोकसंशोधनस्य वासना विलीयते, केवलं लोबसेवैवावशिष्यते, तदैव फलसमर्पणं सम्भवति । यदा वयं लोकसशोधनभावमात्मनि निधाय कार्यक्षेत्रमवतरामः, तदा वयं स्वयमेव प्रभवः सम्पद्यामहे । यतः 'संसारोऽयं विषमः वयं साधव' इत्ययं भावः स्वत उदीयात् ! वयं चाहङ्कारेण भरिता भवामः । तदा का कथा फलसमर्पणस्य ? 'फलं समर्पयामि' इति मुखेनोच्चारणेऽपि न तत्र किमपि स्वारस्यमस्ति यतो या काऽपि वासना फलसमर्पणं च प्रकृतेः प्रभावात् नैवैकत्र स्थातुमर्हतः । यत्र यत्र कामना (वासना)-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
रूप: शव: पर्युषितो भवति, तत्र तत्र रागद्वेषस्वरूपाश्चिल्लगृध्रादयः पक्षिणः सम्पतन्ति । यत्र च हृदये रागद्वेषरूपाणां पक्षिणामाविर्भावो भवति, तत्र फलसमर्पणरूपा पावना भावना कथमायास्यति ?

निष्कृष्टार्थस्तु लोकसंशोधनस्य फलं पुण्यं लोकसेवायाश्च प्रेमा भक्तिर्वा । तदिदमस्माकमभिमतम् ।

(ग) तामसं च निष्कामकर्म तदुच्यते, या किल लोकवासनेत्यस्ति । अयं संसारो मां मानयेदिति सम्मानवृद्धि मनसि निधाय साभिमानं लोकसंशोधने प्रवर्तते, तत्र च लोक संशोधने सम्मानमेव मुख्यतया गणयति । 'मा भूत् मम सम्मानस्य भङ्ग' इति भावनायां हृदये विद्यमानायां कर्मक्षेत्रे न निर्भयं प्रवेष्टुं शक्नोति । यत्र यत्र सम्मानाभि वृद्धि वासना वर्तते, तत्र तत्र रजो-गुणस्य साम्राज्यं स्वाभाविकमिति नियमः । एतादृशो जनः सात्त्विक-निष्कामको जन इव स्वकर्मभिर्न भगवदर्चनं करोति, नापि राजस-निष्कामको जन इव फलसमर्पणं कर्तुं प्रभवति । एतदर्थं प्रेमा भक्तिः ज्ञानं वैराग्यं च न संभवति तथा पुण्यभोगाय नैव स्वर्गप्राप्ति र्भवति । अपि च यया मात्रया लोकानां हितानि साधितानि भवन्ति, तया मात्रया स सम्मानस्य पात्रं भवति । एतद्विपरीततया लोकहितं यदि न साधयते, तर्हि मानस्य स्थानेऽपमान एव पदमादधाति ।

निष्कृष्टार्थस्तु लोकसंशोधनं लोकसेवा एकवत् प्रतीयेतां नाम, तथापि गुणानां भावानां च तारतम्येन उभे आकाशपाताले इव भिद्येते । भाववशाच्च केवलं सात्त्विकएव निष्काम भक्तेः प्रेम्णश्चा-धिकारी भवति ज्ञानवैराग्य मार्गयोश्च प्रवर्तते ।

एवं रीत्या सैयं यथार्था उपासना, या कस्या अपि सांसारिक्या वासनायाः कामनायाश्च सम्पर्कं विना केवलं भगवतो स्मरणम्,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अर्चनम् वन्दनं च विषयीकरोति । सेयं धारणा हृदयस्य विशुद्धतायामेव सम्भवति ।

"एषु सर्वेषु विभिन्नेष्वपि देवविग्रहेषु एकैव मे इष्टदेवता विहरति । स एव हि सर्पहारं विपुलं शुण्डं च धारयन् शिवगणेशरूपेण प्रकाशते । तथा विराजमान एव हि सं मम मनः परीक्षते—किमहं तं परिचेतुं शक्नोमि उत न । यथा महाराजाधिराजः सभायामन्तःपुरे मृगयायां च विभिन्नवेशान् धारयन्, विभिन्नवेशानां धारणेऽपि स्वयं न भिद्यते, तथा ममापीष्टदेवता विभिन्नगणेश शङ्करादिरूपै विराजमानाऽपि नैव भिन्ना भवितुमर्हति । यथा—सेवकस्तथा विभिन्नैर्वेशै विराजमानमपि नैव विभिन्नं कलयति एकमहाराजरूपेण नमस्करोति, तथैवाहं विभिन्नरूपैःप्रतिभान्तीमपि तां मनेष्ट देवतामेकां कलयामि समानरूपामेव तां भजामि ।' इयमेव भक्तशिरोमणे स्तुलसीदासस्योक्तिः । स च कदाचिद् वृन्दावने उपस्थितः, तत्र च मुरली मनोहरं त्रिभङ्गेन विराजन्तं भगवन्तं स्वेष्टदेवतात्वेन जग्राह, भक्त्याप्लुतश्च उवाच "प्रभो अद्य तु त्वं विचित्ररूपेण प्रतिभासि, परन्तु अहं त्वां तदा नमस्करोमि यदा त्वं मे धनुर्बाणहस्तः पुरतः प्रकटितो भवसि । श्रूयते—भगवान् धनुर्बाणहस्तस्तस्याभिलाषं पूरयामास । अतएव गीतायामपि स्वयं भगवता प्रतिपादितम्—

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥

इयमेव सात्त्विकी प्रेमभक्तिरित्युच्यते परन्तु यदि कोऽपि एकस्मिन् देवे परमासक्त इतरं देवं द्वेष्टि दूषयति च यथा वैष्णवः शिवं शैवश्च विष्णुं, तस्येयं भक्ती राजसिकी भवति । अतएवायं स्वकक्षायामेव भ्राम्यति । यद्येताद्दशो जनी विपद्विध्वंसन-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
धनपुत्रादिकामना परवशश्च भक्तिं करोति, तदेयं भक्तिस्तामसिकी भवति ।

(छ) सात्त्विक्याः प्रेमभक्तेरभ्यासेन यदा मनोवृत्तिर्विमलगङ्गाधारेव भगवच्चरणाभिमुखी प्रधावति, तदा, सांसारिका रागद्वेषादयः स्वतएव हृदयादपसर्पन्ति । रागद्वेषादीनां चापसर्पणात् तदभावरूपं वैराग्यमुदेति । वैराग्यस्य च दृढतायां तस्य जिज्ञासा रोगिणो दोषेष्वपहृतेषु क्षुत्प्रवृत्तिरिव प्रखरा भवति । तत्त्वजिज्ञासायां स सद्गुरुमाश्रयते वैराग्यस्य च प्राकृतिकस्य प्रभावेण गुरोरुक्तिषु अचला भक्तिः स्वत एवोदेति । एवं रीत्वा पूर्णतया सत्त्वगुणस्य विकाशे श्रद्धादेव्या दर्शनं सम्भवति । सेयं श्रद्धा समताया जननी भवति । अतएव भगवतः श्रीमुखादिदमुदितम्—

"अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ।" इति
"श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः, स एव सः इति च ।

श्रद्धयैव हि प्रकृतया लक्ष्यं स्थिरं तिष्ठति, तदर्थं च विचाराभ्यास उत्तरोत्तरं वर्धते । अर्थात् श्रद्धया लक्ष्यं स्थिरं क्रियते, विचारेण च लक्ष्यं भेद्यते । प्रथमतो यदि लक्ष्यं स्थिरं न भवति, तदा लक्ष्यभेदस्य प्रसक्तिरेव न सम्भवति । यदा प्रत्यक्षेऽस्मिन् संसारे श्रद्धां बिना नास्माभिः किमपि शिक्ष्यते । तदा अप्रमेये ब्रह्मस्वरूपे श्रद्धां विना कथं किमपि ज्ञानं सम्भवेत् । अत उच्यते, श्रद्धारूपघोटकमारुह्यैव विचारसादी अग्रेसरो भवति । श्रद्धाया अभावादेव एकेनैव विचारेण देहस्य संसारस्य च बन्धनं भवति । अतो विचारेण तस्य निवृत्तिः करणीया । विचारस्य परिपक्वतायामेव हृदये ज्ञानस्योद्बोधः संजायते ज्ञानेन च देहाभिमानरूपमज्ञानम् । अहमेव पापपुण्ययोः कर्ता,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
सुखदुःखयो र्भोक्ता, जन्ममरणयोश्चाधिकारीत्य वं रूपं नश्यति ! तदानीमेव सत्वस्य ब्रह्मस्वरूपस्य साक्षात्कारो भवति । यथा समुद्रस्य तरङ्गः स्वस्य तरङ्गत्वं विहाय सत्यसमुद्ररूपेण परिणमति, तथैव संसार संग्रामस्य विजेता वीरः स्वं देहाभिमानं परित्यज्य साक्षाद् ब्रह्मस्वरूपेण प्रतिभाति । तदा स समुद्र इव विधिनिषेधरूपमर्यादाया मुक्तो भवति, तदा किमपि कुर्वन्नपि न करोति, यतस्तदानीं सम्पूर्णजडचेतनया केवलं सत्यस्वरूपं ब्रह्म विजानाति स्वप्नवत् भेददृष्टयस्तिरोहिता भवन्ति । इदमत्र भगवतः श्रीमुखोदीरितं वाचनम् ।

"सर्वभूतस्थितं यो मां भजत्येकत्वमाश्रितः
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते इति ।"

इयमेव समता । इयमेव मानवजीवनस्य प्रकृतं लक्ष्यम् । साक्षात् परस्परया वा (directly or indirectly) ज्ञातसारमज्ञातसारं वा प्रत्येकं मनुष्यस्य अनुधावनमस्याः समतादेव्या आलिङ्गनार्थमेव । तत्र चौपस्थितौ तस्य प्रकृतं दर्शनं सम्भवति । अस्याः प्राप्तावुपायान्तरं नास्ति, नापि सम्भवति । परन्तु मनस्येतदवधातव्यमुपर्युक्तरीत्या वलिदानं विना अस्या महादेव्या दर्शनं कर्तुं न प्रभवति । एतदर्थं सोपानारोहणं वलिदानादनन्तरमेव सम्भवति । तादृशवलिदानार्थं च स्त्रियः पुरुषाश्चाधिकारिणः । तदर्थं न कस्यापि देशस्य जातेर्वा आवश्यकता भवति । एवं रीत्या अनया सह साक्षात्कारो भवति, ततः प्रभृत्यस्या वियोगो न घटते । प्रलयकालीनोऽग्निरपि नास्मान् ततो विश्लेषयितुं प्रभवति ।

अयै समताभिलाषिणः उत्तिष्ठत, अस्यै आत्मनो वलिदानं दातुं कटिबद्धा भवत । गच्छत, नान्या गतिर्वर्तते, अद्य आहोस्वित्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
श्वोऽवश्यं वलिदानं कर्तव्यम् । हसन्तो यदि न दास्यथ, तदा प्रकृत्या दण्डेन नियन्त्रिता दास्यथ । अतो हसद्भिरेव वलिदानं श्रेयः । तेन मानवस्य स्वं रूपं प्रकटितं भवति । अन्यथा देहाभिमानेन, तत्फलरूप ममतया च स्वार्थकामनासंयता यदि दास्यथ न तेनैषा महादेवी कदाचिदपि प्रसीदति प्रत्युतैषा प्रकुपिता भवेत् । स एष अस्याः स्वभावः । प्रकुपिता त्वेषा महाकालीरूपं स्वीकृत्य लसन्तीं जिह्वां प्रसार्य, अष्टाभि र्भुजैरष्टावायुधानि धारयन्ती रक्तलोचना अस्माकं पुरत आविर्भविष्यति । तस्माद दस्माभिर्नतमस्तकैरस्याः सन्तोषः साधनीयः ।

(सावशेषम्)

आधुनिक संस्कृत परिसंवादः

(सागरविश्वविद्यालयतः)

संस्कृतसाहित्यस्यावर्चीनकालमधिकृत्य २१-५-६५ दिनांकतः सागरनगरे विश्वविद्यालयस्य संस्कृतविभागेन समायोजितो दशाहव्यापी परिसंवादः । इदं प्रथमतया परिसंवादेऽस्मिन् खृष्टीय–१६०० वर्षाद् यद्विपुलं साहित्यं संस्कृते निर्मितं तस्य पुङ्खानुपुङ्ख विवेचनमत्रत्यैः समागतैश्च विद्वद्भिः कृतम् । सार्धत्रिशतवर्षप्रसारी खल्वयं कालः संस्कृत साहित्येतिहासकारैश्चिरन्तनैः कीथप्रभृतिभिरुपेक्षित एव । अथ च नायं कालः साहित्यक्षेत्रे बन्ध्यो गौणो वा । सहस्रशः संस्कृतज्ञाः

एतादृशानां परिसम्वादानां सर्वथा आवश्यकता वर्तत इति सागरविश्वविद्यालयस्य संस्कृत विभागः सर्वथा अभिनन्दनीयो भवति ।

"मनोरमा"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिशतकमसंख्यान् ग्रन्थान् विरच्य संस्कृतभारतीं समेधितवन्तः । संस्कृतविभागेन विश्वविद्यालयानुदानायोगाल्लब्धेन साहाय्येन परिसम्वादोऽयमायोजितः । त्रिंशत्प्राया आगमवृद्धाः समागतास्तैः सर्वैः साकल्येन त्रिंशच्छोधनिबन्धाः पठिता विमर्शविषयीकृताश्च ।

श्रीमदुपकुलपतेर्गणेशप्रसाद भट्टपादस्याध्यक्ष्ये २१ मई दिवसे सायं सप्तवादनवेलायां प्रो० गो० श० त्रिगुणायतमहोदयेन परिसंवादस्य समुद्घाटनं कृतम् । आदौ परिसंवादसंचालकः संस्कृत विभागाध्यक्षः श्रीरामजीउपाध्यायः सागरविश्वविद्यापीठप्रवर्तकं स्वर्गतहरिसिंहगौरमहाभागं सश्रद्धं सभाजयन् संस्कृतसाहित्यस्य भारतीयसंस्कृतेश्च महत्त्वातिशयं व्याख्यातवान् । अर्वाचीनसंस्कृत साहित्यं प्रति यदवहेलनं संस्कृतजगति दृश्यते तत्सर्वथा संस्कृत-साहित्यस्योन्नतिपथस्य रोधकमिति विचार्य संस्कृतज्ञैः सावधानैर्भवितव्यम् । सार्वदेशिकीयं भाषाद्यापि काव्यनाटकनिबन्धादीन् सूते इत्यहो अविचारिताभिधानं संस्कृतं मृतभाषेति । निरवच्छिन्ना संस्कृतवाङ्मयधारा सर्वेषां मनोयोगमर्हतीति बुद्ध्यैव परिसंवादस्यास्यायोजनं कृतम् । तदर्थं ये विद्वांसोऽत्र समागतास्तेषु वयं कृतज्ञा इति प्रोक्तमुपाध्यायेन । पश्चादुपकुलपतिमहाशयैः सहर्षं स्वागत-भाषणेनाभ्यर्थिता अतिथयः । मानवानामुत्तमं कल्याणं ज्ञानमार्गानुसरणेनैव साध्यमित्यासीत्तेषां मनीषा । प्रयासोऽयं सफलो भूयादिति भूयोभूय आशास्य संस्कृतसेवायै सर्वे तैः प्रणोदिताः । प्राध्यापिकया कु० अर्चनया मङ्गलाचरणं गीतम् ।

ततः समुद्घाटन भाषणं त्रिगुणायतमहाशयेन सामरब्यम् । मुद्रिते तस्मिन् संस्कृतभाषणे आधुनिक संस्कृत हित्यस्य बहुमुखो विकासस्तैः प्रतिपादितः । साहित्यस्य सर्वे एव प्रकारभेदाः संस्कृतेऽद्यापि दृश्यन्ते, प्रतिदिनमुपचीयन्ते च । तेषामध्ययनं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नितरामावश्यकमिति तैः प्रतिपादितम् । परिसंवादायोजनमवश्यं महते फलाय स्यादिति तैराशा प्रकटीकृता । तदनन्तरं नागपुरवास्तव्येन श्रीधरभास्करवर्णकरमहोदयेन आधुनिकसंस्कृतस्य महत्त्वं मूल्यं चाधिकृत्य सुदीर्घं तथ्यपूर्णं च संस्कृतभाषणं कृतम् । धनं सम्मानं चालभमाना अपि ये जनाः संस्कृतस्य सेवायां निरतास्तेऽवश्यमेव सर्वेषां श्रद्धास्पदम् । न चैतत्कालिकं वाङ्मय विस्तारविषयबाहुल्यगुणोत्कर्षैः परिहेयम् । अस्यां स्थितावर्वाचीनसंस्कृतमधिकृत्य विमर्शगोष्ठीयोजना नितरां सागरविश्वविद्यालयस्य तत्परं संस्कृतानुरागप्रकर्षं सूचयतीति तैर्महाभागैरुद्घोषितम् । अन्ते परिसंवादमन्त्री डा० विश्वनाथ भट्टाचार्यो धन्यवादनिवेदनमकरोत् । तेनोक्तम्–संस्कृतेनैव वयं जीवामः । संस्कृतं हि भारतीयानामात्मीयतमा भाषा । सा च भाषा न केवलं प्राचीनतम । अपितु समृद्धतमा तयैव महाकविवन्दितया भाषया अतिथीनां स्वागतं समुचितम् । सर्वेणागतिथीनां कृतज्ञता तेन स्वीकृता ।

विभिन्नेषु दिवसेषु एते विद्वांसः सभापति पद्मभूषयन्-डा० गोविन्द त्रिगुणायतः (मोरादाबाद), डा० .श्रीधरभास्करवर्णकरः (नागपुर), डा० जी० टी० देशपाण्डे (नागपुर विश्व०), डा० रेवाप्रसादद्विवेदि, डा० हरीन्द्रभूषणजैनः (विक्रमविश्व०), पं० वासुदेवशास्त्री (वाराणसी), डा० रामजी उपाध्यायः (सागर) प० चिन्ताहरणचक्रवर्ती (कलिकाता)।

निबन्धाः प्राधान्येन संस्कृते विलिखिताः । हिन्दी–आंग्लभाषायामपि निबन्धाः केचन पठिताः । उल्लेखनीयानि सस्कृतभाषणान्यपि समभवन् । तेषु मालवमयूर सम्पादकस्य पं० रूद्रदेव त्रिपाठिनः संस्कृत पत्रिकाकारस्यानुभवाः, डा० उपध्यायस्य संस्कृत शिक्षाविधिः पाठ्यक्रमश्च, शारदासम्पादक वसन्त गाडगोलस्य संस्कृतपत्रिकासु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राष्ट्र भावना, डा० देशपाण्डे महाशयस्य संस्कृतस्य वर्तमाना स्थितिः (आंग्लभाषायाम्), पण्डिचेरिस्थ श्री अरविन्दाश्रमस्य प० जगन्नाथ वेदालंकारस्य श्री मदरविन्दस्य वेदभाष्यमित्यादीनि महत्त्वपूर्णानि ।

अतिथीनां मनोरञ्जनार्थं द्वे संस्कृतरूपके अभिनीते । सागरविश्वविद्यालयप्राध्यापिकया डा. वनमालाभवालकरदेव्या विरचितं रामवनगमननिर्मितं संगीतमयं रूपकं कन्याभिरभिनीतम् । विद्यार्थिभिश्च कौत्सस्य गुरुदक्षिणेति एकांकं रूपकम् । एतदतिरिक्तं विश्वविद्यालय-अडियोविजुयलविभागस्य साहाय्येन त्रीणि चलच्चित्राणि प्रवर्त्तितानि २९ मई दिवसे सायं श्रीमतो वर्णेकरस्याध्यक्ष्ये संस्कृतकविसम्मेलन-मभवत । तत्र समागता अतिथयः, स्थानीस्याः प्राध्यापद । नगर-निवासिनश्च स्व स्व कविताः श्रावितवन्तः । परिसम्वादावसरे एकदा मध्याह्नगोष्ठ्यां संस्कृतशिक्षाविषये विचारः समजनि । सार्वभौम-संस्कृतप्रचारख्यातः पं० वासुदेवशास्त्री, शारदासम्पादको वसन्त-गाड़गीलः, अन्ये च विद्वांसः स्थितिमेतां विचार्य त्रिभाषासरण्यां संस्कृयस्य स्थापनमवश्यकर्तव्यमिति निर्णयं कृतवन्तः ।

परिसम्वादस्य समाप्तिः ३० मई दिवसे प्रातर्नववादनवेलाया-मभवत् । तत्र सर्वेषामतिथीनां प्रतिनिधीभूय पण्ड़चेरी-आश्रमस्य जगन्नाथवेदालङ्कारेण भाषितम् । विदूषां परिचयप्रदानम्, गीतानि सम्पादकीय विवरणपाठः शुभसन्देशश्रावणमित्यादीन्यभवन् । श्रीमदुपकुलपतेः सञ्चालकस्य डा० उपाध्यायस्य च भाषणानि समभवन् । मन्त्रिणा निवेदिते धन्यवादप्रकरे परिसम्वादो विसर्जितः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

म नो र मा

मासिक संस्कृतपत्रिका

ललितैः पदविन्यासैर्विचित्रैर्भावबन्धनैः ।
भावुकानामन्तरङ्गं प्रतिभातु मनोरमा ।।

पञ्चमो वर्षः } १८८७ शकाब्दम्, ज्यैष्ठाषाढौ मासौ { तृतीया चतुर्थी
June and July, 1965 { च सञ्चिके

सुभाषितानि

अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।
यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ।१।

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति शस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ।२।

रत्नाकरः किं कुरुते स्वरत्नैर्विन्ध्याचलः किं करिभिः करोति ।
श्रीखण्डखण्डैर्मलयाचलः किं परोपकाराय सतां विभूतयः ।३।

श्लाघ्यः स एको भुवि मानवानां स उत्तमः सत्पुरुषः स एव ।
यस्यार्थिनो वा शरणागता वा नाशाविभङ्गाद्विमुखीभवन्ति ।४।

दानाय लक्ष्मीः सुकृताय विद्या चिन्ता परब्रह्मविनिश्चयाय ।
परोपकाराय वचांसि यस्य वन्द्यस्त्रिलोकीतिलकः स एव ।५।

व्रते विवादं विमतिं विवेके सत्येऽतिशङ्कां विनये विकारम् ।
गुणेऽवमानं कुशले निषेधं धर्मे विरोधं न करोति साधुः ।६।

सुभाषितैः प्रेम समुन्नतिः श्रिया परार्थनिष्पत्तिपटीयसी क्रिया ।
गुणेष्वतृप्तिर्गुणवत्सु चादरो निगूढमेतच्चरितं महात्मनाम् ।७।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तररामचरित समालोचना

(अनुवृत्ता)

प्रबन्धा—श्रीअनन्त त्रिपाठिशर्म्मा

तदिदं युद्धं रङ्गस्थले प्रदर्शयितुं न शक्यते। आलङ्कारिका अपि 'दूराध्वानं भयं युद्धं राज्यदेशादिविप्लव" मित्यादिना तस्य प्रदर्शनं निषेधन्ति। विशेषतः शृङ्गाररस प्रधानेऽत्र नाटके प्रसङ्गादापतितस्य युद्धस्य प्रदर्शनं नैव प्रकृत उपयुज्येतेति कविः 'एहि विमर्दनक्षमां भूमिमवतराव' इति लवमुखेन उभावपि बालवीरौ विमर्दनक्षमां भूमिमवतारयति। विद्याधरमिथुन मुखेन च तयोर्भुवन-भीममायोधनं संसूचयति। युद्धस्य संसूचनार्थमेव विद्याधरमिथुन-स्यावतरणं कविना कृतमास्ते। एतदेव च षष्ठेऽङ्के मिश्रविष्कम्भकस्य प्रयोजनम्। अनेन हि विष्कम्भकेन प्रवृत्तस्य लवचन्द्रकेत्वो रायोधनस्य भविष्यतश्च श्रीरामचन्द्रागमनस्य संसूचनं क्रियते। संस्कृत प्राकृत-मिश्रितत्वाच्चायं विष्कम्भको 'मिश्रविष्कम्भक' इति व्यपदिष्टः कविना।

भुवनभीममायोधनं वर्णयदपि विद्याधरमिथुनं परस्पर-मसाधारणं प्रेम सूचयत् "अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति, तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जन" इत्युदीरयत् सहृदयेषु कामपि रतिमुज्जृम्भयति। सूच्यस्य वस्तुनः सूचनमपि प्रकृतां रतिमुपबृंहयतीति सम्यगेवौचित्यं परिदृश्यते।

तदिदमायोधनं महाभारते वर्णितस्य आश्वमेधिकाश्वसंरक्षणे नियोजितस्य अर्जुनस्य स्वपुत्रेण बभ्रुवाहनेन प्रवृत्तस्य युद्धस्यादर्शेन कविना संयोजितमिवाभाति। तत्र पितुः पुत्रेण अत्र तु भ्रातुर्भात्रेति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विशेषः । तत्र तु उलूपी नाम नागकन्यका उभयोरन्तरा अवतरन्ती युद्ध-स्यावसानं घटयति, अत्र तु शम्बुकवधात्प्रतिनिवर्तमानस्य विमानादवतरतो महापुरुषस्य रामचन्द्रस्य व्याहारश्रवणमात्रेण तद्गौरवाल्लवः स्वयमस्त्राण्युपसंहृत्य समराद्विरतो भवति, चन्द्रकेतुश्च स्वयं प्रमणन् समरान्निवर्तते । रामचन्द्रस्य दर्शनेनैव लवस्याप्यमर्षः क्वापि गच्छति, क्रोधस्तिरोहितो भवति । चन्द्रकेतुना वयस्यत्वेन कृतपरिचयं लवं यदा रामचन्द्रः सस्नेहमाश्लिष्यति तदा लवः 'ईदृशो मां प्रत्यमीषां स्नेहः । मया पुनरेभ्य एवाभिद्रुग्धमज्ञेन' इति व्याहरन् लज्जित इव 'मृष्यन्त्विदानीं लवस्य बालिश्यं तातपादाः' इति क्षमामर्थयते, रामचन्द्रश्च तस्याचरणं सर्वात्मना अनुमनुते, तं च तदर्थमभिनन्दति । एवमज्ञातपरस्परसम्बन्धयोः पितापुत्रयोः कोऽपि सौहार्दक्रमः संस्थापितो भवति, येन लवो रामस्यादेशेन जृम्भकास्त्राण्युपसंहरति आर्यं कुशं दृप्तभावमुत्सृज्य पितरीवोपचारेणोपसर्पितुं प्रार्थयते ।

एवमनयोरायोधनस्यावतरणेन कविस्तावत् तारामैत्रिकस्य अहेतुकस्य प्रेम्णः स्वरूपं प्रकटयति । अपिचैतदायोधनं मेध्याश्वरक्षा-प्रसङ्गादागतेन चन्द्रकेतुना, तथा शम्बूकवधात्प्रतिनिवर्तमानेन रामचन्द्रेण सार्कं वशिष्ठादेर्वालमीकेर्जनकस्यापि मिलनं सरसतया सचमत्कारं साधयति । ते हि शिशुकलहमाकर्ण्य सभयास्त्वरितमन-सोऽपि श्रमजडा जराग्रस्तैर्गात्रैरागच्छन्तीति श्रुत्वा रामचन्द्रो कुशलवाभ्यां सह तान् सम्भावयति । अतो लवचन्द्रकेत्वोः सम्प्रहारो बहुधा नाटकीयस्य वस्तुन उपबृंहणं करोतीति प्रतिपादितं भवति ।

वाल्मीक्याश्रमे सर्वेषां समावेशः

रामायणे हि अश्वमेधयागो नैमिषारण्ये अनुष्ठितः । अयोध्यातः सर्वेऽपि सम्भारास्तत्र प्रहिताः । लङ्कासमरसुहृदः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्लवङ्गमा राक्षसाश्च तत्रैवामन्त्रिताः समवेता बभूवुः । देवदानवगन्धर्वा ब्रह्मर्षयो राजर्षयश्च तत्रैवामन्त्रिता उपतस्थुः । ऋत्विजः पुरोहिताश्च तत्रैव उपस्थिता अभवन् । भगवान् वाल्मीकिरपि सशिष्यो लवकुशाभ्यां सह तत्रैवोपगतः । पतिदेवता सीताऽपि तत्रैवाकारिता । सीतायाः शपथदर्शनार्थं रामचन्द्रेण सर्वोऽपि सदेवासुरगन्धर्वमानुषो लोक आमन्त्रणपूर्वकं समुपस्थापितः । सीतायां शपथोच्चारणानन्तरं रसातलं विशन्त्यां रामचन्द्रो यागं समाप्य-लवकुशाभ्यामितरैश्च ज्ञातिवर्गैः सहायोध्यां प्रविवेशेति वर्णितमास्ते ।

उत्तररामचरिते तु नैमिषारण्यस्योल्लेखो नास्ति । तृतीयाङ्के च आत्रेयीमुखात् 'तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः । विसृष्टश्च वामदेवाभिमन्त्रितो मेध्योऽश्वः, उपक्लृप्ताश्च यथाशास्त्रं तस्य रक्षितारः । तेषामधिष्ठाता लक्ष्मणात्मजश्चन्द्रकेतुर्दत्तदिव्यास्त्र-सम्प्रदायश्चतुरङ्गसाधनान्वितोऽनुप्रहित" इति श्रृणुमः । भगवानगस्त्यश्च "अथ प्रजाविना पुष्पकेन स्वदेशमुपसंगम्याश्वमेधाय सज्जोभविष्यसि' इति सन्दि : : । नैमिषारण्यस्य नाम न दृश्यते । अतोऽश्वमेधयागः प्रायशोऽयोध्यायामेव चिकीर्षित आसीदित्यूहितुं शक्यते । रामायणे च अश्वमेधयागार्थं सर्वेऽपि तत्र निमन्त्रिताः । अत्र भविष्यतोऽश्वमेधयागस्य विस्तृतं विवरणमनावश्यकं, नैव दत्तमास्ते । रामायणे च हिरण्मयी सीताप्रतिकृतिर्धर्मपत्नीत्वेन स्वीकृता अत्र तु प्रकृतां सीतां धर्मपत्नीत्वेनोपयोजयितुं कवेः संरम्भः । उपसंहारे च भगवती अरुन्धती –

"जगत्पते रामचन्द्र,

नियोजय यथाधर्मं प्रियां स्वां धर्मचारिणीम् ।
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे ॥"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति अनुरुणद्धि । रामचन्द्रश्च तदनुरोधं परिपालयन् सीतां स्वीकरोति । तदेतत्स्वीकरणं किमर्थं कविनोपवर्णितमिति पुरस्तात् प्रति ।

इदानीं रामचन्द्रस्य निरपराधाया उत्पत्तिपरिपूताया विशेषतो भगवता बिश्वावसुना निर्णीतपुण्यचरित्राया जानक्या विवासने पुनरपि च तस्याः स्वीकारे कियदौचित्यमस्तीति विमृशामः ।

केचन विद्वांसो विशेषतः पाश्चात्या तदिदं रामचन्द्रस्याचरितं नैव स्निग्धया दृशा पश्यन्ति, सर्वथा चेदमसंगतं दुर्बलहृदयत्वस्य च परिचायकमित्यभिप्रयन्ति । अपरेऽपि च केचन मनीषिणः केवलं रामचन्द्रस्य प्रजानुरञ्जनवैदग्धीं प्रतिपादयितुकामेन प्राणेभ्योऽपि गरीयस्याः स्वधर्मपत्न्याः विवासनं रुद्ररोदनवपोत्खननादिवत् अवास्तव मर्थवाद एव नैव तथ्यमिति विश्वसन्ति । स्तुतिनिन्दाफलकं वचनं हि अर्थवादः । एकस्य वस्तुनः स्तुत्यर्थं निन्दार्थं वा वहवोऽवास्तवा विषया वेदे वर्णिताः सन्ति । यथा वर्हिषि रजतदानस्य । 'वर्हिषि रजतं न देयम् । अश्रुप्रभवं हि रजतम् । यो वर्हिषि रजतं ददाति, आसम्वत्सरादस्य गृहे रुदन्ति । तदरोदीत्, यदरोदीत्तद्रुद्रस्य रुद्रत्वम् ।" इति अत्र केवलं रजतस्याश्रुभवत्वेन तद्दाने यावत्सम्वत्सरं गृहे रोदनं सम्भवतीमममर्थं समर्थयितुं रुद्रस्य रोदनं कल्पितं न वास्तवमिति मीमांसाशास्त्रं प्रतिपादयति । एवमेव वपोत्खननादयोऽपि वहवः कल्पिता विषया वेदेष्वुल्लिखिताः सन्ति । एतन्मतानुसारिणोऽन्ये वहवो विपश्चितः समग्रमप्युत्तरकाण्डं नैव वाल्मीकीयं परन्तु कस्यापि कवेः कल्पनाविलसितमिति बहुभिः प्रमाणैः साधयन्ति । एवं वह्वीषु विप्रतिपत्तिषु सतीषु पुङ्खानुपुङ्खतया विषयस्यास्य विचारो रामायणविमर्शकर्त्रा करणीयो भवति । वयं तु उत्तररामचरितमधिकृत्य विमृशामः । अतस्तदेव प्रमुखतो निधाय विषयमिमं परिशीलयामः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तररामचरिते रामचन्द्रस्तावत् आदर्शप्रजापालकत्वेन आदर्शप्रेमिकत्वेन आदर्शगृहस्थत्वेन च कविनोपवर्णित इति प्रागत्रोचाम । सीतायाः विवासनं रामायणे परिदृश्यते । अत्रापि च कृतमिति कविरत्र नैव कटाक्षपात्रस्य विषयो भवति । तदिदं विवासनं किं दण्डत्वेन विहितम् उत कर्तव्यमापतितमिति धिया समाहितमिति विचारणीयं भवति । राजा हि अपराधिनः शासितु मर्हति, दण्डयति च । अयं हि राजधर्मः । अत्र राजनीतेः प्रभावः परिलक्ष्यते । धर्मशास्त्रमपि राजनीतिमनुमनुते । राजनीतौ धर्मशास्त्रेऽपि सापराधस्यैव दण्डो विहितः । न चात्र सीता कमपि अपराधं कृतवती । एषा हि उत्पत्त्या परिपूता, राजर्षिणा वेदवेदाङ्गपारङ्गतेन जनकेन परिपालिता । परिणीता च भीषणां वनवासयातनां स्वीकृत्य भर्तारमुपचरितवती । न चास्याः ईषदपि स्खलनं कुत्रापि परिलक्ष्यते । रावणेन च अपहृता स्वं पातिव्रत्यमक्षुण्णं स्थापितवती त्रिलोकीश्वरोऽपि रावणः नानाविधैरुपायैः प्रलोभनैश्च नास्याः मन आक्रष्टुं शशाक । कदाचिदेषा अबला प्रबलपराक्रमेण रावणेन धर्षितेति आशङ्कितुं न शक्यते । स हि देवहूतिं नाम काञ्चन पतिव्रतां रमणीं बलाद्रमयन् तया शप्तो नारीं बलाद्रमयितुं नैव साहसं चकार । अतएव केवलं प्रलोभनैरुपसान्त्वनैरेव तामात्मसात्कर्तुं प्रायतत । न च कदाचिद्बलं प्रायुङ्क्त । नापि विनाऽनुरागं काऽपि ललना कस्यापि परिभोग्या भवतीति कामशास्त्रसम्मतो मार्गः । तमिमं विषयं मृच्छकटिककारः शूद्रकः सम्यगेव सनिदर्शनमुपवर्णितवान् । इदं हि तस्य वचनम् –

"आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।
हृदये गृह्यते नारी यदीदं नास्ति गम्यताम् ॥"

बलाच्च गृह्यमाणास्ता जीवितमपि जहति न चात्मानमर्पयन्तीति शतश उदाहरणानि दृशोः पन्थानमवतरन्ति । विशेषतः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
सीता भगवता विश्वावसुना निर्गीतपुण्यचरित्रा। रामचन्द्रोऽप्यस्या न कमपि दोषलवं कदाचिदपि पश्यति स्म। परन्तु तस्याः राक्षसगृहवास जनितं खेदं स्मृत्वा परं विषीदति स्म। प्रत्युत अग्निपरीक्षणार्थं नियोगमपि केवलं लोकापवादभयात्कृतमिति आत्मानमपराधिनममन्यत। कविस्तावत्तमिमं विषयं सचमत्कारं प्रतिपादितवान्। चित्रं यावदार्याया हुताशन विशुद्धिः, लिखितमिति लक्ष्मणोक्तमाक्षिप्य रामचन्द्रो ह्येवमवादीत्—

"शान्तं पापम्।

उत्पत्ति परिपूतायाः किमस्याः पावनान्तरैः

तीर्थोदकं च वह्निश्च नान्यतः शुद्धि मर्हतः॥

अयि देवि देवयजनसम्भवे! प्रसीद। एष ते जीवितावधिः प्रवादः—

कष्टं जनः कुलधनैरनुरञ्जनीय—

स्तन्नो यदुक्त मशिवं न हि तत्क्षमं ते।

नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा

मूर्ध्नि स्थितिर्न चरणैरवताडनानि॥ इति।

विशेषतो नार्या दण्डनीयत्वे यानि षड् दूषणानि मनुना निर्दिष्टानि, तेष्वेकमपि तत्रभवत्यां सीतायां न परिदृश्यते। इयं हि तदुक्तिः—

पानं दुर्जन संसर्गः पत्या च विरहोऽटनम्।

स्वप्नोऽन्यगेहवासश्च नारीसन्दूषणानि षट्॥ इति।

अत्र पतिविरहपदेन पत्युः सन्निधानेऽपि तदन्तिकमनुपसर्पणं, अन्यगेहवासपदेन च स्वामिगृहं विहाय अन्यगृहेऽवस्थानं गृह्यत इति सीतायां न किमपि दूषणं वर्तते। निरपराधस्य निर्दोषस्य च न कुत्रापि दण्डो विधीयते। विशेषतो दण्डविधाने दण्ड्यं प्रत्यानादरो भवति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत्र तु अनादरस्य सत्ता नास्ति, प्रत्युत समादरो वरीवर्ति । सीतां विवासयन्नपि रामस्तदीयां हिरण्मयीं प्रतिकृतिं बहु मन्यते, तत्र वाष्पदिग्धं चक्षुर्विनोदयति । अतएव आत्रेयीमुखात् अश्वमेधयागे हिरण्मय्याः सीतायाः सहधर्मचारिणीत्वेन स्थापनमुपश्रुत्य वनदेवता वासन्ती व्याहरति—

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ॥ इति ॥

तत्रभवती सीताऽपि छायाङ्के स्वप्रतिकृते रङ्गे सहधर्मचरिणीत्वेन स्थापनमुपश्रुत्य "अज्जउत्त दाणिंपि तुमम् । अह्महे उक्खाउदं दाणिं मे परिच्चाअलज्जासल्लं अज्जउत्तेण" (आर्यपुत्र इदानीमसि त्वम् । अहो उत्खानित मिदानीं मे परित्यागलज्जाशल्यमार्यपुत्रेण) इत्यात्मानं निर्दोष माकलयन्ती तृप्तिमधिगच्छति । अतः सीतायाः परित्यागो न कदापि दण्डो भवति—नापि तस्याः परित्यागे तदीयोऽपराधलवोऽपि वर्तत इति प्रतिपादितं भवति ।

प्रसङ्गेऽस्मिन् इदमपि सहृदयानां पुरत उपस्थापयामो यदुत रामायणे रामचन्द्रो भद्रमुखात् सीता विषयकमपवादं श्रुत्वा परं खिन्नः सीतां वाल्मीक्याश्रमे निभृत प्रदेशे विसृज्य आगन्तुं लक्ष्मणमादिदेश । उत्तररामचरिते कीदृशोऽपवाद इति स्पष्टतया नोल्लिखितमास्ते । दुर्मुखस्तावत्तमपवादं रामचन्द्रस्य कर्णे निवेदयति । तं च श्रुत्वा रामो "हा हा धिक् परगृहवास दूषणं यद्वै । वैदेह्याः प्रशमितमद्भुतैरुपायैः । एतत्तत्पुनरपि दैवदुर्विपाकादालर्कं विषमिव सर्वतः प्रसृतमिति व्याहरन् तां निवासयितुं निश्चिनोति छायाङ्के च 'न किल भवतां देव्या स्थानं गृहेऽभिमतत यतस्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचितेति व्याहरति । अन्येषां च मुखेभ्य "धीरे लोके विततमयशो या च वह्नौ विशुद्धि." 'यत्किल स्वपन्तत बीभत्सकिम्वदन्तीकाः पौरा"

(सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मफलम्

अनुवृत्तम्

लेखकः—श्री रवीन्द्रनाथ ठक्कुरः

सतीशः—यस्यामवस्थायां मनुष्यस्य विवेचनाशक्ति स्तिरोहिता भवति, साऽवस्था न त्वया ज्ञातपूर्वेति त्वमभिमानं करोषि नलिनि !

नलिनी—मम सप्तस्वपि जन्मसु न तादृश्या अवस्थाया ज्ञानेन न किमपि प्रवोजनम् । किन्तु हारोऽयमवश्यं प्रत्यावर्तनीयः ।

सतीशः—प्रत्यावर्तयिष्यसि ?

नलिनी—अवश्यं प्रत्यावर्तयेयम् । मम दृष्ट्या स्पर्द्धया क्रियमाणस्योपहारस्य न किमपि मूल्यमास्ते ।

सतीशः—अनुचितमभिदधासि त्वं नलिनि !

नलिनी—नानुचितमभिदधामि । यदि त्वं मह्यं कुसुममेकमुपाहरिष्यः, तदाऽहं समधिकं प्रमुदिता अभविष्यम् । तदा तदा त्वं महार्घं तत्तद्वस्तु प्रेरयितुमारब्धवानसि । कदाचित्तव मनसि खेदो भवेदिति नैतावत् मया किमप्यभिहितम् । परन्तु क्रमशो मात्रा वर्धते, तूष्णीम्भावो नैव समुचितो भवेत् । तद् गृहाणेमं हारम् ।

सतीशः—त्वमेनं हारं रथ्यायां निक्षिप । नाहमेनं कदापि ग्रहीतुं प्रभवामि ।

नलिनी—अस्तु, सतीश, बाल्यादहं त्वां जानामि । न मां प्रतारय । सत्यं ब्रूहि । किं त्वं बहु ऋणं न कृतवानसि ?

सतीशः—कस्त्वामवोचत् ? नरेन्द्र इति मन्ये ।

नलिनी—न कोऽपि मामवोचत् । अहं तव मुखं विलोक्यैव ज्ञातुं प्रभवामि । मदर्थं किमिति त्वमेवमन्यायं करोषि ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सतीशः—सत्यवकाशे बन्धोः कृते प्राणा अपि समर्प्यन्ते । इदानीन्तनेषु दिवसेषु प्राणान् दातुमवकाशो नोपलभ्यते । परन्तु ऋणजनितदुःखवरणे यत्सुखं तदप्यनुभवितुं-नानुमन्यसे ? त्वदर्थं दुःसाध्यमपि कार्यं कर्तुं सन्नद्धोऽस्मि ! तदिदं त्वं नन्दिसाहेवस्यानुकरणं कलयसीति मर्मणि विषीदामि ।

नलिनी–भवतु नाम । यत्कर्तव्यं तत् त्वया कृतम् तदहमभिनन्दामि । इदानीं पदार्थमिमम्—

सतीशः— यद्येष प्रत्यावर्तनीयः, तर्हि तेन गले बद्धेन श्वासनिरोध-पूर्वकं मरणं वरं भवेत् ।

ननिनी–किमिति तर्हि ऋणस्य परिशोधं करिष्यसि ?

सतीशः—नचिरान्मातुः सकाशाद्धनं लभेय ।

नलिनी--धिगिदम् । सा तु मनसि भावयेत् यन्मदर्थं तस्याः पुत्र ऋणाक्रान्तः समजनि ।

सतीशः—न कदाचित् सा तथा भावयेत् । बहोः कालादवधि सा स्वं पुत्रं स्वरूपतो जानाति ।

नलिनी–अस्तु, यथा वा भवतु । इदानीं प्रतिजानीहि त्वम्—यथा इतः प्रभृति न त्वं मह्यं किमपि महार्घं वस्तु उपहरिष्यसि । अन्ततो मालातो नाधिकं वस्तु दास्यसि ।

सतीशः–अस्तु, तथैव प्रतिजानामि ।

नलिनी—साधु । इदानीं तव गुरोर्नन्दिसाहेवस्य परीक्षे, स्तुतिवाद-विद्या कियदायत्तीकृता त्वया । भवतु, इदानीं मम कर्णपाली-मधिकृत्य यद्वक्तव्यं तत्प्रकाशय । पञ्च निमेषा मया समयो दत्तः ।

सतीशः—मम वक्तव्येन इयं कर्णपाली आरक्ता संजायेत ।

नलिनी--साधु साधु । उपक्रमो नाशोभनो भाति । अद्य एतावत्तैवा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वसानं भवतु, अवशिष्टमन्यदा शृणोमि । इदानीं मे कर्णौ भिम-भिमायेते ।

नवमः परिच्छेदः

विधुमुखी—यावन्तं प्रकोपं मयि प्रकाशय ननु वत्से । पादयोस्ते पतामि । इदानीमेकवारं तस्य ऋणं परिशोधय ।

मन्मथः—नाहं प्रकुपितो भवामि । परन्तु यत्करणीयं तदवश्यं करिष्यामि । बहुशोऽहं सतीशमवोचम्, ऋणं करोषि चेन्नाहं शोधयामीति । न च मे वचनमन्यथा भवितुमर्हति ।

विधुमुखी—अये यद्येतादृशः सत्यप्रतिज्ञो युधिष्ठिरो भवेस्तदा संसारोऽयं न प्रचलेत् । सतीशोऽयं वर्षीयान् संजातः । तस्मै लघुभोजनार्थं यद्धनं दीयते, तावता विना ऋणादानं कथं स प्रचलतु ?

मन्मथः—यस्य यावत् करणीयं, तेन ततोऽधिके कृते नैव क्षेमं भवति—न सन्न्यासिनः, नापि राजराजेश्वरस्य ।

विधुमुखी—किं तर्हि मे वत्सः कारागारं गच्छेत् ?

मन्मथः तदर्थं यदि स व्यवस्यति, यूयं च तमनुमनुत, कथमहं तं वारयितुं प्रभवामि ? (प्रस्थितः)

शशधरस्य प्रवेशः

शशधरः—मामत्र गृहे विलोक्य मन्मथो बिभेति । स भावयति—नवीन-कृष्णपरिच्छदनिर्माणार्थं मानसूत्रहस्तोऽहं तस्य पुत्रस्याङ्गानि परिमातुं समायात इति । तत एव एतावदवधि नागतोऽस्मि । अद्य तु तव पत्रप्राप्तौ सुकुमारी अश्रुप्लुतनयना गृहत्यागिनं व्यधत्त ।

विधुमुखी—कि मार्या में भगिनी नायाता ?

शशधरः—न चिरादागमिष्यति । को वा विशेषः ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विधुमुखी—सर्वं खलु श्रुतमास्ते । इदानीं पुत्रस्य कारागारप्रेषणं विना नास्य मनः स्थिरतां लभते । रास्किनहार्मानपरिच्छदो-नास्य अभिमतः, मन्ये एष कारागारपरिच्छदं सुसभ्योचितं गणयति ।

शशधरः--यथा वा त्वं भावय—नाहं मन्मथं बोधयितुं पारयामि । नाहं तमवगच्छामि, सोऽपि मां नावगच्छति । परिणामे—

विधुमुखी—तत्सर्वं किमहं न जानामि ? त्वं भाग्येन तस्य सहधर्मिणी न भवसि येन सकलं नतेन शिरसा सहेथाः । परन्तु कथमस्या विपदः समुत्तरणम् ?

शशधरः—किं तव हस्ते न किमपि--

विधुमुखी—न किमपि वर्तते । सतीशस्य ऋणं शोधयितुं सर्वेऽप्यलङ्कारा बन्धकसात् कृताः, वलयमात्रकरा तिष्ठामि ।

सतीशस्य प्रवेशः

शशधरः--वत्स सतीश, असमीक्ष्य व्ययं करोषि । पश्येदानीं कीदृश्यामापदि पतितोऽसि ।

सतीशः--नाहं कामपि विपदं पश्यामि ।

शशधरः--तर्हि मन्ये हस्ते किमप्यस्ति , न सर्वं व्ययितम्

सतीशः--कियदप्यस्त्येव ।

शशधरः--कियदेतत् ?

सतीशः--यावदहिफेनक्रयणाय पर्याप्तम् ।

विधुमुखी—(क्रन्दन्ती) वत्स, किमेवं प्रलपसि ? बहूनि दुःखान्यनुभूतानि मया । न पुनर्मां दग्धुमर्हसि ।

शशधरः—धिक् धिक् सतीश, किमेवं मनसि कलनीयम् ? कदाचित्कलितमपि मातुरग्रे उच्चारणीयम् ? अत्यन्त मनुचित मेतत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुकुमार्याः प्रवेशः

विधुमुखी–आर्ये, परित्रायस्व। कदा वाऽसौ किमप्यत्याहितं करिष्यतीति भीतभीता प्राणिमि। यदसौ वदति तच्छ्रुत्वा गात्रं मे वेपते।

सुकुमारी– किमसौ वदति ?

विधुमुखी–वदति-अहिफेनं क्रेष्यामि।

सुकुमारी–अत्याहितम् ! सतीश मम शरीरस्पृष्टिकया शपथं कुरु-नैवं कदापि मननि करिष्यसि। किमिति तूष्णीं तिष्ठसि ? अये त्वमस्माकं भाग्यलक्ष्मीः। मातुर्मातृस्वसुश्च वचनमवधारय।

सतीशः–कारागारमधिष्ठाय तथाकरणापेक्षया वरं बहिरेव सकलोप्येष प्रहसनकरो व्यापारो निर्य्यातनीयो भवेत्।

सुकुमारी–अस्मासु विद्यमानासु कस्त्वां कारागारं नेष्यति ?

सतीशः–राजभटः

सुकुमारी–द्रक्ष्यामि-कीदृशोऽसौ राजभटः। अये, निष्काषय वित्तकम्। किमेवं शिशुजनमायासयसि ?

शशधरः–वित्तकमनायासेन निर्यातयामि। परन्तु मन्मथो मम मस्तकमिष्टकाभिर्विचूर्ण्य मारयिष्यति।

सतीशः–मातृस्वसुः पते ! ताइष्टका न तव मस्तके पतिष्यन्ति परन्तु मम गात्रे। एकतः परीक्षायामनुत्तीर्णः, द्वितीयत ऋणग्रस्तः। इदानीं यदि कारागारवरणसुयोगादहं वञ्चितो भवामि, तर्हि मे पिता तादृशमपराधं नैव मर्शयितुं प्रभवेत्।

विधुमुखी–आर्ये, सत्यमेतत्। सतीशो मातृस्वसृपते र्धनमग्रहीदिति श्रोष्यति चेन्नियतमेनं गृहात् निष्काषयिष्यति।

सुकुमारी–निष्काषयतु नाम। किमिति नान्यत्र गृह मुपलप्स्येत। विधुमुखि, श्रृणु मे वचनम्। अर्पय मह्यमेनम्, निरपत्याऽहम् अहमेनं वर्धयामि। किं चिन्तयसि ?

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शशधरः–सत्यमेतत् शुभकरम्। परन्तु सतीशो व्याघ्रस्य औरसः। तन्मुखात्तस्याच्छादनं मृत्युफलकं सम्पद्येत।

सुकुमारी–व्याघ्रस्तु स्वसुतं राजभटायार्पयति, तं यदि वयं जीवन्तमुद्धरामः, न स किमपि वक्तुं प्रभवेत्।

शशधरः–व्याघ्री वा किं वदति ? सुतश्च ?

सुकुमारी-यद् वक्तव्यं तदहं जानामि, न तत्र जिज्ञासा अपेक्ष्यते। प्रथमतो देयमस्य निर्यातय।

विधुमुखी–आर्ये

सुकुमारी–नेतः परम् आर्ये आर्ये इति संबोध्य रोदितव्यम्। आगच्छ, तव केशान् प्रसाधयामि। एवं विश्रीकायास्तव भगिनीपतिसन्निधौ मुखदर्शनं किं ते लज्जां न जनयति ?

(उभे प्रस्थिते सह सतीशेन)

(मन्मथस्य प्रवेशः)

शशधरः–भ्रातर्मन्मथ किंचिद्विचार्य द्रष्टव्यम्।

मन्मथः—नाहमविचार्य किमपि करोमि।

शशधरः–पुनरपि सकृदवधारय, मम शरीरेण शपामि। किं बालमेनं कारागारं प्रेषयेः ? किं तावता तस्य मङ्गलं भवेत् ?

मन्मथः–मङ्गलममङ्गलं वा यावदवसानं न कोऽपि निर्णेतुं प्रभवति। सरलतया अहमेतदवधारयामि – मुहुर्मुहुः कृतनिषेधोऽपि यदि कोऽपि अन्यायमाचरति, तस्य फलं तेन भोक्तव्यम्। कृत्रिमैरुपायैस्ततो रक्षणं नैव समुचितं भवति। यदि अन्तरा वयं न प्रविशामः, तर्हि प्रकृतेः कठोरशिक्षया मनुष्यो मनुष्यः सम्पद्येत।

शशधरः–प्रकृतेः कठोरशिक्षैव यदि प्रकृतशिक्षा तर्हि विधातुः पितृमातृहृदये स्नेहस्यावधानं निरर्थकम्। मन्मथ, त्वं नक्तन्दिवं कर्मफलं कर्मफलमिति घोषयसि। तत्तु नाहं स्वीकरोमि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकृतिरस्मत्तः कर्मफलं कृत्स्नशः संग्रहीतुं समीहते किन्तु तस्या उपरि अपरः कोऽपि वर्तते यः किल तदा तदा अन्तरा आपत्य तत्र बहुधा साहाय्यमाचरति, अन्यथा प्रकृतेः कर्मफलपरिशोधनपर्यन्तमस्माकं सत्ताऽपि नैव सम्भवेत् । विज्ञानदृष्ट्या कर्मफलं सत्यं स्वीकरोमि । परन्तु विज्ञानस्योपरि अपरं विज्ञानं वर्तते, यत्र प्रेमफलमन्यादृशं दृश्यते । कर्मफलं नैसर्गिकम्, मार्जनं तु तदुपरि वर्तते ।

मन्मथः—यः खलु अनैसर्गिको मानवः स यथेष्टमाचरतु । अहं तु साधारणो नैसर्गिको भवामि । कर्मफलं यावदवसानं स्वीकरोमि ।

शशधरः—अस्तु नाम । अथ यदि सतीशमहम् ऋणान्मोचयामि, तर्हि किं करिष्यसि त्वम् ?

मन्मथः—तमहं त्यक्ष्यामि । पश्य—सतीशमहं यदा मानुषं कर्तुं प्रयत्नमकरवम्, तदा यूयं प्रथमत एव अन्तरा आपतिता मदीयं प्रयत्नं व्यर्थं कृतवन्तः । स तु एकतः संयममन्यतश्च प्रश्रयमुपलभ्य सर्वथा भ्रश्यति । असकृदाहृताभिर्भिक्षाभिर्यदि तस्य सम्मानबोधो दायित्वबोधश्च न भवतः यूयं चान्तरा आपतन्तस्तयोर्विज्ञानायावकाशं न प्रयच्छत, तर्हि तस्याशामहं परिहरामि । यूयं स्वमतानुसारेण तं मानुषं कुरुत । उभयोर्नौकियोः पादक्षेपे महत्यो विपदः सम्भवन्ति ।

शशधरः—किमेवमभिदधासि मन्मथ ? स खलु तव पुत्रो भवति ।

मन्मथः—भ्रातः सकृदालोचय । अहं स्वमतानुसारेण स्वकीयं पुत्रं मानुषं कर्तुं जानामि नान्यमुपायम् । यदाऽहमवधारयामि, तथा न कथंचित् सम्भवति, तदाऽहं स्वकीयं पितुर्दायित्वं न स्थापयामि । मम यत्साध्यं, ततोऽधिकं कर्तुं न पारयामि ।

(प्रस्थितः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शशधरः--किं करणीयम् ? बालकस्य कारागार प्रेषणं न युज्यते । अपराधो मनुष्यस्य यावतः सर्वनाशस्य हेतुर्भवति, कारागारं तु ततोऽधिकस्य सर्वनाशस्म !

दशमः परिच्छेदः

भादुडी गृहिणी--अपि श्रुतम्—सतीशस्य पिता हठादुपरतः ।

भादुडीसाहेवः--आम, श्रुतम् ।

भादुडीगृहिणी--चिकित्सालयस्य कृते सकलामपि सम्पत्तिमुत्सृष्टवान् प्रतिमासं केवलं पञ्चसप्तती रूप्यकाण्येव सतीशस्य मातुः कृते व्यवस्थायोपरतः । कि मिदानीं करिष्यावः ?

भादुडीसाहेवः--किमर्था ते एतावती भावना ?

भादुडी गृहिणी--अये सुपुरुषोऽसि ! तव कुमारिका सतीशं कामयते--किं नयने प्रसार्य न दृष्टवानसि: ? एकदा तयोर्विवाहार्थमपि सन्नद्ध आसीः ! किमिदानीं करणीयम् ?

भादुडी साहेवः--नाहं मन्मथस्य सम्पत्तावास्थावानासम् ।

भादुडी गृहिणी--र्तहि किं बालकस्याकृतावेव आस्थावानासीः ? मन्ये अन्नं वस्त्रं च नावश्यकम् ।

भादुडीसाहेवः--नितान्तमावश्यकम् । यो यथा वा भावयतु--इतोधिक मावश्यकं न किमपि वस्तु वर्तते । सतीशस्य एको मातृस्वसृपतिर्वर्त्तते--मन्ये जानासि ।

भादुडी गृहिणी--मातृस्वसृपतयो बहूनां सन्ति । न तैः काऽपि क्षुधा निवर्तते ।

भादुडी साहेवः--स खलु मम पक्षः । असीमा सम्पत्तिः । निरपत्यश्चायं तपस्वी । वयोऽपि नात्यल्पं भवति । स तु सतीशं पोष्य-पुत्रत्वेन ग्रहीतुमभिलषति ।

भादुडी गृहिणी--साधुप्रकृतिकश्चायम् । तच्छीघ्रं समाधीयताम् । त्वं कमपि निर्बन्धं कर्तुं मर्हसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भादुडी साहेबः--न सम्बन्धकरणार्थं ममापेक्षा भवति, तदर्थं तस्य गृहे एव लोको वर्तते, सर्वमपि सज्जमास्ते। केवलं न्यायदृष्ट्या किमपि विचारणीयं भवति । एककः पुत्रः किं दत्तपुत्ररूपेण ग्रहीतुमनुमन्यते वा न वा विशेषतः सतीशः प्राप्तवयस्कः।

भादुडीगृहिणी--न्यायस्तु तव करतलगतः । चक्षुषी निमील्य कोऽप्युपायः परिचिन्त्यताम् ।

भादुडीसाहेवः--मा उद्विग्ना भव । पोष्यपुत्रास्वीकारेऽपि उपायान्तरमास्ते।

भादुडी गृहिणी--रक्षिताऽस्मि। विचारयन्ती आसम् कथमयं सम्बन्धः प्रत्याख्यानीयः। सम्बन्धस्य भङ्गे--कृत दृढपरिचया अस्माकं नलिनी कीदृशमत्याहितमकरिष्यत्, वक्तुं न शक्यते । तदिति दरिद्रस्य हस्ते नैव कन्या प्रदीयते । पश्य-कथं तव पुत्रिका रुदन्ती चक्षुरुत्फुल्लयन्ती वर्तते । ह्यो भोजनावसरे सतीशस्य पितुर्मरणसंवादः श्रुतः। तदैवोत्थाय प्रस्थिता ।

भादुडी साहेवः--नलिनी सतीशं कामयत इति तया न प्रतीयते। सा तु सततं सतीशस्य नासिकयो र्नेत्रयोश्च जलं स्रावयति । नन्दिनउपर्यस्याः सविशेषः पक्षपात इति तर्कयामि।

भादुडीगृहिणी--तव पुत्रिकायास्तादृशः स्वभावः, येन सा यमेव कामयते, तमेवोद्वेजयति। पश्य बिडाल आमिक्षामादाय किं न चेष्टते। तथाऽपि तां न परिहरति।

नलिनी--(प्रविश्य) मातः, किं त्वं सतीशबाबोर्गृहं न गमिष्यसि ? तस्य माता परं कातरा पतिता भवेत् । पितः, अहमपि सकृत् तदन्तिकं गन्तुमिच्छामि ।

एकादशः परिच्छेदः

सतीशः--मातः कियता सुखेनात्र तिष्ठामीति मम परिच्छदादेव ज्ञातुं शक्नोषि । किन्तु यावन्मां मातृस्वसृपतिः पोष्यपुत्रत्वेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न स्वीकरोति, तावत्पर्यन्तं नैव निश्चिन्तः स्थातुं प्रभवामि। त्वया प्रतिमासं या भरणपोषणार्था वृत्तिरुपलभ्यते, न तया मे कोऽप्युपकारो भवति। बहुदिनावधि साभिलाषोऽपि न मां पोष्यपुत्रत्वेन स्वीकरोति । मन्ये, इदानीमपि तयोः सन्तानलाभेच्छा वर्तते ।

विधुमुखी--(हताशभावमभिनीय) न केवलं वर्तते । इदानीं सा फलोन्मुखी वर्तते सतीश !

सतीशः--किमेतत्संजातं मातः !

विधुमुखी--लक्षणैस्तावत्तथा प्रतीयते ।

सतीशः--कदाचिल्लक्षणानि विसम्वदन्ति नाम !

विधुमुखी--नात्र विसम्वादः। सतीश, न चिरात्तव भ्राता भविष्यति !

सतीशः--किमुच्यते मातः, न ज्ञायते। कदाचिद् भ्राता न स्यात् भगिनी जायेत।

विधुमुखी--आर्यायाः शरीरं यथा परिणतं, तेन प्रतीयते न सुता, परन्तु सुत एव उत्पत्स्यते। विशेषतः सुता वा भवतु सुतो वा भवतु, उभयमपि अस्माकं समानम्।

सतीशः--प्रौढे वयसि गर्भः संजातः। कदाचिद् विघ्ना आपतेयुः।

विधुमुखी--सतीश, इदानीं त्वं जीविकालाभाय प्रयतस्व।

सतीशः--कथमेतत्सम्भवतु ? प्रथमतोऽहमनुत्तीर्णः विशेषतो मे जीविकार्थमभ्यासो गतः। यथा वा वद, सर्वथा इदमन्याय्यम्। अहं पितू रिक्थर आसम्, ततो वञ्चितोऽस्मि। इदानीं पुनर्यदि--

विधुमुखी--यदि नेदमन्याय्यं तदा किमन्यत्स्यात् ? एकतस्त्वामानीय गृहे स्थापयत अन्यतश्चिकित्सकानाहूय औषधानि सेवेते। स्व भगिनीपुत्रेण साकं नैतादृशो व्यवहारः शोभते। परिणामे दलालचिकित्सकस्य औषधं फलोन्मुखं जातम्। सतीश,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh
किमर्थमस्थिरो भवसि ? एकाग्रचित्तो भगवन्तमाह्वयस्व। तस्याग्रतो न कोऽपि चिचित्सकः किमपि कर्तुं प्रभवति। स यदि—

सतीशः—मातः, समय इदानीमपि वर्तते—परन्तु मातः, अस्माभिरनयोः कृतज्ञैर्भाव्यम् तथापि यदिदमन्याय्यं, तस्य प्रतिकारो दुर्घटः सम्पद्यते ईश्वरस्य सन्निधौ एतयोरनिष्टमनर्थयमानः स्थातुं न प्रभवामि। स यदि अनुगृह्य—

विधुमुखी—तथैवास्तु, नोपायान्तरं वर्तते। कीदृशी ते आयतिरिति न विभायामि। स यदि कृपया--

सतीशः—स यदि तथा न कुर्यात् नाहं तस्मिन् विश्वसिमि, पत्रिकासु च नास्तिकत्वं प्रकटयामि।

विधुमुखी—इदानीं तूष्णीं तिष्ठ। न मुखेन तथोच्चारणीयम् स खलु दयामयः। तस्य दयया किं वा न फलवद् भवति। सतीश, अद्य त्वमेवं प्रसाधितः क्व गन्तुमभिलषसि ? सोच्छ्वासं निहितेन ग्रीवाकेतनेन ते मस्तकमाकाशं चुम्बति, कथं सुखमवनमयिष्यसि ?

सतीशः एवमुच्छ्वसितग्रीवाकेतन उन्नतशिरा यावत्सम्भवति, प्रचलामि। ततो यदा मुखनमनाय समय आगमिष्यति तदैतानि परिहरिष्यामि। सविशेषं कार्यमास्ते। एष गच्छामि। अन्यदा समालापो भविष्यति। (प्रस्थितः)

विधुमुखी—कुत्र प्रचलसि जानामि। मातर्जीवामि--पुत्रस्य निमेषोऽप्यसह्यो भवति! अवश्यमयं विवाहः सम्पत्स्यते। जानाम्यहं मम सतीशस्य भागधेयं नैव अशोभनम्। प्रथमतो यावन्तः अन्तराया आपतन्तुनाम, परिणामे शुभं भवतीति सर्वथा अनुभवामि। कुतो वा न भवेत् ? न मया ज्ञातसारया किमपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
पापमाचरितम् । पतिव्रता तिष्ठामि । तदर्थं दृढं विश्वसिमि-
आर्यायाः पुनरिदानीम् –

द्वादशः परिच्छेदः

सुकुमारी--सतीश !

सतीशः--एषोऽस्मि मातृस्वसः,

सुकुमारी--ह्यस्तावन्मया बालस्य कृते वस्त्राणि क्रीत्वा आनेतुमवादिषम् । मन्ये तावता ते अपमान इति त्वया अवधारितम् ।

सतीशः--अपमानस्य का कथा ? मातृस्वसः, ह्यो भादुडीसाहेवस्य गृहे निमन्त्रणमासीदिति--

सुकुमारी--भादुडीसाहेवस्य गृहं प्रति तव मुहुर्गमनस्य का नामाऽत्र्द्य-कर्तेति चिन्तयन्त्यपि नावधारयामि । ते तावन्महान्तः पाश्चात्य-भावापन्नाः, तैः साकं त्वादृशस्य जनस्य बन्धुत्वं नैव स्पृहणीयं भवति । मया श्रुतम्--ते इदानीं त्वां न गणयन्ति । तथापि एवं चालकेतनस्योपरि केतनमाबध्य वैदेशिककार्तिकेयो भूत्वा असकृत् तत्र गच्छसि । किं ते ईषदपि आत्मसम्मानबोधो नास्ति ? स यद्यभविष्यत्तर्हि जीविकार्थं कमपि प्रयत्न-मकुर्वतस्तवात्र एवमवस्थानं नाभविष्यत् । अयं च गण्डस्योपरि विस्फोटः किमपि करणीयमिति वदामि चेत्त्वं मनसि विरक्तो भवसि, आत्मानं गृहस्य कर्मकरं भावयेदिति बिभेषि । वरं गृहस्य कर्मकरः स्पृहणीयो भवति । स खलु स्वयमुपार्जयन् भक्षयति ।

सतीशः--मातृस्वसः, अहमपि तथा अभविष्यम् ! त्वमेव वारितवत्यसि !

सुकुमारी--अये दौर्भाग्यम् । ज्ञातपूर्वमेव मया अन्ते ममैव दोषो भवेदिति । इदानीमनुभवामि तव पिता त्वां सम्यगेव स्वरूपतोऽज्ञासीत् । अतस्त्वां तथा दृढशासनेनाऽस्थापयत् । अहमेव निर्बोधा बाल इति दयापरवशा त्वामत्र आनयम्,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारागारतो व्यमोचयम् । अतो ममैव दोषः समजनि ! इयमेव कृतज्ञता भवति । अस्तु ममैव दोषः । तथापि यावन्ति दिनानि मम अन्नं भुञ्जानः अत्र निवससि, तेषु कदाचित् एकं द्वे वा कार्ये कर्तुमर्हसि । किमेतादृशमितरो न करोति ? किं तावताऽत्यन्तमपमानो भवति ?

सतीशः--न कोऽप्यपमानः, न कोऽप्यपमानः । ब्रूहि किं करणीयम्--एषोऽस्मि कर्तुं सन्नद्धः ।

सुकुमारी--बालस्य कृते सार्द्धसप्तगज परिमितं कौषेयमानेयम्, अपि च एकं सम्यक् स्यूतं पाश्चात्यपरिधेयमानेयम् ।

(सतीशो गन्तुमीहते)

शृणु शृणु, अस्य पादयोः परिमाणं गृहाण, उपानहौ अपेक्षिते ।

(सतीशो गन्तुमीहते)

तिष्ठ तिष्ठ, किमेवं त्वरसे । सकलमपि सम्यगवधारय । किमद्यापि भादुड़ीसाहेबस्य गृहे बिस्कुटादीनि भोक्तुं प्राणा उत्कण्ठन्ते । बालस्य कृते पलालकल्पितमुष्णीषमप्यानेयम्, द्वादश हस्तनिकेतनानि च—

(सतीशः प्रतिष्ठते । पुनस्तमाहूय)

शृणु सतीश, अन्यमप्येकं विषयम् । श्रुतं मया, मामनामन्त्र्य मातृष्वसृपतेः सकाशात् नवीनं पाश्चात्यपरिच्छदं क्रेतुं रूपिका नीतवानसि । यदा स्वस्यार्जने सामर्थ्यं जायेत तदा यथेष्टं व्ययितुं प्रभवसि । परस्य धनेन भादुडीसाहेबस्य मन आक्रष्टुं मातृष्वसृपतिं नैव सन्यासिनं कुरु । ता रूपिकाः प्रत्यर्पय । इदानीं रूपिकाणां नितरामभावो वर्त्तते ।

सतीशः—यथा आज्ञापयसि । एष आनयामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुकुमारी—इदानीं त्वं विपणिं गच्छ। ताम्रीरूपिकाभिः सर्वाणि क्रीत्वा अवशिष्टं मह्यं देहि। सर्वेषां मूल्यादिकं पत्रार्पितं कर्तुं नैव विस्मर।

(सतीशः प्रस्थातुमीहते)

शृणु सतीश, वस्तूनां क्रीतानामानयनाय सार्द्धरूपिकाद्वयं नैव शकट भृतिं परिकल्पय। एतदर्थं न त्वां किमप्यानेतुं वक्तुं बिभेमि। पादद्वय चलने एव शिरसि भावना जागर्ति। पुरुषेण नैतादृश सुभगेन भाव्यम्। तव पिता प्रतिदिनं प्रातः नव-विपणितो मत्स्यं पादचारमानयति स्म भारग्राहकायापि नैव काकणिकां ददाति स्म। नैतत् त्वया विस्मृतं भवेत्।

सतीशः—सकलानमपि तव उपदेशान् पालयामि। अहमपि न दास्यामि। इत आरभ्य तव गृहे भारभृतौ कर्मकारनियुक्तौ यथा यावदल्पं व्ययितं भवेत्, तत्र मया सावहितदृष्टिना स्थातव्यम्।

त्रयोदशः परिच्छेदः

हरेन्द्रः—भ्रातः त्वं किमित्येतावत्पर्यन्तं विलिखन् वर्तसे ? कुत्र वा लिखसि ? ब्रूहि माम्।

सतीशः—वत्स, गच्छ, क्रीड त्वम्। किं तवानेन ज्ञातेन ?

हरेन्द्रः—पश्यामि कि तत्र लिखितम्। अधुना अहं पठितुं पारयामि।

सतीशः--हरेन्द्र, किं मां विरक्तं करोषि ? गच्छ क्रीड त्वं यथेच्छम्।

हरेन्द्रः--ककारेण युक्त आकारः=का, मकारः यकारेण युक्त एकारः =ये। संहत्य कामये। किं त्वं कामयसे--ब्रूहि। किमारेवत-शलठुं कामयसे ? अहं तं कामये।

सतीन्द्रः -न तावत् शब्दं कुरु। नाहं कामये इति व्यलिखम्।

हरेन्द्रः-आः मिथ्या वदसि ! इदानी महमपठम् ककारयुक्त आकारः= का, मकारः एकारयुक्तो यकारः—ये। संहत्य कामये। अस्तु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मातरं प्रदर्शय। तामहमाह्वयामि

सतीशः—न मातुराह्वानमपेक्षितम्। लक्ष्मीस्त्वं गच्छ, तत्र क्रीड त्वम्। अहं लेखमिमं समापयामि।

हरेन्द्रः—भ्रातः, किमेतत्। अये पुष्पस्य मालिका! तामेतां ग्रहीष्यामि।

सतीशः—न तत्र हस्तं धेहि, न तत्र हस्तं धेहि। छिन्नां करिष्यसि।

हरेन्द्रः—नाहं छेत्स्यामि। मह्यमेनां देहि।

सतीशः—श्वस्त्वदर्थं वह्वीः मालिका आनेष्यामि, परिहर एताम्

हरेन्द्रः—भ्रातः, रमणीया एषा। अहमेनामेव नयामि।

सतीशः—परकीया एषा। नाहं तुभ्यं दातुं शक्नोमि।

हरेन्द्रः—मिथ्या वदसि। शर्करागुलिका आनेतुमवदम्। त्वं तेन धनेन क्रीत्वा एनामानयः। कथमेषा परकीया भवति?

सतीशः—हरेन्द्र, त्वं लक्ष्मीरसि। क्षणं तूष्णीं तिष्ठ, यावल्लेखमिमं समापयामि। श्वस्त्वदर्थं बह्वीः शर्करागुलिका आनेष्यामि।

हरेन्द्र तर्हि अहमपि लिखामि।

(फलक मादाय सोच्चैःस्वरम)

ककारयुक्त आकारः=का, मकारः एकार युक्तो यकारः=ये= संहृत्य कामये।

सतीशः—तूष्णीं तूष्णीं तिष्ठ, नोच्चैः स्वरं कुरु, अरे विरम, विरम—

हरेन्द्रः—तर्हि मह्यं मालामेनां देहि।

सतीशः—गृहाण, परंतु नैतां छिन्नभिन्नां कुरु। अये किं कृतवानसि? यन्मया वारितं तदेव त्वया कृतम्! पुष्पं छिन्नं पातितम्। नैतादृशो निर्लक्ष्मीको दृष्टपूर्वः!

(मालामाच्छिद्य चपेटाघातं करोति)

निर्लक्ष्मीक, अपसर, अहं वच्मि इतः अपसर। (हरेन्द्रउच्चैः क्रन्दति—सतीशः सवेगं प्रतिष्ठते)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(व्यस्तत्रस्ताया विधुमुख्याः प्रवेशः)

विधुमुखी-मन्ये, सतीशो हरेन्द्रमरोदयत् । आर्या ज्ञानीयाच्चेदत्याहितं भवेत् । वत्स हरेन्द्र तात हरेन्द्र, मा रोदीः, लक्ष्मीरसि, कनकमसि !

हरेन्द्रः–(सरोदनम्) भ्राता मामताडयत् !

विधुमुखी--तथा वा ? तूष्णीं तिष्ठ, अहं तव भ्रातरं बहुधा ताडयिष्यामि ।

हरेन्द्रः-भ्राता मे पुष्पामालिकाम् आच्छिद्य गतः ।

विधुमुखी-भवतु, अहं तत आच्छिद्य एषा आगच्छामि ।

(हरेन्द्रो रोदिति)

एवं क्रन्दनपटुर्बालो न मया दृष्टपूर्वः । आर्या समधिकादरेण अस्य शिरः खादति । यदा यदस्याभिप्रेतम् , तदा तदस्मै दातव्यम् । किं वक्तव्यम् , आपणं रिक्तीकृत्य वस्त्राणि क्रीयन्ते । यथासौ नवाबस्य तनयो भवति ! धिक् धिक् किमेवं वाला भ्रष्टाः करणीयाः !

वत्स, तूष्णीं भज, अन्यथाऽयं भू :--

(सुकुमार्याः प्रवेशः)

सुकुमारी--विधुमुखि किं करोषि ? किमेवं मम बालाय भूतभयप्रदर्शनं समुचितं भवति ? सर्वेऽपि भृत्या नितान्तं वारिताः । न ते बालाय भूतकथां कर्तुं साहसन्ते । परन्तु बालस्य मातृस्वसा सती एवमुपकर्तुं प्रयतसे । विधुमुखि, ब्रूहि मम बालः कं तेऽपकारमकरोत् येन त्वं द्वाभ्यां नेत्राभ्यां द्रष्टुं न पारयसि । सम्यग्जानामि । अहं तव पुत्रं पुत्रमिव मानुषमकरवम् । त्वं तु तस्य प्रतिशोध माचरसि !

विधुमुखी- (रुदन्ती) आर्ये न तथा वक्तुमर्हसि । मम दृष्ट्या मम सतीशस्य तव हरेन्द्रस्य च मध्ये किमन्तरमस्ति ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हरेन्द्रः—मातः, भ्राता मामताडयत् !

विधुमुखी—धिक् धिक्, न तथा मिथ्या ब्रूहि। स तु अत्रैव नासीत्, कथं ताडयेत् ?

हरेन्द्रः—वाः भ्राता तु तत्रैव उपविश्य लेखमलिखत्—तत्र आसीत्—ककारयुक्त आकारः—का, मकारः, एकारयुक्तो यकारः ये, संहृत्य कामये। अपि च मातः, त्वं मदर्थं शर्करागुटिका आनेतुं धनमदाः। स तु तेन धनेन क्रीत्वा मालिकामानयत्। यावदहं तत्र हस्तं प्रसारयामि, तावन्मामताडयत्।

सुकुमारी—मन्ये युवां मातृपुत्रौ मिलितौ मम वत्सस्यानिष्टमाचरतः। नायं युवाभ्यां सहनीयो भवति। अस्य महाप्रयाणे युवां जीवथः। अये इदानीमहमवगच्छामि—बालो वैद्यानां-बहुविधान्यौषधानि गिलति तथाप्यनुदिनं किमिति रोगाक्रान्तो भवति, इदानीं कारणमुपलब्धम्।

चतुर्दशः परिच्छेदः

सतीशः—नलिनि, अद्य त्वत्सकाशादनुज्ञां नेतुमागतोऽसि।

नलिनी—किमर्थम् ? क्व गमिष्यसि ? (सावशेषम्)

गीतसीतावल्लभम्

शितिकण्ठ कविकृतम्

द्वितीयः सर्गः

विचलित वृहत्कायोऽप्युच्चैः शिराः सधराधरो
मुनिवरवचोबज्राघातैर्व्यशीर्य्यत वीर्य्यवान्।
अविरतगलत्स्वेदं खेदं वहन्नपि दुसहं
गुरुजनपराधीनो दीनोऽप्युवाच मुनीश्वरम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुर्ज्जरी रागः

विहरति चञ्चलतरचरणोज्ज्वल–
नूपुर नवरवकामे
कलित शिखण्डक कुण्डल मण्डित–
गण्डयुगाधिकवामे ।।
रामे मुनिवर निबसति चित्तम् !
असुसहितं मम नय बहुवित्तम् ।
ध्रुवपदम् ।।
नूतन जलधर कान्ति कलेवर–
वररुचिशालिनि बाले ।
विलसदकर्मठविग्रहशर्मणि
घर्म्मजलोज्ज्वलभाले ।२।
कोकिल कलरव कोमलभाषिणि
केकिकलारुचितन्द्रे
मृदुमधुरस्मितरश्मिधराधर–
विम्बलसन्मुखचन्द्रे ।३।
निर्जितनवनवनीतकलेवर–
विदलितमामकतापे
रुचिरनवोदितपल्लव कोमल–
पाणितलाञ्चितचापे ।४।
भूसुर गुरुसुर भक्ति वशम्वद–
चेतसि सुन्दर हीरे
पलित मलीमस मामकलोचन–
लोचक भूतशरीरे ।५।
निखिलमहीतल मानुषमानस–
रञ्जक मञ्जुल वेशे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुणगणलोलुपलोककदम्वक
नेत्रचकोरनिशेशे।
करयुगलाधिक चञ्चमचिह्नित--
चापलचापकलम्वे
तुङ्गकुतूहल संभृतसङ्गर
निर्जित वालकदम्वे
श्री शितिकण्ठ गदितमिदमद्भुत—
राघवरूपमुदारम्।
बलयतु भूतलसारतरं तव
कलिभवकल्मषभारम्।८।

गणयति न तद् बाणीं पाणी
निपीडय मुनी रुषा
ज्वलति सततं रामं
दिदेश सलक्ष्मणम्।
रुषिवृषभतो हृद्यां
विद्यामधिगम्य तौ
बिपिन कलनौत्सुक्याधिक्यात्
गुरुं तम वोचताम्॥

मालव गौड रागः

अभयमृगावलिसेवितया करिनिकर करम्वितगत्तं म्
अविरलवल्कल राजितया नगनिविड़ तरायन विततम्॥
वद हे केन कलितमुदारं
विपिनमिदं श्रमहारि वराश्रमवीथिकया क्षितिसारम् ध्रुवं पदम्
समय हुताहुति वासितया मृगनाभिविभावितलोकम्
द्विजपठनध्वनि नादितयो पिकनादनिकृतशोकम्।२।
बहुसुमनोऽनिशवन्दितयो धृत नव सुमनोभरशोभंम्
समुदित धूमजरेखिकया मधुपावलि सम्भृत लोभंम्।३।
बिलसित पावक पावितया धृतकेसर कुसुम कलापम्
बहुलकमण्डलु मण्डितया गुरुदाडिमफलहृततापम्।४।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धृतकरुणानिशसेवितया करुणासम कुसुम सुहासम्
अविरत मुक्त समाश्रितया परिदधतिमुक्त विलासम् ।५।
हविरति सौरभपूरिता नर्ति लसदति सौरभमालम्
सतत मशोक सुखोषितया सदशोकलसत्त रुजालम् ।६।
मुनिपरिवर्द्धितभूरुहया मुनिभूरुहभूरितगर्भ म्
सरयकदम्वकलोभितया कुसुमानत सरलकदम्वम् ।७।
इतिशितिकण्ठ कृत ततया गुरुतर दुरितोद्धृति कान्तम् ।
राघव पदयुग भावनया रावयतु कुशलानि नितान्तम् ।८।

हन्तैतद् विपिनं विनमृशिखरैः धूताधिरूढादिभिः
भूतान्याश्रमपादपैश्च कुरुते पूतानि किं कारणम् ।
इत्येवं रघुवालकोक्तिमुदितोऽवोचन् मुनिः सादरं
तं भूयिष्ठ कुतूहलास्पदतयाऽनङ्गाश्रमं विस्तरात् ।३।

तदस्तोका मोचाकलितललितारण्य निलयैः
समीरैः वानीरोल्लसित सरयूतीर पथिकैः ।
समाराध्ये साध्येप्सित विपिन मध्ये मुनिवरः
कृतातिथ्यो विप्रैः रघुपतियुतो रात्रिमनयत् ।४।

इति श्री गीतसीतावल्लभे महाकाव्ये शितिकण्ठ कृतौ
अनङ्गाश्राश्रमनिवासो नाम द्वितीयः सर्गः ❀ ।२।

❀ गीतसीतावल्लभमेतावदन्तमेव सहृदयबन्धुवरेभ्यः पुरीसंस्कृतकलाशालाध्यक्षेभ्य श्री वासुदेवनन्दमहोदयेभ्य उपलब्धम् । तदिदं गीतगोविन्दानुकारि श्रीरामचन्द्रचरितात्मकं महाकाव्यं सरसं ललितपदावलीकरम्वितं मनोहरमिति सहृदयवाचकेभ्य पहृतम् अवशिष्ट भागो यदि केषांचित् सहृदयानां सविधे वर्तते, अनुगृह्य प्रेरणीयः । मनोरमा साभिनन्दनं कृतज्ञा तेनात्मानं प्रसाधयेत् ।

सम्पादकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपकारिणः उपकारः

लेखकः—श्री विश्वनाथ सोमशर्मा साहित्य विद्या प्रवीणः

महात्मनां चरित्राणि अतीवविचित्राणि भवंति । सदाशयानां चर्याः प्रायेण अपकारिष्वपि करुणामय्यो भवन्ति । महात्मानः मार्दवदाक्षिण्यादिविहीनेष्वपि अतीवकोमला भवन्ति । परमद्वेषं प्राप्य दंभाचारविहारादिभिः प्रवर्तमानेष्वपि अत्यन्तं शीतला भवन्ति ।

पुरा बिंबिशारपालिते राजगृहनाम्नि नगरे श्रीगुप्त-इति धनमदांधः कश्चन साधुविद्वेषी आसीत् । स सर्वदा धनमदेन ऊर्ध्वमधश्च किमपि न पश्यन् सदा साधुजननिन्दां, अन्यायेन-परद्रव्यापहरणं, परपीडनं च कुर्वन्नासीत् । तस्यासत्कृत्येष्वेव सदाभिरुचिः । स तावदनृतस्याश्रयः । तस्य वाक्यान्यतीवकठिनानि, क्रियास्त्वतीववक्राः । दृष्टयः करुणाशून्याः । तादृशस्य लक्ष्मीकटाक्षः संजातः । ततः को वा निवारयति तं दुष्टं तदीयाद् दुष्टव्यापारात् ? एकदा श्रीगुप्तः गुणशीलसौकुमार्यादिभिस्सर्वथा अत्मतुल्येन अघोरनाम्ना क्षपणकाधमेन संभाषमाण आसीत् । तदा स एवमवादीत् 'अये श्रीगुप्त अयं सुगतः स्व शिष्यैस्सह विकटकूटनाम्नि पर्वते निवसति । तस्य बोधान् श्रुत्वा तस्याकृतिं दृष्ट्वा सर्वे लोका अमायिकास्सन्तः तस्य वाग्वागुरायां पतन्ति । तं देवं भावयन्ति । तं सर्वज्ञं मानयन्ति । परन्तु तस्मिन् प्रशंसार्हः गुणलेशोऽपि न दृश्यते । तथापि "गतानुगतिको लोक" इति, सर्वे लोकास्तमेवानुसरन्ति, तदीयवाक्यान्येव विश्वसंति, अस्मदादिभिर्यथार्थतयाउक्तावपि न विश्वसन्ति । लोके तावत् बहुभिरेकीभूय उक्तौ सत्यमप्यसत्यं भवति, देवोऽपि नरत्वं याति । नरोऽपि देवो भवति । एवमद्य सुगतोऽपि बहुजनादरेण देव इव, सर्वज्ञमात्मानं मनुते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतः येन केनाप्युपायेन आवाभ्यामद्य तस्य शृङ्गभङ्गः अवश्यं विधेय इत्यवोचत् ॥

तच्छ्रुत्वा श्रीगुप्तः "अये, सम्यगुक्तं भवता । चिरात् मन्मनस्यप्येवमेव स्थितम्, अत्राभ्यामेकीभूय कार्यकरणे यत्किंचिदपि दुस्साधं न भविष्यति, आवयोः धनस्य लोपः किंचिदपि नास्ति, 'धन मूलमिदं जगत्' इति लोकोक्ति र्भवता श्रुत पूर्वैव खलु । अस्मिन् विषये सर्वथा भवान् मम सहायो भविष्यति । साधयित्वैतत्कार्यं सर्वथा तवानन्दं विधास्यामीत्यवोचत् ।

ततः श्री गुप्तस्य मनस्येवं विधा बुद्धि स्संजाता । गौतम बुद्धं स्वयं गत्वा भिक्षाव्याजेनात्मद्गृहमानायिष्यामि । गृहप्राङ्गणे पुरुष-प्रमाणं गर्तं कृत्वा तदधः अग्नि पूर्णं कृत्वा अदर्शनार्थं बहिःतृणगुल्मा-दिभिः प्रच्छादयामि । भक्ष्यभोज्यादिकं सर्वं विषपूर्णं कारयिष्यामि । अतः स्वयं गौतमसमीपं गत्वा भक्ति श्रद्धा समन्वित इव पादयोः पति-त्वा एवं विज्ञापयामि । भगवन्तमन्ते, अद्यास्मद्गृहे भवता भिक्षाङ्गीकारः कर्तव्यः । युष्मत्पादरजसा अस्मद्गृहं पावयंत्विति विज्ञापयामीति । परंतु तस्य गृहिणी सर्वमेतत् ज्ञात्वा निवारयामास तस्मात् व्यापारात् पतिम् । तेन क्रुद्धोऽसौ श्रीगुप्तः प्रथमन्तां भीषयामास । ततः स्त्रीचित्तं मतीव-चञ्चलं, तासां हृदये रहस्यं न चिरन्तिष्ठतीति मत्वा तां निगडबद्धां कृत्वा कस्मिंश्चित् भवने संस्थाप्य कवाट बन्धमकरोत् । एवं श्री गुप्तेन यदा यदा यद्यत्कृतमासीत्तदातदा तत्सर्वं तेन महात्मना ज्ञातमासीत् । तथापि न कांचिदपि विक्रियामलमतासौ महात्मा ।

ततः श्रीगुप्तः स्वयं गौतम समीपं गत्वा पादयोश्च तस्य पतित्वा एवं विज्ञापयामास । महात्मन् अद्य अस्मद्गृहे भिक्षाङ्गीकार्या । युष्मत्पाद-रजसाऽस्मद्गृहं पवित्रीक्रियतामिति, ॐ मित्युक्त्वा प्रस्थितोऽसौ महात्मा मध्ये मार्गं केनचित्स्वशिष्येण निषिद्धः पवमुक्तश्च । आर्य ! एताव-त्पर्यन्तम् एष दुरात्मा युष्मान् युष्मदीयांश्च सर्वदा दूषयति । अपरं चानेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वं भक्ष्यभोज्यादिकं विषपूर्णं कृतमिति श्रूयते । अतः एतद् गृहं न गन्तव्यमिति । एवमुक्तोऽपि मम न काचिदपि हानिर्भविष्यति, विश्वस्तो भवतु भवानित्युक्त्वा तद्गृहं प्रतिययौ । गत्वा च गृह प्राङ्गणे अग्निपूर्णे गर्ते यावत् पादनिक्षेपमकरोत्, तावदग्निपूर्णं गर्तं सहस्रदलं पद्मं जातम् । तत्र निक्षिप्तपादोऽसौ महात्मा सर्वैर्दृष्टः, विशेषतः श्रीगुप्तः दृष्ट्वैव चातीवनिर्विण्णः पश्चात्तप्तहृदयश्चासीत् अहो, एतादृशोऽयं महात्मनः प्रभावः ! यदस्य पादक्षेप मात्रेणाग्निकुण्ड सहसा सहस्रदलं पद्मं जातम् । महाशक्तिसंपन्नानां महामहिमाभिरामाणां च न किंचिदप्यसाध्यमस्ति लोके । वृथाऽहमस्य क्षपणकस्य वोधान् श्रुत्वा बुद्धं गर्ते पातयितु मिच्छन् अहमेव तस्मिन् गर्ते पतितम् । इत्येवं पश्चात्तप्तहृदयः तदीयां पापचिन्तां विहाय, तस्य पादयोः पतित्वा 'देव अस्य पापात्मनः दारुणकृत्यं क्षमस्व । युष्मन्माहात्म्यमविज्ञाय नीचैः कृतान् दुर्बोधान् श्रुत्वा ईदृशं दारुणं कृत्यमकरवम् । अस्मद्धर्मपत्न्या बहुधा बोध्यमानोऽपि तदश्रुत्वैव तां कठिनमशिक्षयम् । अपि च भवन्तं हन्तुमिच्छन् भोज्यपदार्थान् सर्वान् विषमिश्रानकरवम् । स्वामिन् ! मदीया विवेकस्य परिमितिर्नास्ति । अधुना पश्चात्तप्तोऽस्मि । अविवेकिनां दुष्कृत्य सहनं तथा कथंचित्तेषामुद्धरणं च सत्पुरुषलक्षणं खलु, इति नेत्राभ्यां वाष्पमुत्सृजन् अतीव दीन मवोचत् । गौतमस्तु तं करुणार्द्रया दृशा पश्यन्, "साधो उत्तिष्ठ, मा विचारं कुरु ।" इत्युक्त्वा प्रथमतः भार्यां बन्धविमुक्तां कृत्वा, एवमवादीत् 'मम तावत् त्वद्विषये कोपलेशोऽपि नास्ति, परन्तु एते विषाग्न्यादयः अस्मादृशां न कांचिदपि हानिं कर्तुं शक्नुवन्ति । श्रूयतां अस्मिन् विषये कांचित्कथां कथयामी त्युक्त्वा एवं कथामकथयत् ।

मणिमयूर वृत्तांतः

आसीत्परमपुण्यस्रवंत्या गङ्गया पवित्रितायां वाराणस्यां कदाचित् ब्रह्मदत्तो नाम राजा । तस्यातीवसौन्दर्यवती अनुपमेत्यन्वर्थ-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाम्नी भार्या, स तावत् तया विना क्षणमपि स्थातुमनिच्छन् यत्र कुत्रापि गमनेऽपि तया सहैव गच्छन्नासीत्। एवं स्थिते कदाचिन्मृगया मुद्दिश्य प्रांतारण्यं तयैव सह प्रस्थितोऽभूत्। मृगयानंतरं भार्यायै वनरामणीयकं दर्शयति इतस्ततस्संचरति राजनि, वीणानादानुकारी विहंगमशब्दस्तयोः श्रुति पथं गतः। तं श्रुत्वाऽतीव हृष्टा तत्पत्नी शब्दमुद्दिश्य राजानमपृच्छत, कस्यायं मनोहर शब्द इति। अस्मिन् वने मणिमयूरोऽस्ति कश्चित्। तस्य शरीरे सर्वत्र नानाविधानि रत्नानि सन्ति। तस्य शरीरकान्तिरतीवचित्रा। स तावत्सर्वधर्माभिज्ञः। मनुष्यवाचा संभाषणमपि करोति, अतीवरूपवान्। तस्य शब्दः योजन पर्यन्तं स्पष्टं श्रुतो भवति। अव्यक्त मधुरोऽयं ध्वनिस्तस्य मणिमयूरस्य सम्बधीत्यवोचत्। तद् श्रुत्वा तथाचेत्सोऽवश्यं मया द्रष्टव्यः। अवश्यं भवद्भिरानेतव्यः पक्षिराज इति राजानमत्रोचत्। ततो राजा किंचिद्विहस्याब्रवीत् तस्य दर्शनमेव प्रायो दुर्लभं, सत्यपि दर्शने ग्रहणं बध्वानयनं चातीव-दुर्लभम्, अद्भुत रूपवान्, रूपसदृश विज्ञानवांश्च पक्षी नान्यः कश्चिदस्त्यत्र भूतले तथापि भवत्याः कामनानुसारेण यथाशक्ति तस्य ग्रहणार्थं प्रयत्नं करिष्यामीत्युक्त्वा अतीव कुशलान् चरानाहूय मणिमयूरं जीवग्राहं मानयंत्वित्यादिशत्।

ते च यस्मिन् प्रदेशे मणिमयूरस्तिष्ठति, तं प्रदेशं गत्वा रज्जुभिर्यावत् तं बध्वानयितु मिच्छन्ति, तावत्मणिमयूरः तदीयरज्जुबंधान्मुक्तो भूत्वा दूरेऽतिष्ठत्। एवं बहुवारमभूत्। तथापि स गृहीतो नाभवत्। ततः खिन्नास्ते राजानुचराः किंकर्तव्यशक्नुवन्तः राज्ञो भीतास्तूष्णीमासन्। तान् तथाविधान् दृष्ट्वा मणिमयूरोऽब्रवीत्। राजैव स्वयमागत्य मां गृह्णात्विति। ते गत्वा मयूरभाषितं राज्ञे न्यवेदयन्। ततो राजा स्वयमेव गत्वा तं गृहीत्वा स्वपुरं नीतवान्। राजादंपती तमन्तःपुरे संस्थाप्य नित्यं पूजयन्तौ तदुपतं केकारवं च श्रृण्वन्तावास्ताम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ कदाचित् दिग्विजययात्रां प्रति गच्छन् राजा पत्नीं हातुमनिच्छन्नपि कथंचित् तां हित्वा एवमवादीत् । 'प्रिये चिरं त्वां विहाय एकाकी वस्तुमात्ययिकं कार्यमापतितम् । त्वया सहैव गन्तव्यमित्यपि परन्तु एषा कियत्कालं भविष्यति सम्यक् न ज्ञायते । अतस्त्वां नेतुमशक्यम्, ततोऽत्रैव स्थातव्यं भवत्या, परं त्वतीवजागरुकतया भाव्यं, मणिमयूरं प्रति स्वयं सर्वदा यथोचितपचारान् कुरु, इत्युक्त्वा चतुरंगबलेन सह प्रस्थितोऽभूत् ।

यात्रासमयः कथञ्चित् वत्सरमतिक्रान्तः । वर्षं पर्यन्तं तदागमनं प्रतीक्षमाणा, यथा कथञ्चित्कालं निनाय । ततोऽप्यनागते तस्मिन् तत्समागममाकांक्षमाणा तदभावाच्च एकाकिनी स्थातुमसमर्था स्वशरीरं परपुरुषाधीनमकरोत् । एवमन्तःपुरे शीलभ्रष्टायाः राज्ञ्या वृत्तं सर्वं मणिमयूरेण ज्ञातम् । अनुपमयापि ज्ञातं मणिमयूर स्सर्वं पश्यतीति । ततस्तस्या मनस्येव चिन्ताऽजायत-वने स्वेच्छया विहरन्तं एनं मणिमयूरं स्वहस्ताभ्यां स्वयमानीय शिरस्यधारयम् । अयमतीवविज्ञानवान् । मनुष्यवाचापि सम्भाषणं कर्तुं शक्नोति । मया च प्रत्यक्षमस्य प्रत्यहं पापमेव क्रियते । 'प्रत्यहं पश्यति चैष मदीयं वृत्तं सर्वम् । पापं मनः सततं शङ्काकुलं भवति इत्युक्तदिशा यदा यदाहन्तं पश्यामि तदा तदा मदीयं मनः अतीव चकितं भवति । यदाकदाचिदपि राज्ञे निवेदयेदयमिति । अतोऽवश्यं मयाऽयं हन्तव्यः । नोचेदयं मदीयं चेष्टितं सर्वं राज्ञे निवेदयेदिति मत्वा कदाचित्तस्मै विषपरीतमन्नमदात् । विषान्न भोजनेन स मणिमयूरः अतीव हृष्टपुष्टांगः अभूत् । तस्य देहकान्तिरतीववृद्धिं गता । केकारवः दशयोजन पर्यन्तं श्रुतोभवत् । किंकरोमि । मदीयं दोषं प्रच्छादयितुमन्यदोषमकरवम् । मदीयं विषान्नमस्य बलवर्धकं जातम् । अवश्यं मदीयं पापचेष्टितं कथयेदेष मयूर- इति चिन्तयन्ती चिन्ताक्रान्ता क्रमेण मृतिमगात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं मणिमयूर कथां कथयित्वा गौतमः महात्मनां हृदये विषमपि भस्मवत् भवति । वस्तुतस्तु रागमोहद्वेषाः प्रधानविषाः । न तु हालाहलादयः । रागादयो यथा लोकान् बाधन्ते न तथा हालाहलादयः । अपि च अमृतोत्पत्तै हालाहलस्य च मुख्यं स्थानं हृदयं (चित्तम्) एष श्रीगुप्तस्य तत्पत्न्याश्च बोधयित्वा धर्मोपदेशं कृत्वा शरणत्रयमुक्त्वा सर्वस्वेनापि दानधर्मादिकं कुर्विस्यनुशास्य तस्मात् स्थानात् प्रचलितोऽभूत् । इति ।

सुमतिशतकम्

अनुवादकः—ति० गु० वरदाचार्यः, यम्. ए.

अविदिताह्वयकेन मनीषिणा कृतिरियं कृतिनान्ध्रगिरेरिता ।
तदनुवादमिमं सुरभाषया सहृदयाः शृणुतादरणोचितम् ॥

श्रीरामस्य दयाहेतोः साधु साध्विति साधुषु ।
वदत्सु हारिणः पथ्यान् ब्रवीमि सुमते ! नयान् १

आपद्यसाह्यकृद्बन्धुः वरादायी सुरोऽर्चितः ।
युध्यारूढोऽचलन्नश्वः त्यक्तव्यास्सुमते ! द्रुतम् ॥ २

अपि जीवेत्सुखं क्षेत्रं कर्षञ्जवयुतैर्वृषैः ।
नत्वर्थितसदातारं सुमते ! स्वामिनं भजन् ॥ ३

मा कार्षीः सेवनं लुब्धः प्रणयं कुजनैः समम् ।
देवालयाधिकारं च सञ्चारं सुमते ! वने ॥ ४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बिरलस्फुरितोष्ठो यो मधुरालापवर्जित:
अधिकारगदग्रस्त: स मूक: सुमते ! शब: ।। ५

ऋणैर्भोगस्तपोऽज्ञस्य वृद्धस्य तरुणी प्रिया ।
अविवेकिप्रभो राज्यं सुमतेऽनर्थहेतव: ।। ६

ऋणदाताऽगदङ्कारो नदी नित्यजला द्विज: ।
यत्र तद्विन्वस ग्रामे नो चेत्तं सुमते ! त्यज ।। ७

जामातुः सौम्यता गोपपाण्डिती सत्यता स्त्रिय: ।
तुषेभ्यस्तण्डुला: श्वेता: काकास्स्युस्सुमते ! न हि ।। ८

निर्विशङ्कं ददद्दाता, बुभुक्षोरोदनस्सुधा ।
धैर्यवान्वंशतिलक:, सुमते क्लेशभृत्पुमान् ।। ९

बुभुक्षानपनुद् भुक्ति: कुलटात्वोपजीवनम् ।
जीर्णकूपजलं गर्ह्यमवीनां सुमते ! पय: ।। १०

फलप्रदात्री विद्या हि रणोत्साहो हि पौरुषम् ।
काव्यास्वादो हि वैदग्ध्यं वादिता सुमते ! व्यथा ।। ११

यन्मुखं न पठेत्सम्यगम्बेत्यन्नं न याचते ।
न नुजांश्चाह्वयेतद्धि खातमृत् सुमते ! विलम् ।। १२

गोधा किं न शतायु: स्यात्, सहस्राब्दश्च पन्नग: ।
ह्रदे सुखी बकश्चापि, पुमर्थान्सुमते ! भज ।। १३

न प्राप्यन्ते गुणा नीचैरुत्तमस्य कथञ्चन ।
पित्तलं किं भवेत्स्वर्णं सुमते ! यत्नविद्रुतम् ।। १४

अश्वमम्भ: पिबन्तं च, मत्तभं च मदच्युतम् ।
गो: समीपे वृषं, माभ्येह्यविद्यं सुमतेऽधमम् ।। १५

उपकर्तारमुद्दिश्य नोपकारेऽस्त्यपूर्वता ।
उपकर्ताऽपकर्तुस्तु सुमते ! सुजनो मत: ।। १६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कपटं मधुरं पूर्वं मिक्षुवद्दृश्यते जनैः ।
पौरोभाग्यान्निजं रूपं व्यनक्ति सुमतेऽन्ततः ॥ १७

यदा यदुचितं वाक्यं तत्तदोक्त्वा परान्न यः ।
क्लिश्नाति क्लिश्यते वापि स्वयं स सुमते ! कृती ॥ १८

रन्ध्रान्वेषपरं नित्यं नोपसर्पेत्कदाचन ।
भेकः फणिफणाच्छायां श्रयते सुमते ! किमु ? १९

आयान्ति सह सम्पद्भिः बान्धवा बहुला भुवि ।
जलपूर्णे सहस्राणि भेकास्स्युः सुमते ! ह्रदे ॥ २०

बन्धुनिन्दा न कर्तव्या, नापक्वफलसञ्चयः ।
पलायनं तथा युद्धे, धिक्कारः सुमते ! गुरोः ॥ २१

एकोऽधिकारी निर्णेता चैको ग्रामे भवेद्यदि ।
शुभं तत्र पदं धत्तेऽनर्थस्तु सुमतेऽन्यथा ॥ २२

नारागिणो जिह्मास्यन्ते जायास्वामिसुहृज्जनाः ।
येन गोपः स एव स्यात् जात्या स सुमते ! न सः ॥ २३

उह्यते शकटो नावा शकटेन तथा च नौः ।
तयोरिव नृणां स्यातां सुमते ! ह्युच्चनीचते ॥ २४

योऽङ्गीकरोति युवतेः चिरं ज्ञातिकुले स्थितिम् ।
प्रेषयत्यापणं वृत्त्यै जारिण्याः सुमते ! स ताम् ॥ १५

शुभलग्नेऽभिषिक्तोऽपि हेमसिंहासने वरे ।
शुनकः किं विजह्यात्स्वं सुमते ! पूर्ववर्तनम् ॥ २६

मण्डूकस्यैकपादत्वं, रोगः सर्पस्य, वार्धके ।
दारिद्र्यं, कुलटा भार्या, सुमते ! दुःखहेतवः ॥ २७

जलजं सलिलाद्भ्रष्टं म्लानं स्यान्मित्ररश्मिभिः ।
स्थानच्युतस्य मित्राणि भवन्ति सुमतेऽरयः ॥ २८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करणो मरणं गच्छेद्विश्वसन्करणान्तरम् ।
जिजीविषुः सजातीयं प्रतीयात्सुमते ! न सः । २९

करणेन समं वैराज्जीर्यत्यन्नं न खादितम् ।
ब्रह्मणोऽस्नेहलिप्ताक्षो न धावेत्सुमते ! रथः ॥ ३०

करणः सुजनो, हस्ती मदहीनो, ऽदशन्नहिः ।
वृश्चिकोऽक्षतिकारी च न गण्याः सुमते ! भुवि ॥ ३१

अपक्व स्यात्फलं दष्टं कषायं मधुरं न तु ।
सतीषु तरुणीष्वीप्सन्नप्रौढाः सुमते ! पशुः ॥ ३२

अकवे रचना, स्त्रीणां रक्तिर्भावविवयोजिता
शरो धावति कोले चाप्यसिद्धः सुमते ! वृथा ॥ ३३

न स्नेहो दुर्जनैः सार्धं न नाशः कीर्तिसम्पदः ।
न श्लाघ्यत्वमृणं दातुः न रागः सुमते ! स्त्रियः ॥ ३४

अन्यभुक्तां स्त्रियं भोक्तुमिच्छन्नन्यविटः समः ।
पिपीलैरुपगच्छद्भिः पिष्टेक्षुं सुमते ! रसात् ॥ ३५

हासो निर्हेतुको व्यर्थो योषा चावृतकञ्चुका
पूरणेन विनापूपोऽप्यतीयैः सुमते ! महः ॥ ३६

कुलस्त्रीषु न वैरं स्यात् न तासामपवादनम् ।
स्त्रियोऽश्रु पतितं गेहे क्षालयेत्सुमते ! श्रियम् ॥ ३७

काले स्नेहमये दोषो गुणकक्षां विगाहते ।
वैपरीत्ये गुणस्यापि दोषता सुमते ! भवेत् ॥ ३८

ध्रुवं नीचनरस्नेहादनर्थः प्रभवेद् भुवि ।
मञ्चो मत्कुणदंशाद्धि निन्द्यतां सुमते ! व्रजेत् ॥ ३९

कामशास्त्रविनिष्णातो राजेन्दुः सुन्दरोऽपि सन् ।
पण्याङ्गनां विना पण्यं लभते सुमते ! कथम् ॥ ४०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सञ्जातस्तनयो व्यर्थः सर्वान्हन्ति गुरोर्गुणान् ।
माधुर्यं मञ्जरीवेक्षोः सकलं सुमते ! शृणु ॥ ४१

स्त्रीविश्वासः फणिस्नेहश्चान्यकान्तानुरक्तता ।
मिथ्या निम्बस्य माधुर्यं नृपाणां सुमते ! वचः ॥ ४२

अर्जितारं पतिं योषा मान्यत्युपचारतः ।
मन्यते तु दरिद्रं तं जङ्गमं सुमते ! शवम् ॥ ४३

माऽनुशोचीरतीतं त्वं मा श्रद्धाः कामिनीरतिम् ।
मावरोधजनैर्गुप्तं भाषणं सुमते ! कृथाः ॥ ४४

पिपीलनिर्मिता यान्ति वल्मीकाः फणिनां वशम् ।
तथाज्ञैस्सञ्चितं वित्तं सुमते ! नृपसाद्भवेत् । ४५

अबन्धुं धनिनं बन्धुं श्रयन्त्युक्त्वा नरा इह ।
अधनोऽबन्धुवद्बन्धुः वर्ज्यते सुमते ! नरैः ॥ ४६

हस्तयोर्भूषणं दानं भूभृतां सत्यभाषणम् ।
पातिव्रत्यं तथा स्त्रीणां सर्वेषां सुमते ! नयः । ४७

कालात्ययं तनूतापं नासहिष्णोः फलोदयः ।
सोढक्लेशविलम्बेन सुमते ! नष्टमाप्यते ॥ ४८

कोप एव स्वकीयोऽरिः, शान्ती रक्षा, तथा दया ।
बन्धुः, तुष्टिर्भवेत्स्वर्गो निरयस्सुमते ! व्यथा ॥ ४९

तपस्स्वीयं, सतीरूपं वैदुष्यं तनयस्य च ।
ओषधिः प्राङ्गणस्था च, न स्तुत्याः सुमते ! जनैः । ५०

स्वसम्पन्मघवद्भोगः, स्वदुःखं स्वर्दरिद्रता ।
स्वमृत्युं जगतामन्तः, स्वप्रिया सुमतेऽप्सराः ॥ ५१

देशे विरहिते स्वीयैः, निस्स्नेहे कलहाकुले ।
संशयस्यास्पदे वापि न स्थेयं सुमते ! जनैः ॥ ५२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अताम्बूलं मुखं, गात्रमघृष्टतरुणीस्तनम् ।
पद्महीनो ह्रदो, रात्रिः निश्चन्द्रा सुमते ! वृथा ॥ ५३

विषं स्यात्फणिनो मूर्ध्नि पुच्छाग्रे वृश्चिकस्य च ।
आचूडपादं सर्वत्र खलस्य सुमते ! विषम् ॥ ५४

दत्तेऽप्यर्थे शिरोदघ्ने गणिकाया न सत्यता ।
शिरसा शपमानां तां प्रतीयात्सुमते ! न हि ॥ ५५

अकृत्तकेशं चास्नातं मलोपहतवाससम् ।
अपि प्रियं जुगुप्सन्ते सुमतेऽपि कुलाङ्गनाः ॥ ५६

आत्मनानुपभुक्तोऽर्थो भूपतिं च भुवं व्रजेत् ।
मक्षिकासञ्चितं ह्येति सुमतेऽन्यवशं मधु ॥ ५७

नृपः कर्णजपामात्यवाग्भिर्यो बाधते प्रजाः ।
स दिधक्षति कल्पद्रुं सुमते ! क्षारकारणात् ॥ ५८

धनदेऽपि सुहृद्वर्ये भैक्षचर्यैव धूर्जटेः ।
स्वीयानां विभवेऽनल्पे स्वभाग्यं सुमते स्वकम् ॥ ५९

करोत्युपकृतो धीरः शतावृत्तं प्रतिप्रियम् ।
दत्ते क्षाराम्बुसंसिक्तो लाङ्गली सुमते ! सुधाम् । ६०

न पन्थानं व्रजेदेको नाद्याच्छत्रुगृहे रसात् ।
नाददीत परस्वं च नाप्रियं सुमते ! भजेत् ॥ ६१

करग्राहो द्यूतकरः स्वर्णकारः पणाङ्गना ।
यामहस्तः पणाजीवः श्रद्धेयाः सुमते ! न हि ॥ ६२

न पाययेत्पयः साम्ना विषं दण्डात्तु भोजयेत् ।
दुर्बलं साम, दण्डस्तु प्रबलः सुमते ! ध्रुवम् ॥ ६३

निर्मर्यादो महीजानिः विधवा गृहनायिका ।
करणो वैदिकश्चापि सुमते ! मृत्युदेवता ॥ ६४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सरसा कवितागोष्ठी श्राव्यं गानं च सन्निधौ ।
अज्ञस्य बधिरस्येव सुमते ! शङ्खनादनम् ॥ ६५

सभायां न हसेत्पित्रोः सन्निधौ च महीक्षितः ।
परसत्या न हासः स्यात्, न हसेत् सुमते ! द्विजम् ॥ ६६

जीवितस्य जलं मूलं मुखं च रसवद्गिराम् ।
नारी भूषा नराणां च नारीणां सुमतेऽम्बरम् ॥ ६७

न केनापि भवेद्वैरं नानुशोचेद्दरिद्रताम् ।
न गोष्ठ्यां पुरुषं भाष्वं स्त्रीलौल्यं सुमते ! त्यज ॥ ६८

रिक्तहस्तेन नोपेयाद्दैवतं भूपतिं गुरुम् ।
प्रेयसीं तनयं धीमानवेप्सुः सुमते ! शुभम् । ६९

कार्ये दासी रतौ रम्भा सचिवा मन्त्रणेष्वपि ।
पोषणे जननी चापि पुंसः स्यात्सुमते ! सती ॥ ७०

सोदरः परनारीणां तुष्टः परहिते रतः ।
स्तुतिनिन्दासमो यस्स सुमते ! पुरुषोत्तमः ॥ ७१

मा रज्यस्व परस्त्रीषु परस्वानि च मा गृधः ।
मा परानपभाषस्व मार्थ्यतां सुमतेऽधमः ॥ ७२

भीष्मोऽप्यन्यसतीगोष्ठ्या भुवि निन्दां प्रपद्यते ।
तथैवास्त्यपतौ वासात्सुमते शीलवत्यपि ॥ ७३

जहाहृत्यन्यहृद्दं भार्यां मा प्रतीपं सुतं भज ।
अविधेयं भटं माऽदाः स्त्रीलौल्यं सुमते ! जहि ॥ ७४

माविष्कार्षीर्मतिं स्त्रीयां मा गमोऽन्यं निरर्थकम् ।
मा रंसीः परदारान्मा दृप्ताश्वं सुमते ! भज ॥ ७५

भार्यां पर्वसु नोपेयान्न हृष्येद्दयया प्रभोः ।
न लालयेत्कलत्रं च, न तिष्ठेत्सुमतेऽपदे ॥ ७६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धौतदन्तस्य ताम्बूलं मानिन्या सह सङ्गमः ।
अभ्यक्तस्नातसुप्तिश्च, सुमते ! वर्णनातिगाः ॥ ७७

सेवाऽक्लेशविदः पत्युः, मुग्धाया योषितो रतिः ।
भद्रताभञ्जकः स्नेहः प्रतीपं सुमते ! प्लुतम् ॥ ७८

सलिलं क्षीरसम्मिश्रं क्षीरवद्भासते वहिः ।
भञ्जयेत्तु रसं तस्य तथैव सुमते ! खलः ॥ ७९

न कदाप्युपकुर्वीत दुष्टमापद्वशं गतम् ।
वृश्चिको रक्षितोऽप्यग्नेः न दशेत्सुमते ! किमु ? ८०

पत्तनस्य वणिक्प्राणाः कलमस्य जलं तथा ।
करिणश्च करो, योषा सम्पदः सुमते ! भुवि ॥ ८१

ददद्व्याघ्रपयः, छित्त्वा हृदयं चार्पयन्करे ।
यच्छन्भूरि धनं, वेश्यां सुमते ! नैव रञ्जयेत् ॥ ८२

आयान्त्येवाटवीमध्यं सर्वेऽर्थाः सुमुखे विधौ ।
मेरावपि न लभ्यास्ते सुमते ! विमुखे विधौ ॥ ८३

अयाचितचिकीर्षुत्वमरक्ततरुणीरतिः ।
वर्ज्या किम्भूपसेवा च, सुमतेऽनार्यसङ्गतिः ॥ ८४

प्रातिवेश्ये नरे शत्रौ, व्यवहारचणे प्रभौ ।
कृषके पिशुने, नाशः सुमते ! करणस्य हि ॥ ८५

स्वणदानादृणं माऽदाः, मा पलायस्व सङ्गरे ।
मा क्रीतार्थमृणं वादीः मा सख्यं सुमतेऽसता ॥ ८६

किं मे बलवतश्छिन्नमिति मा वह्वरिर्भव ।
पिपीलिकावशं प्राप्तो म्रियते सुमते ! फणी ॥ ८७

सचिवेन विनाभूतो भूजानिः सदृशो ध्रुवम् ।
शुण्डादण्डविहीनेन करिणा सुमते ! शृणु ॥ ८८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सामात्यं भूभृतो राज्यं मन्त्रगुप्तेः स्थिरं भवेत् ।
यथाङ्गविकलं यन्त्रं सुमतेऽन्यत्तु सीदति ॥ ८६

जीवितं वचसस्सत्यं, राजदुर्गस्य रक्षणः ।
स्त्रियो मानः, स्वहस्तश्च लेखस्य सुमते ! भुवि ॥ ६०

मानी वीतधृतिर्नीचमाश्रयन्दृश्यते भुवि ।
प्रस्थमात्रे जले गूहन् सुमते ! स्वमिव द्विपः ॥ ६१

अनादरवतो राज्ञो भुक्तिमुक्ती न सेवया ।
नह्यदीपद्युतौ गेहे सुमते रतिविभ्रमाः ॥ ६२

पूर्वोक्तं नान्यथाकुर्यान्न सुहृद्यशिवं वदेत् ।
न सेवेत नृपं चण्डं न दुष्टं सुमते ! भजेत् ॥ ६३

शारीरकबलोपेतान्नीतिमान् बलवत्तरः ।
आधोरणो नयेन्नागं शैलाभं सुमते ! वशम् ॥ ६४

अनूपं न कृषेद्देशं न गच्छेद्बन्धुमापदि ।
नान्यं ब्रूयात्स्वकं छिद्रं, न भीरोः सुमते ! रणः ॥ ६५

असस्योऽस्वामिको ग्रामो, मार्गोऽनुचरवर्जितः ।
देशो भूपविहीनश्च, सुमते ! रुद्रभूसमा ॥ ६६

अमान्मथविकारां यो रिरंसेत बलात् स्त्रियम् ।
स जलेन विना गन्धान्सुमते ! पेष्टुमिच्छति ॥ ६७

श्रोतव्यं सर्वतो मर्त्याच्छ्रुतं सम्यग्विचारयेत् ।
सत्यासत्ये ततो जानन् कथ्यते सुमते ! सुधीः ॥ ६८

अनास्वादितताम्बूलमपीतललनाधरम् ।
अगाननिपुणं चास्यं भस्मदं सुमते ! बिलम् ॥ ६६

वेश्यायाः प्रणयो न स्यात्सम्भूतोऽपि न च स्थिरः ।
न रोहति तृणं मर्गे विनश्येत्सुमते ! भवन् ॥ १००

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चाराङ्गनायाश्शपथः, स्वर्णकारस्य सौहृदम् ।
विभवः स्वप्ननिर्विष्टः, श्रद्धेयः स मते ! न हि ॥ १०१

अकल्याणकरी विद्या, गीतं चारसचर्वणम् ।
अनुत्साहा सभा व्यर्था चासभ्यं सुमते ! वचः ॥ १०२

कलहाय परीहासो, दुःखाय सुखसन्ततिः ।
हासाय च भवेद्वृद्धिः, पातोऽर्थे सुमते वृधे । १०३

कृतघ्नः स्वर्णकारश्च चण्डालो नापितस्तथा ।
प्रियो यस्य प्रभो राज्यं सुमते ! तस्य नश्यति ॥ १०४

मा भूत्स्त्रीष्वपवादस्ते, मा सख्यं कुरु बालकैः ।
आदेया गुणिता, हेया सुमते ! स्वामिगर्हणा ॥ १०५

आयात्येव स्वयं सम्पन्नारिकेलजलं यथा ।
अपैति करिणा जग्धं कपित्थं सुमते ! यथा । १०६

अन्यासक्तां स्त्रियं मूढस्ताम्यतीप्सन्मुधा विटः
किं विडालवशश्चारु संलपेत्सुमते ! शुकः ॥ १०७

जन्ममात्रान्न तावन्तं पिता पुत्रस्य विन्दति ।
हर्षं तस्य गुणाधिक्याद्यावन्तं सुमते । भुवि ॥ १०८

जायतामन्वये नीचे, मास्तु कार्येषु दक्षता ।
दासीपुत्रो भवेद्वापि, सम्पन्नः सुमते ! प्रभुः ॥ १०९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

का नाम समता ?

(अनुवृत्ता)

लेखकः—श्री स्वामी आत्मानन्द मुनिः

समतायाः स्वरूपं साधनानि च निरूपितानि । तत्प्रसङ्गे लोक संशोधनस्य कापि चर्चा कृता । अत इदानीं लोकसंशोधनस्य स्वरूपं निरूप्यते ।

लोक संशोधनस्य स्वरूपनिर्णयात्प्राक् संसारस्योत्पत्तौ हेतुं प्रयोजनं च विमृशामः ।

एतद्विषये वेदास्तावदस्मानुपदिशन्ति—कृतानां कर्मणां फलभोग एव संसारोत्पत्तेः प्रयोजनम् एतद्वर्ज्जं नान्यत् किमपि प्रयोजनं सम्भवति ।

साधारणकीटपतङ्गादारभ्य देवतापर्यन्तं सर्वेषामपि जीवानां तदेव संसारोत्पत्तेः साधारणं प्रयोजनम् । परन्तु फलभोगेन सार्द्ध मानवेषु भगवता समर्पितस्य मनोविकाशस्य प्रभावेण परम-पुरुषार्थ साधनमपि करणीयमापद्यते । अन्यथा इहजन्मनि कृतानां कर्मणां फलभोगार्थं जन्मान्तर स्वीकारोऽपि अर्थात् प्रतीयेत । तथा च संसारोऽयं मविच्छिन्नतया सततं परिवर्धेत ।

अस्मिन् विषये काऽपि श्रुतिः श्रूयते—"तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति ।

श्रीमद्भागवतस्य दशमे स्कन्देऽपि अन्नकूटलीला प्रसङ्गे भगवतः श्रीमु खादियमुक्तिर्नन्दादीनुद्दिश्योदीरिता दृश्यते—

कर्मणा जायते जन्तुः कर्मणैव विलीयते
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते इति ।

जीवेषु कर्मसंस्काराणामुद्बोधो यथा यथा जागर्ति, तथा तथा संसारः प्रसरति । तथा येषु जीवेषु कर्मसंस्काराणां फलभोगार्थं वासना यथा यथा लीयते, तथा तथा संसारोऽपि विलयं गच्छति । यथा चलचित्र-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पटे सूक्ष्मतया अङ्किता आकृतयो वैद्युतिकालोकेन प्रकाशिता बृहदाकृतयः परिणमन्ति, चलचित्रस्य चावसाने बहिः किमपि न दृश्यते, एवमेव जीवानां कर्मसंस्कारा: सूक्ष्मतया स्थिता भगवत्प्रकाशेन सांसारिक रूपतया बृहदाकृतयः प्रतीयन्ते, प्रारब्धस्य च क्षये न कोऽपि संसारस्य सत्ता परिदृश्यते। यथा अस्माकं स्वप्नसंसारः कर्मसंस्काराणामनुसारेण भगवत्प्रकाशेन प्रकटितो भवति, नच तत्र सूर्यचन्द्रादीनां प्रकाशो वर्तते, एवमेव परिदृश्यमानोऽयं संसारो जीवानां कर्म संस्कारानुसारेण भगवत्प्रकाशेनैव प्रकटितो भवति। इयं हि प्राकृतिकी वस्तुस्थितिर्यद्वस्तुनः सत्तां विना असत्यस्य प्रतीतिरेव न सम्भवति। यथा रज्जोः सत्तां विना असत्यस्य सर्पस्य प्रतीतिर्न हि सम्भवति, अपि च सर्पो रज्जौ न किमपि गुणाधानं करोति, एवमेव परमात्मनः सत्तां विना असत्यस्य संसारस्य प्रतीतिर्नैव भवति, संसारोऽपि परमात्मनि न किमपि गुणाधानं कर्तुं प्रभवति। एतद्वर्जं सत्यासत्ययोर्नान्यः कोऽपि सम्बन्धो भवितु मर्हति। अत एव यदि यत्र कुत्रापि स्थितेन मानवेन स्वसंस्काराणा मुद्बोधः क्रियेत, तदा सत्यासत्ययोः सम्बन्धः संजायेत।

तदयं निर्गलितार्थः सिध्यति यत्संसारस्योत्पत्तौ जीवानां कर्मसंसारो निमित्तं यथा घटस्योत्पत्तौ मृत्तिका भगवत्पकाशश्च अनयो रुत्पत्ति विनाशयोः साक्षिस्वरूपेण विराजते। अर्थात्परमात्मनः सत्तायामेवायं संसारः प्रसरति, न चायं संसारस्तस्य कमपि विकारं जनयति। अतएव परमात्मा साक्षित्वेनाभिधीयते। संसारस्यौत्पत्तौ एतत् वर्जयित्वा नान्यत्कारणं सम्भवति। एतेषां त्रयाणां समवाय एव संसारस्योत्पत्तिः सम्भवति। अतएव जाग्रदवस्थायां च येषां येषां कर्मणां संस्कारा यथा यथा उद्बोधिता भवन्ति, तेषां तेषां तथा संसारः प्रवर्तितो भवति। यदा कर्मणां संस्कारा नोद्बुध्यन्ते, तदा सुषुप्तिर्मृत्युः प्रलयश्च संघटते, संसारश्च विलयं गच्छति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मसंस्काराणामुद्बोधात् कीटादीनां संसार एकं हस्तं हस्तद्वयं वा यावत् प्रसरति । स चायं संसारः सर्वथा गुणदोषविरहितो भवति । पक्षिणां संसारः क्रोशमेकं क्रोशद्वयं वा यावत्प्रसरति, पशूनां संसार पञ्च सप्त वा क्रोशान् यावत्प्रसरति । सर्वेऽप्येते जाड्यवशात् गुणदोषयोः सुखदुःखयोस्तत्साधनानां च संश्रवं नैवानुभवन्ति । केवलं कर्म कुर्वाणा एव लक्ष्यन्ते । तानि च कर्माणि पूर्वकृतानां कर्मणां फलभोगायैव । तथा कस्यचन स्थूलबुद्धेर्ग्रामीणस्य संसारः स्वविषयं स्वमण्डलं वा प्रसरति । स तु नैव विज्ञानं जानाति । एकस्य साधारणस्य वणिजः संसारो भारतमभिव्याप्य प्रवर्तते । महतां व्यवसायिनां च संसारः समग्रं भूमण्डलं विषयीकरोति । देवतानां च संसारः सप्त द्वीपान् सप्त समुद्रांश्च व्याप्नोति । निर्गलितार्थस्तु संसारोत्पत्तौ जीवानां स्वस्वफलोन्मुखः कर्मसंस्कार एव निमित्तमित्यभ्युपेतव्यम् । तत्कृतानां च कर्मणां फलभोग एव संसारोत्पत्तेः प्रयोजनमित्यपि स्वीकार्यम् । नान्यत्किमपि निमित्तं प्रयोजनं वा भवितु मर्हति ।

अत्रेयमाशङ्का जायते—यदि फलोन्मुखकर्मसंस्कार एव संसारोत्पत्तौ कारणं संस्कारस्य चानुद्बोधः संसारस्य विलये हेतुः तर्हि संसारस्यादिकालादारभ्य एतावत्पर्यन्तमेकरूपतया अवस्थानं न सङ्गच्छते, संस्काराणामुद्बोधनानुद्बोधनयोः स यज्ञानाभावनिबन्धनः न कोऽपि कर्मसंस्कारस्योद्बोधनं विना कदाचित् संसारं पश्यति । यः कोऽपि यदा कदाऽपि संसारं पश्यति स केवलं संस्कृतानां कर्मणां संस्कारस्य प्रतिबिम्बमेव पश्यति । परन्तु केवलं भ्रमवशात् तदिदं तथ्यं नावबुध्यते, प्रतिपादयति च बहोः कालान्संसारं पश्यामीति । तदिदं भ्रममूलकं वचो नैव श्रद्धेयं भवति । यथा कश्चनाज्ञानो बालो वानरो वा दर्पणे प्रतिबिम्बितमात्मानमात्मनो मुखं वा विलोकयन्, अन्यो बालोऽन्यो वानरः अन्यद्वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुखमिति वारम्वारं पश्यति, वदति च अन्यं बालं पश्यामि, अन्यन्मुखं पश्यामीति, परन्तु दर्पणे न कोऽपि बालो वानरो मुखं वा वर्तते, केवलं प्रतिबिम्ब एवास्ते। तथा निर्मले अजे अविनाशिनि आत्मनि (दर्पणस्थानीये) न कोऽपि संसारो वर्तते, केवलं प्रतिबिम्ब एवावभासते। अज्ञानस्य बालस्येव भ्रमवशात् आत्म स्वरूपस्याज्ञानात् संस्काराणामुद्बोधात् संसारस्य भाव स्तथा तथा दृश्यते। परन्तु संसारस्य तादृशानि रूपाणि न कदाचित् सम्भवन्ति। संस्काराणामुद्बोधनमेव भवति। यदि संस्काराणामुद्बोधनं विना संसारः स्यात्, तदा सुषुप्तौ (यदा संस्कारस्योद्बोधनं न सङ्घटते) अपि संसारः स्यात्। परन्तु तदा संसारस्य सत्तापि न बुध्यते। यथा स्वप्ने वयं वदामः सोऽयं संसारो बहोः कालात् प्रसरतीति परन्तु वस्तुतो नैव संसारो वर्तते, केवलमुद्बुद्धस्य संस्कारस्य प्रतिविम्बमात्रम्। एवमेवायं संसारो प्रत्येतव्यः। अतएव तादृशी आशङ्का केवलं तत्त्वावलोधामात्रमूलिकैव।

एतावता संसारोत्पत्तेः कारणं निरूपितम्। इदानीं संसारोत्पत्तेः प्रयोजनं विचारयामः। आत्मस्वरूपमजानन् जीवः कस्तूरीमृग इव स्वस्वरूपस्य विज्ञाने उदासीनः सांसारिकसुखान्वेषणपरो भवति। यथा कस्तूरीमृगः स्वनाभिस्थां कस्तूरीमजानन् तदीयगन्धेन वनमापूरयन्नितस्ततो भ्राम्यति, एवमयं जीवः सुखस्वरूपमात्मानमजानन् सुखस्वरूपस्यात्मनः प्रभावेण प्रणोदितः सुखस्वरूपेषु सांसारिकेषु भोगविलासेषु आसक्तो भ्राम्यति, स्वस्याज्ञानतावशेन किमपि वस्तु सुखस्वरूपं किमपि च वस्तु दुःखस्वरूपमेव धारयति। तथा सुखदुःखात्मकत्वेन गृहीतवस्तूनां प्राप्तये परिहाराय च व्यवस्यन् शुभाशुभकर्मसु प्रवर्तते निवर्तते च। एवं मायाग्रस्तः स्वयमात्मानं कर्तारं भोक्तारं च मन्यते। फलेन अहं शुभानामशुभानां च कर्मणां कर्ता, अहं सुखदुःखयोर्भोक्ता, अहं जन्ममरणयोश्चाधिकारीति विभा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयति । शुभाशुभकर्माणि तु स्वयमुत्पद्य तदुत्तरक्षण एव विलयमधि गच्छन्ति, परन्तु पुण्य पापरूप वासना अथवा संस्कारः कर्तृत्वाभिमानस्याश्रयः संचीयते । एवं संचितेषु संस्कारजातेषु यावतः संस्कारानय कर्तृत्वाभिमानी जीवः स्वफलभोगायोन्मुखान् करोति, त एव संस्काराः प्रारब्ध रूपेण जीवमिमं भोगायतनशरीरेण सम्बध्नन्ति । यथा पाकस्य सिद्धये पाकशाला, पात्राणि, इन्धनं पाकोपकरणानि चापेक्ष्यन्ते, मधुराम्लरसाश्च पच्यन्ते । एवमेव मानवं फलस्वरूपेण अस्माकं कर्मसंस्काराणां भोगायतन शरीररूपपाकशालां, इन्द्रिय बुद्धिप्राणादिरूपाणि पात्राणि, रूपरसगन्धशब्दस्पर्शरूपाण्युपादानानि च रचयति, सुखदुःखात्मकं पाकं च साधयति । एतदेव संसारोत्पत्तेः प्रयोजनम् ।

तदेतत्प्रतिपादितं भवति यदेव जीवः सुखस्वरूपस्य आत्मनोऽज्ञानात् स्वयं कर्मणां कर्ता सम्पद्यते, कर्तृत्वात् स्वयं देहेन्द्रियमनोबुद्ध्यादिभिः सम्बद्धः स्वकृतकर्मणां फलभोगाय स्वयं संसारं प्रवर्तयति, फलस्य च भोक्ता भवति । परंतु सत्यस्वरूपस्यात्मनोऽज्ञानात् आत्मपरिकल्पितं संसारं यथार्थं मन्यमानः न केवल पूर्वकृतानां कर्मणां फलान्येव भुङ्क्ते परन्तु सुखप्राप्तौ बद्धाशः प्रमत्तः अपराण्यपि कर्माणि कर्तुं प्रवर्तते । एवमपि यदि वयं कर्तृत्वाभिमानं परिहरामः, कर्तृत्वाभिमानपरिहारस्य मार्गं वाश्रयामो वरम्, अन्यथा जननमरणयोश्चक्रं न कदाचिदपि परिपूर्यते, भवतु नाम ब्रह्मणः सृष्टेरवसानम् । कर्तृत्वाभिमानस्य धारणात् 'कुरुष्व उत म्रियस्व' इति प्रखरः सिद्धान्तो न सम्भवति, परन्तु कुर्वे उत म्रिये इति सुदृढा विश्वासः संजायते । एवं जीवस्य कर्मफलभोगे कर्मसंस्कारबीजमुपादानकारणं (Subject) बाह्यश्च संसारो निमित्त कारणं (Object) सम्पद्यते । यथा फलस्योत्पत्तौ बीजमुपादानकारणं बाह्यं चान्यदुद्यानपालजलमृत्तिकादि च निमित्तकारणं, तथा फलोत्पत्तौ प्राधान्यमुपादानरूप-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बीजस्य, न तु निमित्तस्य । बीजं विना हि फलस्योत्पत्तिर्न कदाचित् सम्भवति । परन्तु यदि कदाचित् उद्यानपालस्याभावेऽपि बीजस्य पृथिव्या संपर्को घटेत, तदा फलस्योत्पत्तिर्भवत्येव । एवमेव प्रत्येकं जीवस्य जन्मनो मरणस्य वा, सुखस्य दुःखस्य वा, लाभस्य हानेर्वा संयोगस्य वियोगस्य वा, विकाशस्य संकोचस्य वा उन्नतेरवनतेर्वा-आसां सर्वासां घटनानां भोगानां वा फलोन्मुखः कर्मसंस्कार एव उपादानम्, अन्यत् सर्वं तु बाह्यं निमित्तमात्रम् । तदपि न मुख्यं परन्तु गौणं कारणमेव । तदेतन्निमित्तमुपादानस्य सहायकं भवति नतु स्वयमुपादानं विना फलं जनयितुं प्रभवति ।

अतएव अनन्यगतिकतयेदमवश्यं स्वीकर्तव्यं यज्जीव एव आत्मानः सुख दुःखयोर्मूलं कारणं भवति । परन्तु आत्मनः प्रमादाद् यदा जीव आत्मानं सुखदुःखयोः कारणमवबोद्धुं न पश्यति, बाह्येषु च निमित्तेषु आसज्जति, तदा अस्तव्यस्तः सन् अज्ञातसार सुखदुःखयोः कर्मसंस्कारानभिनवान् स्वयं निर्माति । अतएव--

"सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा
अहं करोमीति वृथाभिमानः स्वकर्मसूत्रे ग्रथितो हि लोकः ॥"

इति श्रूयते ।

इदानीं लोकशिक्षामधिकृत्य किमपि विमृशामः । इदं तु निश्चप्रचं यद्ये तावत् प्राकृतिका नियमाः प्रातिस्विकानां जीवानामपेक्षिताः तएव समष्टिरूपाणां देश–जाति–कुटुम्बादीनामपि प्रतिपालनीया भवन्ति । समष्टेः कृते न कोऽपि स्वतन्त्रो नियमः कर्तुं शक्यते, यतो व्यक्तय एव मिलिताः समष्टिः सम्पद्यते । एकशत सख्याका व्यक्तय एव मिलिताः एकशतरूप समष्टिं भवन्ति । व्यक्तीर्विना न काप्यपरा समष्टि र्वर्तते । अत एव सुखदुःखयो र्हानिलाभयोश्च उपभोगार्थं ये किल

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धार्मिका नियमाः प्रत्येकं व्यक्तीनां कृते परिपालनीया भवन्ति, तएव समष्टिरुपाणां देशजाति कुटुम्बादीनां कृते प्रतिपालनीयाः सम्पद्यन्ते। यथा व्यष्टिरुपस्य जीवस्य सुखदुःखयोर्हानिलाभयो मूलकारणं व्यष्टिरूपस्य जीवस्य कर्मसंस्कारः तथा समष्टि रूपस्य तस्य सुखदुःखयोर्हानिलाभयोश्च मूलकारणं समष्टिरूपः कर्मसंस्कार एव, बाह्यमपरं साधनं तु फलोत्पत्तौ बीजस्यानुकूलं निमित्तकारणमेव भवति। अर्थात् बीजादधिकं बीजविपरीतं नहि किमपि फलं दातुं शक्नोति। यथोद्यान पालकः बीजादधिकं विपरीतं किमपि फलं दातुं न प्रभवति। एतत्सिद्धान्तानुसारं यदि वयं संसारे दृष्टिं निक्षिपन्तः अर्थात् संसारसम्बन्धिनीं सुखदुःखे हानिलाभौ च प्रधानतया विविच्य लोकशिक्षार्थं प्रवर्तामहे, तथैव च लोकान् तेन मार्गेण परिचालयामः, नैव लोकानां कमप्युपकारं कर्तुं शक्नुयाम। न हि तावता लोकनां दुःखस्य निवृत्ति र्भवति, नापि सुखप्राप्तये किमपि साधनं प्रदर्शितं भवति परन्तु संसारदृष्ट्या संसारविषये यः कोऽपि मार्गः प्रदश्यते, स सर्वोऽपि तत्तत्फलोन्मुखकर्म संस्कार रूपबीजस्य परिपुष्टौ उद्यान पालकस्य जलसेचनमिव निमितमात्रं भवति। नहि तावता परम सुखप्राप्तेः किमपि साधनं प्रदर्शितं भवति, नापि बोजारोपणस्य साधनं सम्पद्यते।

एतत्सिद्धान्तानुसारं सांसारिकीषु सुखदुःख-हानिलाभादिषु विविधासु घटनासु जीवस्य कर्मसंस्कार एव बीजरूपं मूलकारणं भवति, बाह्यं सकलमपि वस्तु जातं निमित्तमेव भवति। एवं स्थितौ यदि वयं भूदानयज्ञं कल्पयामः, सेवाक्षेत्रमायोजयामः, सेवाव्रतं वा स्वीकुर्मः सर्वेष्वप्येतेषु वस्तुतत्त्वदृष्ट्या सांसारिक कर्म संस्कारं विना नान्यत्किमपि साधनं प्रदर्शयामः, येनास्य दुःखस्य निवृत्तिर्भवेत् परमं च सुखं लभ्येत। यतस्तस्य तथाऽनुष्ठितवतो कर्म संस्कार एव मूलमुपादानम्, अन्यत्सर्वं तु निमित्तमेव सम्पद्यते। सांसारिकदृष्ट्या अस्माभिः प्रदर्शितै-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साधनं यदपि फलं लभ्येत तदपि नश्वरमेव। कथं वा त्रैलोक्यानामुद्धरणं सम्भवति। भगवता वासुदेवेन एतदेव मनसि निधाय उपदिष्टम्।

"मयैवैते निहताः पूर्वमेव,
निमित्तमात्रं भव सव्यसाचिन्।
द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान्॥" इति।

(सावशेषम्)

सुखस्य दुःखस्य न कोऽपि दाता

लेखकः—श्री गोपीनाथ पाणिग्राही उभयभाषाप्रवीणः,
आयुर्वेदाचार्यः।

जगति सर्वे मानवाः कर्माणि कुर्वन्ति। तैश्च कर्मभिः सुखदुःख-हानिलाभादीन् बहुविधभावाननुभवन्ति। सर्वदा मानवः सुखमेवा-भिलषति। अतएव मानवः स्वस्य उन्नतिः कथं भविष्यतीति सर्वदा चिन्तयति। प्रत्येकं मानवः मम उन्नतिर्भवत्विति विचारयति। न कोऽपि अवनतिर्भवत्विति चिन्तयति। किन्तु स्वल्पसंख्यकानामेव मानवानां उन्नतिर्भवति। अवशिष्टाः मानवाः भयानके दुःख सागरे निपतन्ति। अस्य कारणं किमिति सर्वे मानवाः सर्वदा चिन्तयन्ति।

अस्मिन् संसारे विभिन्न प्रकाराः मानवाः सन्ति। केचनालस्य-परायणाः सन्ति। ते स्वस्य उन्नतये न किमपि कुर्वन्ति। अपरे द्यूत-चौर्यादिषु रताः सन्ति। ते चापि स्वस्य परस्यापि हानिं कुर्वन्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपरे सर्वकर्मसु कुशलाः बहूनि उन्नतिमूलकानि कर्माणि कुर्वन्ति। अस्मिन् संसारे सुखदुःखहानिलाभजयपराजयोन्नत्यवनतिस्वातन्त्र्य-पारतन्त्र्यादयो भावाः अन्य द्वारैव संभवन्तीति सर्वः साधारणः जानाति।

शिल्पी विभिन्नान् शिल्पान् करोति। ते शिल्पाश्च अन्यस्योपकाराय प्रभवन्ति। यदि कोऽपि प्रच्छन्नं गृहदाहं करोति, तर्हि तैः अपकर्मभिः बहवो मानवाः दुखमनुभवन्ति। केचन वृक्षान् रोपयन्ति। उद्यानानि कुर्वन्ति। तन्तुवायो वस्त्राणि निर्माति। अपरे काव्य नाटकाख्यानकेतिहास पुराणनीतिशास्त्रादीन् रचयन्ति। पण्डितः सदुपदेशान् श्रावयतीत्येवमादिभिः सत्कर्मभिः स्वयमेव मानवः कष्टमनुभवति। अन्ये च सुखमनुभवन्तीति मानवः विचारयति। किन्त्वेतन्न सत्यम्। यतः सुखस्य दुःखस्य च स्वयमेव कर्त्ता नान्यः इति। यदि एतत् सर्वं सत्यं स्यात्, तर्हि लक्षशो जनाः दुःखमनुभवन्तो दृश्यन्ते। ते सर्वएव स्वयं दुःखं निर्मायानुभवन्ति किमिति प्रश्नः पाठकानां हृदि अवश्यमेव सञ्जायेत। तथापि सुखस्य दुःखस्य वा दाता नान्यः, परो ददातीति भावना कुत्सिता बुद्धिरेवेति विरोध इव प्रतीयते। किन्तु सुखं वा दुःखं वा स्वयमेव मानवः निर्मायानुभवतीति सर्वत्र सिद्धान्तः।

यदि कोऽपि समाजः सुखानुभवाय सुकर्माणि करोति, तर्हि सुखमनुभवति। यदि कुकर्माणि करोति दुःखमनुभवति। व्यक्ति-विशेषस्य स्वातन्त्र्य पारतन्त्र्यादि विषयेऽपि तथैव द्रष्टुं शक्यते। यत् किमपि राष्ट्रम् अन्यराष्ट्रं पराधीनं कर्त्तुं नैव शक्नोति। तथैव स्वाधीनतामपि दातुं न शक्नोति। अत्र तु कौरव पाण्डवयोः व्यवहारेणैव सर्वं ज्ञायते।

कौरवाः द्यूतक्रीडया पाण्डवान् जितवन्तइति वस्तु न सत्यम् सत्यं तु स्वयं पराजिताः पाण्डवाः राज्यं कौरवाधीनमकुर्वन्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदा तु पाण्डवाः राज्यप्राप्त्यर्थं समराङ्गणे दण्डायमानाः अभवन् तदा ते विजयिनः अभवन् । पूर्णस्वाधीनतामपि अलभन्त । ते तु जयलाभाय पूर्वमेव तदनुरूपाणि कृत्वा सज्जीभूय युद्धमकुर्वन् । यदा तु राज्यभ्रष्टाः वनवासिनः अभवन्, तदा ते मूर्खाइव द्यूतक्रीडादीनि कुकर्माणि कृत्वा राज्यभ्रष्टाः वनवासिनः अभवन् । यदा तु स्व-सङ्घटनाबलेन स्वराज्यस्थापनाय यत्नमकुर्वन्, तदा ते शासकाः अभवन् । पाण्डवानां स्वातन्त्र्यपारतन्त्र्यादिविषये नान्यस्य कस्य वा प्रयत्नस्य कारणं विद्यते । स्व प्रयत्न एव कारणम् ।

अतएव प्रत्येकं राष्ट्रस्य समाजस्य व्यक्तिविशेषस्य वा उन्नतिविषये अधोगतिविषयेऽपि एष एव नियमः । किन्तु सर्वं साधारणः कथयति । मम सहायकाः सन्ति । ते मम उन्नतिं विधास्यन्ति । पुनश्चापरे शत्रवः सन्ति । ते मम अपकारं करिष्यन्तीत्येव मादि ज्ञानं भ्रमज्ञानमेव । एतेन भ्रमज्ञानेन न कस्यापि समाजस्य व्यक्तिविशेषस्य वा उन्नतिर्भवति । अतएव स्वस्य उन्नतये स्वयमेव कर्माणि कर्त्तव्यानि भवन्ति । तथैव अवनतये न किमपि कर्त्तव्यम् । किं कारणमितिचेत्, न कस्यापि मानवस्य शत्रुर्मित्रं वा वर्त्तते । स्वयमेव स्वस्य मित्रं शत्रुश्च भवतीति ।

संयमी मानवः स्वयमेव स्वस्य मित्रं भवति । अन्यथा संयमा-वलम्बनेन स्वेच्छाचारेण वा स्वयमेव मानवः स्वस्य शत्रुर्भवति । स्व शक्ति ज्ञानेनैव मानवः उन्नति मार्गे प्रचलितुं प्रभवति । यस्य तु आत्मज्ञानं न विद्यते, स तु घातुकस्य कर्म कर्त्तुं प्रभवति । अतएव स्वस्य मित्रं शत्रुर्वा द्वितीयः कोपि न विद्यते । स्वयमेव ।

मानवस्योन्नतये एतदेव वक्तव्यं वर्त्तते । यस्तु ब्रह्मचर्यं पालयति सः सुखमनुभवति । अन्यथा यदि भोगविलासादिषु प्रवर्त्तते, तर्हि वीर्यं नश्यति, रोगी अल्पायुर्वा भवति । अतएव ज्ञायते नान्येन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुखं वा दुःखं वा दीयते। पुनश्चाहिंसाऽसत्यास्तेय क्षुधितादि सकल-व्यवहार विषयेऽपि एवमेव द्रष्टव्यम्। व्यक्तिविशेषस्य व्यवहार-विषयेऽपि एवमेव पाठकेन द्रष्टुं शक्यते ।

मानवः मिथ्याज्ञानेन सुखं दुःखमिति दुःखं च सुखमिति जानाति यथा—मानवः अहिफेनादिमादकद्रव्याणि सुखमिति सेवते। किन्तु तत् दुःखकरमेव । तथैव सुखमिति वेश्यासक्तो भवति । द्यूतक्रिडादीनि च सुखमित्याचरति । एवमादीनि असन्ति कर्माणि मानवः अज्ञानमोहितः सुखमित्याचरति । गुरुजनस्योप-देशमपि न शृणोति । अनेनैव प्रकारेण मानवः स्वस्य दुःखं स्वयमेव वर्धयति। एवं क्रमेण स मानवः महति दुःखसागरे निपतति।

एतद् राष्ट्रीयसुखदुःखविषयेपि सत्यं प्रतीयते । यदि मानवः अन्यदेशीयानां वचनेन मोहितो भवति, अथवा तद्देशीयमनोहराणि वस्तूनि आनीय स्वभोगविलासादौ व्यवहरति, तर्हि क्रमशः तद्राष्ट्रं दारिद्र्यदशायां पतति । अतएव सर्वेषां पाठकानां एतदेव ज्ञानं जायते । यच्च राष्ट्रीयं सुखं वा दुःखं वा । स्व प्रयत्नस्य परिणाम एव । अतएव स्वदेशीयव्रतपरि-पालनं प्रशस्तम्। अन्यथा मानवः अत्यधिकं दुःखमनुभवति । पुनश्च मानवः स्वस्य मित्रं शत्रुर्वा स्वयमेव भवितु मर्हति। एतच्च व्यक्तिगतदृष्ट्यां सामूहिकदृष्ट्या पुनश्च सर्वत्रापि सत्यमेव प्रतीयते, सर्वेषां च दुःखानां असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेति त्रिविधमेव कारणं भवति । ज्ञानार्थकालानां समयोगस्तु सुखानां कारणम् । अतएव मानवः स्वप्रयत्नबलेन सर्वाणि हितकराण्येव कुर्यात्। तथा कुर्वन्निह यशो लभते परत्र च च स्वर्गमिति।

तत्र शारीरमानसाभ्यां दोषाभ्यामनभिद्रुतस्य विशेषेण यौवनवत, समर्थानुगतबलवीर्यपौरुषपराक्रमस्य, ज्ञानविज्ञानेन्द्रिये-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यार्थबलसमुदायेन वर्त्तमानस्य, परमर्द्धिरुचिरविविधभोगपरस्य समृद्धसर्वारम्भस्य सुखमभिवर्द्धते ।

तथाच हितैषिणः पुनर्भूतानां परस्वादुपरतस्य शमपरस्य, परीक्ष्यकारिणोऽप्रमत्तस्य, त्रिवर्गं परस्परेणानुपरतमुपसेवमानस्य, पूजार्हसंपूजकस्य, ज्ञानविज्ञानोपशमशीलस्य, वृद्धोपसेविनः सुनियत-रागरोषेर्ष्यामदमानवेगस्य, सततं विविधप्रदानपरस्य लोकमिमं-श्चामुमवेक्षमाणस्य स्मृतिमतिमतो मानवस्यापि सुखमभिवर्धते । दुःखमतो विपर्ययेण । सर्वमेतत् स्वायत्तमेव ।

श्रूयते चरकसंहितायामात्रेयोपदेशः, सर्वं लोकं समनुपश्यतः सत्या बुद्धिः समुत्पद्यते । सर्वं लोकं ह्यात्मनि पश्यति । भवत्यात्मैव सुख दुःखयोः कर्त्ता नान्यः इति । कर्मात्मकत्वाच्च हेत्वादिभिर्युक्तः सर्वलोकोऽहमिति विदित्वा ज्ञानपूर्वं ह्युत्तिष्ठते अपवर्गयेति ।

तत्रेमानि सुखकारणानि भवन्ति यथा – सुखाभिलाषी मानवः प्रथमत आचार्यसमीपं गच्छेत्, तस्योपदेशं परिपालयेत् । धर्मशास्त्राणि पठित्वा तदर्थांश्च वुद्ध्वा तदनुसारेण प्रचलेत् । पुनश्च सतामुपासनम्, असतां परिवर्जनम् । दुर्जनेन संसर्गं परिहरेत्, सत्यं सर्वभूतहितम् अपरुषं काले परीक्ष्यैव वक्तव्यम्, सर्वप्राणिषु आत्मनीव प्रवर्तेत, स्त्रीभि र्हास्य परिहासादि वर्जयेत्, निद्रा तन्द्रालस्यादि कर्म परिवर्जयेत्, सुप्तस्थितगतप्रेक्षिताहरविहारप्रत्यङ्गचेष्टादिकेषु आरम्भेषु स्मृतिपूर्विका प्रवृत्तिश्चावलम्बनीया ।

सत्कार स्तुति गर्हापमान सहत्वं, क्षुत्पिपासायस श्रम शीतोष्ण-वातवर्षासुखदुःखसंस्पर्श सह त्वं शोकदैन्यमानोद्वेगमदलोभरागभये-र्ष्याक्रोधादिभिः असंचलनं, अहंकारादिवर्जनं धृति,-स्मृति वलाधानादयो भावाः सुखकारणानि भवन्ति । अतोऽन्यथा दुःखं वर्द्धते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुखाभिलाषी मानवः असत्सङ्गं परि वर्जयेत्। उक्तंच

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ।।

योगिनः कर्मफलस्य संगं त्यक्त्वा केवलेन कायेन मनसा बुद्ध्या इन्द्रियैर्वा समबुद्ध्या कर्माणि कुर्वन्ति। यस्य सर्वाण्यपीन्दियाणि स्वेषु स्वेषु निश्चितेषु कर्मसु समबुद्ध्या प्रवर्त्तन्ते तस्य सुखमभिवर्धते । प्रत्येकम् इन्द्रियस्य स्वस्व—विषये योग्यतमकर्मकरणे सुशिक्षया संयमावलम्बने च अवश्यमेव प्रयोजनं वर्त्तते । सर्वाण्यपि इद्रियाणि एवं प्रकारेण सुशिक्षितानि कर्त्तव्यानि, येन मानव नित्यं सुखमनुभवेत्, अतएव प्रियं प्राप्य न हृष्येत् ,अप्रियं प्राप्य च न दुःख मनु भवेत्। सुख-दुःखादि सकल भावेषु मानवः समानमेव पश्येत्। अस्माभिः यत् सुखं दुःखं चानुभूयते, तदन्तरात्मनि एवानुभूयते, वहिरात्मनि नानुभूयते । अतएव स्व सुख लाभाय वाह्यवस्तूनामुपरि आशा न रक्षणीया । यस्तु वाह्यवस्तूनामुपरि यत् परिमाणेन लोभं त्यजति सः तत्-परिमाणेन सुखमनुभवति । यस्तु वाह्यवस्तूनामाकर्षणेन मोहितो भवति सः दुःखमनुभवति, यतः सुखस्य दुःखस्य वा स्रोतः अन्तरा-त्मनि एव वर्त्तते वहिर्नवर्त्तते। अतएव सर्वत्र समवुद्ध्या अन्तरात्मनि सातिशयं सुखमनुभवेत् ।

पुनश्च कामक्रोधादीनां वेगं यः सेतुं शक्नोति सः सुखी भवति। अतएव कामादीनां त्याग एव वरम् । प्रियवस्तूनां प्राप्त्य-भिलाषः कामः । अप्रियाणां प्राप्तौ क्रोधः समुपजायते । आभ्यां कामक्रोधाभ्यां भयमपि संजायते। भयं यदि विद्यते कामक्रोधावपि संभवतः ।

पुनश्च निर्द्वन्द्वः सुखमाप्नुयात् । द्वन्द्वभावद्वारा काम—क्रो संभवति । सुखदुःखहानिलाभेष्टानिष्टशीतोष्ण—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धर्माधर्मादयो भावा: द्वन्द्वभावा: भवन्ति तेषां भावानां समानभावेन ग्रहणं समबुद्धि: । अनया समबुद्ध्या मानव: सर्वकर्माणि साधयितुं प्रभवति । अनया समबुद्ध्या एव मानव: क्रमश: स्वस्य सुखं स्वयमेव वर्धयति । मानवेन सर्वदा कर्मण: फलाफलं सम्यक् न विचार्य्य किमपि न कर्त्तव्यम् । तथा चोक्तं भारविना—

सहसा विदधीत नक्रियामविवेक: परमापदां पदम्
वृणते हि विमृश्यकारिणं गुणलुब्धा: स्वयमेव संपद: ।" इति ।

अथेमानि दु:खजननानि भवन्ति यथा–ग्राम्याहारात्, अम्ल लवण कटुतिक्तक्षाररूक्षशुष्कशाकमांस तिनिपलल पिष्टान भोजिनां क्लिन्नगुरुपूतिपर्य्युषितभोजिनां, विषमाध्यसनप्रियाणां, दिवास्वप्नस्त्रीमद्यनित्यानां, विषमातिमात्रव्यायामसंक्षोभितशरीराणां, भयशोकलोभमोहायासबहुलानां, भीरूणां उपक्लिष्टसत्वानां उत्सन्नदोषाणां, समलविकृतोपहितानि अनुचितानि आहरजातानि वैषम्ययुक्तेन विधिना उपयुञ्जानानां, तन्त्रप्रयोगमपि विषमं समाचरतां मानवानामवश्यमेव दु:खमुपजायते । अतो निमित्ताद्धि, शिथिलीभवन्ति मांसानि, विदह्यते रक्तम्, विष्यन्दते चानल्पं मेद:, न संधीयतेऽस्थिसु मज्जा, शुक्रं न प्रवर्त्तते । क्षयमुपैत्योज: एवंभूतो ग्लायति सीदति निद्रातंद्रालस्यसमन्वित: निरुत्साह: श्वसिति पुनश्च नष्टस्मृतिबुद्धिच्छाय: शारीरमानसीसु चेष्टास्वसमर्थ: सन् मानव: सकल दु:खानां रोगाणां चाधिष्ठानं सम्पद्यते ।

लोकसमुदाय: बुद्धिमतां मित्रं शत्रुश्चाबुद्धिमतां भवति । अतएव हि अमित्रस्यापि धन्यं यशस्यं आयुष्यं पौष्टिकं लोक्यमभ्युपदिशतो वच: श्रोतव्यमनुविधातव्यं चेति । अतएव हि देवताद्विजगुरुसिद्धाचार्येषु सम्यक् प्रवर्तितव्यम् । तेषु सम्यक् प्रवर्त्तितस्य ते शिवाय स्यु: । अन्यथाऽशिवाय भवन्ति । अतएव हि मानव: सर्वं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्यक् विचार्य कर्माणि कुर्वन् सुखमधिगच्छति । अन्यथा दुःखं वर्धते ।

एतत् सर्वमपि स्वकर्मणः फलमेव । तच्च कर्मफलं द्विविधम् दृश्यादृश्यभेदेन । दृश्यफलानि तु घटपटभूमियानव्योमयानवैद्युतिकव्यजनादीनि भवन्ति । तानि च दृश्यफलानि अन्यस्मै दातुं शक्यन्ते । स्वयं कृतस्य कर्मणः दृश्य फलं समुदायेनोपभोक्तुं मानवः नैव शक्नोति । अतएव "कर्मण्येवाधिकारस्ते । मा फलेषु कदाचने" त्युच्यते ।

अदृश्यफलानि तु सुखदुःखहानिलाभधर्माधर्मादीनि भवन्ति । तानि चादृश्यफलानि नान्यस्मै दातुं शक्यन्ते यथा व्रणिनो मानवस्य व्रणवेदना नान्यस्मै दातुं शक्यते, तथा सुखदुःखादीनि नान्यस्मै दातुं शक्यते. अतएव मानवः स्वयं कृतस्य कर्मणः अदृश्य फलं पापपुण्यादिकं स्वयमेवानुभवति, नान्येन दीयते दातुं ग्रहीतुं वा न शक्यन्ते । अतएव हि भगवद्गीतायां भगवान् श्रीकृष्णः एवमुक्तवान् ।

"उद्धरेदात्मनात्मानं नात्मानमवसादयेत्
आत्मैव ह्यात्मनो बन्धु रात्मैव रिपुरात्मनः ।
बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः
अनात्मनस्तु शत्रुत्वे वर्त्तेतात्मैव शत्रुवत् ।।

पुनश्च

"सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा" इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीविमलाष्टकम्

लेखकः—श्री जगन्नाथ रथ शर्म्मा यज्ञभूषणकाव्यतीर्थ विद्याभूषणः

ख्यातोऽहं मनुजाधमेषु नितरां ज्ञानं विना भूतले
माया मोह मदान्ध मूढ़ मनसा वोद्धुं न तत्त्वं क्षमः।
मग्नो दुःखपयोनिधावशरणः कामादिनक्राकुले
मातः श्री विमले! त्वमेव शरणं, दीनस्य नान्या गतिः।१।

क्रीडोन्मादनकौतुकेन सततं निःसारितं शैशवं
भोगासक्तिसुरां निपीय वहुशः क्षीवोऽवशो यौवने।
प्रौढ़ः पालयितुं कुटुम्वनिकरान् वित्तार्ज्जने तत्परो
मातः श्री विमले! त्वमेव शरणं दीनस्य नान्या गतिः।२।

संसर्गं परिहाय साधुविदुषां मूढ़ैः समं जीवनं—
नीतं मे विफलीकृतं हि जननं रत्नाधिकं हेलया।
सन्तापानलदग्धमेन मनिशं त्रातुं न का दृश्यते
मातः श्री विमले! त्वमेव शरणं दीनस्य नान्या गतिः।३।

विष्णु ब्रह्म महेश्वर प्रभृतिभिर्देवैः सदा संस्तुता
त्वं देवि! स्थिति सृष्टि नाश करणे शक्तेष्टसंपादिका।
प्राणास्त्वं भुवनत्रये जनिजुषां कृत्यावलेः कारणं
मातः श्री विमले! त्वमेव शरणं दीनस्य नान्या गतिः।४।

आधारो जगतां त्वमेव शुभदे चाधेयभूता परा
विश्वेषां परिवन्दितासि ततं ते विश्वमेवाश्रितम्।
विश्वं त्वं परिपासि विश्ववरदे विश्वस्य मोदप्रदा
मातः श्री विमले! त्वमेव शरणं दीनस्य नान्या गतिः।५।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वामाश्रित्य प्रकाशते जगदिदं त्वं सर्वरूपात्मिका
त्वां त्यक्त्वा न च दृश्यते क्षणमपि त्वं सर्वकालाश्रया।
दृश्यादृश्य विभिन्नरूप वरणात् चिन्त्याप्यचिन्त्या पुनः
मातः श्री विमले! त्वमेव शरणं दीनस्य नान्या गतिः।६।

त्वं सन्तापतमोहरा भगवती दारिद्र्यदुःखापहा
दीनानामभयप्रदा करुणया पापौघविध्वंसिनी।
संसारार्णव तारणैक निपुणा स्वर्गापवर्गप्रदा
मातः श्री विमले! त्वमेव शरणं दीनस्य नान्या गतिः।७।

नो जाने तव पूजनं स्तुतिकथा मन्त्रं च मुद्रास्तथा
नो शक्तो मधुमेध्य द्रव्य निवहं दातुं सपर्य्योचितम्।
नान्यत्रैव गतिर्ममैव कुमते स्त्वत्पादसेवास्थलात्-
मातः श्री विमले! त्वमेव शरणं दीनस्य नान्या गतिः।८।

न याचेऽहं मातर्त्रिपुत्रविभवं दुर्लभतरं--
न वा रम्यां सौम्यां वरयुवतिमासक्तिसुखदाम्।
न मे काप्याकाङ्क्षा परपुरजयेच्छापि च पुनः
सदा ते पादाब्जे विशतु मम चित्तं, कुरु कृपाम्।९।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैदिका देवाः

लेखकः—श्रीदुःखिश्याम पट्टनायकः

सनातनस्य वैदिकस्य धर्मस्य पीठस्थलीयमस्माकं पुण्यभूमिः यदा यज्ञधूमेन धूषरिताऽवर्त्तत, आर्य्याणामृषीणां वैदिकैः मन्त्रैः मुखरिता समपद्यत, तदा सचराचरेयं भारतभूमिर्ज्ञानालोकेन उद्भासिता अवर्त्तत। इदानीन्तने उन्नतिनिर्णायकद्रुतगतिप्रवणे युगेऽपि यद्यस्माकं किमपि गौरवावहं वस्तु विद्येत, त एव एते अपौरुषेया वेदाः। वेदशब्दस्य अर्थस्तावत् ज्ञानम्। 'विदन्त्यनेन धर्ममिति वेदः' इति एतस्य व्युत्पत्तिः। करणाधिकरणयोश्च इति सूत्रेण घञ् प्रत्यये वेदशब्दो निष्पन्नो भवति अर्थात् एतेन धर्मस्य निगूढं तत्त्वं विज्ञातं भवति। अथवा यस्य आलोचनया धर्माधर्मज्ञानं जायते स एव वेदशब्दार्थः। वेदास्तावत् अपौरुषेयाः। नैते कदापि केनापि पुरुषविशेषेण रचिता इति वेदविदाम आशयः। त एते परमब्रह्मणो भगवतो मुखात् निःसृता इति आस्तिकजनानां विश्वासः। नचायं विश्वासः अमूलक इति वक्तुं शक्यते। अतएव वैदिका ऋषयः 'मन्त्र द्रष्टारः' इति व्यपदिश्यन्ते। न च मन्त्राणां कर्तार इति। वेदास्तावत् नैकत्र केनाप्युच्चारिता अभवन्। गुरुशिष्यपरम्परया गुरुमुखेभ्य एवैते शिक्षणीया आसन्। अतएव वेदाः 'श्रुतय' इत्युच्यन्ते। एवं क्रमेण वहवो मन्त्रा अवश्यं विस्मृतिगर्भे विलीना भवितुमुपक्राम्यन्। अतएव भगवान् व्यासदेवो निखिललोकानां हिताय वेदानां संरक्षणाय च तान् ऋगूयजुःसामाथर्वरूपेण चतुर्धा विभज्य लिपिबद्धान् कर्तुं बद्धादरः समजनि। अतएव चतसृणामपि संहितानां सङ्कलनात् 'वेदव्यास' इति व्यपदिश्यते। परन्तु प्रचारस्य प्रसारस्य प्राचीनत्वस्य प्रभावेण ऋग्, यजुः साम चेति त्रयएव वेदाः प्रसिद्धिं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गताः,'त्रयी'नाम्ना च व्यवहृता अभवन् । अथर्ववेदस्य च कालप्रभावेण पुनरपि सुमहान् प्रसारो जातः । फलेन नष्टा प्रतिपत्तिः पुनरायाता । इदानीं वेदशब्देन चत्वारोऽपि वेदाः परिगृह्यन्ते । छन्दोबद्धा मन्त्रा 'ऋच' इत्यभिधीयन्ते, गानायानुकूला गानोपयोगिनश्च मन्त्राः सामानि भवन्ति । गद्यनिबद्धा मन्त्रा 'यजुः' शब्देन प्रतीयन्ते । आथर्वणास्तु मन्त्रा उभयात्मकाः प्रायशः तेभ्य एव संगृहीता दृश्यन्ते । अयं चापरो विषयभेदो दृश्यते ऋग्वेदीया मन्त्राः प्रायशः स्तुतिरूपाः । सामवेदीयाः संगीतरूपा बहुशः देवानामाह्वाने उपयुज्यन्ते, यजुर्वेदीया मन्त्रा कर्मकाण्डे उपयुज्यन्ते । केषामपि मन्त्राणां च ज्ञानकाण्डे विशेषतो व्यवहारो दृश्यते । आथर्वणाश्च अभिचारतन्त्रादिप्रवणाः विशापहरणादौ चिकित्सायामापन्निवृत्तौ चोपयुज्यन्ते । सोऽयं वेदस्त्रयीरूपाणां तिसृणामपि ऋक् साम यजुषां परिपूरकात्मको वर्तते ।

एक एव हि वेदा भारतीयाया विचारभावनायाः, संस्कृति-परम्परायाः, विश्वासस्य चाभिव्यञ्जका ग्रन्थाः । त एते स्वतः प्रमाणानि । एतावदवधि वेदस्य प्रामाण्यं सर्वैरपि हिन्दुभिः स्वीक्रियत एव । नात्र काऽपि विचिकित्सा विद्यते । वेदानां प्रामाण्यमस्वीकुर्वन्तो जना नास्तिका भवन्ति । 'नास्तिको वेदनिन्दक' इति कोष उद्घोषयति । धर्मशास्त्रप्रणेता मनुरपि तमेवार्थमनुवदति । भारतीयाः सर्वेऽपि धर्माः सम्प्रदायाश्च प्रायश एतैः प्रभाविताः सन्ति । भारतीयायाः संस्कृतेर्भारतीयस्य चोदात्तजीवनस्य प्रतीकरूपा एते वेदाः । सर्वाणि च धर्मशास्त्राण्येतन्मूलकान्येव प्रमाणानि भवन्ति । 'वेदोऽखिलो धर्म-मूलं स्मृतिशीले च तद्विदाम्' इति हि प्रसिद्धिः । एकेश्वरवादो विभिन्नदेवदेवीवादश्च एतेभ्य एव प्रसृतः । सोऽयं भाव ऋग्वेदीया-या अस्या ऋचः सुस्पष्टं प्रतीयते—

इन्द्रं मित्रं वरुणमग्निमाहु-
रथो दिव्यः ससुपर्णो गरुत्मान् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकं सद्विप्रा बहुधा वदन्ति
अग्निं यमं मातरिश्वानमाहुः।
(ऋक्संहिता १।१६४।४६)

अनेन एक एव हि देवः (आदित्यः) विभिन्नरूपैः प्रतिभासत इत्युच्यते । एतादृशेभ्य एव मन्त्रेभ्य एकेश्वरवादस्याद्वैतसिद्धान्तस्य वा सम्भवः। वैदिकाः सर्वेऽपि धर्मा ईश्वरविश्वासोपज्ञा इति निर्विवादः सिद्धान्तः । अतएवावैततत्त्वं तदाश्रितानां च देवानां बहुत्वेऽपि एकत्वकल्पनमार्षज्योतिरुद्भासितानां तेषां योगजन्मनामस्मभ्यः किमप्य वदानं भवति । दार्शनिकजगति ब्रह्मसंज्ञया यदद्वैततत्त्वमभिधीयते धर्मराज्येऽपि विविधेषु धर्मग्रन्थेषु तदेव तत्त्वं पुरुषहिरण्यगर्भादिशब्दैः प्रतिपादितमास्ते । सुतरां देवास्तस्यैवाद्वैततत्त्वब्रह्मणस्तत्तच्छक्ति-विशेषाणां द्योतकानि प्रतीकानीति प्रतिपादितं भवति ।

देवशब्दो विभिन्नेष्वर्थेषु प्रयोज्यमानोऽपि कमपि व्यापकमर्थं विषयीकरोति । सोऽयं शब्दो दैवादिकाद् 'दिव्'धातोर्निष्पन्नः । दिव्यतीति देव इति ह्यस्य व्युत्पत्तिः। निरुक्ते तावत् "देवो दानाद्वा दीपनाद वा द्योतनाद वा द्युस्थानो भवतीति" । इति।

देवशब्दो दानार्थकः प्रधानदातारं भगवन्तं विश्वस्य कर्तारं बोधयति। ज्ञानिनोऽपि स्वकीयं ज्ञानमितरेभ्यो वितरन्ति । अतएव तेऽपि देवशब्देनाभिधीयन्ते। शतपथ ब्राह्मणे च 'विद्वांसो हि देवाः' इत्युल्लिखितमास्ते। द्योतनार्थको देवशब्दो भूमण्डलं द्योतयतः सूर्यादीन् विषयीकरोति । माता पिता मन्त्रदाता च तैत्तिरीयसंहितायां देवत्वेन निर्दिष्टाः सन्ति 'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भवे'ति तदीयमनुशासनम् । एवं च भगवान् परमेश्वरः सूर्यादीनां प्रकाशकः, सचराचरस्य च ब्रह्माण्डस्य जन्मदातेति देवशब्दस्तमेव मुख्यतया बोधयति। स्थूलतो दिव् धातोर्दश अर्था वर्तन्ते । भगवान् पाणिनिः दिवु क्रीडाविजिगीषा व्यवहार द्युतिस्तुतिमोद मदस्वप्नकान्ति-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गतिषु' इति निर्दिशति। देवशब्दस्तानेतान् सर्वानर्थान् गर्भीकरोति। दिव्यन्ति भुवि क्रीडन्तीति देवाः, दिव्यन्ति असून् जयन्तीति देवाः। एवमेवापरेष्वप्यर्थेषु एष शब्दः प्रवर्तते।

मानवस्तावत् प्रथमतः प्रकृतितएव एषां परिचयं प्राप। मानवो हि प्रकृतेर्दासः। प्रकृतेरवदानैरेव आत्मानं विस्मरति। प्रभातकालीनस्य बालारुणस्य कनकमयाः किरणाः, शारदीयस्य पूर्णेन्दो रजताभा दीप्तिः मनसि यादृशमाह्लादं जनयन्ति, मध्याह्नकालीनाः प्रखरास्तपनस्य कराः, समुद्रतरङ्गोत्थिता वीचीवल्लर्योऽपि तादृशमेवाह्लादं कुतुकं च जनयन्ति। वासन्तिकः मृदुशीतसुवासितो मलयानिलः, सहकाररसास्वादनलम्पटस्य कोकिलस्य कुहुध्वनिः मनसि आनन्दरसयोद्रेकं जनयन्त्यो वर्षणमुखरायाः प्रावृषः सङ्गीतानुकारिण्यो वारिधारा नीले नभसि खेलत्सु श्यामलेषु मुदिरेषु चोद्भासमाना विद्युद्विलासाश्च कस्य वा सहृदयस्य मनसि नानन्दं वर्षन्ति? एवमादिभिः प्रकृतेरवदानैर्विस्मयेन विमुग्धा आर्या ऋषयो निर्वाचो निस्पन्दाश्च तेषु अदृष्टायाः कस्या अपि महीयस्याः शक्तेरवस्थानं स्वीकर्तुं प्रावर्तन्त। तस्या एव शक्तेराधारो वेदेषु देवशब्देनाभिधीयते। स एव च वैदिको देव इति स्थूलतः प्रतिपादयितुं शक्यते। ते यदा प्रतिदिन मुदीयमानं सूर्यमपश्यन्, तत आलोकं चालभन्त, तेन चोपकृता अभवन्, तस्मिन् कामपि शक्तिं स्वीचक्रुः, तं च 'देव' इत्यमन्यन्त। तथैव चन्द्रवायुप्रभृतिष्वपि देवत्वं स्वीचक्रुः। यदा च संयोगादग्निमपश्यन्, तस्य च दाहकताशक्तिमन्वभवन्, ततश्च बहूनुपकारानलभन्त, तदा तस्य दाहेन भीतत्रस्ता अपि तं देवं मन्यन्ते स्म। ऋग्वेदे बहवो मन्त्रास्तमिममग्निमेव विषयीकुर्वन्ति। एतदभिप्रायेणैव यजुर्वेदे एवं श्रूयते--

"अग्निर्देवता। वातो देवता। रुद्रा देवता। आदित्या देवता। मरुतो देवता। विश्वेदेवा देवता बृहस्पति र्देवता" इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शतपथ ब्राह्मणेऽपि देवानां विषयः सुस्पष्टमुल्लिखितस्रास्ते। एवं वेदेषु तयस्त्रिंशत् देवा वर्णिताः सन्ति । त एते यथा—अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः, इन्द्रः, प्रजापतिश्चेति । अष्टवसुशब्देन त एते अभिधीयन्ते—अग्निः, पृथिवी, वायुः, अन्तरीक्षम्, आदित्यः, द्यौः, चन्द्रः, नक्षत्राणि च । 'वसन्त्यत्रेति वसव इति व्युत्पत्त्या वासस्याधारभूता एते वसुशब्दवाच्या भवन्ति । त एते एकादश रुद्रा भवन्ति—प्राणः, अपानः, उदानः, समानः, व्यानः, नागः, कूर्मः, कृकरः, देवदत्तः, धनञ्जयः, आत्मा चेति । विलापार्थात्, रुदधातोः रुद्रशब्दो निष्पन्नः । रुदन्त्येभिः अथवा रोदयन्तीति वा रुद्रशब्दस्य व्युत्पत्तिः । एतेषु हि शरीरादपसृतेषु मानवो रोदितीति त एते रुद्रा भवन्ति । त एते द्वादश आदित्या भवन्ति—धाता, अर्यमा, मित्रः, वरुणः, इन्द्रः, विवस्वान्, पूषा, पर्जन्यः अंशुमान्, भवः त्वष्टा, विष्णुश्च । एतेषु अर्यमा, मित्रं विवस्वान्, पूषा, अंशुमान् इति पञ्चापि शब्दा एकस्य सूर्यस्य पर्यायाः । परंतु शक्तिभेदमादाय पृथक् पृथक् निर्दिष्टा अभवन्।

त एते देवाः पुनर्याह्स्कादिभि र्महर्षिभिस्त्रेधा विभक्ताः—द्युस्थानीयाः, अन्तरीक्षस्थानीयाः, पृथिवीस्थानीयाश्चेति । द्युस्थानीयेषु देवेषु वरुणः, पूषा, मित्रः, सूर्यः, विष्णुश्च प्रधानानि भवन्ति । अन्तरीक्षस्थानीयेषु इन्द्रः पर्जन्यः, रुद्रश्च प्रधानानि । पृथिवीस्थानीयेषु च देवेषु अग्निः, बृहस्पतिः सोमश्च प्रधानानि । द्युस्थानीयेषु च देवेषु वरुणस्य किमपि वैशिष्ट्यं वर्तते ।

"अतो विश्वान्यद्भुता चिकित्वा
अभिपश्यति । कृतानि च या कर्ता"

अस्य वरुणस्य प्रसादात् विद्वान् भूतानि भविष्यन्ति च वस्तूनि पश्यातीति एतदर्थः—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'उत यो मानुषेषु । यशश्चक्रे असाम्या अस्माकमुदरेषु ॥"
इत्यादिभिरस्य महिमा वर्णित आस्ते । अस्यैव प्रसादेन सूर्यचन्द्रनक्षत्रादयः प्रकाशमधिगच्छन्ति । सोऽयं सर्वज्ञो न पापानि सहते, विशेषतश्च मानवान् दण्डयति । 'काले वर्षन्तु पर्जन्याः" "पर्जन्यादन्न सम्भवः" देशोऽयं क्षोभरहित' इत्याद्युक्तयोऽस्य महिमानं प्रथयन्ति ।

अन्तरीक्षचारिषु देवेषु इन्द्रस्य समधिकं प्राधान्यं दृश्यते । ऋग्वेदस्य प्रायश एकचतुर्थांशा मन्त्राः केवलमिन्द्रविषयका वर्तन्ते ! सोऽयमिन्द्रः शत्रुघातित्वेनासीमशक्ति सम्पन्नत्वेन च मन्त्रेषु वर्णितो दृश्यते ।

पृथिवीस्थानीयेषु च देवेषु अग्निः प्रधानं भवति ।

(सावशेषम्)

भारतीयं ज्योतिषम्

लेखकः—श्री वायिकोलि ज्यौतिषविशारदः

कर्मवादः, ग्रह नक्षत्रादेः प्रभावश्च

आकाशचारिणो ग्रहा उपग्रहाः, धूमकेतवो नक्षत्रपुञ्जाश्च अनुक्षणं तेषां शक्तेर्विक्षेपेण भूमण्डले वर्तमानानां सकलानामपि सचेतनानामचेतनानां च पदार्थानां क्षतिं वृद्धिं परिवर्तनं च सम्पादयन्ति । भूकम्पे, देशस्योन्नयने वात्यासु, ऋतुवैषम्ये, कुहेलिकायां युद्धे, सक्रामकरोगेषु तथा चात्ययिककर्मादिषु ग्रहाणां प्रभावोऽनुभूयते । मानवानां सुखं दुःखं च ग्रहाणां प्रभावेण नियम्यते । तानीमानि तथ्यानि त्रिकालदर्शिभिः सिद्धतपोभिर्महर्षिभिर्ज्ञानबलेन भूयोभूयोऽयुभुत्या च स्थिरीकृतानि सन्ति । आधुनिका वैज्ञानिका

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि तेषु काऽपि अदृश्यरूपा शक्तिः कार्यं करोतीति स्वीकर्तु-मुपक्राम्यन्ति । अखण्डस्य विराजश्च कालस्य प्रत्येकं निमेषस्य किमपि मूल्यं वर्तते। तमिमं मुहूर्तं कालं चाधिकृत्य विचारो ज्योतिःशास्त्रस्य मूलम् । विभिन्नेषु समयेषु जीवेषु उत प्रारब्ध-कर्मसु विभिन्ना गुणाः संक्रामन्तीति जाङ्गनिकेन प्रमाणैः साधितम् ।(१)

सर्वेऽपि कालस्य वशगाः । कालात् कर्मण उत्पत्तिः । तदिदं कर्म मानवस्य जीवितं नियमयति । विषमेऽस्मिन् संसारे यानि शुभान्यशुभानि वा फलानि परिलक्ष्यन्ते, तानि किल कर्मणः फलानीत्य-भिधीयते । सुखदुःखदयो भावा जीवधर्मा आहोखित् पारिपार्श्विक्या अवस्थाया परिणामा इत्यक्तौ न किमपि रहस्यमुद्घाटितं भवति । तस्मात्कर्मफलानि जन्मान्तरस्य ऐहिकस्य च कर्मणो वैशिष्ट्यस्य मूलमिति स्वीकरणीयम् ।

आर्या मनीषिणः पूर्वजन्म परजन्म च स्वीकृत्य अस्यादृष्टस्य वैषम्यं सम्यगेव निरूपितवन्तः । कर्मणः फलभोगेन साकं जन्मान्तरस्य सम्पर्कः ज्योतिश्शास्त्रेण प्रमाणी क्रियते । कायेन मनसा वाचा सम्पन्नानि कर्माणि पुण्यानि पापानि चानुसृत्य सुखदुःखरूपं फलं प्रयच्छन्ति । तस्य फलिततया मानव उत्तमं मध्यमं चाधमं च जन्म लभते (२) सर्वत्र कर्मफलानुसारेणैव जन्मसमये ग्रहाणां-

---

(१) Astrology would be a large scale example of Synchronism. What ever is born or done this moment of time "Jung"

(२) शुभाशुभफलं कर्म मनोवाग्देहसम्भवम् ।
कर्मजा गतयो नृणामुत्तमाधममध्यमाः ।।

मनुसंहिता १२।३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मवस्थितयः सम्भवन्ति । स्थानभेदेन गतिभेदेन सम्पर्कभेदेन च ग्रहाः शुभाशुभफलं वितरन्ति । जन्मक्षण एव जातस्य भविष्यज्जीवनं कीदृशं स्यादिति ज्योतिःशास्त्रेण निर्णेतुं शक्यते । सृष्टावेतस्यां वैषम्यं वैचित्र्यं च सर्वत्र परिलक्ष्यते । प्रत्येकं मनुजाः बुद्ध्या व्यवरारेणान्यैश्च विषयैः परस्परं विलक्षणा भवन्ति । भोगेषु सुखेषु धर्मे बुद्धौ कुटुम्बादिषु च सर्वत्र वैचित्र्यमुपलभ्यते । समतया लालित पालितानां शिक्षितानां च व्यक्तीनां सुखे दुःखे भोगे च बहवः प्रभेदाः अनुभूयन्ते । दरिद्रस्य गृहे जातोऽपि कोटीश्वरो वति । स्थलविशषेषु कदाचित् सम्राजस्तनयोऽपि दारिद्र्यमनु भवति । एकः कोटिशो जनैराद्रियते, अपरः कोटिशो जनैः पराभूयते । एको धनस्यापरिमितस्य प्रभावेण वहुविधैः विलासैः काल नयति, अपरश्च स्वोदरपूरणार्थं भिक्षामटन् परिभ्राम्यति । वलिष्टोऽपि रोगविरहितोऽपि कोऽपि हठात् म्रियते । मुमूर्षुरपि वृद्धो वहुकालं जीवति । ९१

नेपोलियन सदृशोऽपि वीरो वन्दिशालायां म्रियते, हिट्लर सदृशोऽपि दुर्धर्षो योद्धा आत्महत्यया प्राणान् जहाति मुषोलिनी-सदृशोऽपि शासकः स्वजनैर्व्यापादितो भवति ।सत्याऽहिंसाप्रेम्णां प्रतीकोऽपि महात्मा गान्धी आततायिनो गुलिकया निहतो भवति। तानीमानि सर्वाणि नियतेरदृष्टस्य वा फलानीत्यत्र नास्ति सन्देहस्यावसरः । केचन तानीमानि ईश्वरकृतानीति विश्वसन्ति । परंतु स्वयं भगवान् सर्वानपि समतया व्यवहरति । इदं हि श्रीमुखोद्गीर्णं वचनम्—'समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रिय' इति । ईश्वरस्य दृष्ट्या सर्वेऽपि समानाः, स कदाचिदपि कुत्रापि पक्षपातं न करोति । यदीमानि नेश्वरस्य विलसितानि, तर्हि किंकृतेयं विषमतेति विचारणीयं भवति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नीलाद्रिनाथ शतकम्

लेखकः —श्री पुरुषोत्तम मिश्रः

फलं वल वहन्तं त्वां
वप्रलम्वं सुराजितम् ।
मुष्ट्याभिनस्त्वं क्रीडायां
व प्रलम्वं सुराजितम् ।६६।

अन्वयः - हे बल, त्वं क्रीडायां सुराजितं त्वां वहन्तं, सुराजितं प्रलम्वं वप्रलम्वं फलं व मुष्ठ्या अभिनः ।

व्याख्या--हे बल, बलभद्रस्वरूप जगन्नाथ, त्वं क्रीडायां विनोद खेलायां सुराजितं सम्यक् शोभमानं त्वां, वहन्तं स्कन्दयो-रारोप्य हन्तुमिच्छया नयन्तं सुरैर्देवैरपि अजितमपराजितं प्रलम्वं प्रलम्बासुरं वप्रे गृहरोधसि लग्नमुत्पद्य स्थितं प्रलंवं कर्कटी-कुष्माण्डादिफलमिव मुष्ट्या मुष्टिघातेन अभिनः भिन्नमकार्षीः विदारितवानसीत्यर्थः। वप्रलग्नं कर्कट्यादिफलं यथा अनायासेन मुष्ट्या भज्यते तथैव स्कन्दस्थितं तं विदारितवानसीति भावः । अत्र द्वितीयचतुर्थ पादयो र्यमकालंकारः ।६६।

बल मागधः पिवत्ति येन जितो
मधुरेवतीशरणमुद्धवतः ।
त्वयि तव मेऽस्तु मतिरेत्य जगन्-
मधुरेऽवतीश रणमुद्धवतः ।६७।

अन्वयः—हे बल, हे ईश, येन हवतः रणमुत् मागधः जितः तत्र रेवतीशरणम् एत्य मधु पिवति, जगत् अवति, उद्धवतः मधुरे त्वयि मे मतिः अस्तु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—हे बल वलरामावतार जगन्नाथ हे ईश प्रभो, येन त्वया हवतः युद्धे रणे मुद्यतीति रणमुद्युद्धामोदी मागधो मगधोद्भवो जरासन्धो जितः पराजितः, तत्र तस्मिन् तादृश इत्यर्थः, रेवतीशरणं रेवत्याः स्वप्रेयस्या गृहं भवन मेत्यागत्य मधु मद्यं पिवति स्वीकुर्वति, तथापि जगद्भुवनमवति रक्षति, उद्धवतः उद्धवैरुत्सवैर्मधुरे मनोहरे त्वयि मम मतिर्बुद्धिरस्तु । मम मतिस्तादृशं त्वां सर्वदा चिन्तय-त्वित्यर्थः। अत्रापि द्वितीय चतुर्थपादयोर्यमकमलङ्कारः ।६७।

यत्तद्भवान् बलारित्वे
द्विविदेन पराधिना ।
चूर्णोऽसौ त्वन्मुष्टिनाऽसी—
द्विविदेऽनपराधिना ।६७।

अन्वयः—हे वल, यद् भवान् पराधिना अनपराधिना द्विविदेन अरित्वे विविदे, तत् असौ त्वन्मुष्टिना चूर्ण आसीत् ।

व्याख्या—हे वल वलरामावतार जगन्नाथ, यद्यस्मात्कारणात् भवान् परः समधिक आधिर्मनोव्यथा यस्य मित्रस्य कंसस्य नाशा-दित्यर्थः अनपराधिना नास्ति अपराधी ततोऽधिकः अपराधी द्रोही यस्मात्तादृशेन द्विविदेन तन्नामकेन कंसस्य मित्रेण दानवेन अरित्वे शत्रुत्वे विविदे ज्ञातः यतः स भवन्तं शत्रुत्वेनाज्ञासीत्, तत् तस्मादसौ द्विविदस्त्वन्मुष्टिना तव मुष्ट्याधातेन चूर्णः विशकलित आसीत्। अत्रापि द्वितीय चतुर्थ पादयोर्यमकमलङ्कारः ।६८।

का लाङ्गलेन मधुरां
सन्धेतेन त्वया स्रजम् ।
कालां गले न मधुरां
कपताऽपूरि बिभ्रता ।६८।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः–अङ्ग, मधुराम् इतेन, गले मधुरां स्रजं बिभ्रता, लाङ्गलेन कालां कषता त्वया का सन्धा न अपूरि ।

व्याख्या–अङ्ग हे बलरामावतार जगन्नाथ, मधुरां मथुरापुरी-मितेन गतेन मधुरां मनोहारिणीं स्रजं मालां गले बिभ्रता धारयता, लाङ्गलेन कालां यमुनां कषता कर्षता त्वया का सन्धा प्रतिज्ञा न अपूरि पूरिता, सर्वाऽपि पूरितेत्यर्थः । अत्र प्रथमतृतीययोः पादयोर्यमकमलङ्कारः ।६९।

जिन्माग्रहीस्त्वं कंसेन
देव कीनाशदासिना ।
जितैः सुरैः प्रार्थितोऽज
देवकीनाशदासिना ।७०।

अन्वयः - हे अज हे देव, कीनाशदासिना देवकीनाशदाऽसिना कंसेन जितैः सुरैः प्रार्थितः त्वं जन्म अग्रहीः ।

व्याख्या—हे अज जन्मरहित देव जगन्नाथ, कीनाशदासिना कीनाशं यमं दासयितुं दासीकर्तुं शीलमस्येति तादृशेन देवक्या स्तद्भगिन्या नाशदः मृत्युदः असिः खड्गो यस्य तादृशेन कंसेन दानवेन जितैः पराजितैः सुरैर्देवैः प्रार्थितो याचितस्त्वं जन्म जननमग्रहीः गृहीतवानसि, कंसेनोपीडितै दैंवतैरभ्यर्थितस्तेषा मुद्धरणाय जन्मरहितोऽपि त्वं जन्म स्वीकृत्य कृष्णरूपेणावतीर्णोऽसीति भावः । अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ।७०।

आहारि ते पूतनया
स्तन्यं तज्जीवितं यया ।
आहारि ते पूतनया
हृदि मेऽस्त्वीश सा तनुः ।७१।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे ईश यया पूतनया स्तन्ये आहारिते तज्जीवितम् आहारि, सा पूतनया ते तनुः मे हृदि अस्तु।

व्याख्या—हे ईश प्रभो कृष्णावतार जगन्नाथ यया तन्वा, पूतनया कंसप्रेरितया राक्षस्या स्तन्ये विषदिग्धे क्षीरे आहारिते आहारत्वेन दत्ते तज्जीवितं तस्याः पूतनाया जीवनम् आहारि गृहीतम्, सा पूतः पवित्रकरो नयो नीतिर्यस्यास्तादृशी सा ते तव तनुः शरीरं मे मम हृदि मनसि अस्तु आविर्भवतु। अत्र प्रथमतृतीय-पादयोर्यमकमलङ्कारः ७१।

तव तिष्ठतां रतिमदा गृहे व्रजे
चरणे नवामनसि यातुराऽऽजनि।
मम धाम कृष्ण विनुते गृहे ते
चरणेन वामनसि यातुराजनि।७२।

अन्वयः—हे कृष्ण आजनि व्रजे गृहे वा नवां रतिं यातुः, अनसि यातुराजनि धाम अदाः, तादृशस्य ते चरणेन विनुते चरणे मम मनसि तिष्ठताम्।

व्याख्या—हे कृष्ण कृष्णावतार जगन्नाथ, आजनि जन्मत आरभ्य व्रजे गोष्ठे गृहे वा गृहे इव नवां नूतनां रतिमानन्दं यातुः प्राप्तवतः, यश्च त्वं अनसि शकटाख्ये यातुराजनि तदाख्य राक्षसे धाम वैकुण्ठम् अदाः दत्तवानसि। तादृशस्य तव चरणेन वेदेन विनुते स्तुते चरणे पादौ मम मनसि हृदये तिष्ठतां विराजमानौ भवताम्। अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ।७२।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh:

म नो र मा

मासिक संस्कृतपत्रिका

ललितैः पदविन्यासैर्विचित्रैर्भावबन्धनैः ।
भावुकानामन्तरङ्गे प्रतिभातु मनोरमा ॥

पञ्चमो वर्षः } १८८७ शकाब्दम्, श्रावणभाद्रपदौ मासौ { पञ्चमी षष्ठी
August and September, 1965 { च सञ्चिके

सुभाषितानि

विजेतव्या लङ्का चरणतरणीयो जलनिधि-
र्विपक्षः पौलस्त्यो रणभुवि सहायश्च कपयः ।
तथाप्येको रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्वे वसति महतां नोपकरणे ।१।

रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगा-
निरालम्बो मार्गश्चरणरहितः सारथिरपि ।
रविर्गच्छत्यन्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्वे वसति महतां नोपकरणे ।२।

धनुः पौष्पं मौर्वी मधुकरमयी चञ्चलदृशां
दृशां कोणो बाणः सुहृदपि जडात्मा हिमकरः ।
तथाप्येकोऽनङ्गस्त्रिभुवनमिदं व्याकुलयति
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ।३।

घटो जन्मस्थानं मृगपरिजनो भूर्जवसनो
वने वासः कन्दाशनमपि च दुःस्थं वपुरिदम् ।
तथाप्येकोऽगस्त्यः सकलमपिबद्वारिधिजलं
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ।४।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तररामचरित समालोचना

(अनुवृत्ता)

प्रबन्धा—श्रीअनन्त त्रिपाठिशर्म्मा

इत्यादीनि शृणुमः । परन्तु अपवादस्य स्वरूपं स्पष्टतोऽधिगन्तुं न पारयामः। अतो रामायणीयः सकलोऽपि संवादोऽत्र सहृदयानामत्र गतये उल्लिख्यते । इदं हि भद्रस्य निवेदनम्—

हत्वा च रावणं संख्ये सीतामादाय राघवः ।
अमर्षं पृष्ठतः कृत्वा स्ववेश्म पुनरानयत् ॥
कीदृशं हृदये तस्य सीतासम्भोगजं सुखम् ।
अङ्कमारोप्य तु पुरा रावणेन बलाद्धृताम् ॥
लङ्कामपि पुरानीतामशोकवनिकां गताम् ।
रक्षसां वशमापन्नां कथं रामो न कुत्सते ? ॥
अस्माकमपि दारेषु सहनीयं भविष्यति
यथा हि कुरुते राजा प्रजा तमनुवर्तते ॥
एवं बहुविधा वाचो वदन्ति पुरवासिनः ।
नगरेषु च सर्वेषु राजन् जनपदेषु च ॥ इति ।

सीताविवासन प्रसङ्गे च रामचन्द्रस्य वचनान्यधः सहृदयानां शीलनाय निदिश्यन्ते--

"सर्वे शृणुत भद्रं वो मा कुरुध्वं मनोऽन्यथा ।
पौराणां मम सीतायां यादृशी वर्तते कथा ॥
पौरापवादः सुमहांस्तथा जनपदस्य च ।
वर्तते मयि बीभत्सः, स मे मर्माणि कृन्तति ॥
अहं किल कुले जात इक्ष्वाकूणां महात्मनाम् ।
सीताऽपि सत्कुले जाता जनकानां महात्मनाम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जानामि त्वं यथा सौम्य दण्डके विजने वने।
रावणेन हृता सीता, स च विध्वंसितो मया॥
तत्र मे बुद्धिरुत्पन्ना जनकस्य सुतां प्रति।
अत्रोषितामिमां सीतामानयेय कथं पुरम्॥
प्रत्ययार्थं ततः सीता विवेश ज्वलनं तदा।
प्रत्यक्षं तव सौमित्रे देवानां हव्यवाहनः॥
अपापां मैथिलीमाह वायुश्चाकाशगोचरः॥
चन्द्रादित्यौ च शंसेते सुराणां सन्निधौ पुरा॥
महर्षीणां च सर्वेषामपापां जनकात्मजाम्,
एवं शुद्धसमाचारा देवगन्धर्वसन्निधौ॥
लङ्काद्वीपे महेन्द्रेण मम हस्ते निवेशिता।
अन्तरात्मा च मे वेत्ति सीतां शुद्धां मनस्विनीम्॥
ततो गृहीत्वा वैदेहीमयोध्यामहमागत।
अयं तु मे महान् वादः शोकश्च हृदि वर्तते॥
पौरापवादः सुमहांस्तथा जनपदस्य च।
अकीर्तिर्यस्य गीयेत लोके भूतस्य कस्यचित्॥
पतत्येवाधमाँल्लोकान् यावच्छब्दः प्रकीर्त्यते।
अकीर्तिर्निन्द्यते लोकैः कीर्तिर्लोकेषु पूज्यते॥
कीर्त्यर्थं तु समारम्भः सर्वेषां सुमहात्मनाम्।
अप्यहं जीवितं जह्यां युष्मान् वा पुरुषर्षभाः।
अपवादभयाद्भीतः किं पुनर्जनकात्मजाम्।
तस्माद्भवन्तः पश्यन्तु पतितं शोकसागरे।
नहि पश्याम्यहं भूतं किञ्चिद् दुःखमतोऽधिकम्
श्वस्त्वं प्रभाते सौमित्रे, सुमन्त्राधिष्ठितं रथम्
आरुह्य सीतामारोप्य विषयान्ते समुत्सृज।
गङ्गायास्तु परे पारे वाल्मीकेस्तु महात्मनः।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आश्रमो दिव्यसंकाशस्तमसातीरमाश्रितः।
तत्रैतां विजने देशे विसृज्य रघुनन्दन !
शीघ्रमागच्छ सौमित्रे कुरुष्व वचनं मम॥
न चास्मि प्रतिवक्तव्यः सीतां प्रति कथञ्चन।
तस्मात् त्वं गच्छ सौमित्रे, नात्र कार्या विचारणा॥
अप्रीतिर्हि परा मह्यं त्वयैतत्प्रतिवादिते।
शापिता हि मया यूयं पादाभ्यां जीवितेन च
ये मां वाक्यान्तरं ब्रूयुरनुनेतुं कथं च न।
अहिता नाम ते नित्यं मदभीष्टविघातनात्।
मानयन्तु भवन्तो मां यदि मच्छासने स्थिताः।
इतोऽद्य नीयतां सीता कुरुष्व वचनं मम॥
पूर्वमुक्तोऽहमनया गङ्गातीरेऽहमाश्रमान्।
पश्येयमिति तस्याश्च कामः संवर्त्यतामयम्। इति।

रामचन्द्रो हि सर्वात्मना सीतां शुद्धां यशस्विनीं कलयति। तां च विवासयन् आत्मानं शोकसागरे पतितं प्रख्यापयति, परन्तु तां स्वसन्निधौ स्थापयितुं न प्रभवति। "कीदृशं हृदये तय सीतासम्भोगजं सुखम्" इति पौरापवादः परं बाधते। सीताया विवासनमन्तरा नैष लोकापवादः कथंचिदपि निराकर्त्तुं शक्यते। अतस्तस्या निरापराधाया अपि त्यागः "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् कुलं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत्।" इति लौकिकं न्यायमाश्रित्य विहितः आत्मरक्षामूलक एवायं त्यागः इति स्फुटं प्रतीयते। अतएव सीताया यथा न किमप्यनिष्टं सम्भाव्येत तादृशे स्थाने तस्या स्त्यागो विधेय इति लक्ष्मणं समादिशति स्म। आश्रमेषु सीतायाः सुमहती श्रद्धेति वनवाससमये अन्वभूत् सीताऽपि आश्रमेषु स्थितिं दोहदरूपेणाभिललाष। तत्पूरणव्याजेन च सा वाल्मीकेराश्रमे तमसातीरवर्तिनि दिव्यसंकाशे विसृष्टेति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामायणीयो रामचन्द्रः सीतां विवासयन् 'तदिदमनुचितमिति जानाति स्म । भरतादयोऽवश्यं प्रतिवदेयुरिति तान् सशपथं निवारयति स्म । कुलस्य विश्वविदितस्य गौरवं रक्षितुमात्मनश्च कलङ्कमपनोदितुं निरपराधायाः सीताया विवासनं चकार, परंतु तदीयायां हिरण्मय्यां प्रतिकृतौ बहुमानमाधत्त । अन्ते च सर्वेषां पुरतस्तस्याः परमं पातिव्रत्यं प्रख्याप्य तां ग्रहीतुं निश्चिकाय । पातालोदरं च प्रविष्टायां तस्यां बलेन पातालं विजित्य तत उद्धर्तुमपि इयेष । परन्तु पितामहेनोद्बोधितस्तूष्णीमास । अत्र तु उत्तररामचरिते कविः सीताया विवासनमन्तरा रामस्य नान्या गतिरासीदिति विशदं निरूपितवान् । तत्र वशिष्ठस्य सन्देशः परमुपकरोति । 'युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः' इत्युपदेशं शृण्वन्नेव 'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि । आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा" इति प्रतिजानीते । दुर्मुखवचनादपवादं श्रुत्वैव विनाऽन्यस्य परामर्शं, कुलगुरोर्वशिष्टस्य आदेशं स्मरति । स्वकुलस्य मर्यादामक्षुण्णां स्थापयितुं विभावयति । तत्क्षणमेव दुर्मुखद्वारा लक्ष्मणाय सन्देशं प्रेषयति । यदा दुर्मुखो निवेदयति 'हा कहं दाणिं अग्गिपरिसुद्धाए गब्भट्ठिअपवित्तरहुउलसंताणाए देवीए दुज्जणवअणादो एव्वं ववसिदं देवेण" (हा कथमिदानीमग्निपरिशुद्धाया गर्भस्थितपवित्ररघुकुलसन्तानाया देव्या दुर्जनवचनादेवं व्यवसितं देवेन) इति तदा रामः स्वमनोभावं प्रकटयति । "कथं दुर्जनाः पौरजानपदाः !

इक्ष्वाकुवंशोऽभिमतः पृथिव्यां
जातं च दैवाद्वचनीयबीजम् ।
यच्चाद्भुतं कर्म विशुद्धिकाले
प्रत्येतु कस्तद्दूरवृत्तम्' ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदानीं तस्य मनसि 'सतां केनापि कामेन लोकस्याराधनं व्रतम् यत्पूजितं हि तातेन मां च प्राणांश्च मुञ्चता" इति स्वकुलगौरवं स्फुरति । अतएव लोको मत्सम्पर्कान्मदीयं कुलं कश्मलया किंवदन्त्या यथा नैव कलङ्कितं कर्तुं प्रभवेत्, तदर्थं सीताया विवासनमन्तरा नान्यमुपायं पश्यति सोऽयं भावोऽरुन्धतीमुखेन कविना निपुणं प्रतिपादितः । इदं हि तस्या वचनम्—

'घोरं लोके विततमयशो या च वह्नौ विशुद्धि—
र्लङ्काद्वीपे कथमिव जनस्तामितः श्रद्दधातु ।
इक्ष्वाकूणां कुलधनमिदं मत्समाराधनीयः
कृत्स्नो लोकस्तदिह विषमे किं स वत्सः करोतु ॥"

इति तत्रभवती भूतधात्री च तदिदं कर्मानुमनुते । रामस्य च सीतायामसाधारणं स्नेहं प्रकटयति । * एवमेव जनकोऽपि यदा आपातशोकावेगात् 'एतद्दुःसहघोरवज्रपतनं शश्वन्ममोत्पश्यतः । क्रोधस्य ज्वलितुं धगित्यवसरश्चापेन शापेन वा' इति प्रतिकर्तुं प्रकाशयति, तदा भगवत्या अरुन्धत्या 'राजन्नपत्यं रामस्ते, पाल्याश्च कृपणाः प्रजाः" इत्युद्बोधितः "शान्तं वा रघुनन्दने तदुभयं तत्पुत्रभाण्डं हि मे भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः" इति व्याहरन् आत्मानं संस्थापयति । उत्पत्तिपरिपूताया देवयजनसम्भवाया राजर्षिणा जनकेय कृतपरिपालनायाः पावकवशिष्ठारुन्धतीप्रशस्तशीलशालिन्यास्तदेकजीविताया आविवाहसमयात् शैशवे यौवने सौहृदादपृथगाश्रयायाः श्वश्रूभिरनिनन्द्यमानचरित्रायाः सीताया

* किन्त्वापातदुःखसंवेगाद्वदामि, न पुनर्न जानामि सीतास्नेहं रामचन्द्रय ।
दह्यमानेन मनसा दैवाद्वत्सां विहाय सः ।
लोकोत्तरेण धैर्येण प्रजापुण्यैश्च जीवति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
विवासनमनुचितमकार्यमपि इक्ष्वाकुवंशीयस्य प्रजानुरञ्जनबद्धक-दीक्षस्य रामस्य कर्तव्यमापतितम् । कुलगौरवस्य रक्षणाय कलङ्कस्य चापनोदनाय सीताया विवासनमन्तरा नान्या गतिरवर्ततेति गुरुजनः सीतायां रामभद्रस्यासाधारणं स्नेहं प्रत्यक्षीकुर्वन् कथंचित् क्षमते स्म। रामचन्द्रश्च प्राणेभ्योऽपि गरीयसीं सीतां विवासयन्, तदीयायां च हिरण्मय्यां प्रतिकृतौ बाष्पदिग्धं चक्षुर्विनोदयन् पुटपाकप्रतीकाशेन शोकेन दन्दह्यमानहृदयो निरपराधायाः सीताया विवासनरूपस्य पापस्य प्रायश्चित्तं कुर्वन्नास्तेति कथंचित् समाधेयो भवति।

परन्तु निरपराधा सीता विना आत्मनः किमपि कल्मषं महतोऽत्याचारस्य पात्रीकृतेति नियतं विचारणीयं भवति । रामचन्द्रस्य प्रजाराधनबद्धश्रद्धस्य सीताविवासनं कथं चित्समर्थनीयं भवतु नाम, परन्तु नैतन्न्याय्यमिति न सन्देहः । धर्मशास्त्रमपि 'अदण्ड्यान् दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् अयशो महदाप्नोति नरकं चाधिगच्छतीति नैतादृशं कर्मानुमनुते । कविरपि तमिमं भावं वासन्तीमुखेन संसूचयन्निव लक्ष्यते। 'अयि कठोर यशः किल ते प्रियं किमयशो ननु घोरमतः परम्' इति वनदेवता वासन्ती रामचन्द्रस्य सम्मुख एव विगर्हयति। राजर्षिर्जनकोऽपि तदिदं विवासनं वैशसं कर्मेति प्रतिपादयति। परन्तु महानुभावा सीता तादृशं कर्म सर्वात्मना प्रशंसति, भर्तुश्च गौरवेण कुलमर्यादासंरक्षणेनात्मानं गौरविणीं मन्यमाना 'अतएव राघवकुल धुरन्धर आर्यपुत्र' इत्यभिप्रैति । ❀ एवं भर्तारं भर्तुश्च सर्वविधमत्याचरितं सर्वात्मना

❀ रामचन्द्रः— स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥

सीता— अदएव्व राहवकुलधुरंधरो अज्जउत्तो ।
(अतएव राघवकुलधुरन्धर आर्यपुत्रः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभिनन्दन्ती महानुभावा सीता पतिव्रतानां शिरोमणि र्भवतु, भर्तृकृतां च सकलामपि यातनां सहतां नाम, तथाविधायास्तरुण्या विना कारणं निर्वासनं सोढुं नारीसमाजो नैव सन्नद्ध आसीत्। रामभद्रे परं निरागाऽपि भगवत्यरुन्धती द्वादशवार्षिके सत्रे समाप्ते प्रात्यावर्तमाना 'नाहं वधू विरहितामयोध्यां गच्छामीति दृढं प्रतिवादं कृतवती। राममातरोऽपि तदनुमोदितवत्यः। भगवान् वशिष्ठोऽपि ताभिः सह-योगमकार्षीत्। रामस्य जननी कौशल्यापि तेनैव मन्युना स्वपुत्रस्य मुखकमल दर्शनमपि परिहृतवती। वनदेवता वासन्ती च रामचन्द्रं 'तत्किमिदं दारुणं नृशंसं कर्मानुष्ठित'मित्यमयुक्तवती। लोको न मृष्य-तीति रामचन्द्रस्योत्तरं श्रुत्वा 'तत्कस्य हेतो'रिति कारणं पृच्छति स्म। रामचन्द्रश्च किमपि कारणं निर्देष्टुमशक्नुवानः 'स एव जानाति किमपी'ति आत्मनो दुर्बलचित्तत्वं प्रकटीचकार। भगवती तमसा च 'उचितस्तदुपालम्भ' इति रामचन्द्रस्याचरितं गर्हयति स्म। राजर्षि-र्जनकोऽपि रामस्य तादृशवैशसाचरणेन परं क्रुद्धश्चापेन शापेन वा प्रतिकर्तुमियेष। तस्य चैतादृशं चेष्टितं भगवत्यरुन्धती "एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनामिति समर्थयन्ती 'राजन्नपत्यं रामस्ते पालयाश्च कृपणाः प्रजा' इति निवारितवती। एतेन प्रजानामपवादनं रामचन्द्रस्य च सीतानिर्वासनं नैव सहृदयानामनुमतं प्रत्युत गर्हणीय-मवर्ततेति प्रतीयते।

यद्यपि सीताया निर्वासनं नैव दण्डो भवतीति † अदण्ड्यान् दण्डयन् राजेति न्यायो नैव रामचन्द्रं विषयीकरोति, तथापि निरपरा-धायास्तस्यास्तादृशदुःखानुभवे रामः कारणं भवतीति न कोऽपि सन्देहस्यावकाशो वर्तते।

(सावशेषम्)

---

† एतत्प्रागेव निरूपितम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मफलम्

अनुवृत्तम्

लेखक – श्री रवीन्द्रनाथ ठक्कुरः

नलिनी—न तत्र गमनाय काचिदनुमतेरपेक्षा वर्तते । य आत्मानं जानाति, स गृहमधिवसन्नेव तत्र गन्तुमर्हति । इदानीं किमेवं ते हृदयमुत्कलिकाकुलं प्रतिभाति ! किं कण्ठकेतनं नाधुनातनरुचेरनुकूलं भवति ?

सतीशः—किं त्वं भावयसि—सततमहं कण्ठकेतनकथामेव चिन्तयामि ।

नलिनी–तथैव विभाव्यते । तदर्थमेव त्वमत्यन्तं चिन्ताकुल इव दृश्यसे ।

सतीशः—न मामुपहस । यदि त्वमद्य मे हृदयं द्रष्टुं प्रभवेः—

नलिनी—तर्हि उदुम्बरस्य पुष्पाणि सर्पस्य च पञ्च पादानपि द्रष्टुं समर्था स्याम् ।

सतीशः—अये पुनरप्युपहासः ! त्वमत्यन्तं निष्ठुराऽसि । सत्यमहं त्वत्तश्चरमामनुज्ञां नेतुमागतोऽस्मि ।

नलिनी—किमापणं प्रति गन्तव्यम् ?

सतीशः—प्रार्थये त्वाम्, नोपहासैर्मां दग्धुमर्हसि । अद्य चिरमनुज्ञां नेतुं समागतः ।

नलिनी-किमर्थम् ? अकस्मात् तदर्थं किमित्येतादृश आग्रहः समजनि ?

सतीशः—सत्यं वदामि-अहं कियान् दरिद्र इति त्वं न जानासि !

नलिनी–का नाम ते तदर्थं विभीषिका । नाहं त्वत्त ऋणमादातु-मभिलषामि ।

सतीशः—कदाचित् त्वया साकं मम विवाहप्रस्तावः समजनि !—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नलिनी--तदर्थं पलायसे ! विवाहात्प्रागपि हृत्कम्पः !

सतीशः--मम अवस्थामवबुध्यैव भादुडिमहाभागो विवाहप्रसङ्गं प्रत्याजहार।

नलिनी—अहो तेनाभिमानेन निरुद्देशो गन्तुमिच्छसि ! एतादृशं महान्तमभिमानं धृतवतो जनस्य नार्यैः सह सम्बन्धः शोभते, अनेनैव हेतुना तव मुखात्प्रणयप्रसङ्गे श्रुत एव परिहासैरन्तरयामि।

सतीशः--नलिनि, तर्हि किं त्वमुपदिशसि--इदानीमपि आशां पोषयितुम् ?

नलिनी–सतीश, नैवमौपन्यासिकरीत्या प्रसाध्य वचो व्यवहरणीयम्, हासो मे जायते। आशां पोषयितुं किमिति त्वामुपदिशामि ! यस्तावदाशां पोषयति,स स्वत एव पोषयति, न परस्योपदेशेन

सतीशः–अवितथमेतत्। अहं ज्ञातुमभिलषामि त्वं दारिद्र्यं गर्हयसि वा न वा ?

नलिनी--अवश्यं गर्हयामि, यदि तद् दारिद्र्यं मिथ्याकुज्झटिकया स्वस्वरूपं निगूहितुमीहते।

सतीशः--नलिनी त्वं कदाचिदपि चिरपरिचितं विनोदनं विहाय दरिद्रस्य गृहलक्ष्मीः सम्पद्येथाः ?

नलिनी--उपन्यासेषु यादृशमसुस्थत्वं वर्ण्यते तदिदं यदि तथा बलात् निरुध्यते, तर्हि विनोदनं स्वतएव निर्वासितं भवति।

सतीशः—तादृशस्य असुस्थत्वस्य किमपि लक्षणं तत्र---

नलिनी—सतीश, न त्वं कदाचित्कस्यामपि परीक्षायां समुत्तीर्णः। स्वयं नन्दिसाहेबोऽपि नैतादृशं प्रश्नमुत्थापयेत्. न त्वादृशेभ्यः प्रश्रयस्य एकाकणिकाऽपि दातुं युज्यते।

सतीशः--नलिनि, न त्वामहमेतावदत्वधि परिचेतुं प्राभवम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नलिनी–कथं परिचेतुं प्रभवेः ? नाहं तव विलासस्य सामग्री अथवा कण्ठकेतनं भवामि । त्वं नक्तन्दिवं यच्चिन्तयसि, तदेव परिचिनोषि ।

सतीशः–नलिनि, साञ्जलिबन्धं निवेदयामि, न तथा मन्त्रयितुं प्रभवसि । यदहं प्रत्यहं चिन्तयामि, तत् त्वमवश्यं जानासि –

नलिनी—त्वद्विषये ममान्तर्दृष्टिरेतावत् प्रखरेति नासन्दिग्धं निर्णेतुमर्हसि । एष मे पिता आगच्छति । यदि स मामत्र पश्येत् निरर्थकं विरक्तो भवेत् । एषा गच्छामि ।

(प्रस्थिता)

सतीशः–भादुडी महाभागाः! अहं भवत आप्रष्टुमागतोऽस्मि ।

भादुडीसाहेवः—साधु । अद्य तु --

सतीशः—प्रस्थानात्प्राक् किमपि वक्तव्यमास्ते ।

भादुड़ी साहेवः—परं तु नेदानीमवकाशोऽस्ति । विहरणार्थं प्रतिष्ठमानोऽस्मि ।

सतीशः—यदि अनुमन्येरन, भवतः कियतो निमेषाननुगच्छेयम् ।

भादुडीसाहेवः–त्वमनुगच्छेः, सन्देहो नास्ति । परन्तु, नाहं पारयासि एषु दिवसेषु नाहं सहचरस्याभावे व्याकुलो भवामि ।

पञ्चदशः परिच्छेदः

शशधरः–आः किं वदसि! किं मुन्मत्ताऽसि ।

सुकुमारी–किमहमुन्मत्ता उत त्वं नेत्राभ्यां द्रष्टुं न पारयसि ।

शशधरः—न किमपि विस्मयावहम् । उभयमपि सम्भवति । परन्तु-

सुकुमारी—अस्माकं हरेन्द्रस्य जननावधि तेषां मुखानि कथं विसदृशानि—सतीशस्याचरणात् किं त्वं न पश्यसि ?

शशधरः–नाहं तादृशं गभीरं भावं ग्रहीतुं समर्थः । तत् त्वं जानास्येव । मनोऽदृश्यमिति कोऽपि सुस्थिरः संस्कारो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

बाल्यादवधि बद्धमूलोऽस्ति । तर्हि साक्षाद्दर्शने किमपि वाऽवधारयामि ।

सुकुमारी—सतीशस्तत्र बालकं यदा निभृतमुपलभते ताडयति । विधुमुखी तु तत्पश्चादुपसर्पन्ती भूतानां भयं दर्शयति ।

शशधरः—अग्रे—एवं त्वं तिलं तालं करोषि । यदि वा कदाचित् सतीशस्तव पुत्रकं—

सुकुमारी—तत् त्वं सोढुमर्हसि, नाहं पारयामि । न त्वं बालं स्वोदरे धृतवानसि ।

शशधरः—नाहं तदस्वीकर्तुं प्रभवामि । इदानीं त्वदभिमतं श्रोतुमिच्छामि ।

सुकुमारी—बालानां शिक्षणविषये त्वमनर्गलं बहु भाषसे । अस्माभिर्हरेन्द्रस्य विषये यादृशी शिक्षा दित्सिता, तस्य मातृष्वसा तद्विपरीतं शिक्षयति । सतीशस्य सम्पर्कोऽपि तस्य कियान् स्पृहणीयः, तदपि चिन्तनीयम् ।

शशधरः—यदा त्वमेव गभीरं चिन्तयसि, मम ततोऽधिकं चिन्तयितुं नावश्यकता विद्यते । इदानीं किं करणीयं ब्रूहि ।

सुकुमारी—अहं वच्मि—सतीशं त्वं बोधय । स मातुराच्छिद्य कर्मान्वेषणे प्रयतताम् । पुरुषस्य परधनेन तथा विलसनं नैव शोभते ।

शशधरः—तस्य माता यदधिगच्छति तेन सतीशः कथं प्रचलेत् ?

सुकुमारी—किमिति न चलिष्यति । तैर्गृहस्य भृतिर्नैव दीयेत । पञ्चसप्तती रूप्यकाणां नाल्पा भवेत् ।

शशधरः—सतीशस्य यथा प्रचलनम्, पञ्चसप्तती रूप्यकाणां तस्य धूमावान्यामेव भस्मसात् सम्पद्येत । मातुरलङ्कारास्च बहोर्दिनादवधि निश्शेषिताः । इदानीं हविष्यान्तस्य वन्धकत्वेन निक्षेपे नैव ऋणपरिशोधो भवेत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुकुमारी—यस्य अर्जने सामर्थ्यं नास्ति, स किमिति तथा उच्छृङ्खलं व्ययेत ?

शशधरः—मन्मथस्तु तथैवोपदिशन्नास्त । वयमेव सतीशमन्यथा अवर्धयाम । इदानीं तस्योपरि दोषो दातुं न शक्यते ।

सुकुमारी—नैव । तस्य दोषः कथं भवेत् ? सकलोऽपि दोषो ममैव । त्वं नान्यस्य दोषं पश्यसि मम दोषदर्शने तु तव दृष्टिशक्तिः परं वर्धते ।

शशधरः—अये किमिति प्रकुप्यसि ! अहं च तत्र दोषी भवामि ।

सुकुमारी तथा भवतु । त्वं स्वविषयं स्वयं पर्यालोचय । परन्तु नाहं कदाचित्तमवादिषं यत् त्वं मातृष्वसृपतेर्गृहे आरामास्यन्दिकायां पादद्वयोपरि पादं प्रसार्य सुखमुपविश, तथोन्नतायां च तस्यां सुखमासीनो मम पुत्रस्य—

शशधरः—सत्यम्, इमानि वचनान्यविकलं सशपथमहं वच्मि नोक्तवत्यसि त्वम् । अतस्त्वयि न दोषमारोपयितुं शक्नोमि । इदानीं किं करणीयं वद ।

सुकुमारी—यत्ते साधु रोचते, तथा कुरु । किन्तु अहमेतन्निवेदयामि, यावत्पर्यन्तं गृहेऽस्मिन् अवतिष्ठन्ते, तावन्मे बालकं न कदाचिद् बहिरेकाकिनं यातुमनुमन्येय । वैद्यास्तावदुपदिशन्ति—बालोऽयं निर्मलसमीरणसेवनाय बहिः प्रेरणीयः । परन्तु बहिर्विहारार्थं गच्छन्नसौ कदाचित्सतीशस्य सम्मुखमापतेदिति यदा मनस्युदेति, न तदाऽहं स्थिरा स्थातुं शक्नोमि । भवतु नाम स मम भगिन्या औरसः पुत्रः, परन्तु नाहं क्षणमप्यस्मिन् विश्वसिमि—तदिदं तुभ्यं स्पष्टं निवेदयामि ।

(सतीशस्य प्रवेशः)

सतीशः—कस्मिन्, न विश्वसिषि मातृष्वसः ? मयि ? यदि कदाचित् तव पुत्रमेकाकिनं लब्धुमवकाशमासादयेयं तदा तं गलरोध-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्वकं मारयेयमिति ते भयम् ? अस्तु यदि वा मारयेयं, नेदं मारणं, त्वं तव भगिनीपुत्रस्य यादृशमनिष्टं कृतवत्यसि, ततः समधिकं भवेत् ? का मां बाल्यकालादारभ्य एतावदवधि नवात्र-पुत्रमिव बहुविधैर्विलसैरवर्धयत् ? का वेदानीं मां भिक्षुकमिव गृहान्निःसारयति ? का वा मां पितुर्निदेश दाक्षिण्य विश्वेऽस्मिन् लाञ्छनाया अन्तरालमानयत् ? का वा मां –

सुकुमारी—अये शृणोषि ? तवैव पुरतो मामेवमपमानयति । स्वयमेव वदति मम पुत्रकं गलरोधपूर्वकं मारयिष्यामीति ! अये मातः । का गतिरिदानीम् । सुष्ठु मया कृतं दुग्धेन कदल्या च स्वयं कालसर्पः संवर्धितः ।

सतीशः—दुग्धं कदली च ममापि गृहे आसाताम्, ताभ्यां नैव मे रक्तं विषं समपत्स्यत, ततो मां सुचिरं वञ्चितं कृत्वा त्वं येन दुग्धेन यया च कदल्या मां पोषितवती, ताभ्यां मम रक्तं विषतया परिणतं समेधितम् । सत्यमेव वदसि—इतो मत्त स्तव भीतिः समुचितेव । इदानीमहं दष्टुं समर्थो भवामि ।

(विधुमुख्याः प्रवेशः)

विधुमुखी—किमेवं सतीश ! भीषणो दृश्यसे ? तव दर्शनेन मम भयमुत्पद्यते । किमेवं मां निरीक्षमाणो वर्तसे ? अपि नाम परिचिनोषि ? अहं तव माता भवामि !

सतीशः—मातः ! कथमहं त्वां मातेति वक्तुं प्रभवामि ? माता सती किमिति त्वं मां पितुः शासनाद् वञ्चितमकार्षीः ? किमिति मां कारागारादुन्मोचितवती ? किमिदं मातृष्वसुरगाराद्भीषण-तरं भवेत् ? यूयं सर्वशक्तिमतीं मातेति आह्वयत ! यदि सा युष्मादृशी माता भवति, तर्हि न तामहमभिनन्दामि, सा मां नरकं नयतु नाम ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शशधरः—अये सतीश ! किमेवं प्रलपसि ! संवृणु रसनाम् । आगच्छ, मम वहिर्गृहमागच्छ ।

षोड़शः परिच्छेदः

शशधरः—वत्स सतीश, प्रकृतिस्थो भव । त्वां प्रत्यन्तमन्याय्यमाचरितमिति किमहं न जानामि ? यदि तव मातृष्वसा आवेगवशात् किमपि वदति, तत् किं गणनीयं भवति ? पश्य, अत्र यः प्रमादः सञ्जातः, इदानीं यथाशक्ति तस्य प्रतीकारः क्रियते । तत्र त्वया निश्चिन्तेन स्थातव्यम् ।

सतीशः--मातृष्वस्रा रते ! न प्रतीकारस्य काऽपि सम्भावना वर्तते । मातृष्वस्रा साकं यादृशः सम्पर्कः समजनि, तेन तव गृहस्य अन्नं न मम गलादधः सरेत् । एतावत्पर्यन्तं तव गृहे यावान् व्ययः कृतः तं सर्वं यदि कपर्दिकावधि न परिशोधयिष्यामि, तर्हि मम मृत्यावपि नैव शान्तिर्भविष्यति । यदि कोऽपि प्रतीकारः, स तु मम हस्ते । कीदृशं वा प्रतीकारं त्वं कुर्याः ?

शशधरः--शृणु सतीश, आत्मानमुपसान्त्वय । तव यत्कर्तव्यं, तत् त्वं पश्चात्कुरु त्वां प्रति यदन्याय्यमस्माभिराचरितं,तस्य प्रायश्चित्तमस्माभिःस्वीकरणीयम् । अहं मम सम्पत्तेरेकदेशं तुभ्यं दातुमिच्छामि । त्वमेतत् नैव दानमित्यवधारय, तव एतत्प्राप्यमिति जानीहि । सर्वं मया प्रागेव स्थिरीकृतम् । शुक्रवासरे परश्वः पत्रारूढं करिष्यामि ।

सतीशः-(शशधरस्य पादपांशूनादाय) किमहं वक्तुं पारयेयम् । तव स्नेहं --

शशधरः--तिष्ठ तिष्ठ । नातः परं किञ्चित् । एतत्सर्वं स्नेहस्य ममताया अन्यस्य वा विलसितमिति नाहं चिन्तयामि । यत् करणीयं, तस्य व्यवस्था करणीयेति जानामि । सार्द्धा अष्टौ घटिकाः संजाताः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वमद्य 'करिन्थियाना' प्रेक्षागृहं गमिष्यामीत्यवोचः, गच्छ। अपरं किमपि वक्तव्यमास्ते। दानपत्रमिदं भादुड़ीमहोदयेनैव लेखितम्। तस्य चेष्टया अनुमितमेतेन दानव्यापारेण स सम्यधिकं सन्तुष्टः समजनि। त्वदर्थं तस्याकर्षणं नासीदिति न प्रत्येमि किं बहुना? आगमनसमये स मामपृच्छत् सतीशः किमित्येषु दिवसेष्वस्माकं गृहं नागच्छति।

(सतीशः प्रस्थितः)

अरे रामचरण, भट्टिनीं तावत्सकृदाकारय।

(सुकुमार्याः प्रवेशः)

सुकुमारी--किं निश्चितम्?

शशधरः--काऽपि विस्मयावहा योजना प्रस्तुता।

सुकुमारी--तव योजना अत्यन्तं विस्मयावहा भवतीति जानामि। यथा वा भवतु--अस्माकं गृहात् सतीशस्य विवासनं कृतं खलु?

शशधरः-अन्यथा केयं योजना नाम। एवं मया स्थिरीकृतम्--माणिक्यपुरं जनपदं तस्मै लिखित्वा दास्यामि, येन स स्वच्छन्दं तत्र स्थितः स्वकीयव्ययं करिष्यति, न पुनरस्मानुद्वेजयिष्यति।

सुकुमारी--अये अत्यन्तं समीचीना योजना कृता! अस्याः सौन्दर्येणाऽहं परं विमुग्धा भवामि। नहि नहि- न त्वमेतादृशमाघातिकार्यं कर्तुं शक्नोषि--अयं मे प्रथमः कल्पः।

शशधरः--सकृद् विचारय। एकदा सकलाऽपि सम्पत्तिस्तस्मै दित्सिता असीत्।

सुकुमारी--तदानीं न मम हरेन्द्रस्य जननमासीत्। अन्यदपि-किं त्वं भावयसि--तवापत्यान्तरं नैव भविष्यति।

शशधरः--प्रिये, सकृद् विचारय चिन्तय--द्वे अपि तव अपत्ये।

सुकुमारी--नाहं तथा चिन्तयितुं प्रभवामि। किं बहुना? यदि त्वं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सादृशं कार्यं करिष्यसि तर्हि अहमवश्यं गले रज्जुमाबध्य मरिष्यामि । अयं मे दृढः पण इति उक्त्वा गच्छामि ।

(द्रुतं प्रस्थिता)

(सतीशस्य प्रवेशः)

किं सतीश, प्रेक्षागृहं न गतोऽसि ?

सतीशः--मातृष्वसृपते ! नाहमद्य प्रेक्षागृहं गमिष्यामि । पश्यैतत्--दीर्घात् कालादनन्तरमहमद्य भाद्दुडिमहाभागस्य निमन्त्रणं प्राप्तवान् । तव दानपत्रस्य फलमेतत् । संसारस्योपरि मे विद्वेषो जातः मातृष्वसृपते, नाहं तव तज्जनपदं गृह्णीयाम् ।

शशधरः--सतीश, किमर्थम् ?

सतीशः--नाहं छद्मवेशेन पृथिव्याः किमपि सुखमुपभोक्तुमिच्छामि । यदि स्वस्य किमपि मूल्यं स्यात्, तेन च मूल्येन यावदुपलभ्येत, तावदेवोपभोक्ष्ये । ततोऽधिकां कपर्दिकामपि नेच्छामि । अपि च त्वं स्वसम्पत्तेरेकदेशं मह्यं दातुं कृतनिश्चयोऽसि, तदर्थं मातृष्वसुरनुमतिं गृहीतवानसि ?

शशधरः--न हि । सा तत्--यथा कथंचितत्समाधास्यते । हठात् सा नानुमन्येत परन्तु अन्ते--

सतीशः--किमेतत्तस्यै कथितपूर्वम् ?

शशधरः--किमुच्यते--तामनुक्त्वा किं किमपि--

सतीशः--किं सा सम्मता ?

शशधरः--सम्मतेति ययार्थतो वक्तुं न शक्यते । यदि सम्यग् बोधयामि--

सतीशः--वृथैव चेष्टितं भवेत् । मातृस्वसृपते, तस्याः सम्मत्यभावे नाहं तव सम्पत्तिं ग्रहीतुं स्पृहयामि । सकृदेषा निवेद्यताम्, अद्यावधि सा यदन्नं मामखादयत्, नाहं तदनुद्गीर्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीवामि । तस्या ऋणं कुशीदेन साद्धं शोधयित्वैव श्वासान् विसृजामि ।

शशधरः--तत्सर्वं किमपि नावश्यकम् । सतीश, वरमहं निभृते कानिचित् रुप्यकाणि--

सतीशः--न हि । नाहमृणं वर्धायितुमिच्छामि । त्वदन्तिके मम एकैवाऽभ्यर्थना वर्तते--कदाचित् त्वं तव साहेववन्धोः कार्यालये कार्यं कर्तुमामुक्तवान् तदिदं कार्यं मदर्थं सम्पादनीयम् ।

शशधरः--अपि नाम पारयेः कर्तुम् ?

सतीशः--यदि इतः परमपि न पारयेयं, तर्हि मातृष्वसुरन्नभोजनं मे शास्तिर्भवतु ।

सप्तदशः परिच्छेदः

सुकुमारी--पश्य तावत् इदानी सतीशः कथं परिश्रमं कृत्वा कार्यं निर्वहति । पश्य तादृशः पाश्चात्यपरिच्छदपरिधानव्यसनी साहेववावुः कथं प्राचीनं कृष्णवर्णं कञ्चुकं परिधाय तदुपरि उत्तरीयमावेष्टय नियमितः कार्यालय मुपतिष्ठते ।

शशधरः--महान् साहेवः अस्य वहुमुखीं प्रशंसां करोति ।

सुकुमारी--सकृदालोचय । यदि त्वमस्य तज्जनपदमदास्यः, तदैतावता कण्ठकेतनोष्णीषपादुकायष्टीनां क्रयेणैव ऋणग्रस्तं त्रिक्रीत-मभविष्यत् ! सौभाग्यवशान्मदीयं परामर्शं स्वीकृतवानसि । तेनेदानीं सतीशो मानुषो जातः ।

शशधरः--विधाता अस्मभ्यं वुद्धि नादात्, परंतु स्त्रियोऽदात् । वुद्धिं तु युष्मभ्यं व्यतरत्, तेन साकं निर्बोधान् स्वामिनः युष्माकं हस्तेषु समर्पितवान् । उभयथाऽपि अस्माकं विजयः ।

सुकुमारी--साधु साधु । माभूदतिप्रसङ्गः, तिष्ठतु परिहासः । सतीशस्य कृते अस्माभिर्यावद्धनं व्ययितं तदिदानीं यदि गच्छित-मभविष्यत्--

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शशधरः--सतीशो वदति--यदा कदा वा अवश्यं सर्वं परिशोधयिष्यामीति ।

सुकुमारी--स यावत् शोधयिष्यति,तत् सर्वं मम अङ्गे निलीयेत । स तु सततमेवं महान्ति वचांसि ब्रूते । त्वं मन्ये तयैव आशया मार्गं प्रतीक्षमाणस्तिष्ठसि ।

शशधरः--एतावत्पर्यन्तमाशा आसीत् । यदि त्वं परामृशसि--परित्यजामि ।

सुकुमारी--तथाचेत् न तत्र काऽपि क्षतिर्भवेदित्येतावद् वक्तुं शक्नोमि । अयं तव सतीशबाबुरागच्छति । कार्यलाभात्परं नैकं दिनमपि पदमाधात् । एतादृशी ह्यस्य कृतज्ञता ! एषा गच्छामि (प्रस्थातुमीहते)

सतीशः--मातृष्वसः, न पलायितव्यम् । पश्य मम हस्ते, नास्त्रशस्त्रं वर्तते. केवलं धनपत्राण्येव सन्ति ।

शशधरः--अये किमेतत् ! एतावन्ति धनपत्राणि ! यद्येतानि कार्यालयसम्बन्धीनि, तर्हि एतानि एवं प्रकाशं गृहीत्वा भ्रमणं तव नोचितं सतीश !

सतीशः--नेतः परं गृहीत्वा परिभ्रमामि । मातृष्वसुः पादयोरर्पयामि । मातृष्वसः! प्रणमामि। परमनुग्रहस्त्वया प्रदर्शितः । तदानीं तस्य लेखः करणीय इति नैव मनस्युदभूत् । अतएव परिशोधसंख्यायां कोऽपि प्रमाद आपतेत् । इमानि पञ्चदशसहस्राणि रूप्यकाणि गणयन्ती गृहाण । तव बालकस्य पलान्न परमान्नविधौ तण्डुलकणस्याप्यभावो मा भूत् !

शशधरः–किमेतद् विचेष्टितम् ! कुतस्त्वया एतावन्ति रूप्यकाणि लब्धानि ?

सतीशः--प्रायः षड्भ्यो मासेभ्यः चणकानि मया अग्रिममूल्मधारया क्रीतानि । एतन्मध्ये तेषां मूल्ये वृद्धिः समजनि । तस्यैतत्फलितम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शशधरः--सतीश सत्यमेतद् द्यूतं भवति।

सतीशः--द्यूतमेतावतैव अवसितम्, न पुनरावर्तनस्य आवश्यकता स्यात्।

शशधरः--सतीश, त्वदीयान्येतानि रूप्यकाणि त्वमेव गृहाण। नाहं गृह्णामि।

सतीशः--नाहमेतानि तुभ्यमदाम्, मातृष्वसृपते! एष मातृष्वसुः ऋणस्य परिशोधः। तव ऋणं तु न कदाचित् परिशोधयितुं शक्येत।

शशधरः--अयि प्रिये? किमेतानि रूप्यकाणि--

सुकुमारी--गणयित्वा कोषाध्यक्षाय समर्पय। अत्र पतिष्यन्ति?

शशधरः-किं भुक्त्वा आगतोऽसि?

सतीशः--गृहं गत्वा। आहारं करिष्यामि।

शशधरः-आः किमुच्यते। वेला अतीव अतीता। अद्य अत्रैव भोजनं कृत्वा गच्छ।

सतीशः--नात्राहारः सम्भवति मातृष्वसृपते! एकमृणं परिशोधितम् नापरमृणं कर्तुं प्रभवामि- (प्रस्थितः)

सुकुमारी--पितुर्हस्तात् परित्राय एतावत्पर्यन्तं भरणपोषणैः परिवर्ध्य मानुषः कृतः। अद्य हस्ते द्वित्राणि रूप्यकाणि आगतानीति अस्य एतादृशो भावः! किं दृष्टम्? इयमेव कृतज्ञता भवति। कलेः प्रभावो यदि न भवति, किमन्यत्।

अष्टादशः परिच्छेदः

सतीशः-प्रधानाधिकारी श्वः आयव्ययलेखादीनि निरीक्षिष्यते। मया आलोचितम्--एतन्मध्ये चणकविक्रयलाभोऽवश्यं मम करगतो भवेत्, लेखं च यथायथं पूरयेयम्। किन्तु हठात् आपणे मूल्यस्य ह्रासः संजातः। इदानीं कारावरणं विना नान्या

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गतिरस्ति। बाल्यादारभ्य तत्र गमनार्थमायोजनं क्रियमाण-मास्ते।

परन्तु अदृष्टमहं प्रतारयिष्यामि अस्यां नलिकायां द्वे गुलिके भरिते। तदेवालम्। नलिनि! नैतन्नाम नैतन्नाम इदानीमुच्चारणीयम्। तथा चेन्नाहं मरितुं प्रभवामि। तदाशां धूलिसात् कृत्वा आगतोऽस्मि। पत्रे सकलमपि विशदीकृत्य लिखितमास्ते। इदानीं मम भाग्ये यस्य प्रणयोऽपेक्ष्यते, सेयं मे प्रेयसी नलिका! अन्तिमा प्रेयसीयम्। ललाटे अस्याश्चुम्बनमाददान एव नेत्रे पिधास्यामि।

मातृष्वसृपतेरिदमुद्यानं मयैव निर्मितम्। यत्र ये नाम दुर्लभा द्रुमा अवर्तन्त,ते सर्वेऽपि संगृह्यात्र रोपिताः। आलोचितं तदिदमुद्यानमेकदा ममैव सम्पद्येत। कस्य कृते द्रुमा एते मया संरोपितास्तदिदं रहस्यं तदा मां नैव न्यवेदयत्। भवतु नाम। अस्यामेव वृक्षवाटिकायामटन्नेव वैदेशिकष्टिकानो नोटिशलताच्छादिते निकुञ्जे समास्य जगतः कार्यक्रमः समापनीयः। मृत्युना अहमुद्यानमिदं स्वाधीनं करिष्यामि। न कोऽप्यत्र विहारार्थमागन्तुं साहसीत।

मातृष्वसृपतेः प्रणामपुरःसरं चरण पांशूनां शिरसाऽऽदानं करणीयम्! तेषु गृहीतेषु मम मृत्युः सफलो भवेत्। परन्तु इदानीं सन्ध्या समयः। स खलु मातृष्वसुः सविधे वर्तेत नाह-मेतादृगवस्थः मातृष्वसारं द्रष्टुं साहसं करोमि। अपि चेयं नलिका गुलिकाभरिता वर्तते।

मरणवेलायां सर्वेऽपि क्षमणीयाः। शान्त्या मृत्योर्वरणं करणीयमिति शास्त्रोपदेशः। परन्तु नाहं सर्वान् क्षन्तुं प्रभवामि। नायं मे मृत्योः समयः। मम बहुविधाः सुखस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कल्पना: वहवश्च भोगलालसा अवर्तन्त – एषु स्वल्पेष्वेव वर्षेषु ताः सर्वा अपि एकैकशः विशकलिता गताः । मदपेक्षया समधिकमयोग्यानां निर्बोधानां च जनानां भागधेये बहून्ययाचितानि सुखानि मिलन्ति । मम तु सन्निहितान्यपि न मिलितानि तदर्थं ये तावत्प्रतिभुवः, तान् कथमपि क्षन्तुं न पारयामि, कथमपि न पारयामि । मम मृत्युकालीनः अभिशापो यथा यावज्जीवनं ताननुसरन् वर्तेतां, तेषां सकलान्यपि सुखानि ध्वंसयन्तु । तेषां तृष्णाजलं वाष्पतया परिणमयितुं मम दह्यमानस्य देहस्य सकलोऽपि ताप उत्सृज्यते ।

अये ! एते नाम प्रलापाः ! नियतं प्रलापा एव । अभिशापस्य न कापि शक्तिरस्ति । मम मृत्युर्मामेव शेषयेत्, नान्यस्य कस्याप्युपरि हस्तं दातुं प्रभवेत् । आः ! ते तावन्मम जीवनं साकल्येन विशकलितमकुर्वन्, अहं मृत्युं वरयन्न कमपि प्रतिशोधं कर्तुं पारितवान् । न तेषां काऽपि क्षतिः सम्भवेत् ते सुखेन स्थास्यन्ति, तेषां दन्तमज्जनादारभ्य मशारि स्पन्दन पर्यन्तं किमपि कार्यं नैव प्रतिहतं भविष्यति – अथ च मम सकलोऽपि सूर्यचन्द्रनक्षत्रालोकः फुत्कारेणैकेन विलयं यास्यति । अयि मम प्राणानां नलिनि ! अथवा नैतन्नाम उच्चारणीयम् ।

अरे कोऽयम् ? हरेन्द्रः ? सन्ध्यायामुपवनमागच्छति । पित्रोरज्ञातसारम् आरेवतशलाटुं विचेतुमापतति ! अस्य लालसा आरेवतशलाटुमन्तरा नोर्ध्वमारूढा ! अस्य वृक्षस्य आरेवताखादन एव समधिकं सुखं लभते ! पृथीव्यां कियदस्य जीवनस्य मूल्यम् । वृक्षस्यैकस्य शलाटुतोऽपेक्षया नवीनमप्यधिकं जीवनं नैव समधिकं भवति । यद्येतत् छिद्येत, तर्हि अयं जीवने कियद्भ्यो नैराश्येभ्यः परित्रातः क्रियेत

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्तुं न शक्यते । अपरतो मातृष्वसा तु जीवने अस्तव्यस्ता-स्थास्यति । आः !

अये समुचितः समयः । समुचितं स्थानम् ! ! समुचितोऽपि जनः । अये नाहं हस्तं बोधयितुं प्रभवामि ! किमेतेन हस्तेन प्रयोजनम् ? किमेतेन हस्तेन करणीयम् ?

दण्डकाष्ठमादाय सतीशस्तेन वृक्षान् क्रमेण आहन्तुं प्रवृत्तः । तेन तस्योत्तेजना क्रमशो वर्धितुमारभत ! अन्ते स्वहस्तं सवेगमाहन्ति स्म, न च कामपि वेदनामन्वभूत् । ततः कञ्चुकस्थगिकातो नलिकां संगृह्य हरेन्द्रस्याभिमुखं सत्वरं प्रस्थितः ।

हरेन्द्रः – (भीतभीतः) अये किमेतत् ! भ्राता वा ? भ्रातः, तव पादयोः पतामि, तव पादयोः पतामि—न मम पितरं ब्रूहि ।

सतीशः – (उच्चैः) मातृष्वसृपते ! मातृष्वसृपते इदानीं परित्रायस्व न विलम्बं कुरु, इदानीमेव स्वं पुत्रं परित्रायस्व ।

शशधरः–(सवेगमागत्य) किमभूत् सतीश, किमभूत् ?

सुकुमारी–(सवेगमागत्य) मिमभूत् ? वत्सस्य मे किमभूत् ?

हरेन्द्रः—न किमपि, न किमपि । भ्राता युवामुपहसति ।

सुकुमारी – किमर्थं विसदृश उपहासः । धिक् धिक् ? सकलमपि विपरीतम् ! पश्य तावत् – मम हृदयं धडधडायते । सतीश, मन्ये, मदाविष्टोऽसि ?

सतीशः पलायस्व, स्वकीयं पुत्रमादाय पलायस्व इदानीमेव । अन्यथा युष्माकं रक्षा नास्ति ।

(हरेन्द्रमादाय सुकुमारी द्रुतपदं प्रस्थिता)

शशधरः—सतीश, नैवमुद्भ्रान्तो भव, किमिदं व्यवसितम् ? कुतो वा हरेन्द्रो रक्षणीय इत्याहूतवानसि ?

सतीशः—मम हस्तात् (नलिकां प्रदर्श्य) इमां पश्य मतृष्वसृपते !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(द्रुतपदं विधुमुख्याः प्रवेशः)

विधुमुखी–सतीश, कुत्र कस्य सर्वनाशं कृत्वाऽऽगतोऽसि ब्रूहि । तव कार्यालयाध्यक्षो राजभटैः सह अस्माकं गृहं परिशोधयितुं समागतः । यदि पलायितुमिच्छसि इदानीमेव पलायस्व । हा भगवान् ! ममापि भाग्ये एतादृशं दुःखमापतति ।

सतीशः–न भेतव्यम् । पलायनस्योपायो ममैव हस्ते वर्तते ।

सतीशः–तथैव । यथा संशेषे, तत्तथैव । अहं चौर्यं कृत्वा मातृष्वसृ. ऋणं परिशोधितवान् । अहं चौरः । माता श्रुत्वा आनन्दिता भवेत्– अहं चौरः ! अहं घातुकः ! नातः परं रोदितव्यम् । अपसर अपसर, मम सम्मुखादपसर । नाहं सहे ।

शशधरः–सतीश, त्वं ममापि ऋणी भवसि । तत्परिशोध्य गच्छ ।

शशधरः–किं तर्हि त्वं—

सतीशः–ब्रूहि कथं कथं शोधयामि ? किमहं दातुं शक्नोमि ? किं वा त्वं कामयसे ?

शशधरः—तामिमां नलिकाम् ।

सतीशः-एष ददामि । अहं कारागारमेव गच्छामि, अन्यथा नैव मे पापस्य ऋणपरिशोधो भवेत् ।

शशधरः—सतीश, पापस्य ऋणपरिशोधो नैव दण्डेन भवति, कर्मणैव भवति । त्वं निश्चितमवधारय - मया अनुरुद्धस्तव प्रधानाधिकारीं न त्वं कारागारं प्रेरयिष्यति । इतः परं जीवनं सार्थकं कुर्वन् वर्तस्व ।

सतीशः—मातृष्वसृपते ! इदानीं मम जीवनं कियदस्ति न त्वं जानासि । अवश्यं मरिष्यामीति निश्चित्य मम जीवनस्यान्तिमं सुखसाधनं पदाघातेस धूलिसात्कृत्वा आगतोऽस्मि । कथमहमिदानीं जीवामि ?

शशधरः -तथापि जीवितव्यम् । अयमेव मे ऋणस्य परिशोधः । मां वञ्चयित्वा नैव पलायितुं शक्नोषि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सतीशः तर्हि तथैवास्तु ।

शशधरः—मम एकमनुरोधं शृणु । त्वं सर्वान्तःकरणेन प्रथमतो मातरं मातृष्वसारं च क्षमस्व ।

सतीशः—यदि त्वं मामपि क्षन्तुमर्हसि, तर्हि संसारे को वैतादृशो वर्तते, यमहं क्षन्तुं न पारयामि । (प्रणम्य) मातः आशिषं वितर, येनाहं सकलमपि सोढुं शक्नुयाम् । यथा यूयं मम सकलानपि दोषान् क्षन्त्वा मां गृहीतवन्तः, तथैवाहं सकलमपि सहेय ।

विधुमुखी—वत्स, किमन्यद् ब्रवीमि । माता भूत्वा अहं तव स्नेहमेवाकार्षम् । नतु किमपि हितम् । भगवान् तव मङ्गलं विदधातु । त्वदीया भूत्वा अहमार्यायाः सकाशे क्षमामर्थयितुं गच्छामि । (प्रस्थिता)

शशधरः- एहि वत्स सतीश, अद्य मम गृहे आहारं कृत्वा गमिष्यसि ।

(द्रुतपदं नलिन्याः प्रवेशः)

नलिनी - सतीश !

सतीशः - अये नलिनी !

नलिनी कोऽयमर्थः ? किमित्येतत्पत्रं मां लिखितवानसि ?

सतीशः -अर्थो यथा अवबुद्धः, तथैव । त्वां प्रतारयितुं न मया पत्रं लिखितम् । सर्वमपि मम भागधेये विसंष्ठुलं सम्पद्यते । त्वं भावयितुमर्हसि—तव दयायाः उज्जृम्भणार्थं मया लिखितमिति । परन्तु मातृष्वसृपतिः साक्षी तिष्ठति – नाहमभिनयं कुर्वन्नासम् । तथापि यदि न विश्वासः, प्रतिज्ञारक्षाया इदानीमपि समयोऽस्ति ।

नलिनी—किं त्वमुन्मत्त इव प्रलपसि । कोऽपराधस्ते मया विहितः, येन त्वमेवं निष्ठुरतया—

सतीशः—तदर्थं मम संकल्पं त्वं सम्यगेव जानासि । न मया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकमक्षरमपि निगूहितम् । सर्वमपि विशदीकृतम् । तथापि किं तव मयि श्रद्धा वर्तते ?

नलिनी–स्तब्धो भव ! तदर्थं त्वयि मम कोपो जायते । धिक् धिक् श्रद्धा ! श्रद्धां तु पृथव्य वहवः वहुषु कुर्वन्ति ! त्वं यत्कार्यं कृतवानसि, अहमपि तदेव कृतवत्यस्मि । न किमप्यन्तरमवशेषितम् । पश्य सर्वेऽपि मम अलङ्काराः समानीताः । न ते मम सम्पत्तयः, ते हि मम पित्रोः । तावनुक्त्वा आनयम् । कियदेतेषां मूल्यं भवेन्न जानामि । किमेतैस्तव उद्धारो न भवेत् ?

शशधरः– अवश्यमुद्धारो भवेत् । एतैरलङ्कारैः सह यदमूल्यं धनं वितरसि, तेनैवास्य उद्धारो भविता ।

नलिनी–अये शशधरमहोदयाः ! क्षन्तव्याऽस्मि संभ्रमपरवशा न तवाहम्—

शशधरः–मातः, किं तया लज्जया ? दृष्टिदोषो न केवलमस्मादृशां वृद्धानां सम्भवति । युष्माकं वयसि अस्मादृशः प्रवीणोऽपि लोको हठात् द्रष्टुं न पारयति । सतीश, पश्यामि-तव कार्यालयस्य प्रधानाधिकारी अयमागतः । अहमनेन साकमालापं कृत्वा परावर्ते । तावत् त्वं मदीयो भूत्वा अस्यातिथिविशेषस्य समुचितं सत्कारं विधेहि । मातः, इयं नलिकेदानीं तत्र समीपे स्थातुमर्हति ।

(प्रदाय प्रस्थितः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुभूतिशतकम्

लेखकः—श्रीजगन्नाथ रथः विद्याभूषणः काव्यतीर्थः यज्ञभूषणः

सृष्टिस्थितिविनाशानां निदानं शाश्वतं शिवम् ।
कार्य्यकारणकर्त्तृत्वस्वरूपं प्रणमाम्यहम् ।१।

आकीटनरदेहेषु स्वात्मानं यस्तु पश्यति ।
धन्योऽसौ सफलं जन्म तस्य मुक्तिरनर्गला ।२।

नरेषु नास्ति पार्थक्यं, समानाः सकलाः सदा ।
स्पृश्यास्पृश्यप्रभिन्नत्वं संस्कारात् परिदृश्यते ।३।

ज्ञानिनो मनुजा नित्यं पूज्यन्ते सकलैः सदा ।
न काचिदस्ति तत्रैव जातिधर्मविचारणा ।४।

अनुक्तां यो विजानाति परस्य हृदयव्यथाम् ।
प्रतिकुर्य्यात् यथाशक्ति स एव नरदेवता ।५।

धनं यस्य परार्थं स्यात् बलं यस्यान्यरक्षणे ।
तद्धनं तद्बलं सर्वं सफलत्वमवाप्नुयात् । ६ ।

धनदाने यथाऽऽनन्दः संचये न हि तादृशः
इति विज्ञाय सकलं त्यजन्ति ज्ञानिनो जनाः ।७।

उपकारकृतो हन्तुं चेष्टन्ते ये हि पामराः ।
भस्मासुरवदत्रैव नश्यन्ति स्वकरेण ते ।८।

सर्वेषां विषयासक्तिर्मनसो रोगकारणम्
अतः सा सर्वथा त्याज्या बुधेन शुभकामिना ।९।

पूज्यो दिगम्बरस्त्यागी योगी विपिनमाश्रितः ।
दीनानां धनिकानाञ्च यतो नास्ति ततो महान् ।१०।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुखस्थविद्यो न ज्ञानी ज्ञानिनो लक्षणं पृथक् ।
ज्ञानी त्यागी विश्वहितं साधयत्यनिशं महत् ।।११।

उपदेशसहस्रं तु वर्त्ततां पुस्तके मुखे ।
यदि नास्ति तदाचारस्तेन वा किं प्रयोजनम् ।१२।

धनानि जीवितं चैव जन्मभूमिहिताय ये ।
उत्सृजन्ति विनाऽऽशङ्कां ते देवा नात्र संशयः १३।

पितरौ प्राणिनां सत्यं जन्मजीवनकारणम् ।
तयोर्यत्नं विना कश्चिन्न जीवेन्न सुखी भवेत् ।१४।

प्राणपातं प्रचेष्टेत पुत्रस्य श्रेयसे पिता ।
येनासौ कीर्त्तिमान् शान्तो धर्मज्ञः शीलवान् भवेत् ।१५।

पुत्राभावे पिता दुःखी सति पुत्रेऽपि दुःखितः ।
तस्याभये कदाचारे मूर्खे ायं लयेऽपि च ।१६।

पितुः पूजा विधातव्या रामः साम्राज्यमुत्सृजन् ।
वनं गत्वाऽभवद्देवो यावच्चन्द्रदिवाकरौ ।१७।

पितुः सुखं सदा ध्येयं भीष्मस्त्यक्त्वा निजं सुखम् ।
संप्राप्तो विश्वपितृत्वं किमस्मादधिकं फलम् ।१८।

पुत्रो वचस्करो यस्य कुलधर्मानुगः सुधीः ।
भाग्यवान् स नरो लोके वधूः सेवापरायणाः ।१९।

अनुभूय महद्दुःखं प्रपूज्य बहुदेवताः ।
पुत्रार्थं यत्तपो माता करोति तस्य का तुला ।२०

अभुक्त्वाऽपि क्षुधार्त्ताऽपि माता भोजयते सुतम् ।
त्यागमेव दधं कर्त्तुं क ईशो मातरं विना ।२१।

शीतातपपरिक्लेशं सहते पुत्रवत्सला ।
Funding by IKS-MoE
सुखं शाययते पुत्रमसुप्ता सुखमश्नुते ।२२।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तुच्छोभवति पुत्रस्य मुखात् शारदचन्द्रमाः ।
पुत्राङ्गसुखसंस्पर्शात् हीयते मलयानिलः ।२३।

नास्ति मातृसमा देवी वरदा शुभदायिका ।
तव पूजाप्रवणः किं वा न लभेत महीतले २४।

वृद्धा माता देवतापि वधूं यदि न सेवते,
युगेऽस्मिन् संपरित्यक्ता सदा मृत्युमपेक्षते ।२५।

न काष्ठे न च पाषाणे विग्रहे धातुनिर्मिते ।
विद्यते न च कुत्रापि देवत्वं मातरं ध्रुवम् ।२६।

मातरं पितरं त्यक्त्वा यो वै नित्यं स्त्रियां रतः ।
महादुःखमयी तस्य कुमतेर्भवितव्यता ।२७।

तावत् पुत्राः वशं यान्ति यावन्नोपार्जनक्षमाः ।
प्रायशोऽर्जनदक्षैस्तु त्यज्यते जन्मदः पिता । २८ ।

यः पुत्रो वार्द्धके पित्रोः कदापि न सहायकः ।
तेन पुत्रेण पुत्रित्वं सर्वथा निष्फलं भवेत् ।२९।

सुयोग्येन सुपुत्रेण निजस्य भूतिमिच्छता ।
आदौ सेवा प्रकर्त्तव्या पित्रोर्भक्त्याऽतियत्नतः ।३०।

पितरि मातरि यस्य श्रद्धा भक्तिर्न जायते ।
दुःखक्लेशसमाकीर्णा तस्य हि भवितव्यता ।३१।

उपार्जनपरो यदि व्यसनमोहवद्धादरो
जरामरणवासरे निरवलम्बपित्रोर्हितम् ।
न साधयति तत्कथां स्मरति नैव काले कदा
भवेन्निरयगाम्यसौ जननमस्य वाढं वृथा ।३२।

सहोदरेण ज्येष्ठेन लालितः पालितोऽनुजः ।
न जाने नरकायासौ शत्रुभावं कथं चरेत् ।३३।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्येष्ठो भ्राता पितुस्तुल्यः कनिष्ठो वाधते कथम् ।
मन्ये स्वहस्तखड्गेन च्छिनत्ति निजमस्तकम् ।३४।

वह्वाशिनी प्रगल्भा च लज्जाहोना कुटुम्बिनी ।
वर्त्तते यस्य संसारे तत्समो नास्ति दुर्भगः ।३५।

अवला यत्र प्रवला गुरवोऽनुचरा इव ।
नास्ति तत्र सुखं किञ्चित् भवेद् वै जीवनं वृथा ।३६।

पुंवत् प्रगल्भा या नारी चारित्त्ये गणिका इव ।
भोजने राक्षसीतुल्या सा नारी कुलनाशिनी ।३७।

या नारी पुरुषायिता पररता चात्मीयविद्वेषिणी
धर्माधर्मविचारहीनहृदया चौर्य्येषु सिद्धोद्यमा ।
नित्यं स्वोदरपूरणं प्रकुरुते भक्ष्यैरभक्ष्यैर्मुहुः
नष्टा सा चिररोगशोकपिहिता दुःखेन संदह्यते! ।३८।

येन पण्यीकृता भार्य्या सम्भ्रान्तसम्भ्रमेच्छया ।
धिगस्तु तं कुलाङ्गारं तस्याकृत्यं किमस्त्यहो ।३९।

वेशभूषणसम्पन्नो विद्याहीनः कदापि किम् ?
लभते विदुषां पूजां कुर्वन्नपि वहूद्यमान् ।४०।

गुरुद्रोही कृतघ्नश्च यस्तु विश्वासघातकः ।
चिरं स नरकं घोरं याति नास्त्यत्र संशयः ।४१।

स्वार्थं साधयितुं यस्तु साधुवत् मधु भाषते ।
व्याघ्ररूपिखरस्येव तस्य रूपं न लीयते ।४२।

विश्वासमुल्लंघ्य प्रभुं प्रताय्यं ये वित्तराशिं समुपाहरन्ति ।
कुलक्षयं ते नरकाधिवासं स्वकर्मणा नूनमुपार्जयन्ति ।४३।

वुद्धिर्यस्य सदा परस्वहरणे संयोजिता यत्नतः
विद्या यस्य मदान्धमूढमनसो नित्यं परद्वेषिणी ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

धर्माधर्मविचारणा नहि कदा स्वप्नेऽपि चासादिता
नूनं तेन स्ववंशवासभवने धुस्तूरकं रोपितम् ।४४।

मायामोहमदान्धमूढमनसो मत्वा क्षरं शाश्वतः
स्वात्मानं परिपीडयन्ति सकलान् भोगस्पृहा किंकराः ।
संजाते चरमे त एव सततं सन्तापसंपीडिताः
प्राणान्ते सुचिरं वसन्ति नरके घोरे महारौरवे ।४५।

दुष्कुलप्रसवानां च विदुषामपि सज्जनैः ।
संपर्कः सर्वथा त्याज्यो जघन्यव्यवहारतः ।४६।

मूर्खस्य हीनस्य च दीनपुत्रः परप्रसादाद् यदि पण्डितः स्यात् ।
स्फीतो ह्यहंकारमदेन सम्यक् पूज्यान् पराभूय लभेत मन्युम् ।४७

योऽधीतेऽर्थकरीं विद्यां केवलं स्वोदराय वै ।
पशुजन्मवदत्रैव तस्य जन्म निरर्थकम् ।४८।

यो मूढ इन्द्रियग्रामसुखलीप्सानुसेवकः ।
हिताहित विमूढात्मा स नरो नरकं व्रजेत् ।४९।

कामं नाम महाशत्रुं सेवते योह्यहर्निशम् ।
तं परित्यज्य गच्छन्ति धीह्रीश्रीकान्तिकीर्त्तयः ।५०।

अज्ञानतिमिराच्छन्नो न शृणोति हितं वचः ।
आत्मानं पातयत्येव दुःखाग्नौ शलभा यथा ।५१।

गुरोर्वचनमुल्लंघ्य न कश्चित् सुखमश्नुते ।
अनुतापानलेनैव दह्यते जीवितावधि ।५२।

पामरस्य मुखे विद्या पामरस्य करे धनम् ।
साधूनां निग्रहार्थाय निजस्य पतनाय वै ।५३।

उपदेशस्थलं साधूमूर्खस्तु कोपकारणम् ।
तस्मान्मुर्खो नोपदेश्यो विज्ञेन शुभबुद्धिना ।५४।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वैराचारं चरेद्यस्तु न शृणोति हितं वचः ।
तत्र मौनं प्रकर्त्तव्यमुपदेशस्तु निष्फलः ।५५।

भोगाद् रोगः प्रभवति रोगस्तु मृत्युकारणं ।
तस्माद्भोगो न कर्त्तव्यो विज्ञेन भूतिमिच्छता ।५६।

कुलाचारवता लोके कुलं याति समुन्नतिम् ।
कुलाचारविहीनेन भवेदेव कुलक्षयः ५७।

पितरौ संपरित्यज्य कामी नारीमुपासते ।
गते यौवनसम्भारे ह्यनुतापेन दह्यते ।५८।

वाल्यादतीव यत्नेन पालितः पाठितो युवा ।
व्रजेत् स नरकं घोरं गुरून्नापेक्षते यदि ।५९।

कामार्त्तः कपटी क्रूरः कुष्ठी च कटुभाषकः ।
एते पञ्च ककारद्यास्त्यक्तव्या विदुषा सदा ६०।

अगाधविद्यासम्पन्नो विनयालंकृतो भवेत् ।
स्वल्पपाठी ह्यहंकारात् लोकेऽस्मिन् कुत्सितो भवेत् ।६१।

स्वल्पमायुर्मनुष्याणां कालस्य त्वरिता गतिः ।
आलस्यैस विलासेन मुहूर्त्तमपि न क्षिपेत् ।६२।

प्रतार्य्य लोकान् यद्वित्तं सञ्चितं पापवुद्धिना ।
नृपचौराग्नियोगेन तद्धनं निष्फलं भवेत् ।६३

वाल्यान् मतिं यो गुरवे विधत्ते तस्योपदेशेन करोति कर्म ।
तज्जन्म धन्यं तपसा च तेन लोक द्वये शान्तिमुपैति नूनम् ६४

साधु कर्मणि सतामसाधुभिः विघ्नराशिरनिशं निपात्यते ।
वाढमत्र विषये निरङ्कुशाः साधवो हि भगवान् सहायकः ।६५

अवश्यमेव भोक्तव्यं सदसत् कर्मणः फलम् ।
तत् कोऽपि नान्यथाकर्त्तुं समर्थः स्यादितिध्रुवम् ।६६।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुभूतिवशाद् वृद्धो मूर्खोऽपि ज्ञानवान् भवेत् ।
अतस्तस्योपदेशस्तु ग्रहणीयो बुधैरपि ।६७।

कुलोच्छेदकरी बुद्धिर्जायते मूढचेतसाम्
परस्वहरणे सा तु योज्यते पापबुद्धिभिः ।६८।

रोगप्रभावात् क्षीणः सन् लोको हि म्रियते स्वयम् ।
कपटाचारयोगात्तु कुलोच्छेदो भवेद्ध्रुवम् ।६९।

सत्वरं वृद्धिमाप्नोति पापेन सञ्चितं धनम् ।
अचिरेणैव कालेन समूलं तद् विनश्यति ७०।

युवकस्य युवत्याश्च संयोगं नैव कारयेत् ।
कृते संजायते तत्र परिणामो भयावहः ।७१।

असम्यग् व्ययशीलस्य परिणामो भयावहः ।
वार्द्धक्ये दुर्बलो भूत्वा भिक्षान्नमवलम्बते ।७२।

विद्याफलं ज्ञानधनं तया तल् लभते जनः ।
तदभावे न सा विद्या को लाभो विद्यया तया ? ७३।

वर्त्ततां विषये बुद्धिर्वर्त्ततां भूरिदातृता ।
अहंकारविषेणैव तत्सर्वं विफलं भवेत् ७४।

दुर्बलोऽपि दरिद्रोऽपि कुलीनः शीलवान् जनः ।
पूज्यते स तु सर्वत्र संस्कृतिस्तत्र कारणम ! ७५।

अपकारकृतो लोका उपकारबलेन ते ।
वशमेष्यन्ति सर्वत्र पोषिताः कुक्कुराइव ७६।

किं मन्यसे वृथात्मानं सर्वेषां सुमहत्तमम् ।
महान्तः कति वर्त्तन्ते त्वं तत्र कीटवद्ध्रुवम् ७७।

आचारप्रभवा भक्तिर्भक्त्यधीनो हरिः सदा ।
प्राणान्तेऽपि सदाचारो न त्याज्यो भूतिमिच्छता ७८।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अद्यापि रावणादीनामन्वयो वर्त्तते भुवि ।
नराकारसुरेभ्यस्ते द्विषन्ति नष्टबुद्धयः ।७९।

जगतां हितमुद्दिश्य यत्कर्म कुरुते जनः ।
अहंकारेण स्वार्थेन समूलं तद् विनश्यति ।८०।

संकल्पः सुदृढो यस्य मनस्तद्भावभावितम् ।
तत्साधनपरं कर्म तस्य सिद्धिरनर्गला ।८१।

हरौ यस्य दृढा भक्तिर्जगद् यस्य कुटुम्बकम् ।
तस्यैव सफलं जन्म लोकेस्मिन्नमरश्चिरम् ।८२।

मोहाभिभूतचित्तस्य वित्तं प्राणाधिकं भवेत् ।
प्रयाणे सर्वमुत्सृज्य गच्छामीति न मन्यते ।८३।

बुद्धिप्रतिभयोर्मध्ये प्रतिभा तु गरीयसी ।
प्रतिभाशालिनं को वा पुमांसं नानुगच्छति ? ।८४।

निर्धनो निःसहायस्य परैर्दासीकृतो भवेत् ।
सहस्रदोषदुष्टोऽपि धनवान् सज्जनायते ।८५।

सम्भ्रान्तोऽपि कुलीनोऽपि विद्यावित्तान्वितोऽपि च ।
सुरापानवशादेव श्रियं हित्वा विनश्यति ।८६।

सूर्यस्य ह्युदयात्पूर्वं नित्यं धीरसमीरणे—
भ्रमणं सर्वथा पथ्यं कायस्य मनसोऽपि च ।८७।

प्रातरुत्थानमात्रेण कुर्य्याद् यो हरिकीर्त्तनम् ।
आपदस्तस्य नश्यन्ति सुखाय तद्दिनं भवेत् ।८८
मिताहारी मिताचारी मितभाषी मितव्ययी ।
दुःखशोकविहीनोऽसौ दीर्घजीवी भवेद्ध्रुवम् ।८

प्रतिक्षणं कृतं कर्म परिणामे महत्तमम् ।
स्वल्पसञ्चययोगेन भवेद् वै विपुलं धनम् ।९०।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेजस्विनो हि पुरुषाः पुरुषास्त एव
स्वातन्त्र्यसाधनविधावचलप्रतिष्ठाः।
प्राणात्ययेऽप्यनुनयन्ति न पारतन्त्र्यं
दैन्येऽपि तेन सुरलोकसुखं लभन्ते ।९१।

विषयाननुधावन्ति मायोपहतचेतसा।
अनुतापेन दह्यन्ते मृगतृष्णां तृषार्त्तवत् ।९२।

यो वदेन्मे महाभावस्तस्य स्रष्टा स एव हि।
भोगस्पृहाविहीनस्य कदाऽभावो न जायते ९३

उपायं परिशोधस्य विचिन्त्यादौ सुबुद्धयः।
ऋणं कुर्वन्ति सर्वत्र नोचेन्नश्यति गौरवम् ।९४।

शैशवे ताडनं कार्य्यं शिशूनां पालनं यथा।
नोचेत्ते ताडनाभावात् यावज्जीवं कदर्थिताः ।९५।

सृजन्ति निज दुःखानि विलासव्यसनातुराः।
भोगस्पृहातियत्नेन परित्याज्या बुधैः सदा ९६।

अङ्गीकरोषि यत् कर्त्तुं तत् कर्म परिसाधय।
व्यावहारिकसंसारे नोचेन्नास्ति तवादरः ।९७।

रूपश्रियो धनैर्द्रव्यै रधिकारबलेन वा।
कश्चित् भक्तिमनाश्रित्य न लभेत हरेः पदम् ९८।

धन दार सुतान् बन्धून् कथमिच्छन्ति मानवाः।
प्रयाणकाले न कश्चित् सहायः सहगो भवेत् ।९९।

अभ्यासस़ाध्यं सकलं नास्त्यसाध्यं महीतले ।
अतः साधूनि कर्माणि यत्नेन कुरुते बुधः ।१००।

आयुरारोग्यमैश्वर्य्यं प्राप्नुयुः सकला जनाः।
पश्यन्तु भ्रातृवत् सर्वान् मा कश्चिद् दुखमाप्नुयात् १०१।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ॐ

यज्ञेषु हिंसानिवारणम्.

लेखकः– श्रीविश्वनाथ सोमशर्मा साहित्यविद्याप्रवीणः

गौतम बुद्धः प्राणिनां दुःखोपशमनचिकीर्षया कस्मिंश्चिद्गिरिवरे तपः कुर्वन्नासीत्। अत्रांतरे कदाचित्तस्मिन्गिरौ शिलाहतया कुण्ठितपादं शनैश्शनैरतीवश्रमेणातिकष्टेन गच्छन्तं कण्ठगतप्राणं मेषशिशुमेकमपश्यत्। तद्दृष्ट्वा सानुकम्पेन मनसा चिन्तितवान्। अहो मेषशिशुरयं शिलाहतया कुण्ठितपादः कण्ठगतप्राणः! अतीव श्रमेण शनैश्शनैर्गच्छति। एतद्विवशस्य जन्तोः प्राणरक्षणं सर्वथा मुनीनां बाधानिवारणादपि श्रेयः इति विचिन्त्य तत्समीपं गत्वा तं स्कन्धे आरोप्य प्रतिनिवृत्य प्रत्यागच्छत्। मध्याह्न समय एव अजानवींश्च गृहं प्रतिनिवर्तयतः गोपान् दृष्ट्वा एवमवादीत्। भोः किमर्थमद्य मध्याह्न एव मेषादीन् गृहं प्रति निवर्तयत। प्रायः सर्वदा सर्वे गोपाः सन्ध्यासमये निवर्तयन्त्येतान्, इति। तदा गोपा एवमूचुः अद्यास्मत्प्रभुः बिम्बिसार महाराजः महान्तं यज्ञं करोति। तस्मिन्यज्ञे शतं छागाः-शतमवयश्च देवताभ्यः हूयन्ते। तदाज्ञां प्रतिकूलयितुं देवानामपि न शक्यं, किमुतास्मद्विधानामित्यन्यत्प्रतिवचनं किमप्यदत्वैव गच्छतः गोपान्दृष्ट्वा क्षणन्तिष्ठन्, अहमप्यागच्छामीत्युक्त्वा तेन मेषशिशुना सह तेषां पृष्ठतो गच्छन् सायं समये नगरराजमार्गेण नगरमाजगाम। तदानीं राजमार्गेण गच्छन्तौ तौ तदेकदृष्ट्याऽपश्यन् वैश्याः कुलीनाः। एकः द्रव्यजातं गणयन् संख्यां विस्मृतवान्। पौरनार्यः राजमार्गेणागच्छन्तमेनं विशाले अक्षिणी, दीर्घौ बाहू, समुन्नतमंसयुगयम्, पञ्चशिलीमुखाकृतिरेष महान् जगत्सर्वमपि परिपालयितुं समर्थ इव दृश्यते, किमर्थमस्य महात्मनः मेषाणां पृष्टतआगमनमित्यर्थनिमीलित-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृशाएनमाश्रयन् । अत्रान्तरे केचन बलिदाननिवारायमाणमानसस्य बिम्बिसारस्य समीपं गत्वा राजन् अस्मिन् यज्ञे भवता आलभ्यमान-मेषगणैस्सह कश्चिद्यतींद्र आगच्छति । तं पश्येत्यब्रुवन् ।

तदानीमेकः ऋत्विक् दीर्घश्रृङ्गमेकं पशुं मुलपरज्ज्वा यूपे बध्वा एतदर्थामृचमेवमपठत्, यथा, भो देवताः, महाराजसम्बधिन्यस्मिन् यज्ञे प्रधान एष पशुः, अस्य रक्तमांसे अस्मिन्नग्निकुण्डे हूयेते । तस्य गन्धमाघ्राय यूयं तृप्यत । भो वीतिहोत्र, अस्य महाराजस्य पापानि सर्वाण्यस्मिन् पशौ निक्षिप्तानि, तैस्सहैनं पशुं नाशयेति । एवं वदन् यावत्तं हन्तुमुद्युक्त आसीत्तावददतित्वरितं तस्य समीपं गत्वा तं बन्धनान्मोचयित्वा दूरमुत्सार्य आश्चर्येणः पश्यत ऋत्विजः पश्यन मृदुमधुरया वाचा एवमवादीत् ।

परेषां प्राणहरणं सर्वेषां सुकरं नृणाम्
प्राणदानं तु सर्वेषामस्माकं दुर्लभं सदा ।

ये भूतदयावन्तः सदा देवान् तर्पयन्ति, तएव भूतानां देवाः, येषां भूतदया नास्ति तेषु देवानामपि करुणा न भवति । भूलोकवासिनः प्राणिनस्सर्वेऽपि परस्परं संबन्धवन्तः, अपि च अतीवनिष्करुणैरस्माभि-रद्यालभ्यमाना मेषादयः मधुरक्षीरदानपूर्वकं अस्मास्वतीव विश्वा-समापन्नाः, अन्यच्च मानवानां मानवत्वं, मृगपक्षिणां मृगपक्षिरूप-त्वं चानियतम्, यतः मानवो मृतः पुनर्मानवतामेव प्राप्नोति एवं मृग-पक्षिणोऽपि मृतास्सन्तः पुनर्मृगपक्षिरूपतामेव प्राप्नुवंतीति नास्ति नियमः । मानवः मृतः स्वकर्मानुसारेण मृगपक्षिरूपतामेति । एवं मृग पक्षिणोऽपि स्वीयसुकृतलेशेन मानवतां यांति । अपिच मृगमांसरूपो-त्कोचदानेन देवताह्लादजननं दुष्टानां व्यापार एषः, एतादृशव्यापा-रेण देवतानां तृप्तिर्न कदापि भविष्यति । अपि च देही मनोवाक्काय-कर्मभिः भद्रं करोति चेद्भद्रम्, अभद्रं करोति चेदभद्रं च फलं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राप्नोति नान्यत्, भद्रादभद्रं, अभद्राद्भद्रं वा, अपि च, अन्यकृतं कर्म अन्यस्मिन्नारोपयितुं न केनापि शक्यते कदाचिदपि । भूतदयां सौहृदं संम्मानं निपुणतादिकं विना भूतेषु हिंसादिदुष्कर्म कुन्नरः भाविजन्मांतरे स्वकृतहिंसादिफलमवश्यमनुभवतीति श्रुतिभिः कथ्यते, इति गौतमबुद्धोक्तं श्रुत्वा ऋत्विजस्सर्वे व्रीडया अवाङ्मुखा अभवन् । बिंबिसारोऽपि साष्टाङ्गं प्रणामं कृत्वा मुकुलितकरकमलस्तत्रातिष्टत् । तदा राजाभिमुखो भूत्वा सर्वानुद्दिश्यैवमवोचत् । सर्वैः प्राणिभिः परस्पर मैत्र्या वर्तितव्यं, मांसभक्षणं वर्जनीयं, तपनीयवर्गैः व्रीह्यादिभिः, पक्वैः भूमौ पतितैः फलैः, स्वच्छाभिरद्भिः, शाकादिभिश्च क्षुन्निवारणीया, एवंविधाचरणेन लोकःसमीचीनो भविष्यतीति बोधयतः बुद्धस्य वाक्य श्रवणात् सर्वेषां मनसि भूतदया समुत्पन्न ऋत्विजः होमसाधनानि दूरतः प्रक्षिप्य अग्न्यगाराणि प्रशांतानि कृत्वा यथागतं स्वगृहान् जग्मुः । महाराजोऽपि तद्वाक्यश्रवणादतीवसन्तुष्टहृदयस्सन्, "जीवहिंसा न कार्या, मांसभक्षणं वर्जनीयं, भूतदया प्रधानेति स्वदेशे सर्वत्र घोषणां दापयित्वा शिलाफलकेषु लेखयित्वा स्वीयदेशे सर्वत्र जीवहिंसानिवारणाय अधिकारिणः नियोजयामास-तदा प्रभृति देशे सर्वत्र जीवहिंसाप्रचारः शशविषाणप्रायो बभूव । सर्वे मृग पक्षिणः निर्भयं संचरन्ति स्म ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धेयाज्जयं शास्त्रिणाम्

लेखक:—श्री रामकृष्ण मिश्र: न्यायाचार्यः

यागादौ खिलदेवपूजनविधौ यस्यार्च्चनं चाग्रतः –
स्तप्तस्वर्ण्णं सुकान्तिभास्वरतनुः यः कामदः सिद्धिदः ।
दन्ताघातविदारितारिहृदयो दैत्यान्तकः स प्रभु –
र्हत्वा शत्रुकुलं विधाय कुशलं धेयाज्जयं शास्त्रिणम् ।१।

यत्पादाब्जयुगं स्मरन्ति मुनयो मोक्षार्थिनः सन्ततं
यस्योद्दाम पराक्रम प्रमुदितै र्देवैर्जिताः दानवाः ।
शिष्टान् पालयितुं निहन्तुमितरान् जातः क्षितौ यो विभु-
र्हत्वा सोऽरि कुलं बिधाय कुशलं धेयाज्जयं शास्त्रिणाम् ।२।

भूतिं मोहकरीं विहाय सततं भूत्यङ्गरागे रतः,
त्रातुं स्थावरजङ्गमं जलधिजं घोरं विषं यः पपौ ।
दुर्दान्तं त्रिपुरासुरं च हतवान् त्रैलोक्यभीतिप्रदं
हत्वा सोऽरिकुलं विधाय कुशलं धेया ज्जयं शास्त्रिणाम् ।३।

दुर्गा दुर्गतिनाशिनी भगवती स्वर्गापवर्गप्रदा,
दुर्द्धर्षासुरमर्दिनी त्रिभुवनत्राणप्रदानेश्वरो ।
देवक्रोधसमुद्भवा गुणमयी तेजोमयी रूपिणी,
हत्वा साऽरिकुलं विघाय कुशलं धे ा ज्जयं शास्त्रिणाम् ।४।

यस्यालोकमवाप्य जीवनिवहाः स्वाभीष्टमार्गाश्रिताः ।
यश्चाहुर्मुनयस्तथा च विवुधाः सृष्ट्यादि हेतु त्रयम् ।
यस्योत्तापवलेल वर्षति घनो याति क्षयं शर्वरी
हत्वा सोऽरिकुलं विधाय कुशलं धेयाज्जयं शास्त्रिणाम् ।५।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आरुणेः स्वप्नविलसितम्

(एकाङ्किका)

लेखकः—श्री श्रद्धाकर सूपकारः M P.

(वैदिक युगस्य अन्तिमः कालः। अयोदस्य धौम्यमहर्षेराश्रमस्य एको भागः। पर्णकुटीरस्य मध्यभागे कश्चन अजातश्मश्रुर्मुनि-कुमारः खट्वायां शयानो वर्तते। तस्य सर्वाण्यङ्गानि कम्बला-वृतानि। तदा तदा मुखादस्फुटस्य शब्दस्य प्रकाशनम्। पार्श्वयेः समवयस्कावपरौ मुनिकुमारौ दण्डायमानौ स्तः। शुक्लकेशस्य शुक्लश्मश्रोश्च कुतपत धौम्यस्य प्रवेशः। हस्ते मृण्मये पात्रे किमप्यौषधं धारयन् आस्त। सर्वेऽपि गौरव वस्त्र-परिहिताः)

मुनिः—(रुग्णस्य मुनिकुमारस्य नाटिकां परामृश्य) आरुणे प्रियवत्स आरुणे! अये नाटिका तावदश्वस्य प्लुतमिव प्रखरा। अङ्गेषु धान्यमयचः सन्तारः। उपमन्यो, किमेतावता आरुणेश्चेतना नोपगता?

उपमन्युः गुरुपादाः, नोपगताः। आरुणिः सर्वात्मना निष्पन्दः, केवलं तदा तदा किमप्यव्यक्तं भाषते। गुरुपादाः, आरुणिस्तत्र भवतामादेशेन केदारं बद्धुं गतः। नास्माकं साहाय्यमपैक्षत, नापि बहुकालं यावत् मृत्तिकाखण्डं क्षेप्तुं प्रायतत, परन्तु विजयमभिलषन् स्वयं प्रातरारभ्य सायंपर्यन्तं शयानो गर्त्त-पूरणमकरोत्। तेन दिनद्वयावधि एवं चेतनाशून्यः शेते।

मुनिः—उपमन्यो, नायं तस्य विजयाभिलाषः, परन्तु गुरुभक्तेः परा काष्ठा। गुरोरादेशं प्रतिवर्णं पालयन् आरुणिरक्षय्यं यशो मम च हार्दमाशीर्वादमलभत। तस्य विद्याः सफला भविष्यन्ति। सोऽयं सार्थकं ममाशीर्वादमलभत।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपमन्युः—अथ—यदि सन्निपातेन शमनसदनस्यातिथिर्भवति ?

मुनिः—नहि नहि। स खलु ममाशिषा अतिजीवी भविष्यति। शमनोऽस्य केशाग्रमपि स्प्रष्टुं न प्रभवति। सञ्जीवनीमन्त्रपूतमिमं दशमूलकषायं प्रतियामं सकृत् पाययस्व। अपिच तव शरीरस्य स्थूलता मे चिन्तनीया भवति उपमन्यो! तस्मात् अर्धरात्रिं यावत् तमेनं शुश्रूषमाण उन्निद्रस्तिष्ठ। वत्स वेद, त्वमपि आसायमेनं शुश्रूषस्व।

वेदः—यथा आदिशन्ति गुरुपादाः।

मुनिः—उपमन्युरत्यन्तं भोजनप्रियः। तस्य पीवरत्वोपशान्तये आहारस्य नियमनमावश्यकम्। जिह्वालालसया स यथा आरुणेः पथ्यं न गिलति, तत्र त्वया सावधानेन भाव्यम्।

वेदः—यथा आदिशन्ति गुरुपादाः।

मुनिः—अपि च यदि आरुणेः स्वास्थ्ये कोऽपि विपर्यय उदेति, तर्हि मामावेदय। साधयामि, सन्ध्योपासना आसन्ना। नासत्यावस्य मङ्गलं विदधाताम्! (प्रस्थितः)

उपमन्युः—(गुरोः प्रस्थानमार्गमवलोकयन् विद्रूपस्वरेण वेदस्य स्वरमनुकुर्वन्) 'यथा आदिशन्ति गुरुपादाः' सर्वत्र "यथा आदिशन्ति गुरुपादाः"। इयमेवातिभक्तिरित्युच्यते चौरस्य लक्षणम्। हतभाग्य आरुणिर्गुरोरादेशेन कर्तव्यं पालयन् पैतृकान् प्राणान् हातुं सन्नद्धो वर्तते। अहं च गुरोरादेशेन विजन उपवासी। उदरे शतस्य मूषिकानां धावनस्य प्रतियोगिता प्रचलति। अयं च गण्डस्योपरि विस्फोटो यत् त्वं मम प्रहरी। वेद, निपुणमवधारय। क्षुत्पिपासाभ्यां नितरामभिभूतोऽस्मि। रोगिणः शुश्रूषितुं नास्ति मे शक्तिः। नात्र किमपि भोज्यान्तरं वर्तते। अनेनैव दशमूलपानेन आत्मानं [illegible]यामि!

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेदः—भ्रातरुपमन्यो, वातस्य प्रकोपेण वातुलस्त्वं दशमूलकषायं पिपाससि ? कषायोऽयं पित्तस्य उपशमकः । अनेन पीतेन स्वास्थ्यहानेराशङ्का भवति ।

उपमन्युः—(क्रुद्धः) स्वास्थ्यहानिः ! तावता किं ते हीयते ? वरमस्माकं गुरुपादा मम शरीरस्य कृशत्वं दृष्ट्वा आप्यायिता भविष्यन्ति ।

(औषधपात्रमादाय पातुमीहते)

वेदः—(पात्रमाच्छेत्तुं व्यवस्यन्) अस्तु, अस्तु, तिष्ठ तिष्ठ किं कर्तुं व्यवस्यति क्षणमवधारय । यद्यहमेतं विषयं गुरुपादेभ्यो निवेदयेयम्—

उपमन्युः—(उच्चैः) गच्छ, निवेदय । न मे धृतिः सम्भवति ।

वेदः—अये उपमन्युरसि ! मन्युश्चेत्सार्थकमभविष्यत् ते अभिधानम् साक्षात् क्रोधस्यावतारोऽसि !

उपमन्युः—(केवलं कवलद्वयमौषधं पीत्वा मुखं विकृत्य) अये नायं पातुं शक्यते ! थु: थुः कियान् तिक्तोऽयं कषायः !

वेदः किं कषायेण पीतेन पिपासा निवर्तयितुं शक्यते ?

उपमन्युः—तर्हि कोऽभ्युपायः ? आश्रमेऽस्मिन् क्षुधा मृत्युर्वरणीयो भवेत् ! सखे वेद ! आश्रमेऽस्मिन् अस्य गुरोरन्तेवासी सन् नाहं स्थातुं प्रभवामि । आगच्छ, आवां स्वगृहं प्रत्यावर्तावहे । अन्यथा अस्माकं दशा आरुणेरिव सम्पद्येत ।

वेदः -उपमन्यो ! गुरुपादाः तवैव हिताय आहारनियन्त्रणं व्यवस्थितवन्तः । त्वं भोजनप्रियः सन् निद्रालुर्भवसि । अध्ययने च काऽपि बाधा आपतति । अध्ययनं वटूनां तपस्या । संयमः श्रद्धा चास्यास्तपस्याया मूलम् । तेषामादेशस्य पालनमेवास्माकं परमं कर्तव्यम् । तेषामादेशे यथायथं पालिते अस्माकं विद्यायां सिद्धिर्भविता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपमन्युः—अहं विभावयामि—त्वं गुरोरपि समधिकः उपदेशपण्डितः । यदि तुभ्यं दिनत्रयं रात्रित्रयं च किमपि खाद्यं न दीयेत, तदा तवैतत्पाण्डित्यं किमु स्थास्यति ?

वेदः—अवश्यम । छात्राणामध्ययनं तपः । तदर्थं मुच्चावचाः खेदाः सहनीया भवन्ति । वाल्मीकिस्तथा तपस्यायां निरतोऽवर्तत, येन वल्मीकैरावृतमपि स्वं शरीरं नावेदीत् । तत्फलेन च तादृशमुपादेयं महाकाव्यं प्रणेतुं समर्थ आसीत् । नगराजकुमारी पार्वती च पञ्चाग्नितपस्यायां विहितप्रयासा मृत्युञ्जयस्यापि हृदयमावर्जितवती । विद्यायां सिद्धिलाभायापि कठोरं साधनमावश्यकं भवति ।

उपमन्युः- किं त्वमेतादृशेषु विश्वासं स्थापयसि वेद !

वेदः-- तेन किं त्वं शास्त्राणि पुराणानि च मिथ्येति अभिप्रैषि ?

उपमन्युः-- क्षुधया सदसद्विवेको मे तिरोहितः । भिक्षालब्धमन्नं गुरवे निवेद्य पुनरपि भिक्षया जीविकां निर्वहन्नासम् । गुरुस्तु तदसहमानो न्यषिधत् । तत आश्रमधेनूनां क्षीरेण तृषां निवारयन्नासम् । गुरेस्तदपि नासहत । ततो वत्सानां मुखावस्थितफेनेन क्षुधां वारयन्नासम् । तदपि चक्षुःशूलं समजनि । किमिदानीं करवाणि ?

वेदः -रसना संयमनं ब्रह्मचारिणां प्रधानं कर्तव्यम् । सेयं काचन विषमा परीक्षा । अस्यां परीक्षायां त्वयोत्तरणीयम् ।

उपमन्युः- नाहं पारयामि सखे ! आढकपरिमितं पायसान्नमुदरसात् कृत्वा मातुः प्रियपुत्रोऽभवम् । शतसंख्यानि मोदकानि सकृदुदरसात्कृत्वा पितुः प्रमोदमुत्पादयन्नासम् । पिष्टकभक्षणप्रतियोगितायामस्माकं ग्रामे न कोऽपि मे समकक्ष आसीत् । इदानीं पश्य मे दुर्दशाम् । अगस्त्य महर्षिः समुद्रं चुलुकीकृत्य आतापिनं वातापिनं च जठराग्निना विदह्य मुनीनां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माननीयो बभूव । स एव मे आदर्शः । परन्तु इदानीमस्य देशस्य का नाम अवस्था समजनि ! कुत्रापि गुरुः कृपणः–

अग्रमन्युः--(निवार्य) क्षमतास्ते गुरुनिन्दा नैव सहनीया उपमन्यो ! इतोऽधिकं यदि किमपि वदसि, सर्वं दुश्चरितं गुरवे निवेदयामि । धृतिं बधान । तत्र पृथुतमायां दूरेभवन्त्यां, शरीरस्य सुगमतायां भारमान्द्ये च तिरोहिते सति त्वनेक आदर्शोऽन्तरासी समभ्यथाः । अनयैव च तपस्यया त्वं सम्भवतः समग्रस्य छात्रसमाजस्य प्रातःस्मरणीयो भविष्यसि ।

उपमन्युः–किन्तु अहं विभावयामि वेद, मम जिज्ञासयमतरस्यायां सफलतासादनात्प्राक् आरुणिरिव जीवनसंशये पतानि ।

वेदः—गुरुपादानां शुभयाऽऽशया भगवतश्चानुकम्पया अवश्यं ते विद्याः सिद्धिमेष्यन्ति ।

उपमन्युः–अहं तदा तदा कल्पयामि, स्वप्ने च पश्यामि तस्य युगस्य कथाः, यत्र छात्राः स्वाधीनाः, गुरोश्च समकक्षाः, तथापि शास्त्रेषु पारङ्गताः, बुद्धौ तीक्ष्णा, विद्यासु च निपुणाताः । सोऽयं युगः शिष्याणां स्वर्गयुगो भविष्यति । तदा शिष्याः स्वाधीना भविष्यन्ति । गुरवः शिष्येभ्य उपदेक्ष्यन्ति शिष्याश्च गुरुभ्यः ।

वेदः--(सोपहासम्) तादृशीं स्वाधीनतां प्रत्याशेषे उपमन्यो, परन्तु तत्र मन्योः प्रकोपस्तदा गुरूणां सहनीयो भवेत्खलु ।

उपमन्युः–परं सहस्रवत्सरेभ्यः अस्य देशस्य शिष्या अत्यन्तामनुरक्तिम् अतिरिक्तां भक्तिं च प्रदर्शयन्तो सत्यामपि विद्वत्तायां नैव नेतृत्वं दातुं प्रभवन्ति । शास्त्राध्ययनं मनुष्यस्य नैव चरमं लक्ष्यं भवति । मेरुदण्डविहीनान् मानवान् सृष्टवत्या अस्या शिक्षापद्धतेः परिवर्तनं नितरामावश्यकम् ।

वेदः--(उच्चैर्विहस्य) परन्तु यदि स्वतन्त्रता स्वेच्छाचारो भवति मेरुदण्डो यदि अनमनीयो भवति, तर्हि समस्या जटिता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पाद्यन्ते । यदि सर्वेऽपि केदाराः सम्पाद्यन्ते, तर्हि के नाम नेतारः भवेयुः ?

(सहसा शयान आरुणिः उच्चैर्घोषयितुं प्रवृत्तः 'इन् किलाब्_ जिन्दाबाद" "इन् किलाब, जिन्दाबाद" (विप्लवो दीर्घजीवी भवतु" विप्लवो दीर्घजीवी भवतु') (उपमन्यु वेदश्च चमत्कृतौ भवतः)

वेदः–(शय्यान्तिकं गत्वा आह्वयन्) 'आरुणे' 'आरुणे'

आरुणिः– इन् कलाब जिन्दाबाद् !

वेदः–अये कोऽयं निरर्थकः प्रलापः । आरुणे ! किं कर्तुं व्यवसितोऽसि ? । खे उपमन्यो, सकृद् गुरुपादान्निवेदय यदारुणेरवस्था विषमा प्रतीयते ।

(उपमन्युः प्रस्थितः)

आरुणिः -विप्लवो दीर्घजीवी भवतु !

(गुरुपादैः सह उपमन्योः प्रवेशः)

आरुणिः–"इक् किलाब, जिन्दाबाद"

गुरुः—अब्रह्मण्यम । इयं यवनभाषेव प्रतीयते । प्रलपतीति मन्ये ।

वेदः– गुरुपादाः, आरुणिस्तावद् गान्धारदेशीयः । अतएव तस्य मुखाद् यवन भाषाया निस्सरणं स्वाभाविकं भाति ।

आरुणिः--विप्लवो दीर्घजीवी भवतु ।

गुरुः–आरुणे, धन्योऽसि । कियती निष्ठा श्रीमतः ! किन्तु विप्लव, प्लावनं नैकरूपम् । किं त्वं प्लावनं दीर्घजीवि कामयसे ? तथा चेत्तव गुरुभक्तेः चरमा सीमा प्रकाश्येत । अपि च दीर्घकालं यावत् तव केदारबन्धप्लावनं स्वशरीरेण रुद्धं स्थास्यति । साधु वत्स साधु ! अचेतनावस्थायामपि तव चित्तं गुरुसेवाप्रवणं प्रतीयते ।

उपमन्युः--अहं विश्वसिमि--प्रलापेऽस्मिन् अप्रतिकृते परिणामः सुदृढते अनर्थाय प्रकल्पेत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुरुः--न तदर्थं मनः खेदयितव्यमुपमन्यो ! औषधे अस्मिन् सेविते तस्य चित्तं सुषुप्तावस्थामुपनीयेत ।

(पात्रान्तरेणानीतमौषधं तं पाययति)

वत्सौ, सावधानौ तिष्ठतम् । रात्रौ यदि अवस्था संकटापन्ना भवति, तर्हि अहमाह्वातव्यः ।

(प्रस्थितः)

(दृश्यान्तरम्)

(एकस्यां कलाशालायां 'युनियन्'कार्यालयः । एकतः किमपि लेखाधानम्, परित आसन्दिकाः । अस्माकं पूर्वपरिचितानां वेदारुण्युपमन्यूनां प्रवेशः । सर्वेऽपि आधुनिकवेषभूषाभिः सन्नद्धाः । गात्रेषु शुक्लवर्णः 'पेण्ट' परिच्छदः, विचित्रं च 'बुष्‌सर्ट्' कञ्चुकम् । केशास्तावत्प्रयत्नतः प्रसाधिताः गात्राणां परिवर्तनेन साकं मानसिकं परिवर्तनपि लक्ष्यते । त्रयाणां मुखेभ्यो नेतृत्वस्याभासः 'सिगरेट' धूमच्छटा च प्रसरति)

आरुणिः- उपमन्यो, सकृदवधारय । It is impossible विंशशताब्द्याः सप्तमे दशके शुक्लकेशस्य दीर्घश्मश्रुमतो विमुण्डितस्य चन्दनचर्चितकलेवरस्य च अध्यक्षस्य चरित्रं सर्वथा असहनीयं भवति । तस्य अस्याः कलाशालाया निष्कासनं स्थानान्तरपरिवर्तनं चावश्यं सम्पादनीयम् । अन्यथा सर्वेऽपि वयं कलाशालान्तरे नामानि लेखयिष्यामः । अन्यथा अस्याः कलाशालायाः आत्मसम्मान संरक्षणे काऽपि बाधा आपतेत् ।

वेदः- द्वादश वर्षण्यतीतान्यस्य स्वतन्त्रीभूतस्य देशस्य । संविधानेन संघटनस्य स्वाधीनता मतप्रकाशस्य च स्वाधीनता व्यवस्थापिता । इदानीमस्माकं प्रिन्सिपालः अध्यक्षः) कथयति- अस्माकं 'यूनियन्' (छात्रसंघ) संघटनमप्रक्षुन्नं गर्हितं च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोऽयमुपदिशति 'पितृदेवो भव' आचार्यदेवो भव ।' यदि प्रिन्सिपालो देवता समुच्यते, किं वयं नगण्या मानवा भवेम ? तथा सति देशेऽस्मिन् साम्यवादस्य प्रतिष्ठा कथं सम्पद्येत ?

उपमन्युः--अस्माकमौदासीन्यादेव प्रिन्सिपालस्य तथा भ्रान्तिरुदेति । अस्माकं पितृपितामहादयः परं निन्दनीया भवन्ति । ते च नाम्मान् 'अशोककुमार' 'प्रदीपकुमार' 'दिलीप कुमार' 'राजकपूर' इत्यादिनामभिरभिहितवन्तः, परन्तु प्राचीनतमैः आरुणिः, उपमन्युः वेद इत्यादिभिः । तथापि कलेजस्यास्य यूनियन् सभ्या आरुणि शर्माणं सभापतित्वेन उपमन्युं मिश्रं च सम्पादकत्वेन निर्वाचितवन्त इति परमभिनन्दनीया भवन्ति । नात्र तेषां रसबोधः कारणम् प्रत्युत तन्नेतृत्वमस्मान् प्रति 'चालेञ्ज्' (आह्वान) भवति। अस्माकं नेतृत्वस्य कोऽपि विद्रूपता !

वेदः--अस्माकं प्रिन्सिपालोऽपि तस्मिन् दिने तथा अभिप्रैति स्म । योऽयमारुणिरेकदा केदारबन्धे स्वयं सेतुरूपेण जलप्रवाहं न्यरुधत् , सोऽयमारुणिशर्मा भाग्यवशादिदानीं यूनियनस्य सभापति गुरुभक्तेः परां काष्ठां दर्शयिष्यतीति स आशास्ते ।

आरुणिः- सत्यं, सैवासीदभिनन्दनस्य भाषा । तस्याशीर्वादस्य तात्पर्यम् । परन्तु नायं प्रिन्सिपालो जानाति--यदि श्वो धर्मघटो (Strike) भवति, तर्हि स एव वैदिकयुगस्यारुणिः कलाशालाया द्वारदेशे शयीत, यथा छात्राणां प्रवाहो नैवाध्ययनकक्षाः प्रवेष्टुं समर्थः स्यात् !

उपमन्युः–Bravo । समधिकमभिनन्दनीयेनादर्शेनानुप्राणितोऽसि !

आरुणिः-तवाप्येतत् स्मृतिपथान्नापसृतं भवेत् यत्तव 'कलेजयुनियन'स्य सम्पादकत्वेन निर्वाचने वृद्धानामग्रेसरोऽसौ प्रिन्सिपालः अभिनन्दति स्म–योऽयमुपमन्युर्वैदिके युगे गुरोरादेशेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षुधातुरोऽर्कपत्राणि भक्षयित्वा अन्धः समजनि, तमिमनादर्शसम्पादको न विस्मरितुमर्हति ।

उपमन्युः—अये Sir अवश्यमवश्यम् । अनशनमुपमन्युश्च एकार्थकं पदद्वयम् । श्वो यदि कलेजे छात्राणां Strike (धर्मघटो) भवति तर्हि कलेजप्रिन्सिपालस्य आवासस्याग्रतः आमरणस्यानशनस्य दायित्वमस्यैवाधमस्य सम्पादकस्योपरि निधीयताम् । पश्य कथमहं सर्वकलेजेष्वपि कलेजेषु समग्रे च भारते वर्षे चाञ्चल्यं स्रक्ष्यामि !

वेदः—ये तावत् युनियनसभ्या युवयोः सपक्षे स्वमतानि वितरित्वन्तः, तेषां तानि मतपत्राणि सार्थकानि जातानि । भारतस्य छात्रसमाजं युवामेव नेतृत्वेनार्वयितुं समर्थौ भवथः ।

उपमन्युः सखे वेद, तत्रापि किञ्चिद्वक्तव्यमस्ति । युनियनसभ्यास्त्वामुपसभापतित्वेन निर्वाच्य मणिकाञ्चनसंयोगं कृतवन्तः प्रेम्णो मूर्तिमानवतारस्त्वं प्रिन्सिपालस्य शृङ्खलाया दूरे महिलाछात्राणां चाङ्कुरकारणमिति को वा न जानाति ?

वेदः - न कदाचिदपि युवाभ्यां समकक्षो भवितुमहमार्हमाहम्ध्र्मावहामि । गान्धिनेहरूइव लेलिनुष्टालिनाविव, लिङ्कनवाशिङ्गटनाविव, नायोसेतुचौहानलावी इव च युवां छात्र समाजनेतारौ सत्तृष्णमपेक्षते । अहं दृढं विश्वसिमि । युवामस्य देशस्य वीरेनमित्रविजुपट्टनायकौ ओरिस्साया इव सर्वोच्चौ शासनकर्तारौ भविष्यथः । तुलसी पत्रद्वयाङ्कुरात्सौरभायते ।

आरुणिः—नहि नहि । उपमा नैव शोभना भाति । वृश्चिकाली पत्रद्वयाङ्कुरात्कण्डूयते । आधुनिक्याः सभ्यतायाः संस्कृतेः प्रगतेश्च मूलमन्त्रस्तावत्संघर्षः । संघर्षरूपकठोरनिकषेण परीक्षितं चेन्नेतृत्वं यथार्थमिति प्रतीयते । चीनदेशीयस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माओसेतोर्विषयं सकृत्परिशीलय। स किल संघर्षेणैव पृथिव्यां नेतृत्वमभिवाञ्छति।

उपमन्युः–किन्तु वयं यदि अस्मिन् कलेजयुनियने माओसेतोः-पदाङ्कमनुसरेम, तर्हि विपदां सम्मुखीना भवेम।

आरुणि–विपद एव हि पौरुषस्य नेतृत्वस्य च निकषोपलम्। कलाशालायाश्छात्राः शतशोऽस्यासु विश्वस्य मतदानमकार्षुः। वयं तस्य विश्वासस्य योग्यतां प्रमाणयेम। तदर्थं प्रत्यक्षं कार्यानुष्ठानं कर्तव्यम् एतदर्थं प्रिन्सिपालसन्निधिं धर्मघटस्य सूचना देया। अयं तावद् वर्षस्य प्रारम्भः। पठादिकं नैव सम्यगारब्धम्। एतादृशे समये धर्मघटस्य प्रवर्तने पाठविषये न काऽपि क्षतिर्भविष्यति। अथवा छात्रेषु के नाम नेतृत्वस्योपयुक्तास्तत्प्रमाणितं भवेत्। विषये युष्माकं सक्रियं सहयोगमभ्यर्थये।

वेदः–षोडशकलं सहयोगं लप्स्यसे। युवयोरिव अन्येषामपि नेतृत्वं प्रमाणीकरणीयम्। अन्यथा वयं जनसमाजस्य सहयोगं परिहरेम्।

आरुणिः--तदपि मया प्रागेवालोचितम्। सेनापतिस्तावत्त सैन्यपरिचालनक्रमं प्रथमतो निर्धार्य, सम्भाव्यमाना विपदः प्रत्याक्रमणानि च विभाव्य सावहितः समरे प्रवर्तते; तदिति न किमपि नूतनतया विभावनीयं वर्तते।

उपमन्युः--तर्हि कानि कारणानि प्रदर्श्य धर्मघटस्य सूचना दीयेत?

आरुणि--अस्मिन् कलेजविषये भवतां मनोवृत्तिं नाहं जनामि। परन्तु अन्यकलेजतुलनया अस्य कलेजस्य पुरःप्राङ्गणे छात्राणां 'सिगरेट्' पाने न काऽपि स्वाधीनता वर्तते, दशमहोरातः पञ्चमीं होरां यावत् साधारणे उदवसिते सङ्गीतचर्चायां स्वाधीनता न वर्तते। हृष्टेलगृहे प्रातर्घण्टाद्वयं मुखं विवरितुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न कस्यापि स्वाधीनता वर्तते। छात्राभिर्भद्रमहिलाभिश्च संलपितुं न काऽपि स्वाधीनता अस्ति। तस्मादिदं कारागारं न भवति चेत्कि यत् स्यात्। बन्धवः, अस्माकं वरेण्या नेतारः अस्मदर्थं संविधाने मौलिकमधिकारं व्यवस्थापितवन्तः। स्वाधीनं मतं प्रकटयितुं. स्वाधीनं संघटनं चालयितुं स्वच्छन्दं मिलितुं च व्यवस्था कृता। परन्तु अस्मिन् कलेजे किं तादृशी काऽपि स्वाधीनता वर्तते वा ?

उपमन्युः वेदश्च } न वर्तते।

आरुणिः—तर्हि तदिदमनुष्ठानं कारागारात्कलेजं कर्तुं यूयमभिलषथ कच्चित् ?

उपमन्युर्वेदश्च—एवमेव, सर्वात्मना।

आरुणिः—अस्य अनुष्ठानस्य एतादृश्यां शोचनीयायां दुर्गतौ को वा साधनं भवति ?

उपमन्युर्वेदश्च—अस्माकं प्रिन्सिपालः,
वयं च।

आरुणिः—सत्यम्, सत्यम्, उभयमप्युत्तरमवितथम्। अस्माकं दुर्बलता प्रिन्सिपालस्य च एकच्छत्रं शासनम् उभयमपि अस्या दुर्गतेः कारणम्। तदस्माभिः अस्या दुर्गतेः समुचितः प्रतीकारः करणीयः। सङ्गठनं समधिकशक्तिशालि करणीयम्, प्रिन्सिपालस्तावदितः परिवर्तनीयः।

उपमन्युः—सत्यमुक्तं त्वया आरुणे ! पक्वकेशः पक्वश्मश्रु च वर्तत इति प्रिन्सिपालो विचिन्तयति यथार्थतः स भवति प्राक्तनयुगस्य कुलपतिः। अस्यां विंशशताब्द्यामपि रक्तेन चक्षुषा जगच्छासितुमभिलषति। अस्माकं मौलिकमधिकारं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निराकरोति । एतस्य एक एव प्रतीकारः "धर्मघटः" Strike !

आरुणिः—अवितथमाह उपमन्युः । प्रिन्सिपालस्य स्वेच्छाचारशासनस्य विरोधः करणीयः । तस्य परिवर्तनमाक्षिप्य धर्मघटः करणीयः।

वेदः—सत्यम् । परन्तु उपमन्योर्वचनादहमेकं विषयमनुमिनोमि—धर्मघटस्तावच्चरममस्त्रम् । तस्य अस्त्रस्य प्रयोगात् पूर्वं प्रिन्सिपालस्य आचरणं संशोधयितुं सहजमुपायान्तरमहं चिन्तयामि ।

आरुणिः—कीदृशं तदुपायान्तरम् ?

वेदः—इदानीमेव उपमन्युर्निरदिशत् प्रिन्सिपालस्य हस्तायितं श्मश्रु वर्तते इति तस्य मनोवृत्तिरपि प्राचीनकालिका भवति । यदि तदिदं श्मश्रु पूर्णतयोच्छेदयितुं प्रभवेम, तदा तस्य मानसिकं परिबर्तनमवश्यं भविता ।

आरुणिः—तव चिन्तायां न कापि मौलिकता वर्तते वेद ! अहमपि अविकलं तदेवालोचयम् । प्रिन्सिपालायापि तन्निवेदितम् । यदि स पक्षाभ्यन्तरे मुखमण्डलं भद्रं न करोति, तर्हि छात्रसमाजात् भद्रो व्यवहारो नाशासनीयस्त्वयेति । अत्रैव धर्मघटस्येङ्गितं निगूढमास्ते । अहं प्रथमतो व्यचिन्तयम्—प्रिन्सिपालस्य श्मश्रुवपनविषये धर्मघटस्य सूचना दीयतामिति । किमिति चेद्यथा सर्पस्य दन्तेषु विषं वर्तते, तथा तस्य श्मश्रुणि स्वेच्छाचारो वर्तते । तस्य श्मश्रुपातने वयं सर्वानपि मौलिकानधिकारानासादयेम इति दृढं मतम् । किन्तु तस्य श्मश्रुपातनमुद्दिश्य यदि धर्मघटस्य सूचना दीयेत, तर्हि सर्वेऽपि लोका अस्मान् अयथा विभावयेयुः, अस्माकं प्रार्थनीयं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वस्तु वालक्रीडनकमिति भावयेयुरिति नाहं तत्र किमपि गौरवं दर्शयामि।

(नेपथ्ये) – किमहमन्तरं प्रविशेयम् ?

आरुणिः—Come in प्रवेष्टु मर्हन्ति।

(कलेजप्रिन्सिपालः प्रविशति। आयोद धौम्य इव सौम्यमूर्तिः शुक्लकेशः शुक्लश्मश्रु राकृत्या च गम्भीरः। परिच्छदपरिपाटी सर्वदा आधुनिकी। भूषितस्य कोट् पेण्ट् नेकटाइ धारणात् तस्याकृति र्मिसनारी साहेवस्याकृतिरिव प्रतिभाति। वार्तालापः सर्वथोपदेशात्मकः प्रतीयते। आरुण्यादयः ससम्भ्रम-मुत्तिष्ठन्ति)

प्रिन्सिपालः—Hallow आरुणे उपमन्यो अपि च वेद ! यूयं त्रयः धौम्याश्रमस्य मुख्या अन्तेवासिनः। अहं युष्मभ्यो वहु आशासे। यूयमवश्यमेकदा तस्य पुराणयुगस्य श्रेष्ठा शिष्या इव विद्यासु कृतित्वमासादयिष्यथ।

आरुणिः—Sir, अधुना विद्यासु कृतित्वलाभे न किमपि मूल्यं वर्तते। सम्यक्तथा पठने केवलं माष्टर आहोस्वित् प्रफेसर पदवी लभ्येत, या सा अस्माकं मनसे न रोचेत।

प्रिन्सिपापालः—तर्हि युष्माकं कलेजप्रवेशे को हेतुः ? यूयं अपोऽपि यूनियनस्य कर्मकर्तारः सम्यगधीत्य छात्राणां पुरतः समुन्नत-मादर्शमुपस्थापयिष्यथेति अहमाशासे।

उपमन्यु—अस्माकमादर्शस्तु सम्पूर्णतया पृथक्। देशेऽस्मिन् सहस्रशो बालकाः पाठं पठन्ति। परन्तु कति के नाम नेतारो भवन्ति ? वयं देशाय बलिष्ठं नेतृत्वं दातुमीहामहे। देशे साधवश्छात्रा वहवो वर्तन्ते Sir, परन्तु देशे साधूनां नेतृणामभावो वर्तते। तमिममभावं वयं पूरयामः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रिन्सिपाल:—भवतु । युष्माकमेव कथा भवतु । किन्तु आरुणे त्वं ह्यो मे श्मश्रुविषये यदवोचः, तस्यार्थं नाहं सम्यगवबोद्धुं पारयामि । तव तद्भाषितं मह्यमेकं तर्जनमिव प्रतिभाति । इदानीमहं शृणोमि, यद्यहं श्मश्रु न वपामि, तदा यूयं Strike करिष्यथ ।

आरुणि.—भवतः कथा अवितथैव Sir, भवान् सकृत् विभाव्य पश्यतु-विंशशताब्द्याः सप्तमे दशके यदा मानवश्चन्द्रलोकं गन्तुं व्यवस्यति, यदा नापिताः कर्तव्यविहीना वर्तन्ते, यदा भारतीय ब्लेडस्याभावो नास्ति तदा अस्मकं प्रिन्सिपालस्य भवतो मुखे एतावतः श्मश्रुराशेरवस्थानं नितरामसुन्दरम् अयौक्तिकं च ।

प्रिन्सिपाल:—किन्तु मम श्मश्रुसत्त्वे युष्माकं पठने न कापि बाधा-सम्भवति, नापि युष्माकं यूनियन कार्ये काऽपि बाधा संपतति ।

उपमन्यु:--सत्यमेव तत् । किन्तु Sir, बालकानां धारणा भवतः शृङ्खलापरायणताया श्मश्रुणोऽवश्यं कोऽपि कार्यकारण-सम्बन्धो वर्तते ।

प्रिन्सिपाल:—किमिदं त्वं गभीरतया पर्यालोच्य वदसि उपमन्यो !

उपमन्यु:--आम । Sir,

प्रिन्सिपाल:--किन्तु पृथिव्यां बहूनां महात्मनां शुक्लं श्मश्रु वर्तते । कवीन्द्रो रवीन्द्रनाथः, आचार्यः प्रफुल्लचन्द्रः, पण्डितो नीलकण्ठः, वर्णाढशाह एते श्मश्रुसत्त्वेऽपि लोकप्रिया भवन्ति ।

आरुणि:—परन्तु विंशशताब्द्याः मध्याह्ने प्रिन्सिपालत्वेनावस्थानं पृथक् ।

प्रिन्सिपाल:--तिष्ठतु तत् । तर्हि किमिति यूयं निश्चितवन्तः- यद्यहं श्मश्रु न वपामि, तर्हि Strike कर्तुम् ।

अरुणि:--एवमेव Sir,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रिन्सिपालः--कियद्दिनावधि धर्मघटममुं परिचालयिष्यथ ?

आरुणिः -यावदस्माकमाग्रहस्य परिपूर्तिः ।

प्रिन्सिपालः--एवं कृते कियत्यः Man hour अर्थात् Proferm hour अपिच छात्रघन्टाः विनष्टा भविष्यन्ति, तासां गणना कृता वा ?

आरुणिः--निरुपाया वयम् । Sir, न केवलं Strike आमरणान्तमनशनं Hunger strike कर्तुमपि उपमन्योः सकाशात् प्रतिश्रुतिरुपलब्धा । तेन साकं प्रतिदिनं नगरे शोभायात्रा, संवादपत्रेषु विवृतिश्च क्रियेत । सर्वासामासां समस्यानां समाधानं भवतो हस्ते वर्तते I mean भवतः श्मश्रुणि !

प्रिन्सिपालः--समाधानं मम हस्ते ? मम श्मश्रुणः कृते यूयं बालकाः, पाठं परित्यज्य भ्रमिष्यथ, प्रत्यहं च अनशनं करिष्यथ, अहं च एतं सर्वमनाचारं पश्यन् वर्तिष्ये ? यूयं सर्वेऽपि मम पुत्राः दुहितरश्च । यदि युष्माकं सन्तोषः तर्हि तदहं कर्तुं सन्नद्धः ।

आरुणिः-वहुधा धन्यवादाः ! Sir, अस्माकमस्मिन् सत् सत्परामर्शाय भवता मनो न खेदयितव्यम् ।

प्रिन्सिपालः--अस्तु, प्रश्नमेकं कर्तुमिच्छामि । किं नापितो मे तदिदं कार्यं साधयिष्यति, उत युष्मासु कोऽपि तदेतत्कार्यं साधयितुं लालसितोऽस्ति ?

वेदः--Sir,तदेतत्पवित्रं कर्म सम्पादयितुं प्रस्तुतोऽस्मि ।

प्रिन्सिपालः- अस्तु श्वः प्रातर्मे आवसमागच्छ । परन्तु इतःपरं सर्वेऽपि अध्ययने मनो दास्यथ । पश्यामस्तत् ।

आरुणिः- एवमेव Sir, सर्वे वयं गमिष्यामः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(प्रिन्सपालः प्रस्थितः)

आरुणिः--अहं जानामि- अस्माकं प्रिन्सिपाल इव कृपणो जनो जगति विरल एव । अन्यथा चेत् कलेजछात्रं स्तदिदं कर्तुमीहेत ?

भारतीयं ज्यौतिषम्

(अनुवृत्तम्)

लेखकः—श्री वायिकोलि ज्यौतिषविशारदः

तत्त्ववादिनस्तदिदं स्वकृतस्य कर्मणः फलमिति निश्चितवन्तः । ईश्वरः कर्मफलस्य विधाता. यो यादृशं कर्म करोति, स तदनुरूपं फलमनु भवति । देशजातिनिर्विशेषं च सोऽयं नियमः सर्वत्र प्रचलति । ईश्वरेण प्रदर्शितया विधया कर्मफलमनुभूयते । अग्नौ प्रक्षिप्तो हस्तो दग्धो भवति, जलेऽवगाहने शरीरमार्द्रं भवति एतादृशेषु विषयेषु नेश्वरस्य कर्तव्यं दायित्वं हस्तक्षेपो वा अस्ति । ईश्वरेण नियमिता अग्नेर्दाहिका शक्तिः, जलेषु स्यूता आर्द्रता चात्र कार्य-साधिका भवति । तथा शोभनस्य कर्मणोऽनुष्ठाता सुखमश्नुते दुष्कर्मणश्च दुःखमनु भवति एवमेतद्विदित्वा सत्सु मार्गेषु प्रवर्तनं श्रेयसे सम्पद्यते । *

---

* एवं संचिन्त्य मनसा प्राप्य कर्मफलोदयम् ।
मनोवाङ्मूर्तिभिर्नित्यं शुभं कर्म समाचरेत् ।। (मनुसंहिता)
एता दृष्ट्वाऽस्य जीवस्य गतीः स्वेनैव चेतसा ।
धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः ।। (मनुसंहिता)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मवादस्य गूढतत्त्वभेदनम् , आत्मनो विकाशपुरःसरं परमात्मना मिलनं च भारतीयस्य विज्ञानस्य लक्ष्यम् । सर्वेषामपि दर्शनानां मूलभित्तयः कर्मवाद एव प्रतिष्ठिताः ।

आत्मा तावदजो नित्योऽमरश्च । अस्य जन्ममृत्यू न विद्येते । (१) मुहुर्मुहुः शरीरेण संयोगो वियोगश्च एतस्य कर्म । तदेतत्कर्मैव जन्मान्तरम् । एवं जीवस्य बहूनि जन्मान्यतीतानि बहूनि च भविष्यन्ति । (२) जीवोऽविद्ययाऽऽवृतः अतीतान् भविष्यतश्च विषयान् ज्ञातुं न प्रभवति । देही यथा पुरातनानि वासांसि विहाय नवीनानि गृह्णाति, एवमेवात्मा पुरातनं शरीरं विहाय नवीनं परिगृह्णाति । तेन पूर्वशरीरे अनुभूतानि सकलानि तथ्यानि विस्मरति । (३) जन्मान्तर रहस्यं हि कर्मवादस्य मूलपत्तनम् ! वृक्षो नष्टोऽपि यथा वीजरूपेणावस्थाय पुनर्वृक्षतया प्रकाशते, तथैव मनुष्यो मृतोऽपि वासनात्मतयाऽवस्थितो पुनरपि विग्रहवान् भवति । असकृत् सदसद्यद्यत् स इह जन्मनि विदधाति, तत्सर्वं मरणवेलायां तस्य स्मृतिपथारूढं भवति, तदनुरूपं च पुनर्जन्म लभते (४)

---

(१) न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥
भगवद्गीता

(२) बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥
भगवद्गीता ।

(३) वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ।
भगवद्गीता

(४) यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भाव भावितः ॥
भगवद्गीता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यावद्वासनाया अवस्थानम् तावज्जन्मान्तरलाभोऽवश्यम्भावी। जन्मना कर्म फलभोगः, ततो मृत्युस्ततो जननमिति कश्चन प्रवाहः प्रचलति। शस्यवज्जीवो जीर्णः पुनः प्रजायते। मृतो जनः पुनर्जन्म लभते। ❀ यदा स परात्परं परमात्मानं स्वरूपतो जानाति, तदा स्य कर्मपाशश्छिन्नो भवति। अविद्यादयः क्षीयन्ते, जन्ममृत्युजरादीनि विनश्यन्ति, अणिमादीनि अष्टावैश्वर्याणि सिध्यन्ति, तस्य च तत्त्वस्य ध्यानात् ऐश्वर्यातीतः पूर्णानन्दो लभ्यते अस्य परमेश्वरस्य प्राप्तिपर्यन्तं कामनाया अन्तो न भवति। फलतो जन्मान्तरस्य सीमा नास्ति। संसारसक्तो धनादिमदमत्तश्च जीवः परलोकतत्त्वमनवबुध्यन् न प्रत्यक्षं तन्न विश्वासयोग्यमिति विभाव्य जन्मान्तरं नास्तीति स्थिरीकृत्य अज्ञानस्य वशतामापद्यते ✳

धर्मपदेऽपि महात्मना बुद्धदेवेन उक्तम् प्रमत्तचित्तस्य मनुष्यस्य तृष्णा प्रतानवती लतेव प्रत्यहं वृद्धिमयते। फलाकांक्षी वानरो यथा वृक्षाद् वृक्षान्तरं याति मानवोऽपि तथैव एकस्याज्जन्मनो जन्मान्तरं

❀ अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे।
शस्यमिव मर्त्यः पच्यते शस्यमिवाजायते पुनः ॥ (कठोपनिषद्)

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ (गीता)

मृतस्य च पुनर्जन्म भवत्येतच्च नान्यथा।
आगमोऽयं तथा यच्च नोपादानं विनोद्भवः। (विष्णुपुराणम्)

✳ न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्
अयं लोको नास्ति पर इतिमानी पुनः पुनर्वशमापद्यते मे ॥
(कठोपनिषत्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

याति । † अन्यदपि तेनाभिहितम् "हे भिक्षवः, पूर्वजन्मसु युष्माभिर्यन्मातृस्तन्यं पीतम्, तत् चतुर्णां सागराणां जलादप्यधिकम् । पूर्वजन्मसु पितृविच्छेदः, अर्थहानिः, रोगः इत्यादिभ्यो दुःखहेतुभ्यः समुत्पन्नं युष्माकं नेत्रजलमपि चतुर्णां सागराणां जलादभ्यधिकम् । पथिकस्येव कंचित्कालं मिलित्वा पुनर्निर्गमनं संसारस्य रीतिः । पूर्वजन्मसु अवस्थितान् बन्धून् विहाय इहजन्मनि अन्यजनैः संगः पुनः परजन्माश्रयणं जीवस्य धर्मः १ । चरकमहर्षिस्तावत् पुनर्जन्मनि प्रत्यक्षप्रमाणमप्युलभ्यत इति प्रत्यपादयत् । बहुषु स्थलेषु पुत्रस्यावयवाः पितुः सादृशा नैव भवन्ति । एकस्मात् पितुरुत्पन्नानां मध्ये वर्णस्वराकृतिबुद्धिभाग्येषु पार्थक्यं परिदृश्यते । तेषु केचन सत्कार्याणि कुर्वन्ति, अपरे असत्कार्याणि कुर्वन्ति, केचन प्रभवो भवन्ति केचन च दासाः सम्पद्यन्ते, केचन दीर्घायुषः केचन चाल्पायुषः । केचन सुखिनो भवन्ति अपरे च दुःखिनः । सद्यः

† मनुजस्स पमत्तचारिनो
तणहा वढति मालुवा विय
सो प्लवति हुराहुरं फलमिच्छं व वनस्मि वानरो ॥
(धर्मपदम्)

१ । यथाध्वगानामिह संगतानां
काले वियोगो नियतः प्रजानाम् ।
प्राज्ञो जनः कोऽनुभजेत शोकं
बन्धुप्रतिज्ञातजनैर्विहीनः ॥
इहैति हित्वा स्वजनं परत्र
प्रलभ्य चेहापि पुनः प्रयाति ।
गत्वापि तत्राप्यपरत्र गच्छ—
त्येवं जने त्यागिनि कोऽनुरोधः ॥
बुद्धचरितम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसूतस्य शिशोः विनैव शिक्षां भोजने स्तन्यपाने हासे भयादिषु च प्रवृत्तिर्दृश्यते । स्थलविशेषेषु च पूर्वजन्माचरितस्य वृत्तान्तस्य स्मरणमपि सम्भवति । एवमादिभिरनुमीयते यत् पूर्वजन्मकृतानि कर्माणि अपरिहार्याणि अविनाशीनि च । एतदेव दैवमिति व्यपदिश्यते । परवर्तिनि शरीरे च तस्य प्रभावः प्रतिफलितो भवति । अतएव पूर्वोक्तानि वैषम्यानि स्वकृतकर्मणां फलानुसारेण संघटन्ते । इहजन्मनि कृतस्य कर्मणः फलं परस्मिन् जन्मनि प्रकाशते यथा फलाद्बीजं बीजाच्च फलम् ।(१)

कर्तुरसाधारणस्य कारणस्य समवाये यथा कार्यं सिध्यति, तथा जीवात्मनः पञ्चमहाभूतानां च समवाये गर्भं उत्पद्यते । बीजाद् दङ्कुरस्योत्पत्तिरिति न्यायेन कृतस्य कर्मणः फलमुपलभ्यते । न हि एकप्रकाराद्बीजादन्यादृशं फलं सम्भवति । अतः शुभेषु कर्मसु मनो निधेयम् । शुभं कर्म इहजन्मनि यश आधत्ते, मृत्यौ च स्वर्गं वितरति२ ।

---

१ । एवं पुनर्भवः । प्रत्यक्षमपि चोपलभ्यते । माता पित्रोर्विसदृशान्यपत्यानि, तुल्य सम्भवानां वर्णस्वराकृतिसत्त्व बुद्धि भाग्य विशेषाः । +++ कर्तृ करणसयोगात् क्रिया । कृतस्य कर्मणः फलम्, नाकृतस्य । नाङ्कुरोत्पत्तिरबीजात् कर्मसदृशं फलम्, नान्यस्माद्बीजादन्यस्योत्पत्तिरिति युक्तिः । +++ एवं प्रमाणैश्चतुर्भिरुपदिष्टे पुनर्भवे धर्मद्वारेष्ववधीयते । +++ तथा कुर्वन्निह चैव यशो लभते । प्रेत्य च स्वर्गमिति तृतीया परलोकैषणा व्याख्याता भवति ।

२ । स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति
क्रियागुणैरात्मगुणैश्च तेषां संयोग हेतुरपरोऽपि दृष्टः ॥
श्वेताश्वतरोपनिषत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य जन्मान्तरस्य प्रधानं बीजं तावद्वासना । योऽज्ञानान्मुक्तो भवति स खलु जन्मान्तरं स्मरति । विभिन्नासु योनिषु भ्रमणमेव दुःखस्य मूलं कारणम् । तच्च शेषरहितम् । तैलस्य वर्तेश्च संयोगेन प्रज्वलितो दीपो यदि तैलं न लभते, तर्हि उपादानाभावात् निर्वापितो भवति । तथा मानवः संयोगक्रियाया अस्थिरतामुपलभ्य यदि चित्तं निरुणद्धि, तर्हि उपादानं विनश्यति, कर्मबीजं च ध्वंसते, पुनर्जन्म च लुप्तं भवति ।

कृतस्य कर्मणः फलानुसारेण कृतस्य विज्ञानस्य चिन्तनस्य चानुरूपतया केचन मानव शरीरं परिगृह्णन्ति अन्ये च स्थावररूपेण प्रजायन्ते । सोऽयं भावः कठोपनिषदि सुस्पष्टं प्रतिपादितः । इयं हि सा श्रुतिः—

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।

स्थाणुमन्येऽनुसंयन्ति यथा कर्म, यथा श्रुतम् । इति

स्वस्य गुणानुरोधेन विहितानां प्रतिषिद्धानां च कर्मणामनुष्ठानेन स्वकृतस्य धर्मस्याधर्मस्य च फलेन गुणानुरूपाणामुपासनादीनां च फलेन जीवः सूक्ष्मैः स्थूलैश्च शरीरैः संसृज्यते । कार्यकारणसमष्ट्या जीवस्य संयोगबलेन स पूर्वप्रज्ञामपि लभते ।

कर्मणो गतिस्त्रिविधा । प्रारब्धरूपा संचितरूपा क्रियमाणरूपा च । जीवस्य सृष्टिकालादारभ्य कृतस्य योऽयमनुपभुक्तोऽवशिष्यते, तत्प्रारब्धम् । पूर्वजन्म कृतस्य कर्मणः फलमिहानुभूयते, तदेतत्संचितम् । इहजन्मनि कृतस्य कर्मणः फलमिहैवानुभूयते । तदेतत् क्रियमाणम् । कर्म अनुपभुक्तं नैव क्षयमेति । ततो जीवः कृतस्य कर्मणः फलस्वरूपं स्वर्गं नरकं वाधिगच्छति । तत्र च कर्मफलमनुभूय पुनश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जन्म लभते, कर्म च करोति। यः कामनाविरहितः, निष्कामः आप्तकाम आत्मकामश्च स ब्रह्मणि लीयते, न च तस्य जन्म सम्भवति।१।

मानवः कर्मणः प्रेरणया ज्ञानशक्तिं (Thought) इच्छाशक्तिं (Desire) क्रियाशक्तिं (Action) नियोजयति। फलेन तस्य भावनाया वासनायाश्चेष्टायाश्चान्तो न दृश्यते। प्रत्येकं जन्मनि स अस्यास्त्रिविधायाः शक्तेर्नियोगेन बहूनि कर्माणि करोति, बहुविधैश्च सम्बन्धैः संसृज्यते, तेन स जन्मान्तरमधिगत्य कस्येष्टं कस्य वाऽनिष्टं करोति। तेन कोऽपि तस्य मित्रं भवति, अपरश्च शत्रुर्जायते। तदिदं समष्टिरूपं कर्मबन्धनं तं पुनः सन्निधिसम्पर्कसाहचर्यैरावध्य कर्मपाशं दृढं करोति। सुकृतस्य दुष्कृतस्य च फलेन जायमानं सुखं दुःखं वा स स्वयमनुभवति यस्य यत्कृतं ततस्तदनुरूपं लभते। परमात्मनो लाभ पर्यन्तं स एषु जन्मवृद्धिक्षयादिषु भोगेषु च

१। तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य
प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्
तस्माल्लोकात्पुनरेत्य तस्मै लोकाय कर्मणे॥
इति नु कामयमानोऽथाकामयमानो योऽकाम निष्काम,
आप्तकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति॥

बृहदारण्यकोपनिषत्।

यदा सर्वे प्रमुच्यन्ते कामा यस्य हृदि स्थिताः
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥

बृहदारण्यकोपनिषद्।

"संयमेन त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्।"

ब्रह्मसूत्रम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सांसारिकेषु भावेषु चक्रवदावर्तते । २

अस्य कर्मवादस्य प्रवाहेण द्वे शक्ती उत्पद्येते एका दैवम्, अपरा च पुरुषकारः । दैवं नाम मानवस्य पूर्वकृतं प्रारब्धम् । संचितस्य कर्मणः फलम् । पुरुषकारस्तु क्रियमाणं कर्म । यत्कर्म क्रियते, तस्य फलमित्यर्थः । उभयोरपि प्रतिभूर्मानव एव । ३

शास्त्रं प्रतिपादयति-शरीरं, महङ्कारः बुध्या मनसा च सह सकलानीन्द्रियाणि चेष्टाः दैवं चेति पञ्चैव सर्वाणि कर्माणि कुर्वन्ति । मनुष्यः शरीरेण मनसा वाचा च यद्यत् सदसत्कर्म करोति, एतानि तत्र कारणानि भवन्ति । ४ (सावशेषम्)

---

२ अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।

ब्रह्मवैवर्त पुराणेम्

प्रारब्ध कर्मणां भोगादेव क्षय इति स्मृतिः ।
यादृशेन तु भावेन यद्यत्कर्म निषेवते ।
तादृशेन शरीरेण तत्तत्फलमुपाश्नुते ॥ मनुः ।
एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् । मनुः ।

३ । पूर्वजन्म कृतं कर्म तद् दैवमिति कथ्यते

× × × ×

स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् ।

मत्स्यपुराणम् ।

४ । कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥

ब्रह्मसूत्रम् ।

दैवं पुरा यत्कृतमुच्यते तु तत्पौरुषं यत्त्विह कर्म दृष्टम् ॥

चरकसंहिता ।

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्,
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ।
शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ।

गीता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैदिका देवाः

(अनुवृत्ताः)

लेखकः –श्री दुःखिश्याम पट्टनायकः

पृथिवीस्थानीयेषु देवेषु अग्नेरिव बृहस्पतेः सोमस्य च बहुशो-ल्लेखो दृश्यते। द्युस्थानीयेषु देवेषु वरुणस्य स्थानमतीवोच्चै महत्व पूर्णं च।

अतो विश्वान्यद्भुता चिकित्वा अभिपश्यति कृतानि च या कर्त्वा।'

(१।२५।११)

विद्वान् जनो वरुणस्य कृपया वर्तमानानि भविष्यन्ति च सकलानि अत्यद्भुतानि तत्वानि ज्ञातुं प्रभवति। एतद्व्यं वरुणो जगति जनानामुदरपूर्त्ये अमितमन्नं प्रस्तौतीति वेदेभ्यः प्रतीयते। ऋग्वेदस्य प्रथम मंडले ह्येवं संदृश्यते—

उतयो मानुषेष्वा यशश्चक्रे असाम्य अस्माकमुदरेष्वा।

(१।२५।१५)

एवमृग्वेदस्य विभिन्नेषु स्थलेषु वर्णितमास्ते। अतएवासौ नैतिकदेवत्वेन परिगण्यते। तेन हि सूर्यचन्द्रग्रहनक्षत्रादयः प्रकाशन्ते। स खलु सर्वज्ञः, पापं सोढुं न प्रभवति, पापिनश्च भीषणं दण्डयति। एतस्य हि प्रभावं 'काले वर्षतु पर्जन्यः, पृथिवी शस्यशालिनी' इत्याद्युक्तयः प्रख्यापयन्ति। गीताऽपि तमेवार्थं 'पर्जन्यादन्नसम्भव' इत्यादिनानुवदति। स एव अन्नाद्युत्पादनद्वारा प्राणानामाधार इति लोकैः कृतज्ञताप्रदर्शनपूर्वकमभिवन्द्यते। 'देशोऽयं क्षोमरहित' इति प्रवादोऽपि तन्मूलक एव।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्तरिक्षचारिषु च देवेषु इन्द्रस्य प्राधान्यं स्वीकरणीयं भवति। ऋग्वेदस्य प्रायशश्चतुर्थो भागस्तमेनमिन्द्रं विषयीकरोति। तत्र चायं शत्रुदमनोऽसीमशक्तिश्चेति चित्रितोऽस्ति।

द्युस्थानीयेषु देवेषु विष्णुः, पूषा, मित्रः, सूर्यः सविता च विभिन्नैर्गुणैरुपश्लोकिता वर्तन्ते। विष्णुस्तावदाकाशचारिणः सततं व्यापृतस्य सूर्यस्यैव प्रतीकः।

'शंनो मित्रः शं वरुणः शंनोभवत्वर्यमा शंनो इन्द्रो बृहस्पतिः शंनो विष्णुरुरुक्रमः। नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्मवदिष्यामि ऋतं वदिष्यामि, सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्।' इति

एवमादिषु विष्णुरुरुक्रमत्वेन वर्णितोऽस्ति। स च पादत्रयेण विश्वमभिमाय तिष्ठतीत्यपि उल्लिखितमास्ते (एको विममे त्रिभिरित् पदेभिः (१।१५।३) एतेन तस्य त्रिविक्रम इति विरुदमपि साधितं भवति पुराणवर्णितं वामनावतारत्वमपि संसूचितं भवति। वेदे पूषा पशूनां रक्षकत्वेन वर्णितः। तदिदं पशुपालनं तात्कालिक्याः पशुपालनक्रियायाः सूचकं भवति। मानव समाजस्य हितकारकत्वरूपेण मित्रस्य वर्णनं कृतमस्ति।

त्रिविधेषु देवेषु रुद्रस्य आदरणीयोपास्यदेवतात्वेन परिगणनं भवति। रुद्रस्य वैदिक स्वरूपविषये विदुषां सुमहान् मतभेदो दृश्यते। बहवस्तावत् रुद्रं द्राविडदेवतारूपेण परिगणयन्ति। कालक्रमेण सोऽयं देवो वेदे पदमाधत्तेति ते विश्वसन्ति। अन्ये तु वैदिकं रुद्रं न द्राविडलिङ्गरूपेण परिगणयन्ति परन्तु अग्निस्वरूपं मन्यन्ते। तेषामेतादृशी धारणा तावन्नैव निर्मूला भाति। बह्वीषु ऋक्षु रुद्रस्याग्नित्वेनोल्लेखो दृश्यते। तथाहि—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वमग्ने रुद्रो (ऋग्वेदः ५१'६
तस्मै रुद्राय न योऽस्त्वग्नये (अथर्ववेदः ६।७३
अग्निर्वै रुद्रः (शतपथ ब्राह्मणम् ३-१-३, अतः
केचन रुद्रं ज्योतिर्लिङ्गत्वेन स्वीकृत्य आर्यदेवतात्वेनाभिप्रयन्ति।

वैदिकीषु देवीषु ऊषयाः स्थानं समुन्नतं वर्तते ॥ एषा हि परमरमणीया। वर्तकीव सुन्दरपरिच्छदा पुराणी युवतिरिति कीर्तिता। एषा हि पुराण्याऽपि नित्यं नवयौवना युवतिरिति निर्दिष्टा।

आसां देवतानां पूजनक्रमोऽपि नैकविधो दृश्यते। एतदर्थं विभिन्ना रीतयो नियमाश्च निर्णीताः सन्ति। वेदेषु एषां देवानां पूजनार्थं यज्ञार्थं यज्ञानामुच्चावचानां परिकल्पना विहिता अस्ति। त एते यज्ञाः कथमिव क्रियेरन् ? यागो नाम देवोद्देशेन द्रव्यत्यागः त एते चन्द्रसूर्यादयो देवा मानुषाल्लोकात् अतीवदूरे वर्तन्ते। कथमेते पृथिव्यां दीयमानहविर्गृह्णीयुरिति काचन आशङ्का जायते। परन्तु एतादृश्या आशङ्काया न कोऽप्यवकाशो वर्तते अग्निस्तावदत्र परिवहनकार्यं करोति। अतएव देवा अग्निमुखा उच्यन्ते। अग्निश्च 'हविर्भुक्' 'हव्यवाहन' इत्युद्गीयते ; तमिमं भावं शुक्लयजुर्वेदस्य द्वाविंशेऽध्याये वर्तमाना अमी मन्त्राः संसूचयन्ति—

'अग्निं स्तोमेन बोधय समीधानो अमर्त्यम् हव्या देवेषु नो दधत् ।१५।
"स हव्यवाडमर्त्य उशिग् दूतश्च नोदितः अग्निर्धिया समृण्वति ।१६।
हव्यवाहमुपब्रुवे देवाँ आसादयादिह' इति।

सामवेदस्य प्रथम प्रपाठकस्य प्रथमाध्यायस्य प्रथमे मन्त्रेऽपि भोऽयं विषय उल्लिखितोवर्तते। यज्ञक्रिया केवलं देवतानां पूजनाय न क्रियते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तादृशो भावोऽन्धविश्वास इत्युच्यते, न च ग्राह्यो भवति। यज्ञेषु देव-देवीनां पूजनं वैज्ञानिक भित्तौ प्रतिष्ठितम् । अग्नौ प्रक्षिप्ता घृताहुतयः ज्वलिता धूमाकारेण सर्वतः व्याप्नुवन्ति । हव्यधूमस्याणवो वायुमण्डले विप्रकीर्णास्तदिदं मण्डलं परिष्कुर्वन्ति । बहुविधान् रोगस्य च जीवाणून् नाशयन्ति । तस्य विशुद्धस्य वायोः सेवनेन लोकानां रक्तं परिष्कृतं भवति । फलेन बाला नीरुजो बलशालिनश्च भवन्ति । अपि च हुतधूमस्य बाष्पकणा मेघात्मना परिणता भवन्ति, वर्षरूपेणच भुवि प्रति ता भवन्ति । फलेन पृथिवी शस्यशालिनी सम्पद्यते । तेन च शस्येन स्वीकृतेन मानवो जीवनं धारयति । तेन भारतीयेषु श्रेष्ठेषु प्रधानं स्थान मधिगच्छन्त्यां गीतायां यज्ञस्य वैशिष्ट्यं स्पष्टमुल्लिखित-मास्ते । तत्र ह्येवमुल्लिखितमास्ते—

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥
देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः,
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥

तृतीयाध्यायः

ततश्च यज्ञस्य फलं प्रदशयन्ती गीता बोधयति--

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥इति ॥

गीता ३।१४

भगवान् मनुरपि तमेतमर्थं समर्थयति । उक्तं हि तेन—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टि र्वृष्टेरन्नं ततः प्रजाः ॥इति

महाभारतेऽपि सोऽयं श्लोकः शान्तिपर्वणि समुल्लिखितो दृश्यते । यजुर्वेदेऽपि यज्ञकर्मणा अनुष्ठितेन शतस्य वत्सराणां परमायुर्भवतीति प्रतिपादितमास्ते ।

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ॥

अध्यायः ४०

वेदेषु बहुविधानां यज्ञानां विभिन्नानां देवानां देवीनां च समुल्लेखेऽपि एक एव देवः स्वीकरणीयो भजनीयश्चेति कथितमास्ते । एतेन प्राचीनानामार्याणां मनोवैज्ञानिकस्य दृष्टिकोणस्य परिचयः संसूच्यते । मानवो यदि एकनिष्ठो न भवति तर्हि स नैव सिद्धिं लभते, यतः सर्वेऽपि वेदा एकेश्वरवादमेव विषयीकुर्वन्ति । परमेश्वरो ह्येकः, स च पूजनीय इति शतपथब्राह्मणेऽप्युक्तम् ।

आत्मेत्येवोपासीत । + + + योन्यां देवतामुपास्ते, न स वेद । यथा पशुरेव स देवानाम् ।

शुक्लयजुर्वेदीयोऽधस्तनो मन्त्रोऽपि तमेवार्थं प्रकाशयति ।

वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाऽतिमृत्युमेति
नान्यः पन्था विद्यतेऽयनाय ॥

इति । अन्यासु संहितासु उपनिषत्सु पातञ्जले योगदर्शनेऽपि सोऽयमेकेश्वरवादः परमुपबृंहितो वर्तते । वेदस्योपासनाकाण्डेऽपि स एवार्थःप्रतिपादितः । इन्द्रमित्र-शिवा एकत्वेनाभिवर्णिताः । भगवतो विभिन्ना गुणाः एकैकप्रतीकाश्रयेण विभिन्नरूपतया वर्णिताः ःः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्रं मित्रं वरुणमग्निमाहु–
रथो दिव्याः सुपर्णो गरुत्वान् ।
एवं सद्विप्रा वहुना वदन्ति
अग्निं यमं मातरिश्वानमाहुः ।

ऋग्वेदः ११-१२

तदेवाग्नि स्तदादित्य-
स्सद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद्ब्रह्म
ता आपः स प्रजापतिः ।

यजुर्वेदः ३२।१

कैवल्योपनिषद्यपि स एवार्थो विवर्णित आस्ते ।

स ब्रह्मा स विष्णुः स रुद्रः स शिवर्शशवः
सोक्षरः स परमः स परःस्वराट्
स इन्द्रः सोग्निर्लग्नः स चन्द्रमाः ॥

एक एक हि देवो ब्रह्मरूपेण सृजति, विष्णुरूपेण पालयति, रुद्ररूपेण च संहरति । स एव च शिवरूपेण सकलस्य विश्वश्य मङ्गलं विदधाति । एकस्यैवाद्वितायस्य विभिन्नकार्यानुष्ठानवशात् विभिन्नानि नामानि भवति । वृंहतीति ब्रह्मा, विष्णानि विष्णुः, रोदयते इति रुद्रः, इन्दतीत्ति इन्द्रः, इत्यादिनामानि एकस्येव भगवतः । सोऽयमेवभावः गीतायां सम्यगेव विबोधिती वर्तते ।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी

इत्यादिषु सम्यगेव बोधितोऽस्मि । अद्वैतसिद्धान्तेऽपि इदमेव तत्त्वं सम्यगेव स्फुटीकृतं वर्तती ।

—c—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

म नो र मा

मासिक संस्कृतपत्रिका

ललितैः पदविन्यासैर्विचित्रैर्भावबन्धनैः ।
भावुकानामन्तरङ्गे प्रतिभातु मनोरमा ।।

पञ्चमो वर्षः | १८८७ शकाब्दम्, आश्विनकार्तिकमासौ October and November 1965 | सप्तमी अष्टमी च सञ्चिके

सुभाषितानि

दानार्थिनो मधुकरा यदि कर्णताल—
दूरीकृताः करिवरेण मदान्धबुद्ध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने चरन्ति ।।

यत्नाद्वनस्त्वमलिना मलिनाशयेन
किं तेन चम्पक, विषादमुरीकरोषि ?
विश्वाभिरामनवनीरदनीलवेशाः
केशाः कुशेशयदृशां कुशली भवन्तु ।।

मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादलसपुरुषानादरभरैः ।
यथा यूनस्तद्वत्परमरमणीयाऽपि रमणी
कुमाराणामन्तःकरणहरणं नैव कुरुते ।।

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधि र्विपुला च पृथ्वी ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तररामचरितसमालोचना

(अनुवृत्ता)

प्रबन्धा—श्रीअनन्त त्रिपाठिशर्म्मा

"निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम् ।
अद्यैव वा मरणमस्तु भवान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥" इति ।

एतद्रीत्या निरपराधायाः निष्पापाया उत्पत्तिपरिपूतायाः सीताया निर्वासनं सर्वथा रामचन्द्रस्यानुचितमेव ।

स चायं प्रमादः रामचन्द्रस्य महानुभावस्य धीरोदात्तस्य विना सीतायाः स्वीकरणं नैवापनोदयितुं शक्यते । सीतायाश्च स्वीकरणं सकलानां प्रजानामनुमोदनं विना नैव सम्भवति, प्रजाश्च यदि सीतायाः पातिव्रत्यविषये सम्यग नावबोधेरन्, तर्हि नैवानुमोदेयुरिति सर्वेषां समस्तं देवर्षिसिद्धादिद्वारा सीतायाः पातिव्रत्यस्य निदर्शनानि प्रदर्शयितुं भगवान् वाल्मीकिः स्वप्रभावेण सर्वमपि ससुरगन्धर्वसिद्धादिकं भूतग्राममेकत्र सन्निवेशितं चकार । तेन सर्वेषां पुरतः सीतायाः निरवद्यताप्रदर्शनमेव सर्वस्य भूतग्रामस्य एकत्र समावेशे फलमिति क्रमः ।

अन्तर्नाटिकाया अवतरणम्

उत्तररामचरितस्य सप्तमेऽङ्के काचन अन्या नाटिका कविना परिकल्प्य सन्निवेशिता । नाटकस्यान्तःसन्निवेशितत्वादियमन्तर्नाटिकेति व्यपदिश्यते । चतुर्थेऽङ्के जनकादिभिः सह लवस्य सम्भाषणावसरे लवमुखादस्माभिरवगतं यद्रामायणस्य कोऽप्येकदेशो महर्षिणा वाल्मीकिना रसवानभिनेयार्थः कृतः, स च केषांचिदन्तेवासिनां हस्ते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भरतस्य नाट्याचार्यस्यान्तिकं प्रहितः, स किल तमप्सरोभिः प्रयोजयिष्यतीति । सोऽयमेव रामायणस्य सीताविसर्जनानन्तरः सीतायाः प्राप्तप्रसववेदनाया गङ्गायामात्मविसर्जनम्, दारकद्वय-प्रसूतिः, गङ्गापृथिवीभ्यां परिग्रहः, पुत्रयोर्जृम्भकास्त्रप्राप्तिः, रसातल-नयनम् स्तन्यत्यागादनन्तरं वाल्मीकिसन्निधे समर्पणमित्येवं रूपः कथाभागः अन्तर्नाटिकाया विषयवस्तु । तस्यैतस्य भरताचार्येणा-प्सरोभिः प्रयोजयिष्यमाणस्य दर्शनार्थं भगवता वाल्मीकिना सदेवासुर-गन्धर्वादिमुनिवृन्दसहितो जीवलोक उपनिमन्त्रितः, स्वप्रभावेण सन्निधापितश्च । रामभद्रोऽपि लक्ष्मणादिसहितस्तस्यैतस्य रूपकस्य सन्दर्शनार्थमामन्त्रितः । राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः सीताशोकेन पुटपाकप्रतीकाशेन दन्दह्यमानहृदयोऽपि केवलं वाल्मीकिगौरवात् तदिदं रूपकं द्रष्टुं समायातः । गङ्गातीरमातोद्य-स्थानं कल्पितम् । सर्वेऽपि सदेवासुरराक्षसप्लवङ्गमप्रमुखा मर्त्या यथायथमासनेषु लक्ष्मणेन समुपवेशिताः । राजासने रामचन्द्रः समुपविष्टः । लवकुशावपि चन्द्रकेतुसदृश्या प्रतिपत्त्याउपयुक्तयो-रासनयोः आसीनावास्ताम् । रूपकं चाप्सरोभिः प्रयोजितमासीत् । तदयमन्तर्नाटिकायाः सन्दर्भः ।

उत्तररामचरितमेकं रूपकम् । इदं च रङ्गालयेषु परिमित-भूभागेषु प्रयोजनीयं भवति । तेषु च ससुरासुरराक्षसमुनिवृन्दानां पुरतः अभिनेयवस्तुनः प्रदर्शनं कथं सम्भवतीति नियतमालोचनीयं भवति । कविनाऽपि सर्वथा असम्भाव्यमिदमिति विचारयता वाल्मीकिमहर्षेः प्रभावात् सकलमपि सम्भवितुं शक्नोतीति 'स्वप्रभावेण सन्निधापित" इति वाचैव प्रतिपादयता आत्मा निर्विकल्पः समापादितः ।

प्रसङ्गेऽस्मिन् इदमपि सहृदयानां पुरत उपस्थापयामः । नाटकमध्ये अन्यस्य नाटकस्यावतरणं न भवभूत्युपज्ञम् । कविकुल-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तिलकस्य कालिदासस्य विक्रमोर्वशीयेऽपि लक्ष्मीस्वयम्वरनामकस्यापरस्य नाटकस्यावतरणं संदृश्यते। तत्र हि लक्ष्मीरूपधारिणी उर्वशी समवेतेषु लोकपालेषु कतमस्मिन् तेऽभिनिवेश इति मेनकया पृष्टा 'पुरुषोत्तमे' इति वक्तव्ये 'पुरुरवसि' इति पुरुरवसि आत्मनः समधिकोत्कण्टावशादभिधाय प्रमादं कृतवती। रसभङ्गरुष्टेन भरतेन 'एहि मर्त्यत्व' मिति शापस्य भाजनमवर्तत। सोऽयं शापश्च सुरपतिना पत्युरात्मजसुतदर्शनावधिः कृतः, सा च महेन्द्रेण स्वमित्रं पुरुरवसं तावत्पर्यन्त मुपचरितु मनुज्ञाता पुरुरवसमुपगतेति प्रकृतस्य विषयवस्तुन उपक्रमाये तदिदं नाटकं प्रकल्पते। परन्तु कविकुलगुरुणा कालिदासेन लक्ष्मीस्वयम्वरनाटकवृत्तान्तः केवलं सूच्यवस्तुत्वेनोपक्षिप्तः, भवभूतिस्तु तामिमां नाटिकां नाटकस्यान्तः प्रयोजितवान्। अपि च विक्रमोर्वशीये अवतीर्णस्य नाटकस्य लक्ष्मीस्वयम्बरमिति नाम स्पष्टमुल्लिखितमास्ते। अत्र तु प्रयुक्तस्य रूपकस्य न किमपि नामोल्लिखितम्। "कार्यं निर्वहणेऽद्भुतम्" इति नाटकरीतिमनुरुन्धानेन कविना सर्वमपि करुणाद्भुतमेव चित्रितम्। काचन कृतिरभिनीयेतेत्येव सर्वत्र प्रचारः कृतः। सप्तमाङ्कस्य प्रारम्भे हि लक्ष्मणः प्रविश्य—'अद्य खलु भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयोज्यमानां द्रष्टुमुपनिमन्त्रिताः स्म' इत्येव निर्दिशति न तु कृतेर्नाम प्रकाशयति। सूत्रधारोऽपि प्रविश्य 'यदिह किञ्चित्करुणाद्भुतरसमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य उपनिबद्धं, तदत्रभवद्भिः कार्यगौरवादवधातव्यमित्येव निवेद्य 'विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने, प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति' इति वस्तु उपक्षिप्य निर्गच्छति, रामचन्द्रश्च 'देवि, क्षणमपेक्षस्व' इति वदन् मूर्च्छति। लक्ष्मणश्च 'आश्चर्यमार्यो सह देवताभ्यां गङ्गामहीभ्यां सलिलादुदेति', इति विस्मितो विलोकयति। सीतायाः सान्त्वनम्, जृम्भकास्त्राणाम् विर्भावः, गङ्गापृथिव्योः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिचयः । नयतु मामात्मनोऽङ्गेषु विलयमम्बेति सीतायाः सानुक्रोशा प्रार्थना । 'अविलीना वर्षसहस्रं भूया' इति भागीरथ्या आशीः । स्तन्य त्यागपर्यन्तं पुत्रकयोरवेक्षस्व, ततः परं यथा ते रोचेत, तथा करिष्यसीति मातुरुपसान्त्वनम् । स्तन्यत्यागनन्तरं भगवतो वाल्मीकेसन्निधौ समर्पणम् । एष एव वृत्तान्तोऽन्तर्नाटिकायां गर्भीकृतः । विषयस्यात्यन्तं संक्षिप्तत्वात्सूक्ष्मत्वात्प्रकृतोपयोगित्वाच्च सेयमन्तर्नाटिका न सामाजिकानां मनसि किमपि वैरस्यमादधाति, प्रत्युत विस्मयं जनयति । अत्र दारकद्वयं, सीता, भगवती भागीरथी पृथिवी चेति पञ्चैव पात्राणि सन्ति । लक्ष्मण मुखेन 'व्याप्तं च देवर्षिभिरन्तरीक्षमिति प्रतिपादयन् देवानामृषीणां च स्थानमन्तरीक्षे कल्पयन् रङ्गालयस्य परिमितायतनत्वं समर्थयति । विषयस्य सूक्ष्मत्वात् सङ्क्षिप्तत्वाच्च नामनिर्देशोऽपि न कृतः । अतएवायं कवि नाटकस्यान्तरन्तर्नाटिकां प्रयोजयन् नैव कटाक्षस्य पात्रं भवति, प्रत्युत कमप्यादर्शं स्थापयति।

रामायणे हि सीतादेवी वाल्मीकेराश्रमे पुत्रद्वयं प्रासूत, पुत्रयोश्च वयःप्राप्ति यावत् तत्रैवातिष्ठत् । आश्रमपदं शान्तं कल्मषरहितमपि मुनिकुमाराध्युषितम् । भवभूतिना च कविकुलगुरोः शाकुन्तलीयआशयो मनसाऽवश्य विचारितो भवेत् । तत्र हि कालिदासः पतिविरहिताया स्तरुण्याःज्ञातिकुलाश्रयणमपि नानुमनुते । इयं हि तदुक्तिः—

"सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथाभर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वो प्रमदा स्वबन्धुभिः" ॥

अतएव कालिदासः दुर्वाससः शापबलेन दुष्यन्तेन निराकृतां शकुन्तलां न कण्वस्य कुलपतेः पितुराश्रमं प्रापयति, परन्तु मातुर्मेनकायास्तत्रा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वधाने मारीचस्याश्रमे स्थापयति । एवमिवास्माकं भवभूतिर्नहि सीतादेवीमेकाकिनीं वाल्मीकेराश्रमे स्थापयितुमभिलषति, परन्तु मातुर्विश्वम्भरायास्तत्त्वावधाने संन्यस्यति। यद्यपि सीतादेवी मातुर्निदेशेन रसातलं प्राविशत्, तथापि तत्र पृथिव्यामेव संरक्षिता अवर्ततेति सन्देहो नास्ति । अरुन्धतीद्वयेन सीतानिर्वासनावसरे वसुन्धरादेवी रामं स्मारयति 'पृथ्वीपते रामचन्द्र, स्मर तत्सान्त्वनावसरे आत्मनो वचनम्, 'भगवति वसुन्धरे श्लाघ्यां दुहितरमवेक्षस्व जानकीमिति । तत्र अनृणा-स्मि प्रयोक्तव्य'ति । एवं भगवती वसुन्धरा जामातू रामचन्द्रस्य पृथ्वीपते रघुवंश्येन जानकीं रक्षतीति स्पष्टं ज्ञायते । एवमस्माकं कविः सीतादेवीं मातुर्वसुन्धरायाः समीपे स्थापयन् परमौचित्यं प्रदर्शयति ।

प्रसङ्गेऽस्मिन् इदमपि प्रतिपादयामो यत् जनकनन्दिनी सीता भर्त्रा-निर्वासिता पावने महर्षिवाल्मीकेराश्रमे भर्तुर्विरहजं दुःखं व्यतीयाय । अत्र तु भगवत्या भागीरथ्या रसमाता वसुन्धरया च कृतप्रसादा सीतेति कोऽपि पवित्रतातिशयः समवेतैः सामाजिकैः प्रत्यक्षीक्रियते । सीतायाः परमपावनत्वप्रतिपादनमेव उत्तररामचरितस्य परमं लक्ष्यम् । तच्च उभयोः सम्पर्कात् समधिकं प्रतिभासते । तदिदं रहस्यं कविनाऽपि उभयोर्मुखेन विशदीकृतमास्ते ।

> "जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे ।
> आवयोरपि सम्पर्कात्पवित्रत्वं प्रकृष्यते ॥"

इति हि तयोरुक्तिः ।

चित्रदर्शनावसरे हि जृम्भकास्त्राणि दृष्ट्वा सीता यदा कण्ठे उपरि निरन्तरस्थिता उपस्तुवन्तीव आर्यपुत्रमिति पृच्छति, तदा लक्ष्मणस्तान्येतानि सरहस्यानि जृम्भकास्त्राणि ताडकावधे तातकौशिकेनार्यस्य प्रसादी-कृतानि' इति विवृणोति । रामचन्द्रश्च वन्दस्व देवि दिव्यास्त्राणीत्यु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पक्रम्य 'सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्तीति' प्रसङ्गवशादभिधत्ते । तस्यादेवानुज्ञानात् लवकुशयोर्जन्मत एव जृम्भकास्त्रलाभो भवति । आत्रेयीवासन्तीसंवादे च 'स्वतःसिद्धानि किल तयोः सरहस्यानि जृम्भकास्त्राणी'ति प्रतिपादितम् । एषामेव प्रयोगेण वीरसंवादविघ्नकारिणः चन्द्रकेतोः सैनिकान् लवः स्तब्धीकरोति । पुत्रयोः प्रत्यभिज्ञावसरे च रामचन्द्रः चित्रदर्शनाभ्यनुज्ञानं जृम्भकास्त्रप्राप्तौ कारणं स्यादिति सन्दिग्धे । परन्तु सामाजिका निश्चितरूपतया न किमपि ज्ञातुं प्रभवन्ति, ज्ञातुं च कुतूहलिनस्तिष्ठन्ति । अन्तर्नाटिका चेयं तेषां कुतूहलं चरितार्थयति ।

"देवि सीते जगद्वन्द्ये, गतिर्नौ पुत्रकौ-हि ते ।
आलेख्यदर्शने देवो यदाह रघुनन्दनः ।"

ति श्रुत्वा भगवती भागीरथी 'रामभद्रतुल्यकौ ते पुत्रकौ जाता' विति सीतामाश्वासयति, सीता च दुःसहं निर्वासनदुःखं पुत्रयोऽसाधारणास्त्रलाभेन किञ्चिदिव लघूकरोति ।

अपि चान्तर्नाटिकासाधनेन कविः रामचन्द्रस्य सीतानिर्वासनं नान्याय्यमिति समर्थयति । अत्र हि भगवती वसुन्धरा दुर्विसहेनात्मजाया शोकावेगेन विस्मृत हृदया 'युक्तमेतद्वा रामभद्रस्य ?

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः
नाहं न जनको नाग्निर्नानुवृत्तिर्न सन्ततिः ॥

इत्युक्त्वा किञ्चिदिव प्रकुप्यति, तदा भागीरथ्या कृतबोधना आत्मानं संयमयति, वदति च आपातदुःखावेगाद् ब्रवीमि । न पुनर्न जानामि सीतास्नेहं रामस्येति वदन्ती रामचन्द्रस्य कार्यं समर्थयति । भगवती भागीरथी च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"धीरं लोके विततमयशो या च वह्नौ विशुद्धि –
र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु।
इक्ष्वाकूणां कुलधनमिदं यत्समाराधनीयः
कृत्स्नो लोकस्तदिह गहने किं स वत्सः करोतु ।"

इति प्रतिपादयन्ती सर्वात्मना रामचन्द्रस्य कार्यमनुमनुते । एवं श्वश्रूजनेन भगवत्या भागीरथ्या च रामभद्रस्याचरितं सर्वात्मना अभिनन्दितं भवतीति आतोद्यस्थले उपस्थिताः सदेवासुरराक्षसप्लवङ्गमा लोकाः प्रत्यक्षं कुर्वन्ति । सोऽयं विषयोऽस्माभिः पूर्वमेव विपुलतरं विचारितः। प्रसङ्गेऽस्मिन् इदमेव प्रकाश्यते यदुत प्रजानुरञ्जनबद्धकक्षस्य सीताप्राणस्यापि रामभद्रस्य सीतानिर्वासनमन्तरा नान्या गतिरवर्वतेत अन्तर्नाटिकातः प्रतीयते ।

सीतायाः पातिव्रत्यविषये निरवद्यताविषये च रामभद्रस्य चेतसि नासीत्सन्देहलव इति प्रागवोचाम । लक्ष्मणादीनामपि तथैव सुदृढो विश्वासोऽवर्तत। अन्तर्नाटिकायां हि गङ्गा भागीरथीभ्यां यदा "आवयोरपि यत्सङ्गात्पवित्रत्वं प्रकृष्यते" इत्युक्तं तदा लक्ष्मणः सरलया भाषया 'आर्य श्रूयताम्', इति भ्रातरं प्रार्थयते रामभद्रश्च 'शृणोतु लोकः' इति व्याहरन् सीताविषयं स्वमभिप्रायं निपुणं प्रकटयति । तेन विज्ञातसीतापातिव्रत्योऽहं केवलं लोकरञ्जनार्थमेव तामहं विवासितवानस्मीति सूक्ष्मतया प्रतिपादयति। इदमेव हि रामचन्द्रस्याचरितं रूपकस्य जीवातुः। अन्तर्नाटिका च तत्रालोकं पातयन्ती रूपकस्योपादेयतासाधने परमुपकरोति । एवमियमन्तर्नाटिका सीतादेव्याः पतिप्राणायाः परमपातिव्रत्यं प्रतिपादयन्ती नायकस्य चरित्रे कमपि विशेषमवगमयति।

(सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेमनशतकम्

तिं० गु० श्री वरदाचार्यः एम्. ए. (आनर्स्)

शम्भोरुमापतेर्दास इति पात्रं जनस्तुतेः ।
उवाच वेमनो धीरो वेमेदं लोकमङ्गलम् ।१।
युक्तं विज्ञाय वदतां न वयोभेद ईक्ष्यते ।
ज्वलेद्बालस्य दीपोऽपि श्रूयतां वेम विश्वद ।२।
याच्यन्तां याचितुं योग्या दत्तात्काङ्क्ष्यं न चाधिकम् ।
अददानो न चाभ्यर्थ्यः श्रू ।३।
नास्थानेऽधिकता वाच्या नैच्योक्तेः स्वस्य न क्षतिः ।
किं नादर्शे नभोऽल्पं स्यात् श्रू ।४।
अल्पधीरधिकारस्थः सतो निष्कासयेद् ध्रुवम् ।
चर्म भुङ्क्ते न चेक्षुं श्वा श्रू ।५।
अल्पो वदति साटोपं प्रशान्तं सज्जनः पुनः ।
कांस्यवर्तिक स्वनेत्स्वर्णं श्रू ।६।
ये वदन्त्यनृतं शश्वत् तेषु लक्ष्मीर्न तिष्ठति ।
यथाम्भः शिथिले कुम्भे श्रू ।७।
आचारः क्षुधयाऽपैति चित्ताशुद्धिस्तमोभरात् ।
पूर्वधैर्यं विपद्भिश्च श्रू ।८।
दत्तं चेत्क्षुधितायान्नमीश्वरायेव सार्थकम् ।
रिक्तायेव कृतं दानं श्रू ।९।
आत्माशुद्धौ किमाचारात् चित्ताशुद्धौ शिवार्चनात् ।
पात्राशुद्धौ फलं पाकात् श्रू ।१०।
निर्णयादक्षमाध्यस्थ्यं घटनापटुनैपुणी ।
अदातुरारम्भो व्यर्थः श्रू ।११।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आशा सर्वत्र पापिष्ठा यतयोऽप्यनया जिताः।
प्राप्तत्यागी विशुद्धात्मा श्रू ।१२।
वर्धते विभवो दातुः क्षीयते न कथञ्चन।
कूपे तोयमिवोद्धारे श्रू ।१३।
दातुर्दानमदाता स्वैः प्राणैर्वारयते सदा।
लता दुष्टेव कल्पद्रोः श्रू ।१४।
गृहे धनं ममैवेति लुब्धो रक्षति भूतले।
न काचोऽप्येनमन्वेति श्रू ।१५।
त्रेधाच्छिन्नमयस्तप्तं लोहकारेण योज्यते।
मनस्तु भिन्नं नैकं स्यात् श्रू ।१६।
दैवलोपात्सुखं नश्येत् समचित्तस्ततो भवेत्:
भृत्योऽभूद्विपदा पाथः श्रू ।१७।
अदात्रा कारयन्दानं दात्रा दानविपर्ययम्
अलङ्घ्यो विधिरीशस्य श्रू ।१८।
ईश्वरो विषमे ध्यातो न प्रसीदेत् वृथा श्रमः।
कुतोऽसौ न सुखे दृष्टः श्रू ।१९।
साधीरसाधुः सम्भूतः सादयत्यखिलान्वयम्।
माधुर्यं मञ्जरीवेक्षोः श्रू ।२०।
उद्धरत्युत्तमो वशं मध्यमस्तमुपेक्षते।
अधमस्तदधःकारी श्रू ।२१।
कर्पूरक्षारयो रूपं तुल्यं भिन्नस्तु तद्रसः।
पुण्यपापनरेष्वेवं श्रू ।२२।
ऋणदाने भवेत्पूषा शोधनप्रार्थने यमः।
उत्तमर्णोऽधमर्णस्य श्रू ।२३।
सत्यासत्ये न विज्ञेये अतत्त्वज्ञातृभिर्जनैः।
न व्याख्येये श्रुते एव श्रू २४।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आशापिशाचिकाविष्टो बम्भ्रमीत्यवशो नरः ।
शुन एवोच्चिताशेयं श्रू ।२५।
अधीतश्रुतविद्योऽपि न नीचो दोषमुज्झति ,
क्षीरान्नैल्यमिवाङ्गारः श्रू ।२६।
विद्या सर्वा स्वधीतासीत् मृग्या सा चिन्तयोज्झिता ।
तत्त्वमेतद्विजानीहि श्रू ।२७।
सेव्यमानं बहुक्लेशैः विश्वास्यं न हि राजकम् ।
सर्पस्नेहो हि तत्सङ्गः ।२८।
ऊना हि महिषा गोभ्यो मूर्खत्वं तत्र कारणम् ।
कथं स्यान्निपुणो मूर्खः श्रू २९।
विनेयस्स्य द्वलीवर्दो वर्षेणैकेन शिक्षितः ।
न तु मूर्खः शताब्दीभिः श्रू ३०।
सर्वैर्बोध्यो विजिज्ञासुः मूर्खो न ब्रह्मणा पुनः ।
केनावक्रा नदी कार्या श्रू ।३१।
तीर्णो नदीं गतः पारं न पोतो वस्तुवाहकः ।
कृतार्था विमुखा हि स्युः श्रू ।३२।
ऐकमत्यमुपेयं नः तज्जास्स्युः सर्वसम्पदः ।
गजबन्धी गुणस्तार्णः श्रू ३३।
पञ्चांगुलीभिर्हस्तस्य चेष्टा न त्वेकया विना ।
स्वीयनाशे बलं नश्येत् श्रू ।३४।
यैर्नाशश्चिन्त्यतेऽन्यस्य स्वीयं ते न विदुस्ततः ।
किं ते दैवहता न स्युः श्रू ।३५।
अकार्यं रचतेऽज्ञाय लुब्धाय सरसं वचः ।
पङ्कं शूकरबृन्दाय श्रू ।३६।
अन्येन स्थापितं पक्षं क्षणेनैकेन खण्डयेत् ।
धाता तन्मण्डने नालं श्रू ।३७।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शर्कराक्षीरदं सर्पः न दशत्यनुधाव्य किम् ?
वर्जनीयस्सदा दुष्टः श्रू ।३८।
धनितायाः कुलीनत्वं स्थानं सा भोगभाग्ययोः ।
अधनस्थ कुलं नास्ति श्रू ।३९।
भूषणैर्न हि दुर्गन्धः सुराकुम्भस्य शाम्यति ।
विद्ययैवासतो दोषः श्रू ।४०।
अनार्येण समं स्नेहो महान्तमपि बाधते ।
मक्षिकेवोदरं प्राप्ता श्रू ।४१।
शुनको वृषभो न स्यात् मशको द्विरदोऽपि वा ।
लुब्धो दाता शशो व्याघ्र. श्रू ।४२।
सेवस्व स्वामिनं श्वेव काकवत्सौहृदं भज ।
रासभस्य क्षमां याहि श्रू ।४३।
गोलांगूलैर्नवं वस्त्रं यथा दत्वाच्र्यंसे कपिः ।
दुष्टो जनः तथा धूर्तैः श्रू ।४४।
आर्यता हीयते क्रोधात् दुःखं क्रोधाद्भवेद् भृशम् ।
आप्तकामो जितक्रोधः श्रू ।४५
दर्वीमात्रं वरं गव्यं कुम्भमात्रं न गार्दभम् ।
भक्त्या दत्तं वरं चाल्पं श्रू ।४६।
भागीरथ्या गतिश्शान्ता, क्षुद्रनद्यास्ससम्भ्रमा ।
सदसद्वर्तनं ह्येवम् श्रू ।४७।
खरः चन्दनलिप्ताङ्गः पश्चां हन्ति यथा पुरा ।
मूर्खपूजाफलं ह्येतत् श्रू ४८।
गुणिन्युपकृतेर्लेशो गिरिवद् गुरुतां भजेत् ।
विपरीतं भवेद्दुष्टे श्रू ।४९।
गुरुं विना भवेद् ज्ञानी ब्रह्मा तज्जनकोऽपि किम् ।
पेटिका कुञ्चिकोद्घाटया श्रू ।५०।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुधुक्षुर्धेनुकां वन्ध्यां पद्‌र्धति न पयोऽश्नुते ।
लुब्धयाच्ञा तथा मोघा श्रू ।५१।
यथा कुम्भस्थितो दीपो जलपूर्णो घटो यथा ।
निर्विकारस्तथा धीमान् श्रू ।५२।
आनुकूल्ये कृशः श्वापि हर्यक्षमपि बाधते ।
प्रतिज्ञा विषमे व्यर्था श्रू ।५३
चित्तशुद्धया कृतं पुण्यमण्वपि श्लाघ्यतां व्रजेत् ।
न्यग्रोधस्य कियद्बीजं श्रू ।५४।
विधिः नाशयिता दुष्टमापद्यपि न रक्षति ।
नोषरं श्लाघते स्वामी श्रू ।५५।
पादुकाश्मा श्रुतौ दंशः सूची पादेऽक्षिण रेणुका ।
मर्मघाती गृहे पीडा श्रू ।५६।
अमाधुर्याद्यथा काष्ठतुल्य मिक्षुर्भवेत्तथा ।
गुणहीनो बुधो निन्द्यः श्रू ।५७।
न हन्यात्प्राणिनं कञ्चित् हन्याल्लोकभयङ्करम् ।
छिन्द्याद् वृश्चिकपुच्छाग्रं श्रू ५८।
शत्रुमात्मवशं यातं हन्तव्यमपि संत्यजेत् ।
उपकृत्या तु तं हन्यात् श्रू ।५६।
जिघांसन्कुरुते राजा मानुषं प्रणयास्पदम् ।
स्वं गृहत्युरगो दंश्यन् श्रू ।६०।
तैलाक्तं राजते चर्म व्यायामी बलमश्नुते ।
उत्कर्षं ज्ञानतो याति श्रू ।६१।
छत्राच्छायां यथोपैति सालम्बोऽस्ति गुरोर्यथा ।
ज्ञानी नरस्तथा शास्त्रात् श्रू ।६२।
असिनैव भवेच्छेदः कथं तन्मुष्टिना पुनः ।
अबुद्धैः किं बलात्तन्त्राः श्रू ।६३।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वकुक्षेः पूरणे व्यग्राः ये जनाः प्राणिभिर्हताः।
आत्मवत् तान्न ते विद्युः शू. ।६४।
जलाद्बहिर्मृतो मीनः प्रगल्भस्तु तदन्तरे।
स्थानभ्रष्टो भवेदेवं शू. ।६५।
मायिना सह संवासात् यात्यार्यो नीचतां ध्रुवम्।
पलाण्डुना यथा कन्दः शू. ।६६।
मायाविवञ्चनात्स्वं यः त्रायते स प्रवर्धते।
ज्ञानी तत्त्वं विजानाति शू. ।६७।
प्राप्तापदः प्रतीकारात् ज्यायसी प्रेक्ष्यकारिता।
अजानन् जानतो विद्धि शू. ।६८।
पौरोभाग्यभृतः सर्वे स्वयं दोषस्य भाजनम्।
दोषं वक्ता न वेत्ति स्वं शू. ६९।
महत्यपि दरिद्रत्वे नाकार्यं कर्तुमर्हति।
अनार्यत्वं ततो नान्यत् शू. ।७०।
वरमेको मणिश्शुद्धो न काचा गणनातिगाः।
अलमेको गुणी पुत्रः शू. ७१।
नक्रो जले द्विपं हन्ति हन्यते तु बहिश्शुना।
स्थानाद्बलं न तु स्वस्य शू. ७२।
अज्ञंमन्यो भवेद्विज्ञः विज्ञमानी जडः पुनः।
मौनवानुत्तमः ख्यातः शू. ।७३।
नारब्धं लोभितोऽप्युज्झेत् न दानं कीर्तयेत् कृतम्।
अदातारं न सेवेत शू. ।७४।
शौण्डिकस्य गृहे पीतं क्षीरमाहुः सुरां समे।
स्वस्थानावस्थितेर्निन्दा शू. ।७५।
वामनः शबलः सर्पः आशा व्यर्थी च निन्दिता।
पाणिपादं तथा ह्रस्वं शू. ।७६।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वाक्यमेकमलं साधु बहुभिः किं प्रजल्पितैः ।
ज्ञातैको देव एवालं शू. ।७७।

किमदोषज्ञया बुद्ध्या भूत्या चस्वजनार्थया ।
वैद्ये नान्थाध्यभिज्ञेन शू. ।७८।

भुवं स्वीयां वदन्तं भूह् यदातारं घनं हसेत् ।
कृतान्तश्च रणाद्भीतं शू. ।७९।

दष्टं यत्पीडयेदास्यं मरीचं मलिनं बहिः ।
ईदृग्प्रीतिस्सतां लोके शू. ।८०।

औदुम्बरं फलं रम्यं कीटगर्भं विदारितम् ।
भीरधैर्यं कथं चित्ते शू. ।८१।

अकृत्तकेशं चास्नानात् पूर्तिं मलिनवाससम् ।
विप्रमप्यन्यथा ब्रूयुः शू. ८२।

चौरो देवकुले चौर्ये सक्तचेता न दैवते ।
घटान्वेषी गृहे हि श्वा शू. ।८३।

गोपो यदुकुले जातः कृष्णोऽनल्पयशा न किम् ?
गुणो न त्वन्वयो गण्यः शू. ।८४।

समरे न वृथा भाष्यं लालनीयो न चानृतो ।
गुरुर्न प्रत्ययवस्थेयः शू. ।८५।

रामेण स्वकुलं दीप्तं दग्धं तत् कौरवेण तु ।
आर्यानार्यौ जगत्येव शू. ८६।

विनंक्ष्यद्राक्षसं राज्यमाक्रान्तं कपिसैनिकैः ।
क्षेष्यतोऽलं जयेऽल्पोऽपि शू. ।८७।

आशास्वगणनीयासु क्वचिरस्थवशो नरः ।
श्वतुल्यस्य किमन्यत्स्यात् शू. ।८८।

लोभमोहौ विनिन्द्यौ हि सर्वस्यातद्वतो वृथा
दैवं स्यात्प्रतिकूलं च शू. ।८९।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्रदण्डमृजुं कुर्यात् पिष्यात्सर्वगिरीनपि ।
न द्राव्यं कठिनं चेतः शू ।९०।
विद्या विनयहीना चेत् निःसूत्रायाः स्त्रियाः समा ।
सत्त्वेऽपि मणिभूषाणां शू ।९१।
अविद्वान् विदुषां पार्श्वे स्थितोऽपि न हि पण्डितः ।
बको न हंसः तत्पार्श्वे शू ।९२।
पिशुनोऽर्थीव नम्रस्सन् गर्तेऽन्यं पातयेज्जनम् ।
सर्वथा वर्जनीयोऽसौ शू ।९३
महीरुहं यथा कीटो नाशयेच्च लतां क्रमिः ।
तथैव गुणिनं दुष्टः शू ।९४
औषधं भिषजा दत्तं विना व्याधिर्न शाम्यति ।
दीपेनैव तमोऽपैति शू ।९५।
शक्तेराराधने मूर्खाः प्राणिहिंसां वितन्वते ।
जन्तुभुक्षा कथं दैवं शू ।९६।
मुक्ता स्यात्पतितः शुक्तौ जलबिन्दुर्जले जलम् ।
क्षेत्रायत्ताः पदार्था हि शू ।९७।
अवज्ञेयो हि सान्निध्याद्विद्यानां पारगोऽपि सन् ।
ओषधिः प्राङ्गणस्थेव शू ।९८।
प्रगल्भमानो गर्वान्धः स्यादासन्ने क्षये जनः ।
निर्वास्यन् हि चलो दीपः शू ।९९।
सर्वा विद्या अधीत्यापि न दुष्टो याति पात्रताम् ।
वहन्निव खरः स्वर्णं शू ।१००।
अहिंसा परमो धर्मः नात्तुं वध्या हि जन्तवः ।
किं जिघांसत्यपत्यं स्वं शू १०१।
क्षमावानुच्यते साधुः न क्षमासदृशं भुवि ।
मङ्गलानां क्षमा योनिः शू ।१०२।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आन्ध्रीनिबद्धकृतितः कविवेमनस्य
पद्यानि कानिचन लोकहितोपयुञ्जि ॥
गीर्वाणवाचि परिवृत्तिमवापितानि
दोषा यदीह परिवर्तयितुर्न कर्तुः ॥

का नाम समता ?

(अनुवृत्ता)

लेखकः—श्री स्वामी आत्मानन्द मुनिः

श्रूयते हि कदाचिद् दुर्भिक्षमापतितम् । तदा स्वगुरोः सदाशयस्य श्री रामदासस्वामिनो निदेशेन छत्रपतिना शिवाजीमहाराजेन किमपि दुर्ग निर्मातुमारब्धम् । तदा दीनदीना दुर्भिक्षपीडिता-असंख्या जना दुर्गनिर्माणे व्यापृता भृतिलाभेन स्वोदरं पूरयित्वा सुखमन्वभुवन् । एतद् दृष्ट्वा शिवाजी महाराजस्य मनसि अभिमानोऽङ्कुरितः । तेन बहवो जना भृतिदानेन परिपोष्यन्त इति अभिमानस्य कारणम् । सेयमभिमानोत्पत्तिर्गुरोः श्रीरामदासस्वामिनो नैवाविदित आसीत् । विनीतस्य शिष्यस्याभिमानं विज्ञाय तस्य मनसि खेदः समजनि । तमिममभिमानं निरसितुं तस्य हृदयं द्रवीभूतमासीत् । स एकदा यदा शिवाजी महाराजो दुर्गनिर्माण कार्यं निरीक्षते स्म, तदा तत्रोपस्थितः । शिवाजीमहाराजः सष्टाङ्ग-प्रणिपत्यास्य समुचितां सपर्यामकरोत् । तस्य सपर्यया प्रीतो गुरुः 'एवं दुर्गनिर्माणच्छलेन त्वमसंख्यानां जनानां जीविकां निर्वहन् धन्यो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवसीति प्रशशंस । शिवाजीमहाराजस्तु अभूतपूर्वेण गुरोः प्रशंसावादेन नितरां संकुचित आत्मानं कुत्राप्यपराधिनं कलयामास । तदा गुरुरग्रेवर्तिनं कमपि प्रस्तरखण्डं निर्दिश्य 'वत्स, तमिमं प्रस्तरखण्डं निर्भिन्नं कुविन्त्यादिदेश। निर्भिन्ने च प्रस्तरे तत्र पिपीलिकापंक्ति शिरोभिः स्वां खाद्यसामग्रीं वहन्तीमपश्यत्। तदा गुरुर्विनीतं शिष्यमवादीत् 'त्वं परमुदारोऽसि येन प्रस्तरान्तर्वर्तिनीं पिपीलिकापंक्तिमपि भोजनदानेन रक्षसि' इति । तदा शिवाजीमहाराजो गुरोर्विद्रूप वचनस्य तात्पर्यं विज्ञाय भगवतोऽचिन्त्यप्रभावत्व मात्मनश्चाकिञ्चित्करत्वं कलयन् भृशं विलज्जितो गुरोः क्षमामभ्यर्थयामास । गुरुणा च प्रेमाश्रुप्लुतेन क्षमितः।

तस्यैतत्कथनस्य आशयो भगवता वासुदेवेन श्रीमुखेन यदुदितं, तेन संवदति। इयं हि तदुक्तिः—

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।।

गीता १८।६१

तदेतस्य कथनेन न वयं विभ्रमं जनयामः, परं तु संसारोऽयं भगवतो लीलाक्षेत्रमिति प्रतिपादयामः । सर्वमपि आत्मनः क्रियाजातं तस्मा एवार्पयित्वा मानुष्यः सुखमेधत इति च निर्दिशामः । सात्त्विकेन भावेन प्रचोदितं क्रियाजातमनुष्ठितं पुण्यं संजनयति। राजसेन भावेन प्रचोदितो मानवो यत् करोति, तत्सवं स्वल्पमेव पुण्यं जनयति। तामसेन भावेन च क्रियानुष्ठाने लोके सम्मानं लभते न पुनः पुण्योपचयम । एवं मानवः आत्मनो भावनानुसारेण विभिन्नानि फलानि लभते, तेन वयं संसारस्य अपरस्य वा न किमपि हितं साधयितुं प्रभवामः । लोकहितसाधनं च कथं करणीयमिति कापि भावना प्रथमतश्चेतसि पदमादधाति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदि कृतस्य कर्मणः फलस्वरूपं सर्वं सम्भवति तर्हि रोगिणो रोगापहरणार्थं चिकित्सकस्य आह्वानं भेषजदानं च निरर्थकं सम्पद्यत इति प्रथमः कल्पः यदि कृतस्य कर्मणः फलस्वरूपं दारिद्र्यमापतति, तर्हि अतिवृष्ट्यनावृष्ट्यादिनिवारणार्थं भूदानादिक्रिया निष्फला सम्पद्यते। द्वितीयतो भोगास्तावद्विनश्वराः। तेषां विनाशे च सुखापेक्षया दुःखमेव समधिकमुपलभ्यते। तृतीयतः भोगप्रवृत्तिः सदा मानवं परमार्थविमुखं करोति दुःखं च वर्धयति। चतुर्थतः यद्वयं लोकहित साधन मिति विभावयामः, तदिदं यदि वर्णाश्रमविरोधि भवति तर्हि न सुखं साधयति, प्रत्युत दुःखायैव सम्पद्यते। समतानिरूपणावसरे चास्माभिः प्रतिपादितं यद् व्यावहारिकी समता व्यवहारं परमार्थं च विघटयतीति।

एवं सांसारिकीं व्यावहारिकीं च दृष्टिं निधाय या लोकहितसाधनायां प्रवृत्तिः, न सा किमपि लोकहितं साधयितुं प्रभवति। प्रकृतिराज्ये हि सोऽयं क्रमः प्रचलति यद्व्यवहारे पुरुषार्थस्य प्राधान्यं न सम्भवति, परन्तु व्यवहारसम्बन्धे प्रारब्धस्य तत्फलोन्मुखकर्मसंस्कारस्यैव मुख्यता भवति। व्यवहारसम्बन्धे अस्माभिः यः कोऽपि पुरुषार्थः क्रियते, स सर्वोऽपि प्रारब्धाधीनः फलं प्रसूते। व्यवहारे प्रारब्धं विना स्वतन्त्रः पुरुषार्थो न किमपि फलं जनयति। एकश्चिकित्सकः समानप्रकृतिं समदोषं च रोगिद्वयमेकयैव रीत्या चिकित्सति, परन्तु यस्य प्रारब्धमनुकूलं स आरोग्यं लभते, यस्य च प्रारब्धं प्रतिकूलं स न लभते। अतः सांसारिकयोः सुखदुःखयोर्हानिलाभयोश्च पुरुषार्थस्य समानतायामपि प्रारब्धमेव कार्यकारि दृश्यते। अपि च यदि वयं भगवदर्पणदृष्ट्या यज्ञतपोदानादिकं कुर्मस्तर्हि मनसि काऽपि शान्तिरुदेति, परलोके सद्गतिर्लभ्यते। न कोऽपि तत्र कमपि प्रतिबन्धमाधातुं प्रभवति। परन्तु यदि वयं रोगशोकादीनां निवृत्तये भोगलाभाय वा किमपि सत्कार्यं कुर्मः, तर्हि अवश्यं वयं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सफलमनोरथा भवाम इति निश्चितं वक्तुं न शक्यते । अत्र पश्चिमदिशि इंग्लण्डदेशः पूर्वस्यां च दिशि जापान देशः उदाहरणम् उभयत्र जनधनविद्याबुद्धिनीतिपुरुषार्थादीनां समुन्नतेश्चरमसीमायाः वर्तमानतायामपि न तदनुरूपा समुन्नति र्दृश्यते ।

लोकहितसाधन प्रवृत्तौ इहलौकिकी सुख शान्तिः पारलोकिकी सद्गतिश्च अभिलष्यते एतद्वर्जं नान्यल्लक्ष्यं भवितु मर्हति । एतस्य च लक्ष्यस्य लाभः केवलं धार्मिकतया पारमार्थिकतया व्यवहार एव सम्भवति नान्यथा । एतादृशैहिकसुखशान्तिप्राप्तौ पारलोकिकसद्गतिप्राप्तौ चाहङ्कार एक एव प्रतिबन्धकतया अवतिष्ठते । व्यावहारिकी समता च तमिममहङ्कारमुच्छेत्तुं नैव शक्नोति । अतः संसारे एकएव हि धर्मो निर्मलः पदार्थः, यः सकलं कलङ्कं निरस्यति, अहङ्कारमुन्मूलयति, लौकिकीं सुखशान्तिं पारत्रिकीं सद्गतिं च साधयति । अतएव विपश्चितो 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति धर्मस्य लक्षणं विदधति ।

अस्मिन् संसारे धर्मः अर्थः, कामो मोक्षश्चेति चत्वार एव परम पुरुषार्थाः । सकलोऽपि मानव एतेष्वेव प्रवर्तते । एतद्वर्जं न कोऽपि पञ्चमः पदार्थो वर्तते, यत्र मानवस्य प्रवृत्तिर्जायेत । प्रातिस्विकानां संहतानां चैषां प्राप्तिः केवलं धर्मद्वारैव सम्भवति । एतेषां प्राप्तिः केवलं धर्मद्वारैव सम्भवति । एतेषां प्राप्तौ न चान्यत् साधनमास्ते । यद्यपि केषुचित् स्थलेषु अर्थस्य कामस्य च प्राप्तिः प्रकारान्तरेणापि सम्भवति तत्रापि ज्ञाता अज्ञाता वा जन्मान्तरीया धर्मं प्रवृत्तिरस्तीति स्वीक्रियते । यथा तैलं तिलान्निस्सरति, तथा अर्थः कामो वा धर्मादेव संजायते । यथा आत्मनः शारीरिकी अभिवृद्धिः पानभोजनादिभिः सम्भवति, परन्तु मोटरयानेन व्योमयानेन वा भ्रमणे सम्भवति, एवमेव अर्थस्य कामस्य च प्राप्तिर्धर्मेणैव संजायेत

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

यल्लब्धम् , यल्लभ्यते, यच्च लप्स्येत, तत्सर्वं केवलधर्मानुष्ठानेनैव सम्भवति । यद्यपि वयं कदाचित् अर्थस्य कामस्य वा विलासेन मत्ता धर्मं विस्यरामः, तथापि स सर्वोऽपि धर्मरूपस्य वृक्षस्य फलमित्यत्र सन्देहो नास्ति । भगवता बादरायणेन महाभारतस्यान्ते प्रतिपादितम् ।

उर्द्धवाहुर्विरौम्येष न च कश्चिच्छृणोति माम् ।
धर्मादर्थश्च कामश्च स धर्मः किं न सेव्यते । इति ।

भगवता श्री कृष्णेन गीतायामभिहितम्—
श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥" इति (३३५)

"श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥" (१८।४८) इति च

अभ्यामेतत् स्पष्टं प्रतीयते यज्जगति मनुष्याणां धर्मो न कदाचिदेकरूपो भवितुमर्हति परन्तु प्रकृतेर्गुणतारतम्येन विभिन्नरूपो भवतीति । भगवता च ततः स्वधर्म परधर्मयो निर्वचनमपि कृतमास्ते । परधर्माश्रयणं नैव श्रेयस्करमित्यपि प्रतिपादितम् । स्वधर्मानुमतं किमपि कर्म कुर्वन् नैव पापभाग् भवतीत्यपि प्रतिपादितम् । इदानीन्तनाश्चाभिप्रयन्ति—विभिन्नासु जातिषूत्पन्नानां मनुष्याणां मध्ये न कोऽपि भेदो वर्तत इति । परन्तु ते धर्मस्य तत्त्वं न जानन्ति । केवलं नीचेनाभिमानेन आविष्टा धर्ममात्मघातिनं कल्पयन्ति । धर्मविरुद्धमाचरन्तस्ते आत्मानमात्मनः सहचरांश्च पथो भ्रष्टानपराधिनः कुर्वन्ति । प्रथमतो मनस्येवं सिद्धान्तः करणीयो यद्धर्मस्य मूलं त्याग एव । त्यागेनैव हि इह परत्र च सुखशान्ती सम्भवतः । त्यागेनैव हि परलोकः साध्यते, परमात्ममार्गेण च गन्तुं शक्यते । परन्तु सोऽयं त्याग आत्मनः धर्ममनुवर्तेत । यथा नियततया भोजनादिस्वीकारे बलं पुष्टिश्च लभ्यते अनियततया स्वीकारे बलं पुष्टिश्च दूरे आस्ताम् प्रत्युत दुर्बलत्वमापतति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवमेवाधिकारानुसारेण शनैः शनैः बाह्यानां वस्तूनां परित्यागपूर्वकमहङ्कारस्यापि त्यागो विधीयते। अयमेव हि अहङ्कारः अस्मान् सुखस्वरूपादात्मनो दूरे स्थापयति, रोगशोकजन्मजरादिबन्धनैश्च बध्नाति। अतएव यैर्व्यवहारैराचरणैश्च वयं साक्षात् (Directly) अस्याहङ्कारस्य मूलमुत्पाटयितुं प्रभवेम, अथवा परम्परया (Indirectly) अस्य मूलमुत्पाटयितुमपेक्षितं सोपानमारोढुं प्रभवेम, ते व्यापारास्तानि चाचरणानि धर्मस्यैव स्वरूपाणि भवन्तीति वक्तुं शक्यते। एतद्विपरीततया यैर्व्यापारैराचरणैश्च अस्मासु कस्याप्यहङ्कारस्याभिवृद्धिर्भवति, तेन चाहङ्कारेण प्रचोदिता वयमपरमस्याहङ्कारस्य वृद्धिरूपे मार्गेऽग्रेसरं कुर्मस्तर्हि, ते व्यवहारास्तानि चाचरणान्यधर्मस्वरूपाणि भवेयुः। अस्माकं सिद्धान्ते तु व्यावहारिकी सेयं क्षुद्रा समता अस्मानितरांश्च मार्गाद् भ्रंशयितुमलं भवति। प्रकृतिराज्ये तु एते वर्णधर्माः आश्रमधर्माश्च अस्यैवाहङ्कारस्य स्वस्वाधिकारानुसारेणाहङ्कारस्योच्छेदायैव परिकल्पिताः। अतएव भगवता वासुदेवेन गीतायां चातुर्वर्ण्यं मया सृष्टमित्यादिना तेषां चर्चा अक्रियत। ये तु त्रिभिन्नजातिषु उत्पन्नानां मध्ये भेदं न स्वीकुर्वते ते प्रकृतितत्त्वं न जानन्ति। ते मन्यन्ते जन्मलाभानन्तरं प्रकृतयो गुणाश्च युगपदुत्पद्यन्ते। परन्तु तैरेतदवबुधेरं प्रवृत्तयो गुणाश्च जीवेन साकं प्रविशन्ति। अर्थात् त्रिगुणात्मिकया प्रकृत्या सह जीवः शरीरं गृह्णाति। उत्तमप्रकृत्या उत्तमगुणैश्च संश्लिष्टो जीव उत्तमयोनिषु शरीरमाप्नोति विपरीतश्चनीचयोनिषु जन्म परिगृह्णातीति प्रत्यक्षमेव सर्वेषाम्। अतः प्रकृतेर्गुणानां च जीवेन साकं सम्बन्धो जन्मतः प्रागेव स्वीक्रियते। विशेषतो प्रकृतिविरहिततया गुणविरहिततया च जीवस्यावस्थितिरपि नैव सम्भवति। यदा प्रकृतिगुणानुसारेणैव जीवस्य जन्मलाभस्तदा जीवेषु प्रकृतिगुणानुसारेण भेदोऽवश्यंभावी सम्पद्यते। कोऽपि भेदो नास्तीत्युक्तौ न किमपि स्वारस्यं वर्तते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतावत्पर्यन्तं प्रबन्धेऽस्मिन् ये ये विषया निरूपिताः, तेषां संक्षेपतः परिचयो दीयते।

१। संसारस्योत्पत्ति जीवस्य फलोन्मुखकर्मसंस्कारेण भवति।

२। जीवः सत्यं सुखस्वरूपं चात्मानमजानन् विस्मरन्निव तदितरसुखान्वेषणे तत्परो भवति। तत्रस्थश्च ज्ञानवशात् सांसारिकेषु भावेषु काँश्चन् सुखरूपान् काँश्चन च दुःखरूपान् कल्पयति। ततश्च तादृशस्य सुखस्य लाभाय दुःखस्य च परिहाराय शुभाशुभकर्मसु प्रवर्तते। तेन सुखं दुःखं च लभते। एतादृशसुखदुःखानुभव एव संसारोत्पत्तेः प्रयोजनम्।

३। तादृशसुखदुःखप्राप्तौ प्रात्मकृतकर्मसंस्कार एव बीजं भवति।

४। सांसारिकदृष्ट्या लोकानामुद्धरणं कर्तुं न शक्यते। तदुद्देशेन क्रियमाणं सकलं कर्मजातं न केवलं अपि प्रयोजनस्य प्रकल्पते। यतो यस्योद्धरणं चिकीर्षितं स च प्रारब्धकर्मानुसारेणैव सुखं वा दुःखं वा लभते।

५। अतोऽस्माभिः धार्मिकीं पारमार्थिकीं च दृष्टिं निधाय लोकानामुद्धरणं करणीयम्।

लोकानामुद्धरणं लक्ष्यं स्वीकृत्य धार्मिक्या पारमार्थिक्या च दृष्ट्या कार्यं साधने अवश्यमस्माकमभीष्टं सिध्येत। अतएव भगवता उक्तम् -

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते।
न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति। इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारतीयं तपोवनम्

लेखिका—श्रीमती केतकी देवी अध्यापिका

संहिताब्राह्मणारण्यकोपनिषत्सम्मिलिता इयमखण्डवेदविद्या श्रुतिरिति ख्याता। ऋग् यजु रथर्व साम संहितानां व्याख्यानरूपः परिशिष्टो भागो ब्राह्मणानि। ब्राह्मणानां स्वाभाविकी परिणतिः आरण्यके, आरण्यकाणां परिणामस्तूपनिषत्सु लभ्यते। संहिताभागे मन्त्राः, ब्राह्मणभागे तेषां मन्त्राणां व्याख्या यज्ञविद्याः, आरण्यके रहस्यविद्या, उपनिषत सु च ब्रह्मविद्योपलभ्यन्ते चतुराश्रमक्रमानुसारेण ब्रह्मचर्याश्रमे सहिताभागस्य स्वाध्यायोऽध्येतव्यइ यध्ययनम्, गार्हस्थ्याश्रमे ब्राह्मणप्रतिपादितयज्ञविधिसंपादनम् वानप्रस्थे तु आरण्यकरहस्योपलब्धिः सन्न्यासिनस्तु उपनिषत्समुल्लसितब्रह्मतत्त्वावधारणमिति एवं प्रकारेण श्रुतिः भारतीयानां जीवनायने सविशेषं प्रभवति।

वयन्तु तावत् पश्यामः गार्हस्थ्यजीवनं केवलं ग्रामे याप्यते, शिष्टानि त्वरण्ये। ग्राम्यसभ्यताया आरण्यजीवनम् अधिकतरं सम्मानार्हं श्रद्धास्पदञ्च आर्य्यसूनूनां पक्षे आरण्यजीवनं तपोमयम्। वेदस्य आरण्यभागः खलु अरण्ये तपस्विमहर्षिभिः रचित आसीत्, यत्र अध्यात्मतत्त्वसंवलिताया रहस्यविद्यायाः समुल्लासो वर्त्तते। उपनिषत्सु ग्राम्यारण्यजीवनयोः पार्थक्यमपि दृश्यते। ये ग्रामवासिनः इष्टापूर्त्तदानपरायणाः, ते पितृयानपथेन गत्वा पुनरावर्त्तक्रमानुसारं पुनः संसारचक्रं प्रत्यागच्छन्ति, ये चारण्यवासिनः श्रद्धा तपःसत्यानामुपासकाः, ते देवयानमार्गेण परां गतिं लभन्ते, न पुनः प्रत्यावर्त्तन्ते। आरण्योपलक्षिताः वैखानसाः परिव्राजकाश्च 'अपराजितापुरी" इति तृतीयब्रह्मलोके भवन्ति प्रतिष्ठिताः, अरश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ण्यश्च इत्यर्णवद्वये अवगाहन्ते। (द्रष्टव्या छान्दोग्योपनिषत् । ५।१०। २-३ च ८।५।३-४) अरण्यनिवासिनः-आरण्यका हि तपसः श्रद्धाया उपासकाः । तपस्विनस्ते यस्मिन्वने निवसन्ति तपश्चरणाय तद्धि तपोवनमित्याख्यायते। तत्र न केवलं ब्रह्मचारिणः वानप्रस्थाश्रमिणः सन्यासिनः वा निवसन्ति, परन्तु तपोनिष्ठा महर्षयोऽपि सहपत्नीभिः तत्र मोक्षाय अधिवसन्ति । अत्रि, वशिष्टागस्त्यादयो मुनयोऽस्मिन् क्षेत्रे उदाहरणानि। तपःसाधनं, सर्वसत्त्वानुकम्पा, शमो, दम स्तितिक्षो, परतिः, सर्वसत्त्वेषु ब्रह्मदर्शनमित्यादयः धर्माः विषयभोगरहितैः तापसैः नित्यमाचरणीयाः । तेषां तपःसाधनेन पवित्रीक्रियते निखिलं चराचरात्मकं जगत् । ते च स्वाध्याययज्ञविधानादिभिः संसारिणामप्युपकारं साधयन्ति । संसारासक्तचित्ता गृहिणोऽपि भवभयबन्धनात् प्रमुच्यन्ते क्षणमिह तैः सह संगतिं सौभाग्यवशात् लब्ध्वा। तपस्विनां तपःषष्ठभागरूपं नरपतिप्राप्यं यद्धनं, तदक्षय्यमिति महाराज दुष्यन्तेन परमसत्यं स्वीकृतं शाकुन्तले नाटके।

"तपः षड्भागमक्षय्यं ददत्यारण्यका हि नः" इति।

यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाध्यादियोग साधनैः निर्द्धूतकलमषाः योगिनः महद्भिः तपोभिः नूनं निवारयन्ति क्षौणीतलाभिव्याप्तं कालुष्यपङ्कम्, आनयन्ति च स्वीयविमलचरितपुण्यसंपद्भिः पृथिव्यां अखण्डं वरीयं महाभावं—यस्य परिणतिः वेदा,उपनिषदः, आरण्यकाः, भारतादयः ग्रन्थाः, ये विरचिताः तपोध्यानपरायणैः सत्यदर्शनैर्महर्षिभिः। सन्ति बहवः नीरन्ध्रपादपच्छायान्धकारितनिर्जनाटवीसमूहाः आफ्रिकामहादेशीय कंगोनद्युपत्यकासु क्रान्तीयविषुवमण्डलेषु च । तत्रापि लतापादपनदीशैल निर्भराः विद्यन्ते, बहवः पशुपक्षिणश्च अधिवसन्ति । परन्तु भारतीयतपोवनस्य एतेभ्यो वनेभ्यो भेदो वर्त्तते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकत्र अहिंसा विलसति, अन्यत्र तु जीवनसंरक्षणार्थं क्रूर वर्वर-मानवस्य हिंसा समुल्लसति । तस्य क्रूरतमनैष्ठुर्यं सोढुमसमर्था आरण्य प्रकृतिरपि सततं तदभिलक्ष्य मौनतः अभिशापमभिवर्षतीव । सभ्यतमाः प्रतीच्यास्तु स्वकीयभोग्यवस्तुत्वेन प्रकृतिम्, आद्रियन्ते । मुक्ति मानवा एव जीवेषु प्रधानाः, अन्येभ्यः प्राणिभ्यः सुधियः, विवेक-वन्तश्च । अन्यत् यदिह किञ्चिदस्ति, तत् सर्वमपि प्रायः तेषां भोगायैव धात्रा कल्पितम्—एतादृश एव हि तेषाम् आशयः, स्थिरसिद्धान्तश्च । तथाहि हलिउड्—कालिफोर्न्नियादियुरोपीयो पवनेषु प्रकृतेः समुपभोग निमित्तं विविधाश्चेष्टाः संसाधिताः । तत्र च सुखमिच्छुकानां नराणा मुपभोग प्रवृत्तिर्बलीयसी तीव्रतरं प्रकटिता । प्रकृतेः सौन्दर्यं निरीक्ष्य यद् विमुह्यन्ति, तत् स्वकीयां परकीयांश्च भोग वासना परतृप्तिं साधयितुमेव । भवतु वा आल्पस शिखरिमय-स्थानं, अथवा साहारामरुभूमिः, ऊर्मि विधौतसिकतिला वेलाभूमिः अथवा प्रकृतिदेव्याः दुर्गमः प्रदेशो—यत्र मानवानां शक्तिः प्रकृति-प्रतिहता । तत्र तत्र पुरुषकारप्रयोगबलेन प्रकृतेरुपरि विजय-वैजयन्तीं स्थापयितुमेव दुःसाहसिकताबलेन साग्रहाः सौत्सुक्याश्च भवन्ति । मानस परितृप्तये तेऽपि मृगया व्यसनं न परिहरन्ति अथवा आत्मसुखविधानार्थंञ्च प्रकृतेः अभियानं कारयितुं न पश्चत्पदाः भवन्ति । उपमदनया भोगवासना तेषां प्रवर्त्तयति नित्यं प्रकृति रहस्यं ।सक्ता वैज्ञानिकोपायावलम्बनेन ऐहिकजीवनेषु सौख्य-विधान करणाम । भौतिक सुख प्राप्त्यर्थं याः याः चेष्टा तैर्विहिताः, तासां भयावहपरिणामोऽपि सांप्रतिकाविष्कृत 'एटमबम' 'मारात्मक हिंसा रूपेणावतिष्ठते ।

स्फुटतरं प्रकाश्यते चेत्—प्रकृतेः शान्तं वातावरणं परित्यज्य सभ्यमानवः नगरं प्रपन्नः । सर्वत्र शिल्पानुष्ठानानि स्थापितानि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यान्त्रिक-सभ्यतायाः कर्मव्यस्तता जीवनसंग्रामश्च भूयो भूयोऽभिवर्द्धते प्रतिदिनम् । संप्रति प्रात्यहिकजीवन यात्रायामपि एकोऽपरं येन तेन प्रकारेण परामवितुमिच्छति । श्रमं विनापि परप्रवञ्चनया वित्तोपार्जनं, दुरभिसंन्धिः, शूनम, धूर्त्तता, औद्धत्यम् , शाठ्यम् , कलहादयः नागरिकजनसुप्रापाः अतिजिह्मचेतोविकाराः मादयन्ति सततमेव मनः प्रमोदमन्दिरोन्मत्तम । अर्थनैतिकसतर्कतया नगरवासिनः उदारं हृदयं क्रमशो भवति संकोर्णतरम् । अन्तरात् निर्गच्छन्ति स्नेहममतादयः कोमल वृत्तयः । अतः न कोऽपि केनापि सह शुद्धान्तः करण संजात प्रीति विनिमयं कर्त्तुं शक्नोति । अधुना स्वराष्ट्रपरराष्ट्रयोर्मध्ये, शासकशासितयोः, धनिनिर्द्धनयोः प्रभुभृत्ययोश्च परस्परं तिक्तताऽऽवर्तीर्णा । विषमीभूतञ्च दैनन्दिनं जीवनम् ।

भारतवर्षे तु इत्थंभूतात् भोगकालुष्यमयैहिकद्वन्द्वात् आत्मानं परित्रातुमार्य्याः प्रकृतिजननी माश्रयन्ति शान्ते आश्रमपदे । नास्त्यत्र वित्तहीनसम्पूर्णवित्तयोः नम्रोन्नतयोः पण्डितमूर्खयोः कोऽपि भेदः । अमृतोपम मातृस्तन्ये सर्वेषां सन्तानानां समाधिकारवत् अरण्यनिर्झरिणीनां जलपाने, वनस्पतिच्छायानिषेवणे तरूणाममृतोपम स्वादुतमफलभोजने मानवाः पशवश्च सर्वे समानाधिकारिणः । यतः सर्वेऽपि धरित्र्याः सन्ततयः । तत्र नगरसुलभनिषेधादेशा न प्रचलन्ति, कार्य्यकारिणो वा नभवन्ति अनेन प्रकारेण आरण्यप्रकृतिः भारतीयानजनान् उपदिशति विश्वसाम्यवादं, विश्वमैत्रीञ्च ।

जनकोलाहलमुखरायमाणलोकालयसंकुलजनपदेभ्यः अतिदूरमवतिष्ठते शान्तरसास्वदं तपोवनम् । उदारमनसः तपस्विनिचयाः तत्र प्रतिवसन्ति । तत्त नैसर्गिक्याः सौन्दर्य्य लक्ष्म्याः नित्यलीलास्थलम् । इदं तपोवनं हिंसाऽसूयाद्वेषादिदोषविनाकृतम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वाध्यायिशान्तकल्मष ब्रह्मचारि संघेन सेवितम् । अत्र हि वातमजाः कुरङ्गाः अचकिताः शाद्वलेषु विचरन्ति मरकतप्रभकोमलशष्पाग्राण्युपभुञ्जानाः । ऋषिपत्नी परिपालिताः कृष्णसारा अपि यज्ञवेदिं परितः निःशङ्कं रोमन्थायन्ते नीवारधान्यानि । विहगकाकलीमुखरीकृताः वनस्पतयः तपोवनमागतेभ्यः अतिथिभ्यः फलदित्सया सततं फलभारावनताः भवन्ति । मन्दमरुतान्दोलितकुसुमचयाबनभ्राः व्रततीततयो नवकिशलयैः अनिर्वचनीयां सुषमाम् आदधति । हविः प्रदानेन प्रीताग्निदैवतस्य आहुतिगन्धिभिः धूमपटलैश्च दश दिशः पवित्रीकृताः नभोमण्डलञ्च हुतवहशिखाञ्जनेनाच्छादितम् वेदाध्यायिनां प्रणवमन्त्रोच्चारणेन च शब्दायितं वायुमण्डलम् । विश्वामित्राश्रम वर्णन प्रसङ्गे भट्टिकाव्ये सुष्टूक्तम्—

अथालुलोके हुतधूमकेतु-
शिखाञ्जनस्निग्ध समृद्धशाखम् ।
तपोवनं प्राध्यनाभि भूत-
समुच्चरच्चारु पतत्रिशिञ्जम् ।

क्षुद्रान्न जक्षुः हरिणान् मृगेन्द्राः
विशश्वसुः पक्षिगणैः समन्तात् ।

नंनम्यमानाः फलदित्सयेव
चकाशिरे तत्र लताः विलोलाः ।

शाकुन्तलेऽपि तपोनदृश्यं सम्यगेव वर्णितम्

नीवाराः शुकगर्भ कोटर मुखभ्रष्टा स्तरुणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः इति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नूनं मायामयनिखिलसंन्यसनादनन्तरं तपोवनमभिवसतां-तापसानां वासः खलु आधुनिकैः पलायनवाद (escapition) इति न चिन्तनीयः शङ्कनीयश्च। तत्र शिश्नोदर परायणानां कामलुब्धानां मानवानां जीवनसंग्रामो नास्ति। मोक्षसर्वस्वानां तितिक्षाव्रतानां वैरागिणां हिंसाशून्यायत्नलभ्यवृत्तिभिः निरीहतया प्राणधारणं तत्र परिदृश्यते। प्रतिजीवनयात्रायाः प्रतियोगितायामवर्त्तमानायां न कोऽपि कमपि तत्र द्वेष्टि। स्वकीयश्रमेण यानि यानि फलान्युत्पादितानि, अकृष्टभूमेः स्वयं जातानि यानि लब्धानि शस्यानि, प्रकृतिः सन्तोषतः तस्या आश्रयिभ्यो सन्तानेभ्यः यत्किञ्चिदपि ददाति, तेन जीवनरक्षणं कृत्वा तपःसाधने मनोऽभिनिवेशं कुर्वन्ति निर्मानाः निरहंकृतयः शमसुखभोगैकवद्ध-स्पृहा अध्यात्मवादिनः यतयः। नवदुर्वास्तृता धरणी खलु तेषां स्वल्पं तल्पं, विपुलमुपाधानं भवति स्त्रोयभुजलता, सुनीलमम्बरञ्च वितानं, अनुकूलपवनश्च व्यजनम्। कलनिह्लादिनीनां गिरिनदीनां जलेन तृषानिवारणम्, नमृतरुभ्यः निपतद्भिः फलैश्च भोजन-विधिसंपादनम् स्वान्तःसन्तोषिणाम् आत्मन्यात्मानं पश्यतां संसारार्णवलंघनधियां तपस्विनां पशुभिः साधारणीयं वृत्तिः!! अनेनोपायेन ते आशातरुम् निमूलयन्तः मोक्षलाभाय परमनिष्ठया यतन्ते। अकिञ्चनानां, तेषां न सन्ति पार्थिवसंपदः संसारविरक्ता योगिनः गृहस्था इव न सञ्चयनपरायणाः, परन्तु तेषां विभवः शौवस्तिकत्वमपि न व्रजति (तपस्विनां फलेग्रहिणां विभवः आगामिकल्यं यावत् नास्ति)। तपसः अक्षय्यं फलं हि तेषां महाप्रभावाणां श्रेष्ठो निधिः। तदपि तपः सर्वसत्वानां हिताय अनुष्ठितम्। न कोऽपि तत्र आलस्यपरायणः, निद्रालसमन्थरो वा, सर्वेऽपि कायश्रमेण सह ध्यानादिभिः आध्यात्मिकोन्नतिं साधयितुं यतन्ते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जावाल्याश्रमवर्ण्णनाकाले महाकविना बाणभट्टेन तपस्विनां विविधप्रात्यहिककर्माण्यालोचितानि कादम्वरीकाव्ये । कुत्र अतिथि सत्कारः, कुत्र पितृदैवतानां पूजाविधिश्च, कुत्र वा श्राद्धकल्प-यज्ञविद्याद्युपदेशः, धर्मशास्त्रालोचनं, स्वाध्यायो वा, कुत्र पर्ण्ण-शाला विरचनम्, गृहाङ्गनोटजसंस्कार करणम, कुत्र वा ध्याना-वस्थित तद्गतमनसा आत्मदर्शनं, मन्त्रसाधनं, योगाभ्यसनं च संसाध्यते । कदा वा वनदेवताभ्यो वल्युपहारः, कदा वा वल्कल-प्रक्षालनम, मौञ्जीमेखलासंपादनम्, कृष्णाजिनसंस्कारोऽथवा होमार्थं कुश-समिद्-धानी गवेधु-इत्याद्याहरणम्, अक्षमाला ग्रथनं, त्रिपुण्ड्रधारणं, कलसपूर्ण्णजलैन पादपानामालवालपूरणम । होम संपादनम् अथवा पशुपक्षिभ्य आहार प्रदान मित्यादीनि कर्माणि सर्वेषां हिताय संसाधितानि प्रत्यहमारण्यकैः नियमितरूपेण ।

अस्माकं देशे शमादिसाधनसंपत्तिशालिनां तपस्विनां नित्यम् आचरणीयाः धर्माः भवन्ति अहिंसामैत्रीसर्वभूतानुकम्पाः । जटावल्कलधारी भस्मविलेपितगात्रः, पद्मासनस्थः, ध्याननिमीलितः, शान्ततपस्वी योगिराजः शिवो भारतीयानां सततं परमध्येयो देवा-धिदेवः। व्याघ्राजिनाम्बर धरं निःसङ्ग शुद्धबुद्धापापदिग्धम्, उन्मीलित-तृतीय चक्षुषा मोहतिमिरमपहरं तमेव शेषवलयं महादेवं तु चन्द्र-शेखरं समर्च्चयन्तः जनाः परां गति मुपपन्ना भवन्ति । मन्यामहे ध्यानपरायणस्य योगिनः प्राणायामोद्भूतानाहतनादं शुश्रूषुः किं फणिपति स्तस्य कण्ठदेशं परीत्य तच्छिरोपरि भोगोत्तोलनकार्य्ये प्रवृत्तः आहोस्वित् शुभङ्कर शान्तशिवस्य अहिंसाधर्मेणानुप्राणितोऽयं तामसिकभावोपमोहिराजः हिंसां विजहाति तदीयपवित्रगात्र-संस्पर्शोद्भूत पुण्य वलेन !!

अहिंसायाः लीलानिकेतनेऽस्मिन् तपोवने पादपाः गिरयः लताः नद्यः हिंस्रप्राणिनोऽपि सर्वे तापसानामन्तर्निहित प्रीतिरसेन उज्जीविताः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संवर्द्धिताश्च । अध्यात्मभावनानुशीलनस्य यतेः विश्वप्रसारी शुद्धात्मा नह्येकस्मिन् शरीरे आवद्धो वा स्वार्थजडितो वा, परन्तु विश्वमयमभिव्याप्नोति । निखिलचराचरात्मकविश्वकल्याणयज्ञेषु खलु आहुतिरूपेण तदीयात्मा समर्पितः । स्वीयवैयक्तिकी सत्ता सामूहिककल्याणे उत्सर्गीकृता । कुमारसंभवेऽपि अस्य उदाहरणं वरीवर्ति । तपस्विनी पार्वती श्यामाकमुष्टिं हरिणमुखे प्रपूरयतिस्म प्रीतिनिर्भर मनसा । शङ्किता मृगवधूरपि तस्यामेव विश्वसिति स्नेह-वलात् यत् नागाधिराजदुहिता सखीनां पुरः तस्याश्चक्षुर्भ्यां स्वीय-लोचने अमीमित । पार्वत्यास्तपोवलेन

'विरोधि सत्त्वोज्झित पूर्वमत्सर द्रुमैरभीष्टप्रसवार्च्चितातिथि नवोटजाभ्यन्तर संभृतानलं तपोवनं तच्च वभूव पावनमिति-

अतिथिस्तु नारायणः स्वयमिति महाभावानुप्राणिताः महर्षयः अतिथि सत्कारं तपस्विनां प्रधानधर्मत्वेन परिगणयन्ति । वशिष्टाश्रमे विश्वामित्रं प्रति आतिथ्य प्रदर्शनं पुराणख्यातम् । भर्त्रा निर्वासितां देवरपरित्यक्तां रुदतीं जनकतनयां यदा अपश्यत् समित्कुशफला-हरणार्थं तत्रैवागतो परमकारुणिकः वाल्मीकिमर्हषिः ताम् तापसीभिः साकं निनाय स्वकीयाश्रमपदम्, आश्रयाभयाश्वासना-प्रदानेषु हि अकुण्ठिता तस्य महती चेतोवृत्तिः ! तथाहि मुनिकन्य-काभिः सह पादपालवालपूरणादिकार्य्येषु मनोऽभिनिवेश्य, महर्षेः वात्सल्यामृतपूर्णं प्रलेपनेन कथञ्चित् दुःसहां भर्त्तृविरहवेदनां सोढुं समर्था शोकजर्जरितचित्ता सतीशिरोमणिः तत्रैवाश्रमे निर्विघ्नं तनयद्वयं प्रासूत । परमवैरागी अपि महर्षिः जानकी-नन्दनयोः अभिभावकत्वेन जातकर्मसंस्कारादीन् निर्वाहयामास तदनन्तरं धर्मं धनुर्वेदं च पाठयामास, रामायणगानं शिक्षयामास ।

शाकुन्तलनाटके आश्रमपदे जडचैतन्ययोः काऽपि विशुद्धा प्रीतिः सम्यगुपवर्णिता । शकुन्तला तदीया च सखीद्वयी आश्रमतरुः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वालसहकारतरुभिः, 'माधवीलतिकाभिः, मृगपोतकैश्च आत्मज-निर्विशेषं परिलालिते, समस्नेहेन च विवर्द्धिते तातकाश्यपेन। सरलाशयतपस्विभिः सह सा कण्वदुहिता यथा सुदृढस्नेहपाशेन वद्धा, तथा तपस्विभिः साकं' तस्याः पितृभ्रातृसखित्वादिना स्नेहवन्धनं सुदृढमासीन्। तथैव पादपवल्लीभिश्च सह तस्याः स्वभावसिद्धः प्रणयः स्नेहश्च अक्षुण्णः अराजत। तथाहि प्रथमेऽङ्के पादपाल वालपूरणावसरे सखीद्वयं प्रति यथार्थम् आह शकुन्तला—

"णकेवलं तादस्स णिओओ, ममवि एदेसु सहोअर सिणेहो अत्थि।"

कण्वमुनेरपि तपोवनान्तर्वर्त्तिनीषु तरुव्रततीषु सुगभीरः स्नेह आसीत्, यतः प्राणेभ्योऽपि प्रियतमां कन्यां शकुन्तलाम् आलवाल-मापूरयितुं न्ययुङ्क्त। सोऽपि माधवीलतां स्वकीयहस्ताभ्यां सम्वर्द्धयामास। तपोवनपादपेषु शकुन्तलायाः सहोदरसम्मितस्नेहः, वनतोषिण्यां नवमालिकायां तदीयं सखीत्वं, तातकण्वस्य स्वहस्तसम्वर्द्धितायां माधवीलतायां स्वसृसमप्रणयश्च दृश्यते। वातेरितपल्लवाङ्गुलिभिः सहकारस्तामाकारयति रहस्यख्यापना-र्थम्। पादपवल्लरीणां जलसेचनादिकाले ज्ञायते कीदृशः निर्विशेषः प्रणय आसीत् ऋषिनन्दिन्याः, तस्याः सख्योश्च। एतद्धि प्रतिपादितं महर्षि कण्ववचनात्—

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आदौ वः कुसुमप्रसूति समये यस्या भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्। इति।

कीदृशी प्रीतिप्रवणता शकुन्तलाहृदये परिपूर्णा चासीत् तपोवन प्रकृतिं प्रति तत् सर्वमनेन श्लोकेन अवगम्यते।

(सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नारदकामराजीयम्

लेखक:—श्री श्रद्धाकरसूपकार: M. P.

(स्थानम्—वैजयन्तः प्रासादः । शचीदेव्याः राजकुलम् (Secretariate) एकस्मिन् सुमहति लेखाधाने दूरभाषण-(Telephone) यन्त्रम्, दश द्वादश वा पत्रगुच्छाः (Files) लेखाधानस्य पार्श्वेषु बहुनि भद्रासनानि यथायथं विन्यस्तानि। भित्तिसंलग्ना काऽपि सुमहती घटिका प्रचलतिस्म । सायं कालः। पादोन। सप्तमी होरा । कश्चन मुण्डितमुण्ढः शिखावान् सन्न्यासी दूरभाषणयन्त्रं यथायथं निधाय वीणां वादयितुं प्रवृत्तः। कियक्षणानन्तरं वीणावादनं समाप्य 'नारायण' नारायण' इत्यावर्तयन्निस्ततः संचलति स्म । वामभागात्कामराजः प्राविशत् । कश्चन खर्वाकृतिः सौम्यवपुस्तरुणः; वामबाहौ धनुः, दक्षिणहस्ते सायकः, पृष्ठे च तूणीरम् । प्रविश्य भक्तिभरेण सन्न्यासिनं प्राणमत्)

कामराजः भक्त्या नमामि देवर्षे, तव पादसरोजयोः

भयेन वेपते गात्रं किंनिमित्तं स्मृतोऽस्म्यहम् ?
प्रदोषे देवसम्राज्ञ्या, देवर्षिस्त्वं तथाऽऽगतः !
तदिदं निभृतं स्थानं जरसाश्लिष्टविग्रहः ॥

किं ते विप्रकृतं चित्तं कस्यांचिद्देवयोषिति ?
येन मे पुष्पधनुषः साहाय्यमभिवाञ्छसि !
किंमित्येतादृशे वृद्धे वयस्यपि तवान्तरम्
विकृतं ? नाभिजानामि तत्र हेतुं सविस्मयः
यद्यायतिमानालोच्य साहाय्यं करवाणि ते
का नाम मे दशा न स्यात्परिणामभयङ्करी ! ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सकृद्देवहितार्थाय महादेवस्य विग्रहे
सायकं योजयन्नासं भस्मसादतनुस्तथा ॥
तस्य स्मरणमात्रेण कम्पो मे जायते हृदि ।
किं कारणा परीक्षेयं सम्प्रति क्रियते त्वया ?
भवेयं कस्य देवस्य शापस्य भाजनं पुनः ?
कोऽपमानो मया सह्यः ? कीदृशी वा विड़म्बना ?
उत प्रेमपरीक्षेयं ? विशदं वक्तुमर्हसि ।
येन मे मनसः शङ्का शान्तिमेष्यति भो मुने !

नारदः—कालस्रोतो नदीवेदं वहन्त्यचिरनं सदा ।
न च तस्य विरामोऽस्ति, न शान्तिस्तेन लभ्यते ॥
न काम उपभोगेन जातुचिच्छान्तिमृच्छति ।
सुखं नास्त्यमरावत्या मनान्तीराजतेऽधुना ॥
दिने दिने सुधर्मेयं चलत्येव यथाविधि
परस्परं प्रशंसाया सीमा नात्रोपलभ्यते ॥
रम्भादयोऽप्सरोमुख्या नक्तं नृत्यन्ति सर्वदा ।
देवाः सोमरसैर्मत्ता यथावदुपभुञ्जते ॥
परन्तु देवराजोऽयमेक एव निरन्तरम्
प्रभुत्वं चालयन्नास्ते यमाद्यास्तमुपासते ॥
नरकं सर्वदा रक्षन् यमस्तिक्तमना ध्रुवम् ।
वरुणो जलसाम्राज्यं निर्वहन् श्लेष्मणा हतः ॥
धनदः कोषभारेण सदा व्यस्तो विभाव्यते ॥
सविता चाग्निदेवश्च नितान्तं ज्वलतोऽध्वना ।
चन्द्रमा मृदुलान् रश्मीन् खरान् कर्तुं समीहते
रोगिणो हि न लभ्यन्ते नासत्याववसीदतः ।
युगे युगे सदा रीतिर्न कस्मा अपि रोचते ॥
नवीना देवताः सर्वाश्चिकीर्षन्तीह विप्लवम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवराजं नत्रं हृचेता हृदा वाञ्जन्ति साम्प्रतम् ।
शासका: परिवर्तन्ते पञ्चमे वत्सरे भुवि ।
नवं राष्ट्रपतिं नव्यं प्रधानमन्त्रिणं तथा ।
लोकप्रतिनिधीन् नव्यान् वृण्वते विधिवज्जना: ॥
स्वर्गे नैतादृशी रीतिस्तत्र ह्येक: पुरन्दर:
एको दिवाकरो वह्निश्चन्द्रश्चैको यथापुरा ।
एकरूपात्मनाऽखण्डं प्रभुत्वमुपभुञ्जते ।
न हि कश्चित्परो देवस्तादृशं सौख्यमृच्छति ।
निन्दन्ति देवता: सर्वा विधातुर्विषमं विधिम् ।
मर्त्ये च युवराजोऽयं पितर्युपरते सदा
राजा भवति भुङ्क्ते च भोगान्नानाविधान् सुखान् ।
स्वर्गे तु देवता: सर्वा जरामरणवर्जिता:
राजा भोगं सदा भुङ्क्ते दरिद्र: कष्टमश्नुते ॥
दीनो विलुञ्छति ग्रासं व्यथितस्वान्तरात्मना
स्वप्ने सुखमवाप्नोति स्वमिन्द्रं परिकल्पयन् ॥

कामराज: —तर्हि किमिति देवर्षे त्वदीये कूटागारे
अगाधे मां विनिक्षेप्तुं निश्चयं कृतवानसि ?
जानासि त्वं महेन्द्रस्य रक्षितुं हि 'मनोपलीम्' (Monopoly)
समेनकावसन्तोऽहं विश्वामित्रतपोवनम् ।
प्रविश्य तपसो भङ्गमकार्षं ललितै: क्रमै: ॥
मेनका गर्भमाधत्त मां निन्दति मुहुर्मुहु: ।
आर्द्रकव्यवसाय्यस्मि, सिन्धौ पोतव्यपाश्रयम्
वाणिज्यं कर्तुमिच्छामि न क्षेमं कलयाम्यहम् ॥
उड्डीयते ममेदानीं वैजयन्ती हलीयुडे (Holliwood)
तथा 'बल्नृत्य'शालायां विजयोल्लासिनी मुहु: ।
'लिप्स्टिक्' रक्ताधरौष्ठयो याश्चपलाश्चञ्चलदृश: ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'प्रकसट्ट' नृत्यकाले यान् अपाङ्गान् सृजते खरान्,
द्राक्षासवप्रमत्तेषु तरुणेषु सुकौशलम् ।
मदीयान् सायकांस्तत्र योजयामि यथायथम् ।
'नाइट् क्लवेऽम्बरैरिक्ता लीलान्यस्तपदक्रमाः ।
अङ्गना यत्र नृत्यन्त्योस्तरुणान् पर्युपासते,
तत्राहं विजयोल्लासी प्रभावं परिदर्शये ॥
द्वापरे द्रौपदीवस्त्रं हृत्वा दुःशासनो मृतः ।
सभायामधुना नारीवस्त्रस्य हरणं पुनः,
विधत्ते गौरवं, यत्तत् सभ्यताया निदर्शनम् ॥
अतोऽहं स्वर्गमुत्सृज्य मर्त्यलोकं समाश्रये ॥
मर्त्यलोकं मया सार्द्धं यदि त्वं सुखमीप्ससे ।
सकृदायाहि येन त्वं सार्थजन्मा भविष्यसि ॥
न कोऽपि भागः स्वर्गेऽस्मिन् किमितीन्द्रपराङ्मुखः ।
असूययाऽऽत्मनो वक्त्रं विकुञ्चसि वृथा मुने ?
अष्ट्रेलियानियूयार्क होटेलेषु धरातले
भारतेऽशोकहोटेले मुम्बय्यां ताज नामके,
लण्डने रीजि होटेले सकृत्पादौ प्रसारय ।
नृत्ये रताश्चलापाङ्गा ललना यौवनोध्दुराः
आवेष्टय वाहुपाशेन कटिदेशं स्मिताननाः ।
भ्रूभङ्गैस्तर्पयित्वा त्वां मादिकां मादिरां शुभाम्
आनने ते निधास्यन्ति सुधारसविडम्बिनीम् ॥

नारदः– (प्रतिरुध्य)

शान्तं पापं जोषमेधि किं तैर्मे ब्रह्मचारिणः ?
मा मा त्वं वाक्यकर्णैर्मा विध्यस्व, विरतो भव ।
साधये देवताकार्यं तत्र मे साह्यमाचर ।
विप्लवं कर्तुमिच्छामि नवीन युगवाहने,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योजना ग्रथिता भव्या, तामिमां सफलां कुरु ।
अभ्यर्थये ते साहाय्यं त्वं पुनश्चपलायसे
मनो मोहयितुं वाक्यैः प्रलोभनपरैर्मम ?
यदि मे योजना नाम सफला स्यात्तदा ध्रुवम् ।
उन्मादना नवीनैका स्वर्गपुर्यामुदेष्यति ॥
आवां हि मिलितावेतत् कार्यं सम्पादयावहे,
युगे युगे प्रशंसाया भाजनं स्यात्र निश्चितम् ॥

कामराजः—अभिनन्दामि ते कार्यं समादिश यथेप्सितम् ।
किं वा कार्यं मया स्वर्गे ? विप्लवस्योपपत्तये ॥

नारदः—विप्लवस्य ततोहेतून् सहजानवधारय ।
सम्राज्ञी सुरलोकस्य शच्यत्र मन्त्रणालये ।
सार्द्धसप्तमहोरात्रं सभामेकां चिकीर्षति ॥
स्वर्नारीसमितेस्तत्र सर्वासां सुरयोषिताम्
दुःखसहरणार्थाय किं कार्यं तद्विचार्यते ।
देवाः सोमरसैर्मत्ता यथेच्छमुपभुञ्जते,
उर्वशीमेनकारम्भाः सौम्यरूपाः सुराङ्गनाः ।
पातिव्रत्यपरा देव्य सीदन्ति परमात्मना ।
न लभन्ते पतिप्रेम न चान्याँस्ता उपासते ।
न च तत्सोढुमिच्छन्ति, प्रतिकर्तुं समुद्यताः ।
एक इन्द्रः सदा शास्ति, सा तस्मै व वधूः सदा,
उपभुङ्क्ते चाप्सरसः, शची दुःखेन ताम्यति ॥
न सेन्द्रादादरं प्रैति देवानन्यान् न सेवते
अन्याय्यस्य विधेरस्य चर्चा कापि भविष्यति ।
सावधानं त्वया तत्र स्वकार्यं साधयिष्यते ।
देवान्तरे शचीदेव्या यदि चित्तं प्रवर्तते
तत्र त्वया योजनीयाः सायकाः कार्यसिद्धये ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथा स प्रेमपाशेन शचींदेव्या वशीयवेत्
स एव देवराजः स्यात्स महेन्द्रः शचीपतिः ।
यदि ह्येवं परा देव्यो विमुखाः स्वस्वभर्तृषु
देवानन्यान् कामयेयुस्तान् प्रोत्साहय सायकैः ।।
यथा ते तासु रक्ताःस्युस्तथा त्वं कर्तुमर्हसि ।
न पापशङ्का कापिस्वात्स्वाधीनेऽत्र कालो युगे
वृणुयुर्ललना ह्यस्मै सम्मतान् सुभगान् पतीन्
एवं हि योजनाऽस्माकं सफला सम्भविष्यति ।।
अभ्युदयो नवीनस्य युगस्य प्रसरिष्यति ।
अवसानं पुराणस्य युगस्य साधितं भवेत् ।

कामराजः—तथास्तु यदि नाम स्यादनर्थः कार्यसाधने
तत्र त्वया सहायेन रक्षितव्योऽस्मि सर्वथा ।

नारदः– अभयं ते प्रयच्छामि सन्नद्धो भव सम्प्रति ।
शरैः पूरय तूणीरं न भेतव्यं कदाचन ।।

(उभौ निष्क्रामतः)

(आधुनिक विलास प्रसाधितयोः शचीरोहिण्योः प्रवेशः)

रोहिणी —अधुना समयो जातो न काऽपि परि दृश्यते ।
आसनानि च रिक्तानि किं विधेयं प्रकाशय ।।

शचीदेवी—('भेनिट् बेग्' स्थगिकातो दर्पणमादाय, तत्र मुखं निरीक्ष्य, गण्डयोः प्रसाधनचूर्णं विलेपयन्ती च हस्तकेतनेन परामृश्य)

शचीदेवी—सत्यं भणामि ते देवि रोहिणि यातना मम,
एक एव बहोः कालान्मघवाऽसौ पतिः स्थितः ।
न तृप्ति मे मनो याति क्लान्तिः संजायते परा,
अङ्गानि चावसीदन्ति न कश्चिद्धृतिमावहे ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्राज्ञी देवलोकस्य यदि नाम भवाम्यहम् ।
उपेक्षिता च दीना च न लभे पत्युरादरम् ।
लावण्यसागरो गात्रे खेलति विभ्रमोज्ज्वलः ।
न काऽपि देववासा मां सौन्दर्येणातिवर्तते ॥
तथापि देवराजोऽयं रमते मेनकादिषु !
न हि मत्तोऽधिका रूपे रम्भा वा मेनकोर्वशी
सोऽयं सोमरसैर्मत्तो वेष्टितो देवनारीभिः ।
आत्मानं हारयन्नृत्ये रम्भादीनां, दिवानिशम् ।
पक्षान् मासानृतून् वर्षान् यापयंस्तृप्तिमश्नुते ।
न करोति सकृच्चित्ते मामिति खेदमावहे ॥

रोहिणी – मन्येऽहं देवराजस्य नृत्यं चित्तविनोदनम् ।
तेन त्वं नृत्यमस्यस्तुं तत्परा भव शोभने ॥

शचीदेवी – न ते वाक्यं युक्तियुक्तं रोहिणि, परिकल्पये,
गृहिणी देवराजस्य महेन्द्रस्य भवाम्यहम् ।
कथं नृत्यामि रम्भादि स्वर्नारीणां गणैः सह ?
लोका मां सापवादेन हासेन धुनुयुर्ध्रुवम् ॥

रोहिणी—मर्यादाया न ते भङ्गो नृत्ये देवि, कदाचन ।
यन्नृत्यमधुनातन्याः सभ्यताया निदर्शनम् ॥
वेल्टनृत्येऽथ बलनृत्ये वाल्यजनृत्येऽथवा यदि ।
इन्द्रेण सहिता पादं विन्यस्यन्ती लयानुगम्
करिष्यसि यदा नृत्यं तदा देवाः समाहिताः ।
सविस्मयाः प्रशंसेयुरिन्द्रोऽपि तृप्तिमावहेत् ।
रसिकस्य महेन्द्रस्य हृदयावर्जनं यदि
अभीप्ससे, तदा नृत्यं साधनत्वेन कल्पय ॥

शचीदेवी—वयस्यस्मिन् नृत्यशिक्षां कर्तुं न बलते मनः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न च शक्तिर्ममाप्यस्ति श्रूयते हि जनश्रुतिः
'निर्लज्जः कुरुते गीतं नृत्यं दग्धमुखस्तथा'
अपरं तेन मां ब्रूहि साधनं येन वज्रिणः।
गर्वं खर्वं करिष्यामि, जीवनं चरितार्थये ॥

रोहिणी—शृणु तेन वचो मे त्वं जहीहीन्द्रमिमं, वृणु
देवमन्यं पतित्वेन स च राजा भविष्यति।
स्वर्गस्यायं विधिः क्षुण्णःस्वर्गं शिष्याच्छचीपतिः।

शचीदेवी—व्यवस्था त्यागपत्रस्य नास्तीह स्वर्गमण्डले।
नासुराः स्वर्गमायान्ति विजयाकाङ्क्षयाऽधुना।
अतो मे मनसः खेदः, सीदामि च मुहुर्मुहुः।

रोहिणी—सदा चैकविधो भावः, समा रीतिर्न रोचते।
करोति जीवनं दीनं, विधीनन्यान् प्रवर्तय।
इदानीं कामराजस्य योजनायाः प्रसादतः
मन्त्रिणो विलयं यान्ति भजन्ते वनवासिताम्।
सैषा प्रथा स्वर्गलोके यदि नाम प्रचारिता,
भविष्यति क्षुभोदकं सकलं स्वर्गपत्तने।
इन्द्रो यमो रविश्चन्द्रः स्वाधिकारं स्वतो यदि।
परित्यजन्ति तत्स्थानेऽभिच्येरन्नवाः सुराः।
विप्लवः सम्भवेन्नूनं नव इन्द्रो भविष्यति,
आशा ते सफला, माभ्यं परिवर्तेत निश्चितम्॥

शचीदेवी—कामराजो भारतेऽस्ति कथं स इह लभ्यते?
प्रस्तावमीदृशं को वा सुधर्मायां करिष्यति?

रोहिणी—भूतले कामराजो यो ह्यस्तनो बाल एव सः
तथापि विप्लवं घोरं जनयामास भारते।
अस्माकं कामराजस्तु विदितो भुवनत्रये।
सम्मोहनैः शरैः सर्वान् हतगर्वान् करोत्ययम्॥
यद्यसौ कामयेदेकमपरस्य स्त्रिया सह।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रेमपाशेन संयन्तुं, सायकं च प्रचोदयेत्,
उभौ परस्परं प्रेमदाम्ना बद्धौ भविष्यतः ॥
यद्यस्ति कामनाऽन्यस्मिन् देवे, तं स्मर्तुं महंसि ॥

शचीदेवी—अहो ते वाक्यचातुर्यं युक्तियुक्तं मनोहरम् !
स्वर्गे विप्लवमाधातुं बलते मानसं मम ।
परन्तु कोऽपरो देवः शौर्ये वीर्ये गुणे तथा
महेन्द्रस्य समो रूपे, यमहं वृणुयां पतिम् ?

रोहिणी—सौन्दर्ये सम्भ्रमः सोऽयमनर्थाय, जहीहि तम् ।
यतो रूपवती भार्या शत्रुरित्यभिधीयते ॥
लावण्यं च नवेन्द्रस्य तव शत्रुर्भविष्यति ।
तस्मात्सौन्दर्यं सम्मोहं परित्यज्य स्वमोप्सितम्
देवमन्यं पतित्वेन वृणु, येन भविष्यति
अपमानप्रतीकारो गर्वभङ्गश्च वज्रिणः ॥

शचीदेवी—सौन्दर्यस्य पिपासा चेत्परित्याज्या तदा पुनः
कुबेरान्नापरो देवो गौरवेणातिरिच्यते,
टाटा–फोर्डो राकफेलविरलाः प्रथिता भुवि,
कुबेरोऽस्त्येति तानेतान् राजराजश्च कथ्यते,
आकृत्या नैव सौम्योऽयं समृद्धिस्तु गरीयसी,
सम्पत्त्यां विद्यमानायां कुरूपो मदनायते ।
स तु मां प्रीतिपूर्णेन चक्षुषाऽमरसंसदि
निभृतमनिमेषेण पश्यतिस्म तदा तदा ॥
यद्ययं धनदो भूयाद् देवानामधिपस्तदा ।
स्वाधीनभर्तृकात्वेन भवेयं सार्थजीविता ।
उपेक्षा देवराजस्य कुबेरस्य च कामना

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सौन्दर्यस्य प्रभावेण प्रीतिदाम्नाऽथवा पुनः ।
आवध्य शाटिकान्तेन स्वाधीनं करवाणि तम् ॥

रोहिणी—धन्याऽसीन्द्राणि धन्याऽसि यदि त्वं देवमण्डले
एवं विप्लवसाधास्या स्तदा विस्मयरूपिणी
वन्या कापि प्लवेत्स्वर्गे ह्यसम्भाव्यस्य सम्भवात् ॥

शचीदेवी—मत्तोऽधिकतरं दुःखं कलये तव रोहिणि,
पतिस्तावत्क्षयाक्रान्तः सपत्न्यः षट् च विंशतिः ।
कीदृशेनाभिशापेन त्वं चन्द्रस्य वधूः स्थिता ?
सकृत् क्षीणेन चन्द्रेण यामिनीयापने तव
कीदृशी यातना न स्यादित्यहं चिन्तयामि ते ।
किं त्वं नेच्छसि भास्वन्तं ज्योतिष्मन्तं पतिं हृदा ?
जीवनं सार्थकं कर्तुमवकाशो भवेद्यदि,
भाग्यं यदि प्रसन्नं स्यात्सुयोगश्चापि लभ्यते ॥

रोहिणी—कियन्ति न व्यतीतानि दिनानि चिन्तने मम
सूर्यं पतित्वेनावाप्तुं सीदामि चान्तरात्मना ।
ताराभिस्तस्य सम्पर्को दुर्घटः खलु सर्वथा ।
छायायां कृष्णकायायां वद्धप्रेमा विभाव्यते ।
योग्यतायां गुणे रूपे नैषा मामतिवर्तते
जन्मान्तरं चेद्देवानामवश्यं तपनं पतिम्
वृत्वा स्वं जीवनं कुर्यां सार्थकं पूर्णमानसा ॥

(अन्ययोर्देव्योः प्रवेशः)

शचीदेवी—चपलेयं तथा स्वाहा विलम्बः किमयं कृतः ?
सार्द्धं सप्तमहोरात्रां महिलासमितेरिह,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अधिवेशनमित्येवं सूचना प्रागदीयत ।
इदानीमष्टमी होरा न देव्यः समुपस्थिताः ।
सम्भाव्य संख्याऽभावाच्च सभायाः स्थगनं कृतम् ।
परस्त्वन्नावयोर्मध्ये विचारः समपद्यत ।
युगं युगं समारभ्य देवलोके स्थिरः क्रमः ।
शचीन्द्रौ रोहिणीचन्द्रौ छायादिवसबान्धवौ ।
स्वाहाग्नी च तडिन्मेघौ पत्नी स्वामी च सर्वदा ।
विधानं च विधेरेतत्सर्वथाऽपरिवर्तितम् ॥
मर्त्ये तु ललना मृत्यौ लभतेऽन्यं पतिं, ततः ।
दाम्पत्य जीवनं नव्यं भव्यत्वेन विभाव्यते ।
दाम्पत्यजीवणं स्वर्गे पुराणं चाथ नीरसम् ।
विप्लवं कर्तुं मावाभ्यां योजना काऽपि कल्पिता
स्वर्गस्थाः सकला वामा यदि हित्वा निजान् पतीन् ।
पत्यन्तराणि गृह्णीयुस्ततः क्षेमतरं भवेत् ॥
उदीयान्नाम चाञ्चल्यं किमपि देवमण्डले ॥

स्वाहा—मदीयमन्तरङ्गस्थं भावं देवि, प्रभाषसे ।
सदाऽग्निसेवनेनाहं विरक्ता दूनमानसा ।
प्रथमे प्रणये वह्नेः शरीरं हव्यसौरभम् ।
शिखाभि र्नृत्यसञ्चारं रुचिरं सुमनोहरम् ।
द्युतिमद्रूपमालोक्यावृणवं तं पतिं हृदा ।
इदानीं तु श्मशानस्य पूतिगन्धयुतं हि तत् ।
गन्धकादि यवक्षारै र्दीपित्तं विकृतं च तत् ।
रूपं भयङ्करं वीक्ष्य भीतिं चेतसि कल्पये ।
सर्वदा जायते क्षोभो घृणाऽस्वस्ति मे मानसे ॥
वैज्ञानिके युगे चास्मिन् सम्बन्धं, तेन मे चिरम् ।
उच्छेत्तु मभिवाञ्छामि प्रेम्णे स्वाहां करोमि च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शचीदेवी—कस्यापरस्य देवस्य भाग्यलक्ष्मी बुभूषसि ?
अग्निं त्यक्त्वा ततो देवि, विना शङ्कां प्रकाशय ।

स्वाहा—दहन्त्याश्च ज्वलन्त्याश्च व्यतीतानि दिनानि मे ।
तेन मे बलते चित्तं शीतलं वस्तु सेवितुम् ।
प्रशान्तसागरे रम्ये वरुणेन समं सदा
आधातुं सलिलक्रीडां स्वप्नं पश्यामि सम्प्रति ।
वरुणेन समं वाथ गभीरे सागराम्भसि
मुक्ताजालं समाहर्तुं मनः कामयतेऽधुना ।

चपला—अहं तु कामरूपस्य मेघस्यान्तरवर्तिनी
धूमैरुद्धा विषीदामि चन्द्रं च पतिमाद्रिये ।
चन्द्रज्योत्स्नावृतानिस्यं स्निग्धालोकेन यामिनीम् ।
रञ्जयन्ती विराजेयमिति मे वासना हृदि ।

(दूरभाषणयन्त्रं स्फुरति)

शचीदेवी – (यन्त्रमुत्तोल्य)

हलो, को वाऽभिवत्से त्वं मदनस्त्वं ? भव स्थिरः
सभायां व्यापृतेदानीमन्यदाऽऽह्वातुमर्हसि ।
श्वो वा परश्वश्चापल्यं सर्वदा ते प्रकाशते)

किमित्यस्यातश्यकीयं ? पुनः किं क्षुद्रका कथा ?
किं किं ब्रूषे मनोऽस्माकं सफलं सम्भविष्यति ?
किं कन्दर्प, ऋतं ब्रूषे श्वः प्रभृति घनाधिपः
स्वर्गस्याधिपतिर्भूयान् न सम्भाव्यं कदाचन !
रोहिण्या न रवीरात्रौ सञ्चरिष्यति मोदितः
किं देवमण्डले चस्मिन् विप्लवं कर्तुमिच्छसि ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारतीयं ज्यौतिषम्

(अनुवृत्तम्)

लेखकः—श्री वायिकोलि ज्यौतिषविशारदः

मानवो यदि पूर्वजन्मकृतकर्मफलानुरूपं जन्म प्रपद्य शुभाशुभफलानि उपभुङ्क्ते इति यदि निश्चीयते, तर्हि पुरुषकारस्य न काऽप्युपयोगिता वर्तेत। दैववादिनो वदन्ति दैवं भाग्यं, विधिर्वा वलवत्तरतया अवतिष्ठते, पौरुषं नु नगण्यमेव पुरुषकारो यदि दैवनिर्देशमन्यथा-कर्तुं प्रभवेत्, तर्हि जगति न किमपि वैषम्यमवतिष्ठेत ! सर्वेऽपि सुखमभिलषन्ति, धनं सम्मानं च कामयन्ते। दृश्यते हि यत्र योग्यतमो जनो वहुधा प्रयतमानो विफलतामेति तत्र कुहचिदयोग्यो जनो विना विशिष्टं प्रयत्नं साफल्यमधिगच्छति। तदिदं दैवस्यादृष्टस्य वा विलसितमेव। सुतरां प्रारब्धानुसारेण यद्भावि, तद्भवति, यन्न भावि तन्न भवति। (१) यथायथमालोचितं सम्यगारब्ध सुसम्पादितमपि कार्यं दैवयोगाद् विनश्यद् दृश्यते (२)

सर्वाण्यपि भुवनानि दैवाधीनानि। दैवबलं हि प्रबलम्। (३) दैवं रज्जुर्मानवो गोविशेषः, तयाऽऽकृष्टो यत्र, तत्र प्रयाति' इति च प्रवचनं यथार्थं प्रतिभाति

---

(१) यदभावि न तद्भावि, भावि चेन्न तदन्यथा।
इति चिन्ताविषघ्नोऽयं वोधो भ्रमनिवर्तकः॥
पञ्चदशी, १६७ श्लोकः।

(२) सुमन्त्रितं सुनीतं च न्यायतश्चोपपादितम्।
कृतं मानुष्यकं कर्म दैवेनापि विरुध्यते॥
उद्योगपर्व, ७१।२६

(३) दैवाधीनं जगत्सर्वं जन्म कर्म शुभाशुभम्।
संयोगाश्च वियोगाश्च न च दैवात् परं बलम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पौरुषवादिनश्च प्रतिपादयन्ति-मानवः स्वप्रयत्नेन सर्वविधमपि कर्म साधयितुं प्रभवति।(१) स यदकुरुत, तद्विपरीततया गत्वा पूर्वकर्मार्जितं फलमन्यथाकर्तुं प्रभवति। उद्योगवान् लक्ष्मीमासादयति। न हि सुप्तस्य सिंहस्य मुखे मृगाः प्रविशन्ति। सिंहेन आहारसंग्रहणार्थं प्रयतनमपेक्षितम्. (२) कुम्भकारो यथा मृदं विमर्द्य ततः स्वाभिमतानि पात्राणि निर्माति. तथा मानवः स्वकीयं कर्मजातं नियम्य, तदनुरूपां सिद्धिं लभते। (३)

अथर्ववेदस्य एकस्मिन् सूक्ते एवं हि वर्णितमास्ते यत्पुरुषार्थः प्रयत्नो मे दक्षिणे हस्ते विजयश्च मे वामहस्ते' इति। (४)पुरुषार्थबलेन गावः. अश्वाः, यवः धान्यं हिरण्यं समृद्धिश्च अवश्यं लभ्येरन्।

योगवाशिष्ठे रामायणेऽभिहितम्- यत्पौरुषं विहाय दुःखनाशकं नोपायान्तरं वर्तते। दैन्यं दारिद्र्यं दुःखमित्यादीनि स्वस्य

---

(१) स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम्।
तस्मात्पौरुषमेवेदं श्रेष्ठमाहुर्मनीषिणः॥ ब्रह्मवैवर्तपुराणम्
प्रतिकूलं यथा दैवं पौरुषेण विहन्यते। मत्स्यपुराणम्,
१९५ अध्यायः।

(२) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति॥
× × × ×
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥ नीतिशास्त्रम्।

(३) यथा मृत्पिण्डतः कर्ता कुरुते यद्यदिच्छति।
एवमात्मकृतं कर्म मानवः प्रतिपद्यते॥ हितोपदेशः।

(४) कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः।
गोजिद् भूयासमश्वजिद्धनञ्जयो हिरण्यजित्॥ अथर्वसंहिता७।८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरुषकारेण दूरीक्रियन्ते, इन्द्रपदमपि लभ्यते। स्वपुरुषकारेण मानवो वीरः शूरः, प्राज्ञः पण्डितश्च सम्पद्यते। तत्र दैवस्य न कोऽपि सम्पर्को वर्तते। पूर्वजन्मकृतस्य कर्मणः फलभोगः प्राक्तनकर्मफलमन्यथा कर्तुं शक्यते। यथा बलिष्टस्तरुणो बालान् पराजयते, तथा बलिष्ठः पुरुषकारः पूर्वकृतानि जयति। मेषयोर्बलिष्ठयोर्द्वन्द्वयुद्धमिव दैवपुरुषकारयोरपि पारस्परिकी प्रतियोगिता प्रचलति। अन्यतरस्य वरावरत्वाभ्यां जयपराजयौ नियन्त्रितौ भवतः †

उपर्युल्लिखिताः सर्वा युक्तय एकपक्षीया भवन्ति। यदि सर्वाण्यपि कर्माणि दैवायत्तानि स्युस्तर्हि पुरुषकारस्य न काप्युपयोगिता वर्तेत। पापपुण्ययो र्विनिश्चयार्थं न किमपि साधनमुपलभ्येत। क्रियमाणेषु कर्मसु स्वतन्त्रताभावे मनुष्यो जड़ो जायेत। विवेक इति वार्ताऽप्युच्छिद्येत, न्यायान्याययोः सत्ता विलुप्येत। शास्त्रविधीनां कार्याकार्यविधानस्य च प्रयोजनं न वर्तेत। सर्वेषु विषयेषु सकलेषु च कर्मसु मनुष्यो दैवमेव समाश्रयेत। संयममेकाग्रतामभ्यासं च

---

† अत्रैकं पौरुषं यत्नं वर्जयित्वेतरा गतिः।
सर्वदुःखक्षयप्राप्तौ न काचिदुपपद्यते॥
योगवाशिष्ठम् ३।६।१४

दैन्यदारिद्र्यदुःखार्ता अप्यन्ये पुरुषोत्तमाः।
पौरुषेणैव यत्नेन याता देवेन्द्रतुल्यताम्॥
बालः प्रबलपुंसेव तज्जेतुमिह शक्यते।
द्वौ हुडाविव युध्येते पुरुषार्थौ परस्परम्॥
योगवाशिष्ठम् २।६।४

× × ×

य एव बलवांस्तत्र स एव जयति क्षणात्।
योगवाशिष्ठम् २।६।१०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विस्मरेत् । एवमेव सकलमपि कार्यजातं पुरुषकाराधीनमिति स्वीक्रियते, तदा मानवः अज्ञान उच्छृंखलो नास्तिकश्च सम्पद्येत । अत उभयोर्मीमांसा करणीया विभाव्यते ।

[illegible]वेन यत्कृतं यच्च करिष्यते, तयोः कर्मणोः शक्तिसंयोगो लाभालाभयोः क्षयवृद्ध्योश्च कारणम् तयोरन्यतरत् प्राक्तनम्, अपरं चाद्यतनम् । एकं प्राचीनम्, अपरं च नवीनम् । प्राक्तनेन फलेन आयुःसुखादीनि नियन्त्रितानि भवन्ति, स्वभावः प्रवृत्तिश्चाद्यतनेन फलेन नियम्यते । मानवोऽभ्यासेन चेष्टया च स्वभावं प्रवृत्तिं च परिवर्तयति । पारिपार्श्विकत्वादिभिः कारणैर्विपथगामि चित्तं संयमेन शास्त्रज्ञानेन सत्सङ्गादिभिश्च अवरुणद्धि ।

प्रारब्धकर्मफलस्य परिवर्तनं नितान्तं कष्टसाध्यम् । परन्तु चेष्टया अभ्यासेन च किञ्चिदिव परिवर्तनं कर्तुं शक्यते । पुराण नवीनयोः सततं संघर्षो भवति । तयोर्यस्य यदा प्राबल्यं सम्भवति, तस्य तदा विजयो भवति । सोऽयं क्रमश्चिरन्तनः । पुरुषार्थस्य प्राबल्ये कर्मपाशश्छिन्नो भवति । दैवं पराजीयते । ज्ञानाग्निः समेधते । तस्य यथायथे प्रयोगे कर्मजालं ध्वंसमेति ।१

शीतं दैवकृतम । वस्त्रेण तस्य प्रकोपो न्यूनीक्रियते । ग्रीष्मतापो दैवकृतश्छत्रेण व्यजनादिभिश्च निवार्यते । क्षुधा भोजनेन, पिपासा च जलेन निवार्यते । एकचक्रो रथो नैव चलति । पक्षी एकपक्षो नैवोड्डीयते । तथा केवलेन दैवेन, केवलेन वा पुरुषकारेण न किमपि साधयितुं शक्यते । कार्यसिद्धौ उभयोः सहयोगो नितरामपेक्ष्यते ।२)

---

१) यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा । गीता ४ ३७

२) दैवमप्यकृतं कर्म पौरुषेण विहन्यते ।
शीतमुष्णं तथावर्षं क्षुत् पिपासा च [illegible] ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरुषकारं वर्जयित्वा केवलेन दैवेन मानवस्य जीविकानिर्वाहो न सम्भवति । अतो मानवः कर्मणि प्रवर्तेत । क्षुद्रा अग्निकणिका वायोः साहाय्येन यथा समेधते, तथा दैवं पुरुषकारेण समेधते[१] ।

दैववादिनोऽभिप्रयन्ति – यदि कर्मपाशः प्रबलया चेष्टया छिद्येत, तदर्थश्च प्रतिकारो विद्येत, तर्हि नलरामचन्द्रयुधिष्ठिरादीनां महापुरुषाणां तादृशकष्टभोगो नोपपद्येत ।[२] इदमन्यथा समाधातुं शक्यते ।

प्रसङ्गेऽस्मिन् एतदेवं रीत्या समाधातुं शक्यते । नलरामचन्द्रादयो जीवन्मुक्ता महापुरुषाः । सुखं दुःखं च तेषां समतया प्रतिभासते । ततस्तैः प्रारब्धकर्मणो विरोधो न कृतः, आदर्शप्रदर्शनाय च दुःखमनुभूय प्रारब्धकर्मणः परिसमाप्तिः कृता परन्तु अन्यत्र बहुषु क्षेत्रेषु परिदृश्यते यत्क्रियमाणशक्तिप्रभावेण प्राक्तनं सम्पूर्णतया विपरिणमति । ध्रुव सावित्री विश्वामित्रादीनां चरित्रमत्रोदाहरणम् । पुरुषकारविहीनो हि जनो न च सुखादिकमनुभवितुं प्रभवति, दैवं दुःखाद्यनुभवे प्रवृत्तान् जनान् न खलु निवर्तयितुं प्रभवति । अतो मनुष्यस्येव दैवस्य न साक्षात्कर्तृत्वं वर्तते । गुरुं शिष्य इव दैवं

---

१ । यथाऽग्निः पवनाद् धूतः सुसूक्ष्मोऽपि महान् भवेत् ।
तथा कर्मसमायुक्तं दैवं साधु विवर्धते ।
महाभारतेऽनुशासनपर्वणि ५।४७

२ । अवश्यम्भावी भावानां प्रतीकारो भवेद्यदि ।
तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः ।
पञ्चदशी – १५५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वदा पुरुषकारमनुवर्तते । पुरुषकारो बहुविधानि भोगसुखानि साधयति (१)

भगवतो व्यासदेवस्य मते मानवो ज्ञानबलेन कर्मफलमन्यथाकर्तुं प्रभवति । एतद्धि तदीयस्य ब्रह्मसूत्रस्य तृतीयेऽध्याये चतुर्थपादस्य षोडशसूत्रे "उपमर्दं चेति" प्रमाणनिरूपणावसरे विपुलतया प्रतिपादितमास्ते ।

यथायथं कर्मप्रवणेन, सद्बुद्ध्या परिचालितेन, कर्मणो गतिं स्थितिं च सम्यगवबोध्य प्रकृतसरणिमनुवर्तमानेन च जनेन दैवमन्यथा कर्तुं शक्यते । (२) एकस्मिन् जन्मनि यावत् सुखानि वितरति । (३)

---

(१) न च फलति विकर्मा जीवलोके न दैवं
व्यपनयति विमार्गं नास्ति दैवे प्रभुत्वम् ।
गुरुमिव कृतमस्य कर्म संयाति दैवं
नयति पुरुषकारः संचितस्तत्र तत्र ।

अनुशासनपर्व ५।७७

(२) प्रतिकूलं यथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशीलिनाम् ।
पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ।
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ।।
कृषेर्वृष्टिसमायोगात् दृश्यन्ते फलसिद्धयः ।
तान्यकाले प्रदृश्यन्ते नैवाकाले कथञ्चन ।।

मत्स्य पुराणम् । १५ ।

(३) अरुमेका त्तंगत्ता कालभि योस्भाट् ।
केरूमे यु मेमा पुरदैयु ।
'तिरुक्कल' नामधेयस्य द्रविडवेदस्य तात्पर्यमेतद्यदर्जितं ज्ञानं न कदाचित्क्षयमेति, बहूनि जन्मानि यावत्सुखं साधयति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मवादरहस्यस्य मीमांसां परिकल्पितुं सिद्धतपसो महर्षयो ज्योतिःशास्त्रस्य रचनां व्यदधुः। ग्रहाणां स्थित्या, योगेन, दृष्ट्या तथा अन्यैश्च बहुविधैर्बलैः शुभान्यशुभानि विज्ञायन्ते। एतैः सर्वैर्विज्ञातैर्मानवः कृतानि कर्माणि ज्ञातुं प्रभवति, स्वकीया बुद्धिः कथं सता मार्गेण परिचालनीया, तदर्थमुपायाननुसन्धत्ते, ईश्वरं चाश्रयते। अस्यैव शास्त्रस्य परिशीलनेन धर्मे श्रद्धा पापे भयं च समुदेति। ग्रहैर्दीयमानं फलमैश्याः शक्ते रूपान्तरमेव। परमात्मैव ग्रहाणां स्वरूपमाधाय मानवानां तथेतरेषां च जीवानां कर्मफलानि विधत्ते। पराशरेण हि एवमभिहितम् —

देवता ग्रहरूपेण मनुष्याणां शुभाशुभम्
फलं प्रगर्जितं यच्च तद्ददाति स्वकीयकम् ॥
अवतारा ह्यनेके च ह्यजस्य परमात्मनः।
जीवानां कर्मफलदो ग्रहरूपी जनार्दनः॥

इति। ग्रहाणां परमेश्वरस्य च विभेदेऽपि ये विज्ञाने यथाऽधिकमुन्नताः, ते दुर्बलान् तथाधिकं बाधन्ते। वैज्ञानिकबलेन च समग्रामपि पृथिवीमात्माधीनां कर्तुं समीहन्ते। विज्ञानं सत्यं सन्धत्त इति बहिःप्रकटयन्ति, कार्यतस्तु विप्रतीपमाचरन्ति, वैज्ञानिकाइति पुरस्कृता अपि जनाः प्राणदण्डेन दण्डिता भवन्ति यतस्ते वैज्ञानिकं तथ्यमितरदेशीयान् विज्ञापितवन्तः। सभ्यम्मन्येषु देशेषु एषा हि दैवन्दिनी रीतिः। विज्ञानं जगतो हितार्थमभिप्रेतम्। विज्ञानतथ्यानां प्रकाशकरणे दण्डविधाने विज्ञानस्योद्देश्यं नैव साधितं भवति प्रत्युत तदिदं विज्ञानं केवलं मुष्टिमेयानां केषांचित्स्वार्थसाधनायोपादानं भवति। अपि चैतदनु शोचनीयं भवति यदुत केचन ज्योतिःशास्त्रं फलितगणितात्मकत्वेन द्विधा विभज्य प्रथमं हेयं द्वितीयं चोपादेयं मन्यन्ते। कालस्य प्रभावेण ग्रहनक्षत्राणां गतिस्थितिभिः सह जगतः सकलाः क्रिया,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुज्ञानां च जीवनचरितं संसृष्टानि वर्त्तन्ते । केवलं ग्रहाणां स्थिति–गति–वर्ण–किरणाकर्षणविकर्षणादीनां गणनया मानवजीवने न कोऽप्युपयोगो दृश्यते । वाष्पमानयन्त्रे (Barometer) पारदस्योत्थानपतनाभ्यां वर्षस्य स्वरूपं परिमाणं च स्थिरीक्रियते, अन्यथा केवलं परमार्थतो न कोऽपि भेदो वर्तते । प्रतिकलं ग्रहजगति परस्परमाकर्षणानि विकर्षणानि च संघटन्ते तैश्च या प्रतिक्रिया सम्भवति, महर्षयो दिव्यया दृशा प्रत्यक्षीकृत्य मानवानां सहजबोधाय सरलया भाषया सरलैश्चोपायै न्यर्यवध्नन् । स एष निबन्ध एव 'ज्योतिः शास्त्र' मिति नाम्ना व्यपदिश्यते ।

इदानीं विज्ञानबलेन वहुविधाः कल्पनाः सम्भवन्ति । चन्द्रलोकस्य सन्निहितस्य कथा तिष्ठतु नाम सुदूरं मङ्गलमण्डलमपि नचिरान् मानवस्य वासोपयोगि सम्पद्येतेत्यत्र सन्देहो नास्ति । चन्द्रमण्डलमपि अणुमारणास्त्रैं विशकलं कर्तुं शक्यत इति वैज्ञानिका आमनन्ति, ग्रहमण्डलं प्राग् योगबलेनान्यैश्च साधनैः मनुष्याणां सुगमभासीदिति पुराणेषु वर्णितमास्ते । परन्तु तत्रावासकल्पना वैज्ञानिकानामेव दानम् । एतस्य सत्यता भविष्यता एव प्रमाणीक्रियेत । परन्तु महर्षयोऽभिप्रयन्ति–रक्तमांस घटित विग्रहो मानवः पृथिव्यामेव निवसितुं शक्नोति नान्यत्रेति । तेषु ज्योतिर्मयशरीरा एव अवस्थातुं शक्नुवन्ति ।

विज्ञानस्य ध्वंसकारिणी शक्तिरनुदिनं वर्धते. सर्जनाशक्तिश्च ह्रासयेति । परान् भयभीतान् सम्पाद्य स्वस्य सुखसमृद्धिसाधन माधुनिक विज्ञानस्य चरमं लक्ष्यं भवति । शुष्कगणनया न किमपि फलं साधितं भवति । अतो गणितज्योतिःशास्त्रेण सह फलितज्योतिशास्त्रमपि संग्रहणीयं भवति । फलितज्योतःशास्त्रं हि ज्योतिःशास्त्रस्य महावृक्षस्य शाखैका भवति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आधुनिकं समुन्नतं विज्ञानं सौरमण्डलं प्रति क्षेपणास्त्राणि प्रेरयति, परन्तु देशादस्मात् अतिवृष्टेरनावृष्टेश्च निराकरणे मूकत्वं भजते, न च किमपि कर्तुं प्रभवति। परन्तु साधारणोऽपि एक ज्योतिर्वित् वातस्य गतीः ग्रहाणां चावस्थितिं कलयित्वा वृष्टिविषये यां भविष्यद्वाणीं प्रकटयति सा बहुभिर्लक्षैः रूपकाणां परिचाल्यमानस्य जलतुविभागस्य भविष्यद्वाणीतः समधिकं कार्यकारिणी संदृश्यते। तथापि फलितज्यौतिषं नैव वैज्ञानिकमिति ते विश्वसन्ति।

अस्माकं विश्वविद्यालया ज्योतिःशास्त्रं फलितगणितात्मकत्वेन द्विधा विभज्य गणितज्यौतिषमेव विश्वविद्यालयपाठचक्रमेऽन्तर्भावयन्ति, फलितांशं च परिवर्जयन्ति। ज्योतिःशास्त्रस्योत्पत्तिभूमावस्यामितोऽधिकं दूरदृष्टिविहितं किमन्यत् कार्यं स्यादिति विचारणीयं भवति। तदिदं कार्यं केवलं पाश्चात्यविदुषामन्धानुकरणस्य परिचायकम्। यावत्तेषां हृद्बोधो न भवति फलितभागं च ते शिक्षणक्रमे नान्तर्भावयन्ति, तावत्पर्यन्तमन्धानुकरणप्रवणैरस्माकं विद्वद्भिरपेक्षितव्यं भवति।

(सावशेषम्)

गीतसीतावल्लभम्

तृतीयः सर्गः

संसारक्लेशहा ध्वस्तकंसादिदम्भसम्भवः।
अंसासक्तधनू रामस्ताडकावनमाविशत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इतस्ततस्तामवलोक्य ताडकां
क्षणेन बाणाशनिभिन्नवक्षसम् ।
विधाय तिष्ठन्तमुदग्रतेजसं
सकौशिकं सानुजमीड़िरे सुराः ।

गुर्जरीरागः

यामिमां विकटां विलोक्य युतां सदा तनयेन ।
तापसाः सभया जहुः सदनानि यातनयेन ।
रघुवर हतेयमहिता त्वया सा कुपितेन । ध्रुवः ।
तापसाश्रमतापदा मुनिशापदानवशेन ।
राक्षसीतनुलक्षिताऽपि न विक्षता त्रिदशेन ।२।
स्फुर्जयूत्कटगर्जिताम्बुदतर्जनाकलितानि,
यद्ध्र्वं नेघृं तिसाध्वसैः सुमनोऽध्वगैर्न गतानि ।३।
या चलच्छिखरिभ्रमाद् वलघातिमाऽतिबलेन ।
ताडिताऽपि न कम्पते पविना भृशं विफलेन ।४।
यादृशं बत भूतमद्भुत मुच्छ्रितं विधिसृष्टम् ।
भूतले न रसातले दिवि न श्रुतं न च दृष्टम् ।५।
गाधिजाद् गुरुताधिकादवधारयास्त्रमवार्यम् ।
साधयासुरबाधया हततेजसां गुरु कार्यम् ।६।
स्वीकृतं परिपालयाशु निभालयामरराजम् ।
ताडकावधदीर्घसम्मदतावकस्तवभाजम् ।७।
पावनं शितिकण्ठकल्पितराघवोज्ज्वलगीतम् ।
द्रागिदं वहु कामदं तव जायतां श्रुतिपीतम् ।१०
हतगुरुभयं हृद्यं हृष्टं हिताहितमाहितम् ।
हरिहयमुखा हर्षाद्रामं प्रपूज्य दिवं जग्मुः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुनिरपि ययावस्त्रग्रामं सजृम्भकमादरा–
द्रघुपरिवृढे न्यस्य स्वस्याश्रमं विगतश्रमः ॥

पाणौ सायकमेकतस्तदितरे चापं गुणाढ्यं दधद्
गुर्गालोकनकौतुकी मलयजेनासेवितः पृष्ठतः ।
रत्याढ्यः सुहृदानुजेन शुचिना युक्तः पुरस्ताद्विजो
रामः काम इवेषुणा कलयितुं भीमं सुवाहुं ययौ ॥

भूसौन्दर्यधरं धनुर्दधदयं किं दर्पको मूर्त्तिमान् ।
किं वा वामन एष आश्रमपदं स्वीयं प्रविष्टः पुनः ।

इत्यानन्दरसोद्धुरा मुनिवरा रामं विलोक्यादराद्
दूरादेत्य सगाधिजानुजमजं संपूज्य निन्युः पदम् ॥

तान्यासाद्य गृहाणि गाधिजनुषो रामस्तदा मौनिनः
षड्रात्रीः शरचापपाणिरत्रसत्तद् विघ्नहर्त्ता ततः ।

मारीचं हृदि मानवास्त्रकलितं क्षिप्त्वा तटे वारिधे-
राग्नेयेन पुनः सुवाहुमदहद् वायव्यतोऽन्यानपि ।

भ्रूक्षेपभिन्नरिपुणा सह राघवेण,
सर्वैः समेतमुनिभिश्च स गाधिस्वसूनुः ।
श्री शोणतीर कथिताद्भुततथ्यवाक्यः
पथ्यर्चितः प्रमतिना मिथिलां जगाम ।

इति श्री गीतसीतावल्लभे महाकाव्ये शितिकण्ठकृतौ ताड़कादि-
वधो नाम तृतीयः सर्गः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थः सर्गः

अथ रामपदाम्भोजधूलिनिर्धूतकल्मषा ।
अहल्याऽऽनन्दसन्दोहमस्मिता प्राह राघवम् ।

कर्णाटरागः ।

विन्दति चन्दनबिन्दुरतुलरुचिसुन्दरभाले ।
तव करुणामृतसागरपरिलसदिन्दुतुलां सुविशाले ।

सा सदये त्वयि पूता । राघव परमहमिह
दुरितार्णववीचिचयैरवधूता । ध्रुवः ।

गण्डबिलम्बिशिखण्डकमण्डलमण्डितमास्यमुपास्यम् ।
इदमलिकुलकलितं नलिनं तव तुलयति यस्य न दास्यम् ॥

श्रीकरपल्लवमुल्लसदविरतलोहितरुचिरणलोलम्
कलयति रुचिरविचित्रमिदं तव मृदुनखरं शरजालम् ।

त्वत्पदि भाति रजोगुण इत्यपि विन्दति हृन्मम शङ्काम् ।
चरणरजस्तव सृजति वधूमपि यदुपलतोऽप्यकलङ्काम् ॥

स्वान्तलसत्करुणार्णवसमुदितवीचिचयप्रतिबिम्बम् ।
विपुलमुरस्तव नवजलदोज्ज्वलं कलयति शुचिरुचिबिम्बम् ३।

सुरुचिरपल्लव रुचिमपि वाञ्छतु तव नवपल्लवसंज्ञम् ।
पद्ममिति स्फुटनाम दधाति किमम्बुजमल्पमसज्ञम् ।४.

श्री शितिकण्ठभणितमतिमधुरं सततमिदं श्रवणीयम् ।
रघुपतिपावित गौतममुनिरमणीबचनं रमणीयम् ।५।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आवासोपलभूतगौतमवधूमुद्धृत्य धूल्यापदो
न्यस्तं मैथिलमन्दरे शिवधनुर्दष्टुं विवृद्धस्पृहम् ।
श्रीरामं मिथिलेश्वरो विरचितातिथ्यः स कौतूहला-
दावेद्यागमनप्रयोजनमदः पृष्टोऽवदत् कौशिकः ॥

देशाख्य रागः

निशितविशिखहतताडकमेतम्
सारमहो रुचिनिचयनिकेतम् राघवं,
स्वधनुर्नृप दर्शय । ध्रुवः ।

अनुदितबलमनुपममृदुलसुबाहुम् ।
नातिकलितशरदलितसुबाहुम् ।२।

निखिलभुवनपरिपालनदक्षम्
शिशुतनुधरमपि कृतमखरक्षम् ।३।

अगणितगुणमपि गुणरसवन्तम्
अवहुगुणं धनुरपि कलयन्तम् ।४।

यत्पदधूलिविगलदघशल्या
भूप वहसि निजरूपमहल्या ।५।

इममपि वरमिह कलय जगत्याम्
मम गिरमपि हृदि भावय सत्याम् ।६।

ललक्ष्मणमिममपि रामकनिष्ठम्
कलय करोज्ज्वलकार्मुकनिष्ठम् ।७।

श्रीशितिकण्ठभणितमिति चित्रम्
दुरितचयं द्यतु रामचरित्रम् ।८।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सारः सर्वधनुष्मतामयमिहानीतो मया सानुजः
श्रीरामः कुतुकेन खण्डपरशोर्दृष्टुं धनुर्वाञ्छति ।
तत्तूर्णं तदिहानयेति स तदाकर्ण्यर्थात्मकर्णामृतं
विश्वामित्रवचो मनोरथफलं मेने करस्थं नृपः ।।

स्मराभिरामं स निरीक्ष्य रामं
कामं सभायां विनिवेद्य कामम् ।
समानयद्दाशरथेः समीपं
चापं दुरापं कृतवीरतापम् ।।

कन्दर्पाहितकार्मुकं निजकरेणोद्धृत्य कौतूहलात्
तद्दुर्द्धार्य्यमवार्यवीर्यमहिमा साश्चर्यमापूर्य सः ।
निर्घातोच्चयदैर्घ्यभृद्ध्वनिभरस्तब्धीभवत्क्ष्मातलं
ज्याकृष्ट्यैव बभञ्ज सार्धमखिलं क्षोणीभुजामोजसा ।

क्षणमथ कलयन् क्षितिक्षणेऽक्षिद्वयमाशु वितर्क्य तस्य कर्म ।
ज्वलितमपि भृशं स्ववीरतेजः शममनयन्महता त्रपारसेन ।।

इति श्रीगीतसीतावल्लभे महाकाव्ये शितिकण्ठकविकृतौ धनुर्भङ्गो नाम चतुर्थः सर्गः ०।

पञ्चमः सर्गः

ग्रहनि सह तदैव वेगवद्भिः
नृपतिचरेषु हयैर्गतेष्वयोध्याम्
ग्रथ जनकसुतां धृतानुतापां
वडभिगवाक्षगतां सखीत्युवाच १।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देशवराडि रागः

मिलति रघुकुलहीरे सह मुनितिलकेन।
कलितधनुषि रुचिरे मुदमिह विदधति केन ।१।

कथमधुनाऽप्यतिमुग्धा सखि सीदसि ? ।ध्रुवः ।।

गिरिशधनुषि विभिन्ने दशरथतनयेन ।
पतति मनुजनिवहे ध्वनिभरजनितभयेन ।५।
पतति कुसुमसमूहे दिव उदितरसेन,
धृतगुरुमुदि जनके मुनिवरकलितहसेन ।३।

विचलितनृपसमूहे मुरमर समुखेन ।
नदति मुरजनिवहे रघुवरे कलितसखेन
भणति कविशितिकण्ठे रघुपति रुचितेन
मनसि सपदि विशदे निवसतु निजचरितेन ।।

पूर्वं तादृशदारुणः पितृपणः क्षेणीधराकर्षण–
श्चिन्तां कुन्तइवाततान महतीं हन्तातिसन्तापदः
सोऽयं ते फलदो नवीनजलदोद्द्योतेन केनापि तद्
भग्नं शैवधनुस्तदाधिरधुना सीते परित्यज्यताम् ।।

गुर्जरीरागः

त्यज सखि खेजं हृदि कलयेदं मम वचनं धृतहर्षम्
मृदुगतिकान्तं रचय नितान्तं सदसि सुधारसवर्षम् ।

धीरमुदारं जगतीसारं वरय वरं रघुवीरम्
श्यामलकोमलकान्तिमनोहरमूर्त्तितिरस्कृतमारम् ।ध्रुवः ।

कृतगुरुयत्नां धृतवहुरत्नां विलसितमौक्तिकजालाम्
सत्त्वतरङ्गां वलवदनङ्गां कलय गले मणिमालाम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलितविभागं वपुषि सरागं स्वीकुरु कुङ्कुमरागम्
त्वत्पदि रक्ते सततमलक्ते वह सखि परमनुरागम् ।३।

इयमपि काञ्ची रचयतु काञ्चिद्रुचिमिह समुचितदेशे
सपदि वयस्यां मण्डनसरसां संदिश निजशयवेशे ।४।

मणिभिररहितं हंसकसहितं रुचिनिचयैः परिपूर्णम्
विलसितहीरं नवमञ्जीरं पदकमले वह तूर्णम् ५।

कलय सलीलं वपुषि विनीलं विमलमिदं मृदुचेलम्
हाटककेतकमधुपकदम्बकमस्तु विनिन्दितखेलम् ।६।

रुचिजितकमले वह करकमले नवरुचिरवरणमालाम्
किशलयकलितामिह कुरु ललितां राममुदे सुविशालाम् ।७।

इति शितिकण्ठे श्रितशितिकण्ठे भणति मनोहर गीतम्
नवघनवामं चेतसि रामं स्मरत सदैव ससीतम् ।।

(३) विकिर हृदयात् क्षोभं शोभां तनोः सुमनोभरैः
कलय रुचिमाकल्पै रल्पेतरै रचयाधुना ।
प्रणयलहरीं साक्षाल्लक्ष्यां यथावरणस्रजं
सखि चिर धृतोत्कण्ठे प्रियस्य समर्पय ।

(४) त्वद्वाष्पेण समं जगाम मरुतां चिन्तोदधिस्ते पितु-
स्तत्कल्याणि हृताधिशल्यहृदये हेतुर्विलम्बेऽस्तु कः ।
इत्याकर्ण्य सखीवचो जनकजा गत्या श्रिया मालया
मार्गं राजसभां गलं रघुपतेः सा भूषिताऽभूषयत् ।।

(५) आश्लिष्याथ समागतं दशरथं सामात्यपुत्रानुगं
पृष्ट्वाऽनामयमादरेण रचितातिथ्यस्तदा मैथिलः ।
श्रीरामाय सलक्ष्मणाय विधिना सीतामदात् सोर्मिलां
संयोज्य श्रुतकीर्त्ति माशु भरते शत्रुघ्नतो माण्डवीम् ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(६) सभयरुचिरं निष्पीड्यान्त निजैः करपङ्कजैः
निजनिजवधूपाणीन् प्रापुर्मुदं हृदि राघवाः ।
अथ दशरथो दारोदारैः सुतैः कृतमङ्गलैः
सह सहरिणैर्यानारूढैर्ययौ स महामहाः ॥

इति श्री गीतसीतावल्लभे महाकाव्ये शितिकण्ठकविकृतौ सीता-परिणयो नाम पञ्चमः सर्गः ।

(सादशेषम्)

पणस्य आदानं प्रदानं च

लेखकः श्री रवीन्द्रनाथ ठक्कुरः

पञ्चसु पुत्रेषु यदा काचन कन्या अजायत, तदा पित्रोरानन्दः सीमामतीयाय, आदरेण ताभ्यां दुहितुर्नाम कृतं निरूपमेति । निरूपमायाः पितृकुले तादृशनामकरणं नैव परिचितमास्त । गणेशः, कार्तिकेयः, पार्वतीति सजातीयं देवतानां नाम वादीयत । निरुपमेति भावप्रवणं नाम तु इदं प्रथमतया अदीयत ।

गच्छता कालेन यौवनमधिरूढाया दुहितुर्विवाहार्थं रामसुन्दरमित्रो वहुधा प्रायतत । परन्तु नात्मनोऽभिमतं वरमलभत । वहु प्रयतमानेन तेन परिशेषे समृद्धिमतो रायबाहादूरस्यैकमात्रः कुमारो दृष्टिपथमारूढो मनोमतश्च जातः । रायबाहादूरस्य पैतृकी समृद्धिर्यद्यपि ह्रासमभजत, तथापि सम्मानस्तु अक्षुण्ण एवावर्तत ।

वरपक्षीयैः दशसाहस्री रूपिकाणां विविधानि चोपकरणानि यौतुकरूपेणाभ्यर्थितानि । रामसुन्दरस्तु आत्मन शक्तिमविगणय्य सम्मतः समजनि । यौतुकभयेनैतादृशस्य पात्रस्य परिहारो न तस्य मनसे अरोचत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुधा प्रयतमानेनापि नैव दशसहस्ररूप्यकाणि तेन सम्पादयितुं शक्यान्यासन् । बन्धकरीत्या वहूनां बस्तूनां विक्रयेणापि पञ्चषाणि रूप्यकसहस्राणि अवशिष्यन्तेस्म । विवाहदिवसोऽपि सन्निहितो जातः ।

विवाहदिवसोऽपि समायातः । वहुगुणितकुशीदेन अवशिष्टं धनं दातुमेकः स्वीकुर्वन्नास्त, परन्तु विवाहावसरे स नैवादृश्यत । विवाहवेदिकायां कश्चन तुमुलः कोलाहलो जातः । रामसुन्दरः सम्वन्धिनो रायबाहादूरस्य चरणयोः पतित्वा, करौ धृत्वा सशपथं विनयेनावोचत्–'शुभकर्मणि नान्तरायो भवतु, न चिराद्धनं दास्यामि ।' रायबाहादूरस्तु स्पष्टमवादीत्--'विना धनसमर्पणं न वरो वेदिमधितिष्ठेत ।'

दुर्घटनयाऽनया अन्तःपुरे कापि रोदनच्छटा समजायत । गुरुतराया अस्या विपदो मूलभूता कन्यका कृतचोलिकापरिधाना विभूषणविभूषिता, चन्दनर्चितकपाला, तूष्णीं धरणीमाश्रयन्त्यवर्तत । भावि श्वशुरकुलं प्रति भक्तेरनुरागस्य वेङ्गितं प्रादर्शयतेति नैव वक्तुं शक्यते दैवा कार्यमन्यथा परिणतमासीत् । वरस्तु पितुरबाध्यः समजायत । स तु पितरमवादीत् । 'नाहं क्रयविक्रयव्यवहारं जानामि ।विवाहार्थं समायातः कृतविवाह एव प्रतिगच्छामि ।"

पिता तु सम्मुखमापतन्तं सकलमवदत् –'पश्यत - अद्यातनानां बालकानां दुर्व्यवसितम् ।' तत्रत्ये पुत्रिचतुरा कुलवृद्धा अवर्तन्त– तैरुक्तम्–'अधुना शास्त्रशिक्षा नीतिशिक्षा च न प्रचलतः । अत एव फलति' । अद्यतनशिक्षाया विषमयं फलं स्वपुत्रे प्रत्यक्षीकृत्य रायबाहादूरः किंकर्तव्यविमूढस्तूष्णीमास्त । विवाहश्च विषादभरिततया निरानन्दमयः यथाकथंचित् सम्पन्नः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्वशुरगृहगमनावसरे पिता दुहितरं निरुपमां वक्षसि गाढं निपीड्य चक्षुषोर्जलं नैव निवारयितुं शशाक। निरुपमा तु 'किं तैर्मामात्रागमनं नानुमन्येतेति पितरमपृच्छत्। रामसुन्दरः प्रत्युवाच "कुतो नानुमन्येत, अहं त्वामवश्यमानेष्यामि"।

रामसुन्दरस्तु असकृत् दुहितरं द्रष्टुं गच्छति स्म, परन्तु सम्बन्धिगृहे न तस्य कोऽपि सम्मानोऽवर्तत। भृत्या अपि नीचदृष्ट्या अवजानन्ति स्म। अन्तःपुराद्बहिः कस्मिन्नपवरके पञ्चषनिमेषपर्यन्तं द्रष्टुमन्वमन्यत, कदाचिद्वा विफलमनोरथः प्रत्यावर्तत।

समाजे तादृशोऽपमानो नितरामसह्योऽवर्तत। रामसुन्दरो निश्चिकाय—यथाकथंचित् अवशिष्टं यौतुकं समर्पणीयम्। परन्तु योऽयमृणभारः स्कन्धेऽवर्तत, स तु अतीव दुर्वह आसीत्। प्रतिदिनं व्ययस्य मात्रा कुटुम्बस्याभिवृद्ध्या वर्धयन्त्यास्त। उत्तमर्णानां दृष्टि-पथाद्दूरे स्थातुं ननाविधानि कौशलान्यवालम्ब्यन्त।

श्वशुरकुले च निरुपमाया जीवनं नितरामसहनीयं समजायत। प्रतिदिनं पितृकुलस्य निन्दामसकृदाकर्ण्य खेदमनुभवन्ती द्वारं निरुध्य केवलमश्रुजलं विमोचयन्ती कालं निनाय। श्वश्रूदेव्या आक्रोशस्तस्या मर्माणि विध्यति स्म। साधारणो जनो यदि वधूं विलोक्य 'अपूर्वा अस्याः सुषमा! दर्शनेन नेत्रे उल्लसत' इति, वदेत् तदा सा गर्जनेन नभो विडम्बयन्ती सकोपमभिदधाति स्म, अये यत्सत्यमपूर्वा सुषमा। यादृशं पितृकुलं, तादृशं सौन्दर्यम्! गच्छता कालेन न कोऽपि वध्वा आहारविहारादिषु तत्त्वमाधत्त। यदि कदाचित् काऽपि इतरललना कामपि त्रुटिमदर्शयिष्यत्, तदा श्वश्रूदेवी 'तदेवालम्, यत् यौतुकं जनकेन प्रदत्तं, तद्दृष्ट्यै तत् सुपर्याप्तमेव।" सकलोऽपि गृहजन एवं भावं दर्शयितुं प्रवृत्तो येन वध्यास्तस्मिन् गृहे सत्ता नान्वभूयत। न कोऽपि अधिकारस्तस्या अवर्तत। केवलं कौशलेन केनापि सा तत्र प्रविष्टा इत्येव व्यभाव्यत।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रमेण सकलोऽयं व्यवहारः कन्यायाश्चापमानः पितुः श्रुतिपथमुपगतः । रामसुन्दरो गृहं विक्रीय यौतुकं निर्यातयितुं प्रायतत। परन्तु गृहं विक्रीयत इति वार्तां गोपनीयां चकार । मनसा निश्चिकाय गृहं विक्रीय भृतिदानेन तस्मिन्नेव गृहे स्थास्यतीति । एवं कौशलेन स्थास्यति येन न कोऽपि तस्य मृत्युपर्यन्तं ज्ञातुं प्रभवेदिति । परन्तु पुत्राः क्रमशो ज्ञातुं प्राभवन्, ते च क्रन्दितुं प्रवृत्ताः । प्रथमास्त्रयः पुत्राः कृतविवाहा आसन् , तेषां सन्ततयोऽप्यवर्तन्त । तेषां विरोधो गुरुतरः संजातः, गृहविक्रयकथा अवसिता ।

तदा रामसुन्दरः सुसहता कुशीदेन ऋणं संग्रहीतुं प्रवृत्तः । गृहस्य परिचालनं दुर्वहमापद्यत ।

निरुपमा पितुर्मुखं दृष्ट्वा सर्वमवेदीत् । वृद्धस्य पक्वेषु केशेषु, विशुष्के मुखे, सदा संकुचितेषु व्यवहारेषु च दैन्यस्य दुश्चिन्तायाश्च कापि च्छाया समदृश्यत । पित्रा यदा दुहितृसन्निधावपराद्धं, तदा अपराधस्यानुतापो नैव गोपनीयः स्थापयितुं शक्यते । रामसुन्दरो यदा सम्बन्धिनोरनुकम्पया क्षणं कन्यायाः साक्षात्कारं कर्तुमवकाशमलभत, तदा तस्य हृदयं कथमन्तर्भिद्यमानमवर्तत, तत्तस्य शुष्कहासदर्शनेनैव गोचरमभूत् ।

व्यथितं पितृहृदयमुपसान्त्वयितुं निरुपमा म्लानं मुखं दृष्ट्वा न सा दूरे स्थातुमशकत् । एकदा रामसुन्दरमवादीत्—पितः, शक्नुमागृहं नेतुमर्हसीति । रामसुन्दरश्च आमेति स्वीचकार ।

परन्तु न तस्य कोऽपि निर्बन्धोऽवर्तत । स्वस्य दुहितरि योऽधिकारः सहजसिद्धः, स च यौतुकधनेन बन्धकीभूय तिरोहित

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आस्त किं बहुना ? कन्याया दर्शनमपि ससंकोचं मिथ्यानीयमवर्तत, कदाचिदलभत कदाचिद्वा विफलमनोरथः प्रत्यावर्तत । अनुयोक्तुं नैकोऽपि वागवर्तत ।

परन्तु यदि कन्या पितुरालयं गन्तुं कामयते, तदा पिता कथं नाम निराकर्तुं प्रभवतु ? ततः सम्बन्धिनः सकाशे प्रस्तावात्प्राक् रामसुन्दरः कां हीनतां कीदृशमपमानं कांच क्षतिमविगणय्य त्रिसहस्र-रूप्यकाणि संग्रहीतुं समर्थ आसीत्, तस्योट्टङ्कनमितिहासे गोपनीयं स्थातुमर्हति ।

तानि धनपत्राण्युत्तरीये समावेश्य रामसुन्दरः सम्बन्धिनः समीपमुपससाद । प्रथमतः सहासं कुशलवृत्तान्तमपृच्छत्, पारिपार्श्विक-स्थितिमनु कामपि चर्चामकरोत् । कथं हरेकृष्णस्य गृहे सुमहच्चौर्यं संघटितं, तस्य सुविस्तृता वर्णना कृता । नवीनमाधवराधामाधव-योश्चरित्रं तुलयन् राधामाधवस्य विद्यां बुद्धिं ख्यातिं च प्रशशंस, नवीन-माधवस्य च निन्दां चकार । तदानीं नगरे व्याप्रियमाणस्य व्याधे-दौरात्म्यं प्रकटीचकार । अन्ते च धूमपानभाजनं भूमौ निधाय प्रसङ्ग-क्रमेणावोचत्—'सम्बन्धिन्, तादिदं यौतुकं देयं वर्तते खलु । प्रतिदिनं मनस्यालोचयामि, परन्तु आगमनसमये विस्मरामि । अतः वृद्ध एवाहं संजातः' कानि वा दिनान्यवशिष्यन्त इत्यादि भूमिका-मारचय्य पञ्जरस्यास्थित्रयमिव तदिदं सहस्ररूप्यपरिमितं धनपत्र-त्रयमतीवसहजसरलेनावहेलनक्रमेण प्रादर्शयत् । रायबाहादूरस्तु केवलं धनपत्रत्रयमवलोक्य उच्चैर्हसितुं प्रवृत्तः । साट्टहासं चावोचत्—'तिष्ठतु सम्बन्धिन्, किं तावता मे प्रयोजनम् ?' कमपि वङ्गदेशप्रचलितं प्रवचनमुल्लिख्य सामान्यं कारणमनुरुध्य नाहं स्वहस्तं पूतिगन्धं कर्तुमिच्छामीति प्राकाशयत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवं परिस्थितौ दुहितुरानयनप्रस्तावः कस्य वा मुखादुदेतु ? रामसुन्दरः केवलमचिन्तयत्—कन्यापितुः बहुपरिवारस्य मादृशस्य पक्षे संकोचो नैव शोभेत।' मर्माहतो बहून् क्षणान् यावत् तूष्णीमास्थाय परिशेषे प्रसङ्गं मृदुना स्वरेणावततार। रायबाहादुरः विनैव कमपि संकोचं प्रकाशमवदत् 'न तदिदानीं सम्भवतीति, अनुपदं च तमविगणय्य स्थानान्तरं प्रस्थितः।

रामसुन्दरो दुहित्रे मुखं दर्शयितुमशक्नुवानो धनपत्राणि उत्तरीयप्रान्ते संयम्य स्वगृहं प्रत्यावृत्तः प्रतिजज्ञे यावत्सकलमपि अवशिष्टं पणं परिशोध्य निस्सङ्कोचं स्वदुहितरि आत्मनः प्रतिभूत्वं न स्थापयति, तावत् सम्बन्धिनो गृहं न गमिष्यति।

बहूनि दिनान्यतीतानि। निरुपमा असकृत् भृत्यान् प्रेषयति स्म, परन्तु पितुर्दर्शनं नालभत। एवं विफलमनोरथा सा अभिमानेन भृत्यप्रेषणं स्थगितवती। तदा रामसुन्दरस्य मनसि कोऽपि आघातो जातः, परन्तु न स जगाम सम्बन्धिनो गृहम्।

आश्विनो मासः सन्निहितः। रामसुन्दरोऽचिन्तयदवश्यं पूजाऽवसरे मातरं (दुहितरं) समानेष्यामि, अन्यथाऽहम्—सुमहान्तं शपथमेकमकरोत्।

पञ्चम्यामथवा षष्ठ्यां तिथौ उत्तरीयप्रान्ते धनपत्राणि संयम्य रामसुन्दरः सम्बन्धिनो गृहं गन्तुमुद्यत आसीत्। पञ्चमवर्षीयः कश्चन नप्ता उपगम्य अवोचत्—'तात, किं मदर्थं शकटिकामानेतुं गच्छसि ? बहोः कालादवधि शकटिकामारुह्य विहर्तुं तस्य लालसा अजायत। परन्तु कथंचिदपि सा चरितार्था अभवत्। अपरा काचन षष्ठवर्षीया नप्त्री समागत्याभियोगं चकार—पूजावसरे निमन्त्रणे समुपस्थातुं नोपयुक्तः परिच्छदोऽवर्तत।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामसुन्दरः सर्वं जानाति स्म। धूमपानं च कुर्वन् बहुधा चिन्तयामास। रायबहादूरस्य गृहाद्यदा पूजोत्सवे निमन्त्रणमागमिष्यति तदा तस्य वधूजनो नगण्यैरलङ्कारैः परिच्छदैश्च दीनो दरिद्र इव यास्यतीति स्मृत्वा दीर्घदीर्घान् श्वासान् विमुञ्चति स्म। तावता च तस्य ललाटरेखाः किञ्चिदिव गभीरतरा वार्द्धक्यस्य मात्रामवर्धयन् परंतु न किमपि फलमलाप्स्यत।

दैन्यनिपीडितस्य परिवारजनस्य क्रन्दनध्वनिं कर्णसात्कृत्वा वृद्धः सम्बन्धिनो गृहं प्राविशत्। अद्य तु तस्य स संकोचो नावर्तत, गृहरक्षिषु भृत्येषु च चलितचकिता दृष्टिर्नापतत्। स्वगृहमिव सम्बन्धिनो गृहमाससाद। रायबहादूरो गृहे नास्तीति वार्ता तस्य श्रुतिपथमुपगता। यावत्तस्यागमनमपेक्षणीयम्। मनसश्चोच्छ्वासो नैव विग्रहीतुं शक्य आसीत्। स्वसुतया च मिलित आसीत्। आनन्दवशात् चक्षुषोरश्रुधारा निगलिता। पिता अक्रन्दत्, सुता अक्रन्दत्। तयोर्नान्यतरः किमपि वक्तुमनीशोऽजायत। एवं कश्चन कालोऽतिचक्राम। ततश्च रामसुन्दरः स्वसुतामकथयत्—'इदानीं त्वामहं गृहं नयामि, न किमपि प्रतिबन्धकमिदानीमवशिष्यते।

तदा राममोहनस्य ज्येष्ठः कुमारः स्वस्य द्वौ बालकौ समादाय सहसा तत्रोपस्थितः। स च पितरं न्यवेदयत्—'पितः, नास्मान् इदानीमकुलसमुद्रे प्लावय।'

रामसुन्दरः सहसाऽनलस्य रूपमाधाय अवोचत्—युष्मदर्थं किमहं नरकगामी भवेयम्? किं यूयं मां सत्यं पालयितुमवकाशं न दास्यथ? रामसुन्दरो गृहं विक्रेतुं कृतनिश्चय आसीत्। यथा पुत्रास्तमिमं वृत्तान्तं ज्ञातुं न शक्नुयुस्तदर्थं सर्वतोभावेन व्यवस्थामकरोत्। तथापि ते ज्ञातुं प्राभवन्निति अत्यन्तं विरक्तः कुपितश्च समजनि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य नप्ता जानुद्वयं गाढमाश्लिष्योवाच । 'तात, किं मदर्थं शकटिकां न क्रेष्यसि ?'

नतशिरा बालकः पितामहात्किमप्युत्तरमलभमानो निरुपमामुपेत्यावदत्—'पितृष्वसः, मदर्थं शकटिकामेकां क्रीणीष्व"।

निरुपमा सकलमप्युदन्तं ज्ञातुं प्राभवत् । अवादीच्च 'पितः, यदि त्वं काकणिकामेकामपि मम श्वशुराय दास्यसि, तर्हि तव कन्यकां जीवन्तीं न द्रक्ष्यसि अहमेतत् तव पादौ स्पृष्ट्वा शपामि ।"

रामसुन्दरोऽवोचत्—'शान्तं पापम् । वत्से न तथा त्वं वक्तुमर्हसि । यद्यहमेतमर्थं न परिशोधयामि, तर्हि तव, तव पितुश्चापमानो भवति ।'

निरुपमा प्रत्युवाच । अर्थस्य दानेऽपि नापमानो निर्याति । किं तव सुताया न किमपि मूल्यं वर्तते ? किमहमेका अर्थस्य स्थगिका भवामि ? यावदर्थाः, तावदेव मे मूल्यम् ? पितः, अर्थमिमं दत्वा न ममापमानं कर्तुमर्हसि । अपि च मम स्वामी नेममर्थं कामयते ।'

रामसुन्दरोऽवदत्—'तथा चेत् न त्वां पितुर्गृहं गन्तुमनुमन्येरन् !'

निरुपमा प्रत्युवाच—'यदि ते नानुमन्येरन् , तर्हि त्वं न वृथा निर्बन्धं कर्तुमर्हसि ।'

रामसुन्दरः कम्पितहस्तेनार्थपत्राणि उत्तरीये निबध्य, स्कन्धे च तदिदमुत्तरीयं निधाय चौर इव सर्वेषां दृष्टिपथं परिहृत्य स्वगृहं प्रत्यावृत्तः ।

परन्तु रामसुन्दरस्य अर्थेन साकमागमनं कन्यायाश्च निषेधेन प्रत्यावर्तनं न गोपनीयमतिष्ठत् । काऽपि रहसि दत्तकर्णा दासी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तमिमं वृत्तान्तं निरुपमायाः श्वश्रूं निवेदयामास । श्रवणेन च श्वश्रूदेव्या आक्रोशः सीमानमतीयाय ।

श्वशुरगृहं निरूपमायाः शरशय्या पर्यणमत्। तस्याः स्वामी च विवाहादनन्तरं कतिपयेभ्य एव दिनेभ्य. 'डेपुटीमाजिष्ट्रेट्' रूपेण देशान्तरं प्रातिष्टत । कदाचित् हीनलोक संसर्गाद् हीनता संक्राम्येतेति भिया पितृकुलादागतेन जनेन साकं निरुपमायाः साक्षात्कारोऽपि निवारितः समजनि ।

एतदवसरे निरुपमायाः काप्युत्कटा पीडा प्रादुर्भूता । तदर्थमवश्यं श्वश्रूदेवी नैवाभियोजनीया भवितुमर्हति । निरूपमेव आहारविहारादिषु वीतस्पृहा अजायत, शरीरं प्रति नावधानं ददौ । कार्त्तिकमासस्य हिमवतीषु रात्रिष्वपि गृहं पिहितमवर्तत, मस्तकोपरि च व्यजनं चलति स्म, न च शीतापनोदनार्थं सा शीतवस्त्रं व्यवजहार । आहारस्य न कोऽपि नियमः अवर्तत । कदाचित् परिचारिका आहारमानेतुमपि व्यस्मार्षुस्तर्हि न सा मुखेन किमपिअवोचत । श्वश्रूदेव्याश्चानुग्रहमनु जीवतीति काममपि धारणां बद्धमूलां कृतवती । तस्याः तादृशो व्यवहारः श्वश्रूदेव्या असहनीयः समजनि । यदि कदाचित्सा तस्या आहारेऽवहेलामलक्षयत तदा वदति स्म, 'नबावस्य पुत्रकैषा, कथं नाम अस्य दरिद्रगृहस्यान्नं रोचेत ?' कदाचिदपि व्याहरत् 'पश्यत कथमेषा दग्धकाष्ठतया परिणमति !'

रोगस्तु अवहेलया गुरुतरो जातः । श्वश्रूस्तु सर्वमेतद् वध्वाश्छलमितिप्राकाशयत् । एकदा निरूपमा परं विनीता श्वश्रूदेवीं प्रार्थयत- 'मातः, पितरं सोदरांश्च सकृद्द्रष्टुमिच्छामि ।' श्वश्रूस्तु 'सर्वमेतत् पितृगृहगमनाय छलमिति सोपहासं प्राकाशयत् ।

अवश्यमेतदविश्वसनीयं भवेत्, परन्तु सत्यमेव । यस्मिन् दिने निरुपमा अन्तिमान् श्वासान् मुमोच, तस्मिन्नेव दिने चिकित्सक आहूतः न पुनस्तस्याह्वानस्य आवश्यकता अवाशिष्यत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहस्य ज्येष्ठा वधूरुपरतेति अन्त्योष्टिक्रिया साडम्बरमक्रियत । देवीप्रतिमाविसर्जनावसरे रायवहादूरस्य या प्रतिपत्तिरवर्तत, ज्येष्ठाया वध्वाः शवसत्कारक्रियायां ततोऽधिका प्रतिपत्तिरजायत । एवं चन्दन-काष्ठस्य नैव दृष्टपूर्वा समूढा समवर्तत । तादृशी श्राद्धक्रियाऽपि केवलं रायबाहादूरगृह एव सम्भवति ! श्रूयते स्म शुद्धिक्रियायां रायबाहादूरस्य किञ्चिदिव ऋणं कर्तव्यमापतत् ।

रामसुन्दरमुपसान्त्वयितुं तस्य मित्राणि दुहितुस्तथा समारोहेण मृत्युसमारोहं वर्णयितुं प्रावर्तन्त ।

इतः डेपुटिमाजिष्ट्रेट् सकाशात् पत्रमायात्—मया सकलान्युपकरणानि व्यवस्थितानि । शीघ्रं मदीयां सहधर्मचारिणीं प्रेरय इति । रायबाहादूरस्य महिषी अलिखत्—'वत्स, त्वदर्थमपरा कन्यका स्थिरीकृता शीघ्रं विरामं स्वीकृत्य आगन्तव्यमिति" ।

अस्मिन् विवाहे विंशसहस्राणि पणत्वेन विवाहक्षणएव स्वीकरणमिति च व्यवस्था अक्रियत !

आत्मबोधः

लेखक - विश्वनाथ सोमशर्मा साहित्यविद्याःप्रवीणः

एकदाः सिद्धार्थः राजगृहसमीते वेणुवने विंशति सहस्र शिष्यैस्सह निवसति स्म । तदानीं कपिलवस्तु नगरात् शुद्धोदनः 'वत्स त्वां दृष्ट्वा सप्त वर्षा अभूवन् । आवामतीववृद्धौ जातौ । त्वदीयं धर्मतत्त्व श्रोतुमिच्छावः । अतः त्वदीयं धर्मसारमेकवारम मस्मदीयवन्धुवर्गेण सहआवयोः श्रावय, आवां, त्वन्निमित्तं परितप्यमानां त्वदीयां धर्मपत्नीं, परिवारं चैकवारं दृष्ट्वा पुनर्गच्छतु भवान् इति प्रधानामात्यमेकं प्राहिणोत् । स तावद्वेणु-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वनं गत्वा सिद्धार्थं दृष्ट्वा तदीयबोधसारं श्रुत्वा, तदानीतवार्तां विस्मृत्य तदीयशिष्यगणेऽन्तर्भूयावस्थितः । प्रेषितः अमात्यः कदापि नागतइत्यालोच्य पुनरन्यं प्रेषयामास शुद्धोदनः । सोऽपि गत्वा तदीयां वार्तां तस्मै निवेद्य तदीयबोधान् श्रुत्वा तदीयशिष्यगणेऽन्तर्भूतो ऽभवत् । परन्तु सिद्धार्थः पित्रा प्रेषितां वार्तां श्रुत्वा स्वशिष्यैस्सह पादचारेणैव कतिपय प्रयाणैर्मासद्वयेन कपिलवस्तुनगरं जगाम । शुद्धोदनस्तु प्रागेव सिद्धार्थस्यागमनवार्तां श्रुत्वा स्वशिष्यैस्सह तस्य निवासार्थं न्यग्रोधवनं सम्यक् कृत्वा दत्तवान् । सिद्धार्थोऽपि न्यग्रोधने वसन् राजसभां गत्वा तत्र द्वित्रिवारान तदीयधर्मोपन्यासं कृतवान् । तदीयधर्मश्रवणेन कपिलवस्तु नगरवासिनः सर्वेऽपि क्षेत्रकलत्रापत्यादिपरित्यागेन केचन शिष्या अभूवन् केचन क्षेत्रकलत्रापत्यपरित्यागं विना केवलं तदीयधर्माश्रयमात्रेण उपासकाश्चाभूवन् ।

तत एकदा सिद्धार्थे भिक्षार्थं पुरवीथ्यां गच्छति कस्मिंश्चित श्रीमतां गृहे महान् कलहः प्रवृत्त आसीत् तं श्रोतुं जनसमूहश्च प्राङ्गणेऽवस्थितोऽभवत् । तदा सिद्धार्थः कोऽयं कलकलइत्यपृच्छत् तदा गृहाभ्यन्तरात् यजमान आगत्य स्वामिन् श्रीमतां पुत्री त्वेका ममाभाग्यवशात् स्नुषा जाता । श्वश्रूश्वशुरौ पतिं च न गणयत्येषा । नचास्मद्वाक्यं शृणोति, यथेच्छंप्रवर्तते । न केवलमस्मद्वाक्यमेव, महात्मनां भवादृशामपि वाक्यं नैषा शृणोतीत्यवोचत् । तदाकर्ण्य सिद्धार्थः गृहाभ्यन्तरे तां दृष्ट्वा, "सुजाते इत आगच्छेत्यवादीत्य, तदा सुजाता आगत्य नमस्कृत्य समीपे उपाविशत् । तदा बुद्धः सुजातामुद्दिश्य, 'वत्से ! लोके पुरुषस्य प्रायस्सप्तविधा भार्या भविष्यन्ति, हन्तका, चौरी, भोगपत्नी, (न तु विधिवत्परिणीता) मातृसदृशी स्वसृसदृशी, सखीतुल्या, दासीसदृशी चेत्ति । तासां मध्ये कीदृशी त्वमित्यपृच्छात् तदा सुजाता, तद्दर्शनमात्रेणैव निवृत्तमूढभावा, 'स्वामिन्, एततक्षणमारभ्याहं मम पत्युः दासी-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भविष्यामीति सविनयमवोचत् (सपाद ग्रहणम्) तदा तस्या-आशीर्वादं कृत्वा तस्माद्गृहा न्निवृत्तोऽभूत् ।

एकदा पाटलीपुत्रे वसन् तदीयाभ्यर्थनया एवमुपन्यस्तवान्' वत्साः, मानवानां मानबतां स्थिरीकर्तुं शक्तः धर्मं एकएव लोके यः धर्मं परित्यक्तुमिच्छान् धर्महानिं करोति, स तावत् पञ्चविधान् अनर्थानप्राप्नोति । प्रथमतः धर्मपरित्यागेन अलसो भवति । अलसः दरिद्र-देवतया वृतो भवति । दारिद्र्यादपयशः प्राप्नोति । अपकीर्तिमतः संघे प्रवेशो न भवति । सत्यपि प्रवेशे संघो नष्टो भवति । अतस्तेन निर्विण्णो म्रियते । एवं सदा जनन भरण रूपां न सारयातनामनु-भवतीति ।

यस्तु सदा धर्मपरायणो भवति, स सर्वदा पंचविधंश्रेयस्समा-प्नोति, प्रथमतः धर्मार्थं कायिकश्रमेण धनार्जनं करोति तेन च परमां कीर्तिं लभते । तादृशः यस्मिन् संघे प्रविशति, गतोवैर्येण संघस्याभि वृद्धि करोति । निश्चिन्ततः आनन्देनन्देहत्यागं करोति । तेन च सुगतिं लभते एतत्सर्वसम्यक्बुध्वा यथेष्ट मनुतिष्टं त्वत्यवीचत् ।

तदीयमुख्य सूत्राणि पञ्च

१ । जीवकारूण्यवद्धिस्सवैः भाव्यम्
२ । सर्वैं स्वधर्मो न परित्याज्यः ।
३ । जातिमतभेदाभावः ।
४ । असत्य, स्तेय, व्यतिचार, सुरापानादीनां त्यागः ।
५ । यथाशक्ति संघसेवा करणीयम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नीलाद्रिनाथ शतकम्

(अनुवृत्तम्)

लेखकः—श्रीपुरुषोत्तम मिश्रः

यथा श्रीदजयोस्त्यक्त्वाऽनगताऽऽदिनवं धुता ।
दीने मयि स्मृतिं सा किं न गता दीनबन्धुता ॥७३॥

अन्वयः—हे कृष्ण, यया श्रीदजयोः आदीनवं त्यक्त्वा नगता धुता, सा दीनबन्धुता दीने मयि किं स्मृतिं न गता ?

व्याख्या हे कृष्ण, कृष्णावतार जगन्नाथ यया दीनानामार्तानां बन्धुर्मित्रं, तस्य भावो दीनबन्धुता आर्तार्तिनाशन दयालुता, तया श्रीदः कुवेरस्तज्जयोस्तत्पुत्रयोर्नलकूवरमणिग्रीवयोः शापग्रस्तयोः कुवेरपुत्रयोः आदीनवं दोषं त्यक्त्वा वर्जयित्वा दोषं विनाश्येत्यर्थः नगता वृक्षरूपता धुता विच्याविता, सा प्रसिद्धा ते दीनबन्धुता दीनार्तिदारणबद्धकक्षत्वं दीने कृपणे दुर्दशाग्रस्ते मयि विषये किं किमिति स्मृतिं न गता तव स्मृतिपथारूढा न जाता ? अपि तु जातैव । अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ७३।

नन्दस्येत्र गुणैर्बद्धः स दाम्ना येन योषिता ।
तं त्वां विश्वो बबन्धेड्यं सदाऽऽम्नायेऽनयोषिता ॥७४॥

अन्वयः—हे ईश, स विश्व येन त्वया गुणैः बद्धः, तं सदा आम्नाये ईड्यं त्वाम् अनयोपिता नन्दस्य योषिता दाम्ना बबन्ध ।

व्याख्या—हे ईश प्रभो कृष्णावतार जगन्नाथ, स प्रसिद्धः विश्वः संसारः येन त्वया गुणैः सत्त्वरजस्तमोभिर्बद्धानियन्त्रितः तं तादृशं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सदा सर्वदा आम्नाये वेदे ईड्यं स्तुत्यं त्वाम् अनघोषिता दुर्नीतौ स्थिता नन्दस्य योषितां स्त्री यशोदा दाम्ना रज्ज्वा ववन्ध । अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ।

उदधावि वकेनापि त्वां हन्तुं रक्षसा हरे ।
उदधाविव केनापि वधो मग्नेन तेन तु ।७५।

अन्वयः—हे हरे केनापि वकेन रक्षसा त्वां हन्तुम् उदधावि । तु तेन उदधौ मग्नेन इव वधः आपि ।

व्याख्या - हे हरे श्रीकृष्णावतार जगन्नाथ, केनापि अनिर्वचनीयेन वकेन बकाकृतिना रक्षसा राक्षसेन कंसप्रेषितेन त्वां हन्तुं मारयितुमुद्धावि धावितम् । तु किन्तु तेन वकासुरेण उदधौ समुद्रे मग्नेनेव वधः मरणमापि प्राप्तः । प्रवलपराक्रमो बकासुरस्त्वां हन्तुमागात् स च त्वया चञ्च्वोर्विदीर्णः समुद्रे निमग्नो जन इव । झटिति मृत्युमापेत्यर्थः । अत प्रथम तृतीय पादयोर्यमकमलङ्कारः ।७५।

यागोपीशरणे न वालकवलादाकल्पवल्लीलया
यागोऽपीशरणेन बालकवलादाकल्पवल्लीलया ।
ऐन्द्रोऽघानि यथाघदनुजो बर्हेण कैश्यं तनुः
स्वानां ते मनसाऽऽश्रये च दधती तां कर्मणाऽऽनन्दिता ।७६।

अन्वयः—हे ईश यया ऐन्द्रः यागः अघानि, रणेन विना अघदनुजः च अघानि, । या तनुः बर्हेन, आकल्पवत् कैश्यं दधती, या च स्वानां कल्पवल्ली, या गोपीशरणे लीलया वालकवलादा, किंच या नवालकवलात्, आनन्दिता, तां ते तनुम्, इलया, वाचा कर्मणा च आश्रये ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—हे ईश प्रभो कृष्णावतार जगन्नाथ, यया ते तन्वा शरीरेण ऐन्द्र इन्द्रसम्बन्धी यागो यज्ञः अघानि विध्वस्तः, यया च तन्वा रणेन युद्धेन विना अघदनुजः च अघानि, अघासुरो मारितः, या च तनुः बर्हेण मयूरपिञ्छेन आकल्पवत् भूषणवत् कैश्यं केश-समूहं दधती धारयन्ती राजत इत्यर्थः। या च तनुः स्वानां स्वकीयानां भक्तानां कल्पवल्ली कल्पवल्लीव वाञ्छितप्रदा, या च गोपीशरणे गोपीनां गृहे लीलया विलासेन अनायासेन बालकवलादा बालेभ्यः स्व सहचरेभ्यः शिशुभ्यः कवलं ग्रासं दधिनवनीतादि खाद्यमास-मन्तात् ददातीति तादृशी, किं च या नवा नूतना अलकाश्चूर्ण-कुन्तला यस्य तादृशात् बलभद्रात् आनन्दिता हृद्या अथवा नवालं वल-भद्रं आप्य आनन्दिता, तां तद्दशीं ते तव तनुं शरीरम् इलया वाचा, मनसा हृदयेन कर्मणा कार्येण च आश्रये भजामि। अत्र प्रथमद्वितीय-पादयोर्यमकमलङ्कारः।७६।

कालीयं दमितुं कृष्ण ससर्प यमुनावने।
भवान् व्रजस्य भीतस्य ससर्पयमुनावने।७७।

अन्वयः—हे कृष्ण, अमुना भीतस्य व्रजस्य अवने भवान् कालीयं दमितुं ससर्पे यमुनावने ससर्प।

व्याख्या—हे कृष्ण कृष्णावतार जगन्नाथ, अमुना कालीयेन भीतस्य भयं प्रापितस्य व्रजस्य गोष्ठस्य अवने रक्षणे रक्षणार्थं भवान् ससर्पे सर्पयुक्ते यमुनाया यमुनासम्बन्धिनः कालीयह्रदस्येत्यर्थः। वने जले ससर्प भ्राम्यति स्म। अत्र ससर्पे अमुना—ससर्पयमुनेति व्याकरणविरुद्धमपि यमकनिर्वाहार्थं कृतमिति चिन्तनीयम्। ससर्पेमुनेति भाव्यम्। तथा च छन्दोभङ्गः। अत्र द्वितीय चतुर्थपादयोर्यमक-मलङ्कारः।७७।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मायू ञ्जिततारेण हारेण दधतं शिवम् ।
मायूरञ्जिततारेण त्वां ध्यात्वेशाञ्जनेन च ।७८।

अन्वयः–हे ईश, जिततारेण हारेण, रञ्जिततारेण अञ्जनेन सह मायूरं दधतं त्वां ध्यात्वा के शिवं मा अयुः ?

व्याख्या – हे ईश प्रभो कृष्णावतार जगन्नाथ, जितास्तारा नक्षत्राणि येन ताद्दशेन हारेण रत्नमालया, रञ्जिता प्रसाधिता तारा अक्षिकनीनिका येन ताद्दशेन अञ्जनेन सहितं मायूरं मयूरपुच्छं दधतं धारयन्तं त्वां ध्यात्वा चिन्तयित्वा के शिवं मोक्षं मा अयुर्न गताः सर्वेऽपि गता इत्यर्थः। अत्र प्रथमतृतीयपादयोर्यमक-मलङ्कारः ।७८।

चरणं कृष्ण नमन्ति यत्तवास्ता–
अमरा धामधुरा यतस्य ।
हृदि तत्पिवतोऽपि पापिनोऽस्त्वै–
मम राधा मधुराधराय तस्य ७६।

अन्वयः – हे कृष्ण, यत् धामधुरा अमरा नमन्ति, तत् राधामधु राधराय पिवतः तव तत् चरणं अद्यैः यतस्य तस्य पापिनः अपि मम हृदि आस्ताम् ।

व्याख्या – हे कृष्ण कृष्णावतार जगन्नाथ, यच्चरणं धाम्नां भुवनानां धरा धारका अमरा देवा नमन्ति वन्दन्ते, तत्ताद्दशं राधामधुराधराय, राधाया मधुराधरमास्वादयितुं पिवतस्तस्याधरं पीडयतस्ते तव चरणं पदम् अखैरस्वकीयैः कामकोधादिभि र्यतस्य बद्धस्य तस्य तादृशस्य पापिनोऽपि पापिष्ठस्यापि मम हृदि हृदये आस्तां विलसतु । अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ७६।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राधिकया भिन्नायामातरलो भीतयाऽनावि ।
कृष्ण, नुमस्त्वां तं त्वामातरलोभी तया नावि ।८०।

अन्वयः—हे कृष्ण, आतरलः आतरलोभी यः त्वं भिन्नायां नावि इतया तया राधिकया भीतया अनावि, तं त्वां नुमः ।

व्याख्या—हे कृष्ण. कृष्णावतार जगन्नाथ, आ समन्तात् तरलो लम्पटः आतरलोभी तरपण्यलोभवान् यः त्वं भिन्नायां विदारितायां नावि नौकायामितया प्राप्तया स्थितया राधिकया भीतया त्रस्तया सत्या अनावि स्तुतः, तं तादृशं राधिकया कृतस्तुतिं त्वां नुमः स्तुमः । अत्र द्वितीयचतुर्थं पादयोर्यमकमलंकारः ।८०।

याऽवीक्ष्यायाचि जीर्णा स्त्रीर्गोपिकामातरस्तथा ।
त्वया तारयता नावाऽगोऽपि कामातरस्तया ।८१।

अन्वयः – हे गोपिकामातः, या जीर्णा. अस्तया तया नावा स्त्रीः तारयता त्वया आगः अपि अवीक्ष्य कामातरः अयाचि ।

व्याख्या—हे गोपिकामातः, गोपिकानन्दन श्रीकृष्णावतार जगन्नाथ. या नौर्जीर्णा जर्जरिता तया तादृश्या अस्तया वातोत्क्षिप्तया नावा नौकया स्त्रीर्गोपललनास्तारयता नदीपारं प्रापयता त्वया आगः पापमपि अवीक्ष्य अगणयित्वा कामो रतिरेव आतरस्तरपण्यमयाचि प्रार्थितः । कपटनाविकवेशं धारयित्वा मायाकल्पितजीर्णनौकया गोपाङ्गनास्तारयन् तद्रतिरूपमातरं प्रार्थयमानश्छलेन ता मुग्धा मोहयन् उपभुक्तवानसीति भावः । अत्रापि द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ।८१।

उदस्य दधती सती व्रजसुतेषु ता त्वां द्विजैः
समुत्तर जनीकरावलि मनन्त रङ्गायुतम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवन्तमपि नाप किं श्रमजलास्यविभ्यत्सुधा—
समुत्त रजनीकरा वलिमनन्तरं गां युतम् ।८५।

अन्वयः–हे अनन्त, सती श्रमजलास्यबिभ्यत्सुधासमुत्त-रजनीकरा, बलिं दधती समुत्तरजनी द्विजैः निरन्तरं धुता अपि करावलिम् उदस्य, रङ्गयुतं, गाः अवन्तं, व्रजसुतैः युतं त्वां किं न आप ?

व्याख्या–हे अनन्त अपरिसीम कृष्णावतार जगन्नाथ, सती साध्वी, श्रमस्य जलं स्वेदविन्दुर्यत्र तादृशं यदास्यं मुखं तस्मात् विभ्यत् प्राप्तभयः सुधा अमृतेन समुत्त आर्द्रः रजनीकरश्चन्द्रो यस्यास्तादृशी श्रमजलार्द्रेण मुखेन सुधार्द्रं चन्द्रं विडम्बयन्तीत्यर्थः वलिमुपहारं दधती धारयन्ती सह मुदा वर्तत इति समुत् सहर्षा, अत्यन्तं समुत् समुत्तरा नितान्तं हर्षयुक्ता एवं भूता जनी द्विजपत्नी जातावेकवचनम् द्विजैः ब्राह्मणैर्निरन्तरं सततं धुता निषिद्धा अपि करावलिं निषेधतां ब्राह्मणानां हस्तपङ्क्तिम् उदस्य उत्क्षिप्य रङ्गाणां क्रीडानामयुतं दशसाहस्री यस्य तादृशं गाः-सुरभीः अवन्तं पालयन्तं व्रजसुतैः गोष्ठबालकैर्युतं परिवृतं त्वां किं नाप न प्राप अपि तु प्रापैव । द्विजपत्न्यः स्वामिनां निषेधमगणयन्त्यो यज्ञान्नेन गोपबालैः परिवृतं त्वां सम्भावयामासुरित्यर्थः । अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ७२।

न गोपीनां शस्यभुजां कृष्ण, त्राणाय चोद्धृतः ।
नगोऽपीनांसस्य भुजां ही दुनोति स्म ते शिशोः ।८३।

अन्वयः–हे कृष्ण, गोपीनां शस्यभुजां च त्राणाय उद्धृतः नगः अपि अपीनांसस्य शिशोस्ते भुजां न दुनोति स्म ही ।

व्याख्या–हे कृष्ण कृष्णावतार जगन्नाथ गोपीनां गोपिकानामुपलक्षणमेतत् सकल गोपजनानामित्यर्थः शस्यं भुञ्जते अदन्तीति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शस्यभुजो गोबलीवर्दादयस्तेषां च त्राणाय रक्षणाय इन्द्रस्य प्रकुपितस्य मुषलवृष्ट्या उपीडितान् गोपान् गवादींश्च परित्रातुमित्यर्थः उद्धृतः शिशुना त्वया उत्पाट्य धृतः नगोऽपि गिरिर्गोवर्द्धनोऽपि न पीनौ दृढवृत्तौ अंसौ स्कन्धौ यस्य, तादृशस्य शिशोर्बालकस्य ते तव भुजां बाहुं न दुनोति स्म न पीड़यति स्म ही आश्चर्यम् । शिशुरपि त्वमनायासेन गोवर्द्धनमुद्धृत्य गोपान् गवादींश्च परित्रातवानसीति भावः । यनके शसयोर्भेदो नाद्रियते । अत्र प्रथमतृतीयपादयोर्यमकालङ्कारः ८३।

क्रुद्धेनाऽपारि किं वृष्णाऽप्यागोबालं विनाशितुम् ।
व्रजं बलिस्ते रुषो वाप्यागोगलं विनाऽशितुम् ।८४।

अन्वयः--हे प्रभो, आगोऽवलम्बिना, क्रुद्धेन अपि वृष्णा अगोबालं व्रजं विनाशितुं किम् अपारि ?। अपि रुषा अशितुं बलिः अपि किं अवापि ?

व्याख्या--हे प्रभो कृष्णावतार जगन्नाथ. आगोऽपराधं दोषमवलम्बत इत्यागोऽवलम्बी, ते इन्द्रपूजाभङ्गरूपं दोषं गणयता अतएव क्रुद्धेन कुपितेनापि वृष्णा इन्द्रेण न स्युर्गावो बालाश्च यत्र तत्तथा व्रजं गोष्ठं विनाशितुं ध्वसितुं किमपारि ? न पारितम् । अपि च तव रुषः क्रोधात् अशितुं भक्षयितुं बलिरुपहारः अपि किमवापि लब्धः न लब्ध इत्यर्थः । अत्र द्वितीयचतुर्थपादयोर्यमकालङ्कारः ।८४।

नगरेणुभिर्विदलिततालकाने
घनभासि मेऽस्तु खरयातु हृत्त्वयि ।
नगरेऽणुभिर्विदलितालकानने
विशति व्रजेश गलितेऽह्न्यपास्य तत् ।८५।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः--हे व्रजेश, धनभासि, विदलितालकानने तत् खरयातु अपास्य गलिते, अह्नि नगरे विशति, अणुभिः नगरेणुभिः विदलितालकानने त्वयि मे हृत् अस्तु।

व्याख्या–हे व्रजेश गोष्ठेश व्रजविहारिन् कृष्णावतार जगन्नाथ घनभासि मेघश्यामले विदलिनः विशिष्टदलयुक्तास्तालास्तालवृक्षा यत्र तादृशे कानने वने तत् प्रसिद्धं खरयातु खरनामकं राक्षसमपास्य विजित्य गलिते विश्वस्ते सति नगरे गोकुले अह्नि दिवसे विशति प्रविशति (सप्तम्यन्तम्) किञ्च अणुभिसूक्ष्मैर्नगस्य गोवर्द्धनपर्वतस्य रेणुभिर्धूलिभिः विदलिता आक्रान्ता अलका यस्य तत्तादृशमाननं मुखं यस्य सः तस्मिन् तादृशे त्वयि मे हृन् मानसमस्तु अनुरक्तं भवतु। अत्र प्रथमतृतीयपादयोर्यमकमलङ्कारः ।८५।

या गुणैर्नाथ ते गोपी
सा ररासान्तरं गता।
नाना लक्ष्म्या तयाऽलम्भि
साररासान्तरङ्गता।८६।

अन्वयः–हे नाथ या गोपी गुणैः ते अन्तरं गता नानालक्ष्म्या ररास, तया सा साररासान्तरङ्गता अलम्भि।

व्याख्या–हे नाथ प्रभो कृष्णावतार जगन्नाथ, या गोपी गोपिका व्रजाङ्गना गुणैः सौन्दर्यसौशील्यादिभिस्ते तव अन्तरं हृदयं गता प्रविष्टा सती नानालक्ष्म्या नानाविधविलासैः ररास विजहार, तया गोप्या सा प्रसिद्धा सारे उत्कृष्टे रासे रासक्रीडयामन्तरङ्गता विश्वस्तता अलम्भि लब्धा प्राप्ता। अत्र द्वितीयचतुर्थपादयोर्यमकालङ्कारः।८६।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनोरमा

मासिक संस्कृत पत्रिका

पञ्चमो वर्ष } १८८७ शकाब्दम, मार्गशीर्ष, पौष माघ फाल्गुन मासा: December, January, February and March, 1966 { नवमी दशमी एकादशीद्वादशी च सञ्चिका

सम्पादकः—

श्री अनन्त त्रिपाठि शर्मा M.A., P.O.L., M.P.

साहित्यशिरोमणि:, मीमांसा-विद्याप्रवीण:

आयुर्वेद चक्रवर्त्ती, आयुर्वेदाचार्य:

राष्ट्रभाषारत्न:

वार्षिक शुल्कं रूप्यकषट्कम्

इदं सञ्चिकामूल्यम् रूप्यकद्वयम्

Printed and Published by Sri A. T. Sarma at his own Siromani Press, Berhampur

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयसूची

संख्या	बिषयः	लेखक नाम	पुटसंख्या
१।	सुभाषितानि		२६७
२।	उत्तररामचरित समालोचना	श्री अनन्त त्रिपाठिशर्मा	२६८
	"	"	३२६
३।	श्री दाशरथिशतकम्	श्री ति०गु० वरदाचार्यं एम्.ए.	३१३
४।	समाप्तिः	श्री रवीन्द्रनाथ ठक्कुरः	३४१
५।	भारतीयं तपोवनम्	श्रीमती केतकीदेवी अध्यापिका	३६६
६।	गीतसीतावल्लभम्	श्री शितिकण्ठ कविकृतम्	३७५
७।	मद्यपान, मांसाशन, चौर्यनिरोधः	श्री सोमशर्मा साहित्यविद्याप्रवीणः	३७६
८।	श्रीवेङ्कटेश्वराष्टकम्	श्री विश्वनाथसोमशर्मा, साहित्यविद्याप्रवीणः	३८३
९।	नारदकामराजीयम्	श्री श्रद्धाकर सूपकारः एम्.पि साहित्याचार्यः	३८५
१०।	नीलाद्रिनाथ शतकम्	श्री पुरुषोत्तम मिश्रः	३९३
११।	हनुमत्सन्देशम्	श्री मधुसूदन तर्कवाचस्पतिः	४१२
	" उत्तरार्द्धम्	"	४२४
१२।	अनुवादकस्य आत्मकथा		१–४
१३।	पुरुषोत्तममिश्रः		१–१२

—❀—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

म नो र मा

मासिक संस्कृत पत्रिका

ललितैः पदविन्यासैर्विचित्रैर्भावबन्धनैः ।
भावुकानामन्तरङ्गे प्रतिभातु मनोरमा ॥

पञ्चमो वर्षः } १८८७ शकाब्दम्, मार्गशीर्ष पौष माघ फाल्गुन मासाः
December, January, February, and March 1966 { नवमी दशमी एकादश द्वादशी च सञ्चिकाः

सुभाषितानि

आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति ते ।
बह्वारम्भाः कृताधियस्तिष्ठन्ति च निराकुलाः ॥ १ ॥

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ २ ॥

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ ३ ॥

आमरणान्ताः प्रणयाः कोपास्तत्क्षण भङ्गुराः
परित्यागाश्च निस्सङ्गा भवन्तीह महात्मनाम् ॥ ४ ॥

वित्ते त्यागः, क्षमा शक्तौ दुःखे दैन्यविहीनता ।
निर्दम्भता सदाचारे स्वभावोऽयं महात्मनाम् ॥ ५ ॥

शरदि न वर्षति गर्जति वर्षति वर्षासु निःस्वनो मेघः ।
नीचो वदति न कुरुते न वदति सुजनः करोत्येव ॥ ६ ॥

उपकर्म प्रकाशं क्षन्तुं नीचेऽप्ययाचितं दातुम् ।
अभिसंधातुं च गुणैः शतेषु केचिद्विजनन्ति ॥ ७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तररामचरितसमालोचना

(अनुवृत्ता)

प्रबन्धा—श्रीअनन्त त्रिपाठिशर्म्मा

उत्तररामचरितीयो रसः

उत्तररामचरिते को वा रसः प्रधानं स्यादिति साम्प्रतं विचारयामः। उत्तररामचरितं हि नाटकश्रेण्यामन्तर्भवति। नाटके च 'एक एव भवेदङ्गी वीरः शृङ्गार एव वा' इत्युक्तदिशा वीरेण शृङ्गारेण वा प्रधानेन भाव्यम्। तत्र वीररसस्य तादृशपरिपुष्टेरभावात् शृङ्गारेण प्रधानेन भाव्यमित्यापाततः प्रतीयते

परन्तु शृङ्गाररसस्याङ्गित्वं वहवो विमर्शका न स्वीकुर्वन्ति। शृङ्गाररसे हि रतिः स्थायीभावः। शृङ्गाररसस्याङ्गित्वस्वीकारे रतेः स्थायित्वमपेक्षितम्। रतेश्च स्थायित्वं नाम सजातीयविजातीयभावैरतिरस्कृततया यावद्रसमवस्थानम्। एवं हि आलङ्कारिका आमनन्ति-

सजातियैर्विजातीयैरतिरस्कृतमूर्तिमान्।
यावद् सं वर्तमानः स्थायीभाव उदाहृतः। इति

दशरूपकेऽपि

सजातीयैर्विजातीयैर्भावैर्विच्छिद्यते न यः
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः।

इति स्थायीभावस्य लक्षणं निरूपितम्। रतिश्च नायिकानायकयोः परस्परं समागमार्थमभिनिवेशः। अत्र यद्यपि रामचन्द्रविषयिणी सीतानिष्ठा रतिः आमूलचूलं सजातीयैर्विजातीयैश्च भावैर्नैव विच्छिन्ना, प्रत्युत उपवृंहिता स्थायितामापद्यते रामचन्द्रस्य रतिस्तु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निर्वासितायां सीतायां विच्छिन्ना भवति। निर्वासितायाः सीतायाः न कमपि विषयं जानाति रामचन्द्रः। विशेषतो रामभद्रः 'किमभवद्विपिने हरिणीदृशः, कथय नाथ कथं वत मन्यसे' इति वासन्त्या पृष्टः, "सखि किमन्यत् ?

त्रस्तैकहायन विलोल कुरंगदृष्टे—
स्तस्याः परिस्फुरितगर्भभरालसायाः।
ज्योत्स्नामयीव मृदुबालमृणालकल्पा
क्रव्याद्भिरंगलतिका नियतं विलुप्ता॥"

इत्युदीरयन् सीतां नष्टां मनुते।

सीताशून्यस्य जगतो द्वादशः परिवत्सरः।
लुप्तं सीतेति नामापि न च रामो न जीवति।"

इति वचनेन च स एव भावो दृढीकृतः।

"न किल भवतां देव्याः स्थानं गृहेऽभिमतं ततो
तृणमिव शून्येऽरण्ये त्यक्ता न चाप्यनुशोचिता॥"

इति प्रतिवादवचनात् रामचन्द्रः सीतात्यागानन्तरं सीताया अनुशोचनमपि न कृतवानिति प्रतीयते। एभिरुदाहरणैरन्यैश्च प्रसङ्गापतितैर्निदर्शनैः सीतां स मृतामभ्यमन्यतेति वक्तुं शक्यते। न च मृतया सह समागमो सम्भवति। अतः सीताविषयिणी रामचन्द्रनिष्ठा रतिर्विच्छिन्ना नैव स्थायितां भजति। अतो रामचन्द्रस्य सकला अपि सीताविषयकाः व्याहारव्यवहाराः शोकपर्यवसायिनो भवन्ति। शोकश्च करुणरसस्य स्थायीभावः। करुणे च रसे शृङ्गाररसस्य सकला अप्यनुभावा विरुद्धा अपि स्मर्यमाणतया निबद्धा अङ्गिनं करुणं रसमुपबृंहयन्ति। अत एवालङ्कारिका विरुद्धयोरपि रसयोरेकतरस्य स्मर्यमाणतयोपनिबन्धनं नैव दोषाय प्रत्युत रसस्योपबृंहणायेति प्रतिपादयन्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उदाहरन्ति च

"अयं स रसनोत्कर्षी पीनस्तनविमर्दनः
नाभ्युरूजघनस्पर्शी नीवीविस्रंसनः करः ।" इति
छायाङ्के कविनाऽपि तमसामुखेन
एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक्पृथगिवाश्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव हि तत्समग्रम्"

इति स्वकृतेरुत्तररामचरितस्य करुणरसप्रधानत्वं प्रकटीकृतम् । समालोचका अपि

"एतत्कृतकारुण्ये किमन्यतो रोदिति ग्रावा' इति उत्तर रामचरितं करुण रसप्रधानं मन्यन्ते ।

नायिकानायकयोः परस्परमनुरक्तयोरपि यत्र पुनः समागमार्थमुभयोः प्रसक्तिस्तत्र तत्रस्थायित्वेन शृङ्गारो रसः, यत्र तु अन्यतरस्य समागमाशा नास्ति, केवलं शोकः, तत्र रतेर्विच्छिन्नत्वान् न स्थायित्वमिति न शृङ्गारः प्रत्युत करुणो रसः अवश्यं स्वीकरणीय इति व्यवस्था करणीया । अत उत्तररामचरिते निर्वासनानन्तरं सीतां सर्वात्मनोपरतां मन्यमानस्य रामचन्द्रस्य सकलोऽपि व्यापारः करुण रसपर्यवसायीति केचन समालोचका अभिप्रयन्ति ।

एतत्प्रसङ्गे इदमपि केचन प्रकटयितुं साहसन्ते यत् रामचन्द्रस्य सीताविषयिण्या रतेरभावात् केवलं सीतानिष्ठाया रामचन्द्रविषयिण्या रतेः सद्भावात् उत्तररामचरितं शृङ्गाररसाभासप्रवणं भवितुमर्हति । स चायं शृङ्गाररसाभासः प्रकृतस्याङ्गिनः करुणरसस्याङ्गं सम्पद्यतो इति

"एकत्रैवानुरागश्चेत्तिर्यग्म्लेच्छगतोऽपि वा
योषितो बहुसक्तिश्चेद्रसाभासस्त्रिधा मत'

इति रसाभासस्य लक्षणम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतन्मते 'एकएव भवेदङ्गी वीरः शृङ्गार एव वा' इति नाटकलक्षणं न संघच्छत इति नाशङ्कनीयम् । अत्र 'एववा' इति एवशब्द निर्देशादत्र वीरः, शृङ्गारः, अथवादशोऽन्यो वा अङ्गी भवेदिति व्याचक्षाते । तेषां मते एकस्य रसस्याङ्गित्वेन अन्येषां चाङ्गत्वेन सन्निवेशः करणीयः । अतएव शान्तरसप्रधानानामपि प्रबोधचन्द्रोदयादीनां नाटकत्वं न व्याहन्यते । मुद्राराक्षसस्याद्भुतरसप्रधानत्वेऽपि न काचित्क्षतिरिति तेषामाशयः ।

साहित्यदर्पणकारास्तु 'यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये, विमनायते यदैकस्तदा भवेत्करुण विप्रलम्भख्य इति लक्षणं विधाय करुणविप्रलम्भं नाम विशिष्टमपरं रसमङ्गिरसत्वेन स्वीकुर्वन्ति ।

अत उत्तररामचरिते करुणरसस्य करुणविप्रलम्भस्य वा प्राधान्यं नतु शृङ्गारस्य अङ्गित्वमिति प्रतिपादयन्ति ।

प्रसङ्गेऽस्मिन् भवभूतिः केवलकरुणरसवादी आहोस्विन् नवरसवादीति प्रथमतो निरूपयामः । शृङ्गारप्रकाशकारो भोजदेवो हि शृङ्गार एव मधुरः परः प्रह्लादनो रस इति एकमेव शृङ्गाररसं प्रह्लादकत्वा द्रसत्वेन स्विकरोति । अन्येषां प्रह्लादककत्वात्वाभावात न मुख्यं रसत्वं, रस्यते आस्वाद्यत इति व्युत्पत्त्या औपचारिकं रसत्वमिति तदाभिप्रायः । अत्रस्यतु करुणस्यैकस्यैव रसत्वस्वीकारे अन्येषां च तद्विवर्तनत्वस्वीकारे न किमपि कारणं निर्दिष्टमस्ति । नापि भवभूतिरेककरुण रसवादीति विद्वत्समाजे प्रसिद्धिरस्ति । भवभूतिरपि उत्तररामचरिते बहुषु स्थलेषु इतरान् रसानुल्लिखति । अधस्तनोदाहरणानि प्रति सहृदयानां दृष्टिमाकर्षामः—

(क) दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कौमारकेऽपि गिरिदूगुरुतां दधानो
वीरो रसः किमयमित्युत दर्प एव ॥

(ख) उपायानां भावादविरत विनोद व्यतिकरै-
विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः ।
वियोगो मुग्धाक्ष्याः सखल रिपुघातावधिरभूत्
कथं तूष्णीं सह्यो निरवधि रिदानीं तु विरहः ॥

(ग) विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन—
स्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।
झटित्यस्मिन् दृष्टे किमिति परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥

एषु त्रिष्वपि पद्येषु यथाक्रमं वीररसस्य अद्भुतरसस्य शान्तरसस्य चोल्लेखो दृश्यते । स चायमुल्लेखस्तस्य केवलकरुणरसवादित्वे नैवोपपद्यते । अपि च भवभूतिः उत्तररामचरितस्य सप्तमेऽङ्केऽन्तर्निहितं रूपकं स्वयं करुणाद्भुतरसं निर्दिशति । इयं हि सूत्रधारमुखेन तदुक्तिः— "यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनं वचनामृतं करुणाद्भुतरसं किञ्चिदुपनिबद्धं, तत्र कार्यगौरवादवधातव्यम्" इति ।

भवभूतेरेककरुण रसवादित्वे 'करुणाद्भुतरस' मिति करुण-रसेन साकमद्भुतरसयोर्लेखः सर्वथा असंगतः सम्पद्येत । उत्तररामचरिते चाद्भुत रसस्यामूलचूलमवतरणं दृश्यते । उत्तररामचरितमिति नामापि लोकोत्तर रामचरितं गर्भीकुर्वदद्भुत रसप्रवणत्वं प्रकटीकरोति । कविनाऽनेन कृतस्य महावीरचरितस्य वीररसप्रवणत्वं मालतीमाधवस्य च शृङ्गाररसप्रवणत्वं तत्र तत्रोल्लिखितमास्ते । तस्माद्भवभूतेरेककरुणरसवादित्वात् उत्तररामचरितं करुणरसप्रधानमिति वक्तुं न शक्यते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इदानीं करुणरसोऽङ्गीभवितुमर्हतिवा नवेति परीक्षामहे। करुणरसे हि शोकः स्थायीभावः। शोकश्च इष्टजनविनाशादिजनित—दुःखाभिभूतिः। सोऽयं शोको यदि विभावैरनुभावैः सात्त्विकैर्व्यभिचारिभिश्च उपबृंहितः, सुहृदयैरास्वाद्यो भवेत्तदा करुणरसो भवेत्। स च यदि आमूलचूलं मुख्यतया वर्तेत, तर्हि अङ्गीभवितुमर्हति। भरतो हि नाट्यशास्त्रकर्ता 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति' रित्यनेन तमिमाशयं प्रकटयति। दशरूपककारादयोऽपि इममेवाशयं पोषयन्ति। ते च रसस्य लक्षणं विदधति—

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः
आनीयमानः स्वाद्यत्वं स्थायीभावो रसः स्मृतः॥ इति

समर्थयन्ति च। भावस्य स्थायित्वं च सजातीयविजातीयभावैरतिरस्कृततया अवस्थितत्वमिति प्रागवोचाम। करुणरसस्य स्वीकारे करुणरसस्य स्थायीभावः शोकः सजातीयैः विजातीयैश्च अतिरस्कृततया उत्तररामचरिते वर्तते इति वक्तव्यं भवति। उत्तररामचरितस्य आरम्भे हि वयं नाटकस्य नायकौ परं प्रमुदितौ विलोकयामः। यद्यपि सीतादेवी पितुर्जनकस्य प्रस्थानेन किञ्चिदिव विमनायमाना अवर्तत, तथापि पत्युरुपसान्त्वनेन वशिष्ठऋष्यशृङ्गादीनां सम्वादेन, चित्रदर्शनेन च विनोदिता समपद्यत। सा च चित्रदर्शनेन परिश्रान्ता वातायनोपकण्ठे भर्तुर्वक्षसि प्रसुप्ता। रामचन्द्रश्च तामिमां गृहस्य लक्ष्मीं नयनयोरमृतवर्तिं च वक्षसा धारयन् अमितमानन्दमनुबभूव। उपसंहारे च सप्तमेऽङ्के भगवतो वाल्मीकेः प्रभावेण गङ्गातीरे सन्निधापिताः मर्त्यामर्त्यदेवासुरनरनारीतिर्यङ्‌निकायाः अन्तर्नाटिकादर्शनानन्तरं भगवतीभ्यां पृथिवीभागीरथीभ्यामभिनन्द्यमानामरुन्धती सकाशे समर्पितां देवयजनसम्भवां सीतां नमस्कुर्वन्ति। अरुन्धत्या च जगत्पते रामचन्द्र

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नियोजय यच्चाधर्मं प्रियां त्वां धर्मचारिणीम् ।
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे ॥

इत्यभ्यर्थितो रामचन्द्रः स्वीकरोति, सीता चात्मानं प्रत्युज्जीवितं मन्यते। उभयोश्च नायिकानायकयोः समागमो भवति । सकल-दुःखस्यावसानं भवति। शोकस्य न काऽपि छाया परिलक्ष्यते। एवं चारम्भे शोकस्य अभावात् अपसंहारे च शोकस्योच्छेदात् शोकस्थायीभावकः करुणरस आमूलचूलं वर्तत इति वक्तुं न शक्यते । शोकस्य चोच्छेदात् स्थायित्वमपि न सम्भवति ।

उत्तररामचरिते हि करुणरसो न केवलम् 'एको रसः करुण एव' इत्यत्र कविनोल्लिखितः, परन्तु निम्नोद्धृतेष्वपि स्थलेषूल्लिखितो दृश्यते—

(क) अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः
पुटपाक प्रतीकाशो रामस्य करुणो रसः ॥

(ख) परिपाण्डु दुर्बलकपोलसुन्दरं
दधाती विलोलकवरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी ॥

(ग) तटस्थं नैराश्यादपि च कलुषं विप्रियवशाद्—
वियोगे दीर्घेऽस्मिन् झटितिघटनोत्तम्भितमिव ।
प्रसन्नं सौजन्याद्दयित करुणैर्गाढं करुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षणइव ॥

(घ) क्षुभिताः कामरिदशां कुर्वन्ति मम साम्प्रतम्
विस्मयानन्द सन्दर्भ जर्जराः करुणोर्मयः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(ङ) हेलोल्लोलक्षुभित करुणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि मयाऽधीयते तं तमन्तः।
भित्त्वा भित्त्वा प्रसरति बलात्कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः।

एवमिव शोकपदमपि निम्नोद्धृतेषु स्थलेपूल्लिखितमस्ति। शोकश्च करुणरसस्य स्थायीभावो भवति।

(क) चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः
कुतश्चित्संवेगात्प्रचल इव शल्यस्य शकलः।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः
पुराभूतः शोको विकलयति च मां नूतन इव॥

(ख) किशलयमिव मुग्धं बन्धनाद् विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम्॥

(ग) अन्तर्लीनस्य शोकाग्नेरद्योद्दामं ज्वलिष्यतः।

(घ) प्रणय एव व्याहरति शोकश्च!

(ङ) पूरोत्पीड़े तटाकस्य परीवाहः प्रतिक्रिया।
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते॥

(च) इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव घर्मो ग्लपयति।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ—
स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम्।

(छ) नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः।
एतास्ता मधुनो धाराश्च्योतन्ति सविषास्त्वयि॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(ज) यथा निरश्चीनमलातचक्रं
प्रत्युप्तमन्तः सविषश्च दंशः ।
तथैव तीव्रो हृदि शोकशङ्कु—
र्मर्माणि कृन्तन्नपि किं न सोढः ।

(झ) हृदि नित्यानुषक्ते सीताशोकेन तप्यते ।
अन्तः प्रदीप्तदहनो ज्वलन्निव वनस्पतिः ।

एवं करुणरसस्य तत्स्थायीभावस्य शोकस्य च कविना स्वयमेवासकृदुल्लेखात् आलम्बनविभावयोः सीतारामचन्द्रयोः शोकमय—जीवितत्वात् ताभ्यां पूर्वमनुभूतानां कदलीघनशयनीयशिलातल-लतागृहादीनां चोद्दीपनविभावानां प्रत्यक्षतो वर्णनात् अनुभावानां च रोदनमूर्च्छनादीनामसकृत् वर्णनात् व्यभिचारिभावानां च चिन्ता-ग्लानिदैन्यनिर्वेदादीनां परमास्वाद्यत्वेन वर्णनात् शोकस्थायीभावकः करुणो रसः उत्तररामचरिते प्रधानभूतस्य शृङ्गाररसस्यांगतया परिपोषको भवति । यद्यपि करुणरसः शृंगाररसस्य विरोधी तथापि अंगत्वेनात्रोपनिबध्यमानः शृंगाररसस्य परिपोषको भवति ।

एवमेव "अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥"

इत्यादौ विरुद्धोऽपि शृंगाररसः करुणरस्यांगतयोपनिबध्यमानः करुणरसस्य परिपोषको भवति । एतादृशं च विरुद्धरससमावेशमालङ्कारिका अनुमोदन्ते । अतः करुणरसस्यांगतयाऽत्रावस्थानं केचन प्रतिपादयन्ति । तान् प्रति ब्रूमः

रसो द्विविधःऽलौकिकः लौकिकश्च । नायिकानयकादिभिरनुभूयमानो रसो लौकिकः, तेषांतैरनुभूतानां च भावानां श्रवणेन दर्शनेन च सामाजिकैरास्वाद्यमानो रसः अलौकिकः । लौकिको रसः कदलीफलाद्यास्वादस्थानीयः, अलौकिको रसो ब्रह्मास्वादसब्रह्मचारी । लौकिको

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(१) सुखदु:खमयः, अनित्यः, अलौकिक रसश्च केवलानन्दमयो नित्यः। लौकिक रसस्याश्रयो नायिकानायकादिः, अलौकिकरसस्य चाश्रयः सामाजिकः लौकिकरसं प्रति लौकिकरत्यादेः यानि कारणानि कार्याणि सहकारीणि भवन्ति, अलौकिकरसं प्रति च तान्येव कारणकार्यसह–कारीणि काव्यनाटकयोश्चित्रितानि कारणकार्यसहकारिनामानि परित्यज्य विभावानुभावव्यभिचारिभावव्यपदेश्यानि, साधनानि भवन्ति (२) अतएव सामाजिकानां हृदये वासनात्मतया अवस्थितो रत्यादिः स्थायीभावो यदा काव्य श्रवणेन नाट्यदर्शनेन च लोके कारण-कार्य सहकारितया प्रतीतैः काव्य नाटकादौ च विभावानुभावव्यभिचा-रिनाम्ना व्यवहृतैः व्यंञ्जकै रुद्वोधित आस्वाद्यते,तदा शृगांरादिरसात्मना परिणतो भवति (३) स चायं शृगांरादिरसः सर्वथा नित्यव्यङ्ग्यो भवति,न कदाचित् शब्दैरभिधीयते । रसादेश्च स्वशब्दभिधानं रसदोषाय प्रकल्पते।

अयं हि आलङ्कारिकसिद्धान्तः।

रसो हि विभावानुभावसात्त्विकव्यभिचारिभिः स्वशब्दे-नानुक्तोऽपि प्रतीयते, विभावादीनामभावे स्वशब्देनोक्तोऽपि न प्रतीयते

---

(१) सुखं वा दुःखं वा निविडयतु यूनोः सहृदये
त्वमन्दानन्दात्मा परिणमति पूर्णो रसभरः ।
विद्यानाथः

(२) कारणान्यथ कार्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके, तानि चेन्नाट्यकाव्ययोः
विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः ।
विद्यानाथः

(३) विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वाद्यत्वं स्थायीभावो रसः स्मृतः
इति प्रागभिहितम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(१) नित्यव्यङ्ग्यस्य तस्य च शब्देनाभिधानं नैव सम्भवति। एवमेव स्थायीभावादीनामपि शब्देनोक्तिर्न कस्मा अपि प्रयोजनाय भवति। अत आलङ्कारिकदृष्ट्या रसभावादीनां केवलं स्वशब्देनाभिधानं नैव तस्य रसस्य बोधकं भवति। सुतरां कविना करुणरसस्य तत्स्थायीभावस्य चासकृदुल्लेखादुत्तररामचरिते करुणो रस इत्युक्तौ न किञ्चित्स्वारस्यं कलयामः।

इदानीं शोकमयैकजीवितावपि सीतारामचन्द्रौ करुणरसस्यालम्बन विभावौ भवतो वा न वेति परीक्षामहे। तत्र सीता राममथैकजीवित। रामचन्द्रं च साक्षात्पश्यन्ती तेन निर्वासिता अमितं क्लेशमनुभवन्त्यपि अहं जानामि, एष ममैवेति विभाव्य आत्मानं विनोदयन्ती कथं करुणरसस्यालम्बनं भवतु ? नापि तया अनुभूयमानस्य शोकस्य प्रत्यक्षतो दृश्यमानो राम आलम्बनविभावो भवति। करुणरसस्य आलम्बनं हि उपरत इष्टजनादिः। तयानुभूयमानः शोको नेष्टजनादिविनाशजनित इति प्रकारान्तरेण प्रतिपादितं भवति।

रामेण अनुभूयमानस्य शोकस्य तेन मृतेति विभाव्यमाना सीता आलम्बनं भवितुमर्हति। परं सीता मृतेति रामचन्द्रो न कुत्रापि उल्लिखति। यद्यपि वासन्त्या।

"अयि कठोर यशः किल ते प्रियं
किमयशो ननु घोरमतः परम् ?
किमभवद्विपिने हरिणीदृशः
कथय नाथ कथं बत मन्यसे"

इति पृष्टो रामचन्द्रः

'सखि किमन्यत् ?

त्रस्तैकहायनविलोलकुरङ्गदृष्टे-
स्तस्याः परिस्फुरितगर्भभरालसायाः।

---

(१) तामुद्वीक्ष्य कुरंगाक्षीं शृंगारो मे व्यजायतेत्यादौ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्योत्स्नामयीव मृदुबालमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥'

इत्युत्तरयति, यदि च 'देव, अतिक्रान्ते, धैर्यमवलम्ब्यातामिति तया अनुरुद्धः,

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः
लुप्तं सीतेति नामापि न च रामो न जीवति ।

इति व्याहरति, दण्डकारण्ये पूर्वपरिचितानां भावानां दर्शनेन

यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत ।
एकः सम्प्रति नाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा गच्छत्व संभाव्य वा ।

इति चोल्लिखति, तथापि रामः सीतां मृतामममन्यतेति वक्तुं नैव शकयते ।

एष हि वशिष्ठादि गुरुजनेषु सुबहुमानमावहति, तेषामुक्तीश्च —

"लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ।

इत्युक्तदिशा परिगृह्णाति । वशिष्ठेन च सन्दिष्टं 'तत्किमन्यदाशास्महे, केवलं वीरप्रसवा भूया' इति । रामचन्द्रश्च तमिम सन्देशम, अनुगृहीताः स्म इत्यभिनन्दति । ऋष्यशृङ्गस्य च 'तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्याम' इति सन्देशं सौत्सुकयस्मितं 'तथाऽस्तु' इत्यभिधाय शिरसा गृह्णाति । एवं गुरुजनवचनानि विश्वसतस्तस्य 'सीताया अङ्गलतिका नियतं विलुप्तेति निश्चयः कथं सम्भवतु ? अत आवेगवशादेन तथोक्तवानिति कलयामः । अतोऽसौ जगत् सीताशून्यं

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्यते, आत्मानं च नाशितप्रियतमं निर्दिशति । अजविलापे करुण-रसस्यन्दिनि मृतामिन्दुमतीमुद्दिश्य अजस्य यादृशो व्यवहारः, वयं तादृशं व्यवहारं रामचन्द्रे न कलयामः । ऐष हि आत्मनः शोकं पुराभूतं जागरितं शोकं मन्यते । इयं हि तदुक्तिः—

चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः
कुतश्चित्संवेगात्प्रचल इव शल्यस्य शकलः ।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः
पुराभूतः शोको विकलयति पुनर्नूतन इव ॥

विशेषतोऽयं साम्प्रतिकस्य विरहस्य पूर्वविरहस्य च मध्ये न किमपि तादृशमन्तरं पश्यति केवलं 'वियोगो मुग्धाद्याः स खलु रिपुघातावधिरभूत्, कथं तूष्णीं सह्यो निरवधिरिदानीं तु विरह' इति कलयति । अपि च

"व्यर्थं यत्र कपीन्द्र सख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञा जाम्बवतो न यत्र च गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्त्रिणामविषये तत्र प्रिये क्वासि भोः ॥"

इति अनिर्ज्ञाते प्रदेशे सीताया अवस्थानं कलयति ।

'अयि चण्डि जानकि, इतस्ततो दृश्यसे इव, न चानुकम्पसे ?
हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विश्वङ् मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥

"क्वासि प्रिये देवि प्रसीद । न मामेवंविधं परित्यक्तुमर्हसि ।"
"हा देवि दिष्ट्या वर्धसे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येनोद्गच्छद्विसकिशलयच्छेददन्ताङ्कुरेण
व्याकृष्टस्ते सुतनु लवलीपल्लवः कर्णमूलात् ।
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
यत्कल्याणं वयसि प्रथमे, भाजनं तस्य जातः ।।

इत्यादयो रामचन्द्रस्य व्याहाराः सीता मृतेति धारणायां नोपपद्यन्ते । विशेषतो रामचन्द्रः स्वयं 'सर्वथा स एष भगवाननेकवारपरिकल्पनानिर्भिन्नो विप्रलम्भएव पुनः पुनरमुवध्नाति माम्' इत्यनेनात्मानं विप्रलम्भपीडितं मन्यते । अतो लोकोत्तरचरितस्थास्य चेतसि सीता न मृता, वीरप्रसवा कुत्रापि पुत्रपूर्णोत्सङ्गा वर्तते इति विश्वासः समवर्ततेत्यूहितुं शक्यते । अतएव कविर्वासन्तीमुखेन—

'वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ।'

इति निपुणमस्मान् बोधयति । अरुन्धतीमुखेन च

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयोऽभूत् ।
भद्रा ह्येषां वाचि लक्ष्मीर्नियुक्ता
नैते वाचं विप्लुतार्थां वदन्ति ।

इति वशिष्ठादीनामुक्तौ निस्सन्दिग्धं विश्वासं स्थापयितुमुपदिशति । विशेषतो रामभद्र आमूलचूलं गम्भीरप्रकृतिकश्चित्रितः कविना । तेन सीतां यत्र कुत्रापि स्थितां वीरप्रसवां पुत्रपूर्णोत्संगां च मन्यमानस्य रामभद्रस्य शोकस्य न जीवन्ती सीता आलम्बनं भवितुमर्हतीति करुणरसे अपेक्षित आलम्बनविभावो नोत्तररामचरिते वर्तते इति प्रतिपादितं भवति ।

अवसरेऽस्मिन् इदमपि सहृदयानां पुरत उपस्थापयामः शोकस्तावद् दुःखस्य कार्यम् । दुःखं चेष्टजनविनाशहेतुकमिष्टजन-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विरहहेतुकमिति तज्जनितः शोकोऽपि द्विविधो भवति। तत्र इष्टजन-विनाशजनितदुःखजः शोकः करुणरसस्य स्थायीभावः इष्टजनविरह-जनितदुःखजः शोकश्च विप्रलम्भशृङ्गारस्य रतिस्थायिभावस्य अनुभावः । इष्टजनविनाशजनितशोकाभिभूता परं खिन्नाः सर्वात्मना सौन्दर्यविरहिता भवन्ति इत्यनुभवसिद्धम् । इष्टजन-विरजदुःखजनितशोकेन खिद्यमानास्तु क्षीयमाणा अपि समधिक-सौन्दर्यशालितो भवन्ति । अतः कामजनितबाधाया इतरकारण-जनितबाधायाश्च कोऽपि भेदः कविसमयप्रसिद्धो वर्तते। कविकुलगुरुः कालिदासः मदनेनायास्यमानां शकुन्तलां शोच्यामपि प्रियदर्शनां मन्यते, अनसूयामुखेन च 'अनुदिनं क्षीयसे अङ्गेषु, केवलं लावण्यमयी छाया त्वां न मुञ्चतीति प्रतिपादयति ।

दुष्यन्तश्च–

स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं
प्रियायाः साबाधं तदपि कमनीयं वपुरिदम् ।
समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्नतु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ”

इति कामबाधां सौन्दर्याधायकत्वेन ग्रीष्मबाधातो विशिनष्टि ।

मणिः शाणोल्मीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरिदाश्यानपुलिना
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नरा

इति कवय उद्गिरन्ति ।

उत्तररामचरितेऽपि सीतादेवी चित्रदर्शनावसरे विरहिणं रामचन्द्र मनुभावसौभाग्यमात्र परिधूसर शरीरकं वर्णयति । छायाङ्क च यासन्ती

(अवशिष्टं १२६ पुटे द्रष्टव्यम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीदाशरथिशतकम्

लेखक तिο गुο वरदाचार्यः एम् ए

❀ श्रीरघुराम ! चारुतुलसीदलदाम ! शमक्षमादिशृ-
ङ्गारगुणाभिराम ! जगतीस्तुतशौर्य ! रमाललाम ! दु-
र्वारिकबन्धराक्षसविराम ! जगज्जनकल्मषार्णवो-
त्तारसमाह ! भद्रगिरिदाशरथे ! करुणापयोनिधे ।१।
राम विशालविक्रम पराजितभार्गवराम सद्गुण-
स्तोम पराङ्गनाविमुखसुव्रतकाम विनीलनीरद-
श्याम ककुत्स्थवंशकलशांबुधिसोम सुरारिदोर्बलो-
द्दामविराम भद्रगिरिदाशरथे करुणापयोनिधे ।२।
अगणितसत्यभाष शरणागतपोष दयालसज्झरी-
विगतसमस्तशोष पृथिवीसुरतोष त्रिलोकपूतस-
द्गगनधुनीमरन्दपदकंजविशेष मणिप्रभाधगद्-
धगितविभूष भद्रगिरिदाशरथे करुणापयोनिधे ।३।
तुङ्गदरातिभङ्ग खगराजतुरङ्ग विपत्परम्परो-
त्तुङ्गतमपतङ्ग परितोषितरङ्ग दयान्तरङ्ग सत्-
ससङ्ग धरात्मजाहृदयसारसभृङ्ग निशाचराब्जमा-
तङ्ग शुभाङ्ग भद्रगिरिदाशरथे करुणापयोनिधे ।४।
श्रीद सनन्दनादिमुनिसेवितपाद दिगन्तकीर्तिस-
म्पाद समस्तभूतपरिपालविनोद विषादवल्लिका-
च्छेद धराधिनाथकुलसिन्धुसुधामयपाद नृत्तगी-
तादिविनोद भद्रगिरिदाशरथे ! करुणापयोनिधे ।५।

❀ आद्यं श्लोकाष्टकं प्रत्यर्थांशादन्यत्र यथामूलमेव ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरमणीयहार सजलाम्बुदनीलशरीर भक्तमं-
दार विकारदूर परतत्त्वविहार समस्तचेतनो-
द्धार दुरन्तपातकवितानविदूर खरादिदैत्यका-
न्तारकुठार भद्रगिरिदाशरथे करुणापयोनिधे ।६।
दुरितलतालवित्र खरदूषणकाननवीतिहोत्र भू-
भरणकलाविचित्र भवबन्धविमोचनसूत्र चारुवि-
स्फुरदरविन्दनेत्र घनपुण्यचरित्र विनीलभरिकं-
धरसमगात्र भद्रगिरिदाशरथे करुणापयोनिधे ७।
कनकविशालचेल भवकाननशातकुठारभूत स-
ज्जनपरिपालशील दिविजस्तुतसद्गुणकाण्ड काण्ड-
संजनितपराक्रमविशारद शारदकन्दकुन्दच-
न्दनघनसारका भद्रगिरि दाशरथे करुणापयोनिधे ८।
नत्वार्यान्गुरुनाथभट्टरगुरुं ध्यात्वा च बद्धाञ्जलिः
स्तुत्वा सत्कविशेखरान्स्वकृतिनिर्विघ्नावसानादृतः ।
वक्ष्येऽहं शतकं भक्तपरतया सद्वत्सल स्वीकुरु
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९।
लोभाद्यद्रचितं पुरा कुजनसन्तोषाय काव्यं मया
सोऽयं स्याद्धदरक्षयो विरचितस्त्वन्मौक्तिकैर्मुक्तिद ।
जिह्वायां मम नृत्य दत्तरसवच्छन्दाशयस्सन्ततं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१०।
काकुत्स्थान्वयवारिधौ तव सुधासूतेः पवित्रं शुभं
पादाम्भोजयुगं सुगन्धिविकचैर्नीलोत्पलैश्चम्पकैः †
सद्वृत्तवचनैस्तनोमि विहिताभ्यर्चं प्रसीद प्रभो !

---

† मूलस्थानि पद्यानि उत्पलमाला, चम्पकमाला चेति वृत्तविशेषयोः निबद्धानि ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।११।

निर्दोषं सुगुणं विभूषणयुतं काव्यं रसैः पूरितं
काव्यास्वादचणान् सचेतस इवाप्राज्ञान्किमावर्जयेत् ।
स्यन्दन्ते किमु चन्द्रकान्तमणिवद्ग्रावाण इन्द्वंशुभिः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१२।

भास्वद्वंशज ! शक्तियुक्तिरहितस्यामुष्य दुष्टोक्तिभि-
र्भूयिष्ठापि भवत्कथा त्रिजगतीं पूतां विदध्याद् ध्रुवम् ।
किं कालुष्यवती पुनाति न जगद्वक्रा च भागीरथी
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१३।

घोरांहश्चयसागरस्य दहनस्संशोषणो वाडवः
संसारार्तिदवानलस्य च सुधासारोऽभिधानं तव ।
पापोपद्रवदुरन्तदुर्गतमहाटव्याः कुठारः स्वरः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१४।

शर्वाणीशिवयोर्विभीषणमहाभक्तस्य मन्त्रो महान्
द्रौपद्याः करिणश्च गौतममुनेस्सत्या विपद्बान्धवः ।
जिह्वायां मम ते पवित्रमलं नामानिशं नृत्यतु
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१५।

प्रेताधीशनियुक्तकिङ्करगणे प्राप्य स्थिते प्राङ्गणे
कण्ठरोधिनि मृत्युकालजकफे स्वीये जने रोदिनि ।
सन्दिग्धं तव नामकीर्तनमतः कर्तव्यमद्यैव तत्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१६।

कारुण्यालय ! दुःस्थितावन ! रमाकान्तेति नित्यां स्मृतिं
प्राप्तानां सुधियां पदाब्जरजो मूर्ध्ना मया धार्यते ।
मा तान्यात कदाचनेति शमनो रुन्धे ब्रुवन्किङ्करान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१७।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्रष्टुश्चापि पितासि राम ! सनकादीनाञ्च तत्त्वं परं
मौनीन्द्रद्विजसत्तमादिसुजनस्येष्टा कुले देवता ।
श्रेष्ठश्चासि दिवाकरान्वयमहीपालेषु तार्क्ष्यध्वज !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१८।
विद्वद्रक्षक ! सर्वपापहरणोद्योगानिशव्यापृत ।
ब्रह्मेन्द्रादिसमस्तदैवतनमस्योद्देश्यदिव्याकृते !
त्वत्कीर्तिप्रमदागले सुकवितामाला मदीयाऽर्प्यते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ।१६।
श्रीदेवीं धरणीसुतां निजपरीवारं जनं दृष्टवं
भद्रादिं परमं पदञ्च विरजां गोदावरीनिम्नगाम् ।
कुर्वन् चेतनतारणाय वसुधालोकेऽवतीर्णो भवान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भाद्राद्रिभाग्यावधे ।२०।
अद्राक्षं तटिनीतटं वसतिरप्यालोकि भद्राचले
पृथ्वीजा ददृशे त्वदायुधचयो वीक्षाम्बभूवे मया ।
सौमित्रिश्च विलोकितः त्वमपि चेत्येवं कृतार्थोऽभवं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे २१।
हालेनैति कृषीवलोभिरुचितं व्रीहिं क्षुधापीडितो
गङ्गायां लभते जलं सुमधुरं पान्थः पिपासार्दितः ।
पापस्त्वां शरणागतो विकृतिमच्चित्तोऽगमं स्वस्थतां
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ।२२।
खाते तर्कखनित्रतोऽस्त्यधिगतस्तत्त्वस्थले यो निधी
रामाख्यस्सुचिरं पुरा सुमहता कष्टेन तं साम्प्रतम् ।
हस्तस्थं वितनोति भक्तसुलभं भक्त्याख्यसिद्धाञ्जनं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।२३।
रामः किल्विषसंततेश्शमयिता संतोषहेतुः सतां
कामादिद्विषतां जये निजजनायाजस्रसाह्यप्रदः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्राता साधुजनस्य देव इति ते पादाम्बुजेऽहं भजे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ।२४।

त्वामुत्सृज्य भवन्ति ये जडधियो देवान्तराराधका-
स्ते नूनं सहकारजातसुमधुरान्निम्बे फलेऽत्याहृताः ।
एकस्त्वं भजनीयतामुपगतस्त्वं चैव मोक्षप्रदः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादि भाग्यावधे ।२५।

'रा' वर्णो वृजिनानि मर्त्यहृदयान्निस्सारयत्यक्षरं
रुन्धत्तत्पुनरागतिं 'म' इति संरक्षेत्कवाटीभवत् ।
नैवाज्ञैस्तव नाम कीर्तितमिदं; नोचेत्कुतोन्वापदः ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादि भाग्यावधे ।२६।

सीताराम । ककुत्स्थराम ! रघुवंशोद्धार ! लोकप्रिये-
त्येवं भेकगणा इवापि मधुरं पापापहं नाम ते ।
ये शश्वत्समुदीरयन्ति परमं त्वद्धाम गच्छन्ति ते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादि भाग्यावधे ।२७।

मूढाश्शार्करमोदकाय तरुणीबिम्बाधरायापि च
क्षोद्राय स्पृहयन्ति ये मधुरतासीमान्तभूतं तव ।
पीयूषाभ्यधिकं न ते विदुरहो नाम्नो रसं श्रीपते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादि भाग्यावधे ।२८।

अंहांसि द्विजराजयान ! भजतां त्वामद्रितुल्यानि किं
नो नश्यन्ति ? न निर्विशन्ति किमिमे भूतिं मघोनस्सदा ।
एभ्यः किं न ददाति मोक्षविभवो हस्तावलम्बं प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादि भाग्यावधे ।२९।

आस्वाद्यस्सितयान्वितः पयसि यस्सारो यथा भक्ष्यते
तद्वत्ते कमनीयरूपममृतं चित्ताख्यपात्राहितम् ।
दास्येनाञ्जलिना पिबामि तृषितो यत्नार्जितं राघव !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादि भाग्यावधे ।३०।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दत्तेऽल्पेतरसम्पदस्तव सती, दूतो हनूमान्व्यथां
प्रोद्धूनोति, तवानुजो मम सखा शोके, शुभं नाम ते ।
पापघ्नं, महिमा विपत्सु शरणं ते वज्रसंनिर्मितं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।३१।

कल्पद्रुध्वजशङ्खचक्रकुलिशा बाणासनं चाङ्कुशो
रेखारूपतया वसन्त्वविरतं त्वत्पादपङ्केरुहे ।
दत्त्वा गौतमदारवत्तदधुना दीनस्य मे पालय
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे । २।

अम्भोधीनवगाह्य मन्दरगिरिं धृत्वा च पृष्ठे गुरुं
दंष्ट्रायां धरणीं विधाय विबुधाराति विदार्यापि च ।
दुष्टक्षत्रततिं निहत्य जगतां त्रातासि हे राघव !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।३३।

दुष्टोन्मूलयितुर्विपन्नशरणस्याचिन्त्यदिव्यायुधो-
दञ्चद्बाहुयुगस्य रामनृपतेर्नान्यत्समं दैवतम् ।
इत्युद्घोषणमातनोमि करिणो भेरीं समुन्नादयन्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।३४।

जानक्या नयनोत्पलामृतकरः प्रस्निग्धनीलाम्बुदो
वक्षोजाद्रिसमाश्रितो नववयःकान्तारहस्ती भवान् ।
नित्यं ते पदपङ्कजे मधुपतां प्राप्नोतु मे मानसं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।३५।

आदित्यान्वय ! भूतराक्षसपिशाचादेश्शरीरामय-
भ्रान्त्यादेश्च निवारकं तव पदाब्जाख्यं महापञ्जरम् ।
प्राप्तोऽहं शरणं शरण्य ! भवता नोपेक्षणीयोऽस्म्यहं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।३६।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पीयूषं चरित पिबामि तृषितश्श्रीपादतीर्थं च ते
आस्वाद्या मम मङ्गलाकर ! भवन्नाम्नस्स्रवन्ती सुधा ।
सङ्गं त्वद्गतचेतसां वितर मे नीचांश्च दूरीकुरु
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।३७।
घोराकारकृतान्तकिङ्करततेराधिः शुभं नाम ते
दारिद्र्याख्यपिशाचघातकमहामन्त्रो विकुण्ठस्य च ।
द्वारोद्घाटि रघूत्तमोत्तम ! सदा त्वद्दासदासीजने
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।३८।
विज्ञप्तिं शृणु मामिकां रघुकुलोद्भासिन्न संदृश्यते
मत्तो मत्ततरो जगत्सु सुदुराचारप्रसक्तः परः ।
त्वत्तो वा गुणवत्तरस्सुमनसां; त्वं मे गतिः केवलः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।३९।
माता त्वं भरणात् पिता च वृजिनापत्संतते रक्षणात्
वैद्यश्चासि दशेन्द्रियामयचयस्याजस्रनिर्मूलनात् ।
त्वच्चिन्तितमद्धितो भव भवाभावाय भक्तस्य मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४०।
ब्रह्माण्डावलिमात्मकुक्षिकुहरे सृष्ट्वा तदन्तरस्थितान्
जन्तून्स्थावरजङ्गमांस्त्वमसि संरक्षंस्त्वदीयः पिता ।
तत्सूनौ मयि पक्षपातवहनात्तापान् क्षमस्व प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४१।
सद्योगीश्वरमानसाम्बुजरसास्वादी मिलिन्दो भवान्
त्वं कीरो मधुराकृतिर्धरणिजावाह्वन्तरे पञ्जरे ।
मुक्तेस्त्वं च निधिर्भवद्विरहजं शोकं ममोन्मूलय
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४२।
ज्ञातुं त्वां प्रभवन्ति किं न मनुजाः ? किं तेष्वरक्तोऽसि वा ?
यन्नापज्जलधौ शृणोषि वचनं त्वं मज्जतां प्राणिनाम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सीताया अथवा न विस्मृतवतः पीडामुपेक्षा न ते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४३।

स्वश्रोतृज्वरहेतुतावककथाः पीयूषपूर्णा पुरा
घण्टोच्चध्वनिभिर्निवारितवते नीचाय दत्तो वरः ।
यद्देयं करणत्रयस्तुतभवत्तत्त्वाय तद्देहि मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४४।

प्राप्तास्वाहवपन्नगामयपिशाचापत्सु सीतापते !
त्वय्येवाहितचेतसः कृतधियः पार्श्वद्वये रक्षितुम् ।
राम ! त्वां च तवानुजं च कथयन्त्यत्यादरेण स्थितौ
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४५।

सङ्ख्यातीतजनुर्भवाब्धिमनिशं दुःखोर्मिमालाकुलं
नालं सन्तरितुं तितीर्षति जनोऽयं भक्तिनावा तव ।
भीतिं चाभयदानदीक्षित ! हरे तस्यार्हतां चिन्तयन्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४६।

भूयोऽङ्ग्ध्रिरणोऽपि पातकरसस्त्वन्नाम मे पावनं
जिह्वायास्समभूत्पुरा किल शुकः किं नाप पुण्यां गतिम् ।
अन्ते "राघव ! पाहि मा" मिति वदन् ; नित्यं तदेवास्तु मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४७।

अन्यस्वापहृतिस्तथान्यतरुणीरक्तिः परान्नादनं
मात्रादौ मधुरं नवेत्त्यनुपदं तद्दुर्विपाकं मनः ।
मृत्योः किङ्करबाधनादवसि मां करुणां तरण्यां नयन्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४८।

घोराण्याचरितान्यकारि भगवद्भक्तापचारो मया
सख्यं चापि कृतं समं कुपुरुषैर्देवान्तराराधकैः ।
आगांस्येव विचिन्त्य मा तुदविभो ! त्वद्दासदासोऽस्म्यहं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।४६।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोभादन्यधनाङ्गनापहरणे युक्तं मदीयं मनः
चोरं दास्यविवेकरज्जुविहितैः पाशैर्दृढं निर्दयम्।
त्वत्पादाब्जसुरद्रुमस्य ललिते मूले बधान प्रभो!
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे।५०।

काशीक्षेत्रविभूषणोऽस्मि न शिवः त्वन्नामसारस्य वित्
नाहल्याऽस्मि तवाङ्घ्रिनीरजरजोमाहात्म्यसवेदिनी।
नाहं वापि विभीषणः सुविदितस्त्वत्सत्य; ईडे कथं?
श्रीमन्दाशरथे। दयाजलनिधे! भद्राद्रिभाग्यावधे।५१।

पात्रं पातकिनस्त्वदीयकरुणावृत्तेस्तथा ह्यश्मन-
श्चैतन्यं समभूदरेश्च धरणीराज्यं, च पुण्यं महत्।
दुर्जातेर्महितात्मता कविकुलस्याहो भवद्दातृता
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे।५२।

दुर्वारा मम पापसन्ततिरहो! किं चित्रगुप्तो लिखेत्?
क दण्डं विदधीत मृत्यु रथ तद्भृत्याश्च कुर्युः कथम्?
एतत्सम्भवनात्पुरैव भवता संरक्षणीयोऽस्म्यहं
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे।५३।

किं बन्धुश्शबरी तवास्ति यदियं सम्भाविताभीत्तथा?
कि ते स्निग्धजनो गुहोऽपि यदयं त्वद्दास्यपात्रीकृतः?।
किं पापं मम यच्छृणोषि न नुतिं? किं तादृशोऽहं न ते?
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे।५४।

दीनान्नानुगृहीतवान्कति जनान् त्वं दीक्षितो रक्षणे?
वस्त्रालिं बहुलां प्रदाय किमु नारक्षः स्मृतो द्रौपदीम्?
याच्ञां मे सदयं निशम्य नयनानन्दं विधत्से न किं?
श्रीमन्दाशरथे! दयाजलनिधे! भद्राद्रिभाग्यावधे।५५।

अभ्रश्याम! दिदृक्षितोऽपि बहुधा नात्मा त्वया दृश्यते
कोणे नाम निगुहसि क नु निजं लोकप्रसिद्धं महत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भक्तेर्हेतुरिदं च पातकतरोः कुद्दालको राघव !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।५६।

नोपेक्ष्यं; भवतो दयालुचरितं मा भूदसत्यं प्रभो !
नोपेक्ष्यं; तव वत्सलस्य न भवेच्चाकीर्तिरत्राणजा ।
नोपेक्ष्यं, भवतारणो भव तरिः त्वत्सक्तचित्तस्य मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।५७।

अज्ञानाद् दुरितान्यकार्षमिति, मां त्रायस्व, मे त्वं पिते—
त्यन्यान्न प्रणमामि शीर्षत इति, त्वत्त्वे सभाजामहम् ।
दासानामविरुद्धदास इति, चावाचं जनस्त्व प्रभो
श्रीमन्दाशरथे दयाजलनिधे भद्राद्रिभाग्यावधे ।५८।

दुष्टोऽस्मावितिः दूषितोऽहमितरैः; दुष्टोऽहमित्यत्र न ।
विश्वत्राणपरायणे त्वयि भजाम्यन्यान्नहीत्यैरयम् ।
अत्रामुत्र सुखं ममास्तु न च वा; त्वन्नाम मे स्याद्गतिः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।५६।

पर्याप्तं त्विदमेव यत्तव दयावर्षेण मां सिञ्चसि
प्रोन्माथं तत आतनोमि दुरितक्ष्यामिकानिर्मूलनम् ।
ईहानां च विनाशनं यमभटप्रोत्सारणं सन्ततं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।६०।

बाणस्ते जलधीनजीगमदहो सप्तापि संयुक्ततां;
धूलिस्ते पदपङ्कजस्य महिलां चक्रे शिलां दुर्भगाम् ।
वृत्तं ते द्रुहिणादिनिर्जरवचोऽतीतं, कथं वर्ण्यते ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।६१।

सङ्ख्यातीतसुरारिमर्दनविधौ किं वक्नुयान्मर्कटः ?
शक्तस्यापि तनौ सुधाकिरणतां गच्छेद्‌द्वाग्निः कथम् ?
सीतायाः महिमा, तथापि करुणा भक्तं च दूरास्य तत्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।। ६२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवश्रेष्ठ ! जगत्त्रयाधिप ! पुरारात्यादिदेवप्रभो !
भक्तानामपवर्गदानजनितामेयप्रतिष्ठानघ !
स्तौमि त्वां सततं स्वदीयदयया शाम्यन्त्वघान्यद्य मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ॥ ६३

सत्वं ते सहजो गुणो हि, वसतिः पीयूषवारां निधिः;
सूनुः पद्मभवो, रमा च ललना, भूमिश्च सिंहासनम् ।
छत्रं ते गगनं, निशाकररवी नेत्रे च, शय्या फणी
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ।६४।

चित्रं त्वच्चरणाम्बुजव्यतिकराद्योषा यदासीच्छिला;
चित्रं चापरमप्लवन्त गिरयो यत्सागराम्भश्चये ।
चित्रं त्वेतदतीव यत्कृतभवद्ध्याना विमुक्ता इह
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ।६५।

त्वं दैवं जननी पिता च वरदो मित्रं गुरुश्चासि मेऽ-
प्येवं ध्यानपरायणं जनमिमं तन्वन्ति पापान्यहो ।
प्राप्तस्त्वान्तविकारदुर्गतिमितस्त्राता त्वमेकः प्रभो !
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ।६६।

प्राप्ये वासवराज्यभोगदपदेऽप्याशा प्रशाम्येत्कथं ?
सौवर्णाचलतुल्यसम्पदमितः काचोऽपि नान्वेष्यति ।
पुण्याधानि मुधा भवन्ति न हि मे; तुष्टोऽस्मि; नेहे भवं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ।६७।

विज्ञास्सूनृतवादिनश्च करुणापूर्णा अलुब्धा द्विजाः
गावो वीरपतिव्रताश्च निगमा भूमेर्धुरं बिभ्रति ।
वीक्ष्यं तानपि जानते नहि नराः कर्तुं परोपक्रियां
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्रादिभाग्यावधे ।६८।

अम्भोधिं प्रविगाह्य नक्रभरितं मत्स्यावतारे पुरा
क्रोधोग्रो निगमापहं [illegible] हत्वा च तं सोमकम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संरक्ष्य श्रुतिसञ्चयं सकरुणं धात्रे व्यतारीद्भवान्
श्रीमन्दाशरथे ! दयाजलनिध ! भद्राद्रिभाग्यावधे ६९।
मन्थं मन्दरमद्रिमादिफणिनं रज्जुं विधायादरात्
दुग्धाब्धिं मथितुं सुरासुरगणे व्यापारयुक्ते भवान् ।
भूमिं कम्पवतीं विलोक्य धृतवान् कूर्माकृतिस्तं गिरिं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।७०।
आवृत्तां कटवद्विधार्य धरणीमब्धौ निलीय स्थितं
वाराहीं तनुमाश्रितः त्वमवधीर्हेमाक्षरक्षःपतिम् ।
स्वायत्तां च महीं पुरेव धृतवान् शृङ्गे भवान्दक्षिणे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।७१।
निर्भिन्नान्नखदन्तकान्तिरुचिरात्काष्णार्यसान्निर्गतः
स्तम्भाद्भीकरनारसिंहवपुषा हर्तुं स्वभक्तव्यथाम् ।
संहर्तुं च हिरण्यपूर्वककशिपुं प्रह्लादमाह्लादयः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।७२।
धारिण्यां प्रथमं ततश्च गगने दत्त्वा द्वितीयं पदं
तार्तीयेन बलाद्बलेरवनतं भक्त्या शिरो नामयन्
देवेन्द्राय जगत्प्रभुत्वमददा भूत्वा वटुर्वामनः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।७३।
हत्वा दृप्तमहीपतीन् परशुना त्रिस्सप्तकृत्वोऽखिलान्
स्रोतोभूततदीयरक्तसलिलैस्सन्तर्प्य तातं हतम् ।
भूमिं भूसुरसाच्चकार विजितां रामो भवन्भार्गवः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।७४।
हत्वा यज्ञविघातिराक्षसगणं भङ्क्त्वा धनुर्धूर्जटेः
पृथ्वीजां परिणीय काननभुवं गत्वा गुरोराज्ञया ।
अन्ते त्वं दशकण्ठकण्ठनिचयं छित्त्वा जगत् त्रातवान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।७५।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हर्षाणां निलयो हि, संसृतिमहामोहद्विपस्याङ्कुशः,
सम्पद्भाण्डगृहं, समीहितनिधिर्निःश्रैयसस्याकरः ।
मार्गश्शत्रुजयस्य, नौरपि विपत्सिन्धोः शुभं नाम ते
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ८०।

पापाख्यव्रतति भवासुखफलां श्रीरामनामायुधं
कुर्यात्किं सहसा सहस्रशकलां छित्त्वा न रूढामपि।
किं नोत्तुङ्गशिखोऽवलेढि शलभानासीदतः पावकः ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ८१।

भक्त्या यः परया जितेन्द्रियचयो विष्णौ स एवोत्तमः
योऽजस्रां करणोच्चयं प्रयतते जेतुं ह्यसौ मध्यमः ।
जिग्ये यः करणैस्तमाहुरधमं ; त्रायस्व मामीदृशं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ८२।

लोभात्स्पर्शसुखे द्विपो, रसनगाल्लौल्याद्विनश्येज्झषो,
गीत्या श्रुत्यभिरामया विषधरो, रूपप्रसक्त्या मृगः ।
सौरभ्यान्मधुपश्च ; पञ्चविषयाकृष्टस्य मे त्वं गतिः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।८३।

हस्तावञ्जलिबन्धने तव निजे नत्रे समालोकने
संस्मृत्यां रसनं श्रुती निशमने व्यापारयन्वीरधीः ।
त्वय्येवार्पितसर्वभारमहितो यस्तं जनं पालय
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।८४।

एकं ते तुलसीदलं सुदृढया भक्त्यार्पयन् गण्यते
लेखाधीशसुपर्णकुञ्जरसामस्मौलभ्यशालिन् ! बुधैः ।
नित्यं त्वच्चरणारविन्दनिरतस्त्वद्धाम इस्तस्थितं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।८५।

प्राच्यामुद्गत एव भास्वति यथा चन्द्रानलौ स्लायतो
लोकैकाधिपतौ तथोज्वलगुणे संशोभमाने त्वयि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रक्षीणद्युतयो भवन्ति सकला ग्रन्थाः प्रभो ! देवताः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।८६।

लोकाधीश ! भवत्पवित्रचरितक्षीरम्बुधिं मोहतः
त्यक्त्वा स्नातवतो बहुष्वपि महातीर्थेषु पुण्येषु मे ।
क्षाल्यन्ते कथमन्तरिन्द्रियमलाः ? वन्ध्यश्श्रमः केवलं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।८७।

हेम्नोऽपैति यथा विना न दहने सन्तापनाच्छ्यामिका
तद्वद्दौष्ट्यविनाशदीक्षित ! भवद्भक्त्यग्निसंयोगतः ।
दुस्साधं यदहेर्मदायतिभिदं पापत्रयं दुर्मलं
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।८८।

श्रीर्हेतुर्बहुलश्रियां तव सती, गङ्गा त्वदीया सुता
लोकान्पूततमान्करोति, तनयः प्राणान् प्रदत्ते विधिः ।
कामान्कान्न भजेयुरीप्सिततमान् ये त्वां भजन्ते सदा ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।८९।

क्लिद्येत्किं जलबिन्दुभिः कलशिनीपत्रं जलान्तःस्थितं ?
पङ्के गाढतमे चरन्तमपि मृत्कीटं विभीयात्स किम् ? ।
एवं संसृतिवासनाविरहितो गच्छेत्परं मानवः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९०।

पुष्टाङ्गं सजरं स वीक्ष्य धरणीराज्यश्रियं चञ्चलां
स्वात्मीयं सकलं विहाय पुरतस्स्वीयान् प्रयायानपि ।
ये छिन्दन्ति न मोहपाशनिचयं तेषां गतिः कीदृशी ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९१।

ऋद्धौ विस्मृतिमेत्य सङ्कटगतः पुण्यानि कार्याण्यहं
नाकार्षं कथमित्यसावनुशयस्सर्वप्रकारैर्वृथा ।
गेहे वह्निगते तृषाभिभवने कोऽद्भ्यः खनेद् भूतलं ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९१।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पङ्कस्थो जलशोषणादविचलन् स्थानात्स्वकीयाज्झषः
जीवाशस्बनमीहते पुनरपि क्षिप्रं यथा जीवनम्।
एवं प्राप्यनिवद्धसुस्थिरमतिर्योगी भवद्भक्तितः
न्दनघनसारका भद्रगिरि दाशरथे करुणापयोनिधे ।९३।
उद्भूतप्रतिशब्दघर्घरश्वं कुर्वन्कटुं दर्दुरः
फुल्लाम्भोजरसं न वेत्ति मृदुनिस्वानं मिलिन्दो यथा ।
श्रीमन् दाशरथे दयाजलनिधे भद्राद्रिभाग्यावधे
नैवं ज्ञातुमलं मनस्सहृदयस्याज्ञस्सचेता इव
श्रीमन्दाशरथे दयाजलनिधे भद्रादि भाग्यावधे ।९४।
पर्याप्तोह्ययमेक एव तनयः पित्रोर्महाधन्ययोः
यः कुर्यान्न परिग्रहं परजनाद्द्याच्च सद्योऽर्थिने ।
सत्यं वक्ति च केवलं त्वयि निजे दैवे च यो भक्तिमान्
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९५।
सीताराम ! रमेश ! राम ! सहितज्ञानस्वरूप ! प्रभो !
पाहीमं जनमित्यजस्रमगतिः संप्रार्थये त्वां हृदि ।
तन्मे पापविनाशपूर्वककलाचातुर्यदानं कुरु
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९६।
धन्या सा शवरी भवन्तमकरोद्या भुक्तभुक्तोज्झितं
चिक्रोडः कृतरेख एति करजैः पृष्ठे त्वया धन्यताम् ।
भक्तानां कुलजन्मिनी न गणिते वेदान्तवेद्य ! त्वया
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९७।
श्रेष्ठो नानृतवाक् विनेति न रिपोर्यस्स प्रवीरो मतः
दाता याचककामनाधिकतया दत्ते ऽर्थिते यो भुवि
त्वय्येवार्पितभार एव कथितो निश्चिन्तचित्तः कृती
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९८।
प्राहुर्लोकविदो द्विरेफवरणं कीटं द्विरेफाकृतिं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किं वाच्यं भयदुःखसन्ततितमोनिष्कासनाहस्करः ।
स्वाभिन्नं वितनोषि मामिति विभो ! सङ्क्रामयन्स्वान्गुणान् ?
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।९९।

वृक्षाणां कुसुमं शलादुफलतां गच्छन् क्रमाद् दृश्यते
त्वत्पादान्तिकगं तदेव परिवस्यार्थत्वमापादितम् ।
आदौ धान्यगवादिसम्पदतुला निश्श्रेयसं स्यात्ततः
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यवधे ।१००।

पादौ भट्टगुरोश्शिशूनावदयवेपूर्ध्वा इव पुण्ड्राः धृताः
मन्त्रस्ते स्ववशः कृतो यमभटास्सन्तर्ज्य दूरीकृताः ।
त्वत्पादाम्बुजबध्यमानमनसश्शान्तानि पापानि मे
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यावधे ।१०१।

आत्रेयस्तनयश्च लिङ्गसचिवस्याध्वर्युवेदे शुचौ
शाखामाश्रित आदिमामकरव कष्वलंवंशोद्भवः ।
गोपोऽहं कविसन्नुतः कृतिमिमां दासो भवत्कीर्तनां
श्रीमन्दाशरथे ! दयाजलनिधे ! भद्राद्रिभाग्यवधे ।१०२।

भद्राचलकृतवसनेर्दाशरथेस्तावकस्य शतकस्य ।
अनुवादं वरदकृतं भागवताः पठितुमर्हन्ति ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(४१२ पुटतोऽनुवृत्ता)

'सखि सीते, कथं न पश्यसि रामस्यावस्थाम् ?

कुवलयदलस्निग्धैरङ्गैर्ददन्नयनोत्सवं
सततमपि ते स्वेच्छादृश्यो नवो नव एव यः ।
विकलकरणः पाण्डुच्छायः शुचा परिदुर्बलः
कथमपि स इत्युन्नेयस्तथापि दृशां प्रिय इति ।

क्षीणकायं विकलकरणं पाण्डुच्छायं शुचा परिदुर्बलमपि दृशां प्रियं निर्दिशति । छायाङ्के च दूरत एव रामचन्द्रं वीक्षमाणा सीता

"हा कहं पहादचन्द मण्डलपाण्डर परिक्खाम-
दुर्व्वलेण आआरेण अयं सोम्यगम्भीराणुभाव
मेत्तपच्चहिज्जाणीओ अज्जउत्तो एव्व ।।"

(हा कथं प्रभातचन्द्रमण्डलपाण्डर परिक्षाम दुर्बलेन आकारेण अयं सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञेय आर्यपुत्र एव)

इति रामचन्दं प्रभातचन्द्रपाण्डुरं दुर्बलं क्षाममपि सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञेयं मन्यते । चतुर्थाङ्कस्य शेषे च नेपथ्यवचने

अनुभावमात्रसमुपस्थितश्रियं
सहसैव वीक्ष्य रघुनाथमीदृशम् ।
प्रथमप्ररूढजनकप्रबोधना-
द्विधुराः प्रमोहमुपयान्ति मातरः ॥

इति रामचन्दोऽनुभावमात्रसमुपस्थापितश्रीरुल्लिखितः । तत्रभवती सीता च परिपाण्डुदुर्बलकपोलकमनीयमाननं दधती तमसया शरीरिणी विरहव्यथेवोपवर्णिता । एवं च विकलकरणं पाण्डुच्छायं शुचा परिदुर्बलमपि दृशोः प्रीतिकरमनुभावमात्रवर्धितश्रियं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामचन्द्रं परिपाण्डुदुर्बलकपोलकमनीयमाननं दधतीं सीतां च न वयं करुणरसस्यालम्बनं स्वीकर्तुं प्रभवामः। सुतरां करुणरसेऽपेक्षितस्य स्थायीभावस्य शोकस्याभावात् करुणरसोचितालम्बनभावासङ्गा वाच्च उद्दीपनविभावानां कदलीवनशयनीयशिलातललतागृहादीनां करुण रसोद्दीपनभावत्वं.कर्यभूतानां च मूर्च्छामोहभूपतनादीनां करुणरसानुभावत्वं च न संगच्छते। सुतरां करुणरसोऽत्र वर्तत इति न वयं स्वीकर्तुं प्रभवामः। छायाङ्के चोपसंहारे रामचन्द्रः 'अस्ति च मे इदानीमश्वमेघसहचारिणी हिरण्मयी सीताप्रतिकृतिः, तत्र तावद्बाष्पदिग्धं चक्षुर्विनोदयामीति व्याहरन् शोकस्यावसानं करोति। अतः शोकस्याभावात् करुणरसो नास्त्येव।

यदपि ते आचक्षते श्रृङ्गाररसस्य विरोध्यपि अङ्गत्वेन वर्तमानः करुणरसः श्रृङ्गाररसं परिपुष्णातीति तदपि न युक्तिसहम्। करुणे रसे हि पूर्वानुभूताः श्रृङ्गारसम्बन्धिनो भावाः स्मर्यमाणाः करुणरसमुद्दीपयन्तीति करुणरसोद्दीपकत्वात्स्मर्यमाणतया अवस्थितस्य श्रृंगारःस।।त्वमुपपद्यते यथा 'अय स रशनोत्कर्षीत्यत्र। इयं हि कुरुपाण्डवसग्रामे निहतस्य भूरिश्रवतः संग्रामांगणपतितं छिन्नं हस्तमुद्दीश्य तदीयपत्नीनामुक्तिः। अत्र पत्नीगतस्य शोकस्य संग्रामनिहतो भूरिश्रवा आलम्बनम्। तेन जीवितावस्थायां संगमावसरे करेण सम्पादितानां रशनोत्कर्षणपीनस्तनविमर्दननाभ्यूरुजघनस्पर्शननीवीविश्रंसनानामुल्लेखः प्रकृतस्य शोकस्योद्वेलको भवतीति युक्तं भवति श्रृंगारस्य करुणरसांगत्वम्। संभोग श्रृंगारे च कथमिव करुणरसस्य विभावा अंगत्वेन निवेशयितुं शक्यन्ते। तस्मात् श्रृंगारविरोधी करुणो रसो उत्तररामचरिते न कुत्रापि विद्यमानः स्वीक्रियते। वारद्वयं हि छायाङ्के भागीरथीवरप्रसादाददृश्यरूपया सीतादेव्या करकमलेन हृदि ललाटे च कृतस्पर्शो रामभद्रोऽमितमानन्दमनुभवति। दर्शनाभावेऽपि स्पर्शस्यानुभवा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च्छोकस्योच्छेदो भवति। एवं वारद्वयमुच्छन्नः शोकः कथमिव स्थायित्वमालम्बताम्। तस्मादुत्तररामचरिते अंगितया अंगतया वा शोकस्थायीभावस्य करुणरसस्यावस्थानं सर्वथा न सम्भवतीति दृढं ब्रूमः।

अवसरेऽस्मिन् इदमपि प्रतिपादयामो यत्करुणरसस्वीकारे पुनर्नायिकानायकयोः समागमो न घटते। यत्र पुनर्नायिकानायकयोः पुनः समागमो भवति, तत्र कथञ्चिदपि करुणरसः स्वीकर्तुं नैव शक्यते। अतएव कादम्बर्यां पुण्डरीकमहाश्वेतालम्बनश्चन्द्रापीडकादम्बर्यालम्बनश्च रसो न करुणः, परन्तु विप्रलम्भश्रृङ्गार एव। उपरतेऽपि पुण्डरीके "वत्से महाश्वेते न परित्याज्यास्त्वया प्राणा" इति चन्द्रमसो वचनेनाश्वस्ता पुनः समागमाशया तद्गुणानुपवर्णयन्ती, दीर्घं विरहव्रतमाचरन्ती महाश्वेता विप्रलम्भश्रृंगारस्यैव आलम्बनं भवति, न तु करुणस्य। महाश्वेतायाश्च शोकः अनितरसाधारण एव। एवम् उपरतेऽपि पुण्डरीके महाश्वेतया अनुभूयमानो दुःखातिरेको नैव शोकपदवाच्यो भवति प्रत्युत पुनः समागमसम्भावनायाः सत्त्वात् केवलं रतिमूलक इति स्वीक्रियते। एतस्याश्च रतेरविच्छिन्नतासम्पादनार्थं चन्द्रमस आश्वासनं तरलिकायाः कातरप्रार्थना चन्द्रापीडस्य चोपसान्त्वनं कविना निबद्धम्। एवमपि मित्रस्य वैशम्पायनस्य महाश्वेताशापेन शुकत्वप्राप्तौ निर्भिन्नहृदयस्य उपरतस्य चन्द्रापीडस्योद्देशेन कादम्बर्या अनुभूयमानः दुःखातिरेको नैव करुणरसस्य स्थायी भवति, परन्तु पुनः समागमसम्भावनया रतिहेतुक इति विप्रलम्भश्रृङ्गारस्यैवा[illegible] भवति। कादम्बर्या रतेरविच्छिन्नतासम्पादनार्थं चन्द्रापीडशरीरं कादम्बरीसन्निधौ संस्थापितम्, आकाशवाणी च अवतारिता। एवमादिषु सर्वेषु स्थलेषु रतिर्नैव विच्छिन्नेति उपाया उद्भाविताः। पुनः समागमसम्भावना च मुख्यं कारणमिति नास्ति सन्देहः। एवमेवात्र

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
उत्तररामचरितेऽपि पुनः समागमस्यान्ते प्रतिपादनात् शोकस्य समूलमुत्पाटनेन न स्थायित्वमिति करुणो रस एव न सम्भवतीति तस्यांगांगित्वेनावस्थानविचार एव न प्रसज्जते ।

प्रसंगे चास्मिन् पूर्वोक्तरीत्या पुनः समागमस्योपवर्णनात् सीताविषयको रामचन्द्रेणानुभूयमानो दुःखातिरेकः नैव शोकपद-वाच्यो भवति, परन्तु रतिमूलक एवेति प्रतिपादयामः । यद्यपि रामः सीतां निर्वासयति, निर्वासितायाश्च सीतायाः कामपि प्रवृत्ति द्वादश वत्सरान् यावत् नोपलभते, तथापि अस्य सीताविषयिणी रतिर्नष्टेति वक्तुं न शक्यते । एष हि सीतां निर्वासयन्नपि तदीय-प्रतिकृतिं बहुमन्यते, तत्र च वाष्पदिग्धं चक्षुर्विनोदयति । एष हि तामुत्पत्तिपरिपूतां तीर्थोदकमिव वह्निमिव परमपवित्रां मन्यते, सर्वदा च तां बहुमन्यते । परित्यागावसरे 'भगवति वसुन्धरे श्लाघ्यां दुहितर-मवेक्षस्व जानकीम् ।

जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम्

यां देवयजने पुण्ये पुण्यशीलामजीजनः ।

इति प्रार्थयते । आलेख्यदर्शनावसरे च 'सा त्वमम्ब स्नुषायामरुन्ध-तीव सीतायां शिवानुध्यानपरा भवेति भागीरथीमनुरुणद्धि । सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्तीति जृम्भकास्त्राणि सन्ततिमनु-जानाति । 'तत् किमन्यदाशास्महे केवलं वीरप्रसवा भूया' इति वशिष्टस्य सन्देशं, परमनुगृहीताः स्मेति अभिनन्दति, त्वत्पुत्रपूर्णो-त्संगामायुष्मतीं द्रक्ष्याम इति ऋष्यशृंगस्य वचनं 'तथास्तु' इति सौत्सुक्यस्मितं गृह्णाति । एतयोर्वचनं च 'लौकिकानां हि साधूनामर्थं वागनुवर्तते, ऋषीणां पुनराद्यानां वाचमर्थोऽनु धावति' इत्युक्तदिशा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृह्णन् वीरप्रसवायाः पुत्रपूर्णोत्संगायाश्च सीतायाः सन्दर्शनं सम्भाव्येतेति काञ्चन धारणां मनसि बध्नाति । एवं गुरुजनवचःसु विश्वासं प्रदर्शयतोऽस्य कृत्याद्भिरंगलतिका नियतं विलुप्ते'ति उत्तरज्ञान केवलमावेगवशादेवेति विचारणीयं भवति । न च सा मृतेति कुत्राप्युच्चारयति । ताश्चोद्दिश्य 'हा देवि दण्डकारण्य वासप्रियसखि' इति संबोधयति । 'न मामेवंविधं परित्यक्तुमर्हसि', चण्डि जानकि इतस्ततो दृश्यत इव, न चानुकम्पसे' इति च व्याहरति । सीताया विरहं च प्राक्तनविरहस्य रूपान्तरं मन्यते । अतोऽस्य सीताविषयिणी रतिर्नष्टेति वक्तुं न शक्यते । सीताविषयिणीं रतिमुज्जृम्भयितुं छायाङ्के छायामय्याः सीताया उपस्थापनं कविना कृतमिति प्रागवोचाम । सीताविषयिण्यां रतौ नष्टायां सीतया कृतस्पर्शस्थास्य तादृशानन्दानुभवनं नैवोपपद्येत । छयाङ्के च पूर्वानुभूतानां कदलीवनशयनीयशिलातललतागृहादीनां सन्दर्शनं तामिमां रतिं परमुपबृंहयति । छायाङ्के च परस्परं दृढमनुरक्तयोः सीतारामचन्द्रयोः परस्परं गाढानुरागस्य परिचयप्रदानेन उभयो रतिरक्षुण्णा अवर्ततेति सुस्पष्टमेव सहृदयानां वाचकानाम् । छायाङ्के च रामचन्द्रः सीतां स्वरूपतोऽपश्यन्नपि तदीयं स्पर्शमनुभवति, सीता च भर्तुः स्पर्शेनामितमानन्दं लभते अतः सीताविषयिणी रामचन्द्रनिष्ठा रतिर्नष्टेति न कोऽपि वक्तुं साहसीत ।

अतः आमूलचूलं नायिकानायकयोः परस्परमनुरागः अव्याहत एव वर्तते, स चासौ रत्यपरपर्यायोऽनुरागः सजतीयैर्विजातीयैश्च भावैर्न तिरोधीयते, प्रत्युत उपबृंहित एवास्ते । स एवासौ स्थायितामापन्नः शृङ्गाररसात्मना परिणमतीति सम्भोगशृङ्गार एव प्रधानं रस इति प्रतिपादयामः ।

तत्र संयुक्तयोस्तु संयोगो विप्रलम्भो वियुक्तयोरिति शृङ्गारो रसो द्विविधः । उत्तररामचरिते चारम्भे उपसंहारे च नायकयोः संयुक्त-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योर्वर्णनात्सम्भोग शृङ्गारः। छायाङ्के च उभयोरप्युपस्थितयो रामचन्द्रः सीतया कृतस्पर्शोऽपि भागीरथीवरप्रसादाददृश्यरूपां सीतामपश्यन् आत्मानं सीताविरहितं मन्यते। सीता रामचन्द्रं स्पृशन्ती, स्पर्शजनितममितमानन्दमनुभवन्ती, प्रत्यक्षतश्च तं प्रगाढं निध्यायन्त्यपि तेन निर्वासितमात्मानं वियुक्तं मन्यते । एवं सन्निहितयोरपि परस्परं वियुक्तं मन्यमानयोस्तयोः शृङ्गारो विप्रलम्भशृङ्गारो भवति। न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुत इत्युक्तदिशा सोऽयं विप्रलम्भशृङ्गारः सम्भोगशृङ्गारस्य परिपोषको भवति । अत्र उभयोरपि शृङ्गारे सीतारामचन्द्रौ आलम्बनविभावः। तदीय रूपलावण्यादिः पूर्वानुभूता कदलीवनादयश्चोद्दीपनविभावः, ताभ्यामनुभूयमानाः कटाक्षालिङ्गनस्पर्शनभूलुण्ठनमूर्च्छामोहादयश्च व्यापारा अनुभावाः, स्वेदप्रलयरोमाञ्चादयश्च सात्त्विकभावाः, चिन्ताग्लानिदैन्यादयश्च व्यभिचारिभावाः, एवमेभिर्विभावैरनुभावैः सात्त्विकैर्व्यभिचारिभिश्चोपबृंहितः संयुक्तयोः सीतारामचन्द्रयोः परस्परं गाढानुरागरूपो रत्याख्यः स्थायीभावः सम्भोगशृङ्गारात्मना परिणतो मुख्यतया तिष्ठतीति संभोगशृङ्गार एव अङ्गीरस इति निरूपितं भवति । छायाङ्के चोपस्थापितो विप्रलम्भ- शृङ्गारोऽप्यैव संभोगशृङ्गारस्योपबृंहक इति च प्रतिपादितं भवति ।

ये तु करुणविप्रलम्भं नाम पृथगेकं रसं स्वीकुर्वन्ति, स चायं रस एव उत्तररामचरिते प्रधानमिति वदन्ति, तेषामाशयं नैव वेत्तुं प्रभवामः। किमयं रसो नवरसेभ्यः अतिरिक्तः कोऽपि पृथग्रसः, आहोस्वित् करुणशृङ्गारयोः संकररूपः, आहोस्वित् करुणस्य शृङ्गारस्य वा कोऽप्यवान्तरभेद इति निरूपणीयं भवति । नवरसेभ्यः पृथक्तया अस्य स्वीकारे आलङ्कारिकसमयो विरुध्येत। ते हि नवरसरुचिरां भारतीमुपस्तुवन्ति । सर्वात्मना विरुद्धयोः करुणशृङ्गारयोरसयोरेकत्र समावेशः कथं नाम सम्भवतु। विशेषतः उत्तररामचरिते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करुणरसस्य अङ्गतया अंगितया वा अवस्थानं न सम्भवतीति प्रागेव निरूपितम् । करुणरसस्य विप्रलम्भश्रृंगारस्य च परस्परं विरुद्धत्वात् करुणविप्रलम्भश्रृंगारः करुणभेद इति वक्तुं न शक्यते । करुणे हि शोकः स्थायीभावः, विप्रलम्भश्रृंगारे च रतिः स्थायीभावः। शोके सति रतिर्न संम्भवति । यदा च पुनः समागमो भवति, तदा शोकस्योच्छेदात् स्थायित्वं न सम्भवति, रसत्वेन परिणतिस्तु दूरे आस्ताम् । अतोऽसौ करुणस्य भेद इति वक्तुं न शक्यते । यद्यसौ विप्रलम्भश्रृंगारस्य भेद इति स्वींक्रियते, तदा ओमिति ब्रूमः । परन्तु अत्र करुणविप्रलम्भ इति नामनिर्देशे करुणपदं नेष्टविनाशजनित-दुःखकार्यशोकस्थायिभावपरं परन्तु तदितरकारणज दुःखकार्यशोक-परमिति स्वीकरणीयम् । यत्र विप्रलम्भशृंगारे नायिकानायकयो-र्वियोगे शोकेन सहकृता रतिः स्थायीभावः, सोऽयं वियुक्तयोर्नायिका-नायकयोर्विप्रलम्भ औपचारिक करुण पदसहकृतः विप्रलम्भः केवलं करुणविप्रलम्भ इति वा व्यपदिश्यते । विप्रलम्भः पूर्वरागमान-प्रवासशापादिहेतुत्वेन चतुर्धेति आलङ्कारिकसिद्धान्तः । चतुर्थे च भेदे शोकस्य सम्भावितत्वेन तस्य करुणविप्रलम्भत्वेन व्यपदेशः उपपद्यते । इतरभेदत्रयेऽपि शोकस्यावस्थानेऽपि अतिशयितत्वं नास्ति, चतुर्थे चातिशयितशोकस्य सद्भावः सम्भवति । एवं च सीताया विवासने-न जायमानदुःखातिशयात् समुद्भूत–शोकसहकृता सीताविषयिणी रामनिष्ठा रतिरक्षता स्थायित्वमापन्ना करुणविप्रलम्भात्मना परिणता भवतीति तादृशकरुणविप्रलम्भस्यैव करुणरसत्वेन व्यपदेशः सम्भवति । अतएव भगवत्या लोपामुद्रया 'रामस्य करुणो रस' इति निर्देशः कृतः । तथैव तमसयाऽपि सन्निहितयोः परस्परं दृढानुरक्तयोः सीतारामचन्द्रयोर्दुःखातिशयदर्शनेन तज्जनितशोकं प्रत्यक्षीकुर्वन्त्या 'अहो संविधानकम्' इत्युपक्रम्य 'एको रसः करुण एव' ते पद्यमुदीरितम् । अत्रत्य करुणशब्दस्य करुणविप्रलम्भ-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्येवार्थः । स साधं रसः केवलं छायाङ्कमात्रपर्यवसित इत्यपि वक्तव्यं भवति।

'यूनोरेकतरस्मि'न्निति लक्षणं तु कादम्बरीं विषयीकरोति । तत्र तु लोकान्तरगतयोः पुण्डरीकचन्द्रापीडयोरुद्देशेन महाश्वेतायाः कादम्बर्याश्च विमनायमानत्वमिति लक्षणसमन्वयो भवति । उत्तररामचरिते तु विवासितायां सीतायां पातालरूपलोकान्तरगतायामपि छायाङ्के नैकतरस्य रामचन्द्रस्य विमनायमानत्वम्, प्रत्युत उभयोरपि विमनायमानत्वमिति विशेषो वर्तते । विभिन्नलोकगतयोरपि नायिकानायकयोर्घटनाचक्रेण एकलीभूतयोरपि परस्परमात्मानं वियुक्तं मन्यमानयोर्विमनायमानत्वमिति प्रत्यक्षमेव।

एवं चात्र सीतारामचन्द्रयोः परस्परं रतेरक्षुण्णतया अवस्थानात् पुनः समागमात्प्राक् सीतानिष्ठा रामचन्द्रविषयिणी रतिः रसाभासात्मना परिणता शृङ्गारस्याङ्गमिति वादिनः प्रत्याख्याता भवन्ति । अत्र रसाभासस्य प्रसक्तिरेव नास्तीति कुतस्तस्य शृङ्गाराङ्गत्वकल्पनमिति दृढं प्रतिपादयामः।

एवं शृङ्गाररस प्रधाने उत्तररामचरिते तत्र तत्रोदीरितः शोकशब्दो नैव शोकस्थायिभावार्थक इति तस्य स्वशब्देनोक्तिर्नैव दोषावहा भवति । 'रामस्य करुणो रसः' 'एको रसः करुण एव' इत्यादिषु 'करुणरस'पदेन करुणरसस्यानभिधानात् अन्यार्थकत्वेन तस्य प्रयोगोऽपि नैव दोषाय भवति। एवमिव निम्नोद्धृतेषु विभिन्नार्थकत्वेन रसशब्दस्य प्रयोगात् न कमपि दोषमाकलयामः।

(क) अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्-
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(ग) चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः

(घ) संजीवनौषधिरसो नु हृदि निषिक्तः ।

(ङ) उपायानां भावादविरतविनोदव्यतिकरै-
विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः ।

(च) सुहृदिव प्रकटय्य सुखप्रदां
प्रथममेकरसामनुकूलताम् ।।

(छ) वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते

(ज) विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघनः

(झ) गात्रं श्लेषे यदमृतरस स्रोतसा सिञ्चतीव ।

(ञ) क्व तावानानन्दो निरतिशयविश्रम्भबहुलः
क्व वाऽन्योन्यं प्रेम क्व नु च गहनाः कौतुकरसाः

एवमादिषु रसशब्दस्य विभिन्नेष्वर्थेषु कविना प्रयोगः कृतः । यद्यपि 'वीरो रसः किमयमित्युत दर्प एव' 'करुणस्य मूर्तिरथवा शरीरिणी' इत्येतयोः प्रयुक्तौ वीररसकरुणशब्दौ रसाभिधानपरौ, तथापि उपमानतया प्रयुक्ताविति न कमपि दोषमाकलयामः ।

तस्मादुत्तररामचरिते संभोग शृङ्गार एव मुख्यो रस इति 'एक एव भवेदङ्गी वीरः शृंगार एव वेति नाटकलक्षणं सम्यगेवानुसृतं भवति ।

अवसरे चास्मिन् अवशिष्टेषु अष्टसु रसेषु शृंगाररसस्य विरोधिनः करुणभयानकबीभत्सशान्तरसाः कविना न कुत्रापि अवतारिताः । हास्यवीररौद्राद्भुताश्च रसा मुख्यस्य सम्भोगशृंगार-स्यांगतया सन्निवेशिताः । तत्र सौधातकिदाण्डायनसम्बद्धो रसः हास्यरसः । लवचन्द्रकेत्वालम्बना वीररौद्राद्भुताः षष्ठाङ्के विद्याधर-मिथुनालम्बनश्चाद्भुतरसः । (सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

को नाम धर्मः ?

लेखकः—श्रीस्वामी आत्मानन्द मुनिः (पुष्करक्षेत्रम्)

विषयोऽयमतीव गहनः। सम्पूर्णतयाऽस्य विचारो नैव सम्भवपरो भवति। तथापि यथामति अस्य विचारः प्रक्रम्यते।

संसारस्य मूलतया प्रधानतो द्वे वस्तुनी विचारपथमवतरतः— चेतनावान् परमात्मा जडस्वरूपा माया च। सांख्यशास्त्रे इदं द्वयमेव पुरुषः प्रकृतिश्चेति निरूपितमास्ते। चेतनस्वरूपः परमात्मा देशकालयोः सीमाया दूर इति नित्यो निर्विकारः अचलः कूटस्थश्च परिकीर्त्यते। प्रकाशमन्तरेण एष जन्ममरणरूपयोर्विकारयोर्दूरे निर्विकारतयाऽवतिष्ठत इति विकरस्य सत्ता—(Existance) रूपेण विराजते। सम्पूर्णो विकारः अस्यैव सत्तायाः प्रकटीभवति परन्त्वयं सम्पूर्णविकारस्य यत्रकुत्राप्यवस्थितः तस्य साक्षी द्रष्टा च सम्पद्यते। जडरूपा माया (प्रकृतिः) नित्यविकारवती सक्रिया चपला च भवति। परन्त्वस्या न काऽपि सत्ता वर्तते। अतएवैषा जडेत्युच्यते। यद्वस्तु अन्यस्य सत्तायामवतिष्ठते, प्रचलति च, तज्जडमिधीयते यथा प्रस्तरः। प्रस्तरो हि न स्वयं चलति परन्तु पुरुषस्य शक्त्या संचालितो भवति एवमेव माया (प्रकृतिः) स्वयं न प्रचलति परन्तु चेतनस्य सत्तायामेव प्रकटीभवति। अर्थात् चेतनस्य सत्तायामेवास्याः सकलो विकारः प्रवर्तते। चेतनस्य सत्तां विना नास्याः-कोऽपि विकारः संभवति। यथा जलस्य सत्तायामेव तरङ्गाणामुत्पत्ति-प्रलयौ गमनागमनरूपं च नृत्यं भवति। स च सकलोऽपि विकारः जलस्य स्पर्शेन न भवति। स्थूलत एवं वक्तुं शक्यते यत्पुरुषः मूढः, प्रकृतिश्च अन्धा। अत उभावपि स्वतन्त्रतया न किमपि कर्तुं प्रभवतः। परन्तु यदि अन्धायाः स्कन्धयोर्विमूढः पुरुष उपावेश्यते,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदा द्वयोः सम्मिश्रणेण सकलं कार्यं साधयितुं शक्यते । एकमेव चेतनः पुरुषः क्रियाशून्यः, परन्तु प्रकाशस्वरूपः । अचेतना प्रकृतिस्तु प्रकाशशून्या स्वसत्तापरीता विकृतिमती । अतः पूर्वोक्तरीत्या उभयोः संयोगे सकलं कार्यं साधितं भवति । मिलन एव हि प्रकृतिः प्रकाशं सत्तां चोपलभ्य सकलं कार्यं (संसारस्य उत्पत्तिप्रलयौ) साधयितुं प्रभवति । जडा विकृतिमती चेति प्रकृतिः सत्त्वरजस्तमःस्वरूपा त्रिगुणात्मिका चोच्यते । विकृतिमानेव हि सगुणः सक्रियश्च भवतीति नियमः । एतेन निर्विकारश्चेतनः पुरुषो निर्गुण इति प्रतिपादितं भवति । एवं जडचेतनयोः संयोगे सर्वप्रथमतो जीवभावस्योदयो भवति । चेतनस्य धर्मः प्रकृतौ प्रकृतेश्च धर्मश्चेतने इति परस्परमध्यवसीयते । सोऽयमध्यवसाय एव हि प्रकटनापरवर्यायो जीवभावस्योदय इति व्यपदिश्यते । सोऽयमेवोदयश्चिज्जडग्रन्थिरित्यभिधीयते अर्थात् चेतनः सर्वेषां सत्तारूप आत्मस्वरूपश्चेति 'अहं' स्वरूपः । तत्र च नान्यत् किमपि प्रतिभासते । अतोऽसौ 'अहंता' धर्म विशिष्टः । परन्तु निर्विकार इति न कर्ता नापि भोक्ता भवितुमर्हति । एतद्विपरीततया प्रकृतिर्विकृतिमतीति कर्तृत्वभोक्तृत्वधर्मवती भवति, जडत्वाच्च 'नाहंता' विशिष्ठा भवितुमर्हति । एवंरीत्या चेतनस्य पुरुषस्य अहंता प्रकृतौ प्रकृतेश्च कर्तृत्वभोक्तृत्वादिकं च चेतने पुरुषेऽध्यवसीयते । सोऽयमध्यवसाय एव हि चिज्जडग्रन्थेः स्वरूपम् । सैव च परा प्रकृतिरित्युच्यते । सा च संसारं प्रवर्तयति । भगवतः श्रीकृष्णस्य श्रीमुखोदीरितं तदेव प्रतिपादयति ।—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्
जीवभूतां महाबाहो ययेदं धार्यते जगत् । इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अयं चिज्जडग्रन्थिरेव संसारस्य मूलं कारणं भवति सोऽयमात्मनोऽज्ञानवशात् कस्तुरीमृग इव आत्मानं सत्यसुखस्वरूपस्याक्षतं भाण्डागारं गोपायन्नपि आत्मनि सुखमलभमानो बाह्यस्य सुखस्य प्राप्तये समुत्सुको भवति । तत्र च सत्यं सुखमलभमानः बाह्यविषयोपभोगेषु सुखमनुसन्दधाति । तत्र च अज्ञानवशात् कानिचित् सुखरूपाणि कानिचित् दुःखरूपाणि विभावयन् तेषु ग्राह्याग्राह्यबुद्धिं करोति । एवं च कर्मभिरावद्धो भवति । तेषां च कर्मणां संस्कारानाचिनोति । एवं क्रमेण स पापपुण्ययोः कर्ता सम्पद्यते, फलं च तदनुरूपमुपभुङ्क्ते जन्म मरणयोश्च भागी सम्पद्यते । एवमसौ ऊर्णनाभ इव आत्मन उपभोगार्थं स्वयमेव आत्मनः सांसारिकान् भावान् प्रस्तुत्य तैरेव लिप्तो भवति ।

अयं चिज्जडग्रन्थिरेव सर्वेषामपि अनर्थानां मूलम् । अयमेव आत्मनः प्रभावेण अजन्मनो जन्म, अविनाशस्य विनाशं, नित्यानन्दस्य दुःखं, नित्यनिर्मलस्य मलिनतां नित्यमुक्तस्य च सांसरिकभावेषु बन्धनं कल्पयति । अतएवास्य ग्रन्थेर्भेदनमेव मानवस्य कर्तव्यमापतति । एतदर्थमेव मानवस्य जन्मोद्दिष्टम् । इदमेव हि सत्याया समतायाः प्रकृष्टं साधनम् ।

अस्य चिज्जडग्रन्थेर्भेदनं मनुष्यस्य जीवन एव सम्भवति, नतु इतरयोनिषु । अद्यावधि नैतदितरयोनिषु अभवत् नापि भविष्यति । अयमेव वेदानां च डिण्डिमः । अत एव येन व्यवहारेण साक्षात्परम्परया वा (Directly ar indirectly अस्य ग्रन्थेर्भेदनं सम्भवति स एव धर्मः । येन च व्यवहारेण अस्य ग्रन्थेः दृढता समर्थ्यते,स खलु अधर्मः ।

(सावशेषम्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समाप्तिः

लेखक—श्री रवीन्द्रनाथ ठक्कुरः

प्रथमः परिच्छेदः

अपूर्व कृष्णः B.A. परीक्षायामुत्तीर्थ कलिकतातः स्वग्रामं प्रत्यावर्तमानोऽवर्तत।

क्षुद्रा नदी। वर्षागमे प्रायशः शुष्यति। इदानीं श्रावणस्यावसाने जलभरिता, ग्रामस्य प्रान्तदेशं वंशवनस्य च तलं चुम्बति स्म।

बहूनि दिनानि यावत् नितरां वर्षः प्रावर्तत। अद्य तु आकाशो मेघमुक्तः संजातः। आकाशे सूर्यस्य किरणा अभासन्त।

नौकायां समासीनस्य अपूर्वकृष्णस्य हृदयाऽभ्यन्तरस्य यदि कापि प्रतिकृतिरलप्स्यत, तदाऽत्र अदृश्यत—तस्य मनसि नववर्षैः कूलङ्कषा, आलोके उद्भासिता, वात्यया च विकम्प्यमाना काचन सरित् प्रावहत्।

नौका यथावत् तीरमाससाद। नदीतीरतः अपूर्वकृष्णस्य वसतेः प्रासादाग्रभागो वृक्षाणामन्तरालैः समदृश्यत। अपूर्वस्यागमनसम्वादस्त-दीयगृहजनेन न विदितपूर्वः। अतस्तस्य सभाजनार्थं न कोऽपि तीर्थस्थानं समायातः। नाविकस्तस्य स्थगिकामादातुमुद्यत आसीत्। अपूर्व कृष्णस्तु अवधीर्य स्वयं हस्तेन स्थगिकामाददान आनन्दभरितो नौकातस्त्वरितत्वरितमवततार।

अवतीर्ण एव पिच्छिलायां तीरभूमौ स्खलितपदोऽपप्तत्, कर्दमितपरिच्छदश्च समजनि। पतनक्षण एव कुतश्चिदेका सुमधुरा, उच्चकण्ठतरला हासलहरी समुद्वेलिता, आसन्नस्याश्वत्थतरोर्विहङ्गमान् चकितचकितान् अकरोत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपूर्वकृष्णोऽत्यन्तं विलज्जितस्त्वरितत्वरितमात्मानं संवृत्य इतस्ततो दत्तचक्षुरवालोकयत—अवतीर्णायां नौकायां नातिदूरे स्तूपीकृतानां नवीनानां मिष्टकानामुपरि समासीना काचन कन्यका हासवेगेन शतधा विदीर्यमाणेव व्यभाव्यत ।

अपूर्वकृष्णस्तामेनां परिचिकाय । सैषा तस्य प्रतिवेशिन्या वनलताया दुहिता मृण्मयी । पूर्वं महत्या नद्या तीरे तस्या वसतिरवर्तत । वसतौ च कूलङ्कषया महानद्या ग्रासितायां द्वित्रेभ्य एव वत्सरेभ्यः सा ग्राममेतमागम्य वसति ।

पितुरादरणीया कन्येति सा दुर्दमनीयं प्रतापं प्रादर्शयत् । एतदर्थं मृण्मय्या जननी सखीसमाजे भर्तरि अभियोगं कर्तुं नैव व्यस्मार्षीत्, परन्तु पितुरसन्निधानात् कन्याया नेत्रयोरश्रुजलं यथा नोत्पद्येत, तथा अकार्षीन्न येन भर्तुर्मनसि न कोऽपि खेदो जायेत । भर्तुः स्मरन्ती सा तामनुशासितुं नैव प्राभवत् ।

मृण्मयी द्रष्टुं श्यामला । पृष्ठास्तस्याः केशा नातिदीर्घा विलुलिता आसन् । मुखस्य भङ्गि तु साक्षाद् बालकस्येव । विशालयोः कृष्णयोश्चक्षुषोः न लज्जायाः, न भयस्य नापि हावभाव विलासाय काऽपि छाया अदृश्यत । शरीरं दीर्घं सुस्थं सबलं चावर्तत । तस्या वयोऽधिकम् आहोस्वित् स्वल्पमिति कलयितुं न किमपि निर्णायकमवर्तत । साधारणतो दर्शन एतादृशी बालिका एतावत् अविवाहिता तिष्ठतीति पित्रोराक्रोशोऽक्रियत । ग्रामे यदाकदाचित् वैदेशिकस्य व्यवसायिनी नौका तीर्थमवतरतिस्म, तदा ग्रामवासिनो जनास्तामिमां द्रष्टुमुत्सुकाः समवेता भवन्ति स्म, ग्रामवासिनीनांललनानां च मुखेषु नासाग्रपर्यन्तमवगुण्ठनानि पदमादधुः परन्तु मृण्मयी कुतोऽपि उलग्नमेकं शिशुमङ्के कृत्वा विश्लथां चिकुरराजिं पृष्ठे आलोडयन्ती तीर्थं उपस्थिता भवति स्म । व्याधविरहितस्य निरातङ्कस्य देशस्य हरिणशिशुरिव निर्भया सकुतूहला च पण्येषु चक्षुर्व्यापारयन्ती परिणामे समवयसः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सहचरान्, बाल्यत्वन्धूनुपेत्य नवागतानां आचारव्यवहारेषु कामपि विवृतिं ददाति स्म।

अस्माकमपूर्वकृष्ण इतःपूर्वं विरामेषु स्वग्राममागत्य बन्धनविमुक्तामेनां बालिकां त्रिचतुरान् वारानद्राक्षीत् । यथावकाशमवकाशविरहितेऽपि काले अस्या विषये चिन्तामप्यकार्षीन । पृथिव्यां बहूनि मुखानि दृशोः पन्थानमवतरन्ति परन्तु तेषु किमपि मुखं विनाऽऽलापं विना विचारं च द्रागेव मानसस्याभ्यन्तरमवगाहते । नेदं केवलं सौन्दर्यवशात्सम्भवति, परन्तु किमपि गुणान्तरमाकर्षति, तदिदं गुणान्तरं स्वच्छता भवति, यत्किल एकस्य हृदयमावर्जयति। बहुषु मुखेषु मनुष्यस्य प्रकृतिः नैव प्रतिबिम्बिता भवति, यस्मिन् मुखेऽन्तर्निहितं रहस्यं विना बाधां झटित्यवभासते, तदिदं सहस्रेष्वेकं मुखं यदा दृक्पथमवतरति, तदा द्रागेव मनसि दृढमास्थानं भजते । अस्या बालिकाया मुखे लोचनयोश्च काचन दुष्प्रधर्षा नारीप्रकृतिः यूथभ्रष्टा चपला आरण्यमृगीव दृश्यते खेलति च । तादृति प्रकृति चपलं मुखमिदं सकृदालोकितं नैव विस्मरणीयं भवति।

वाचकानामेतत्पुनरुक्तं प्रतीयतां नाम मृण्मय्याः कौतूहलोद्दीपितोऽयं हासरवः यावन्मधुरो भवतु नाम, मन्दभागधेयस्य अपूर्वकृष्णस्य किञ्चिदिव क्लेशदायकः समजनि । स तु त्वरितत्वरितो नाविकस्य करे स्थगिकामाधाय आरक्ताननो द्रुतपदः स्वगृहाभिमुखश्चलितः।

परिवेशस्तु सुमनोहरोऽवर्तत । नद्यास्तीरम्, वृक्षस्य छाया विहगानां काकलिः, प्रभातस्यातपः, विंशतिर्वयः, इष्टकास्तूपं नोल्लेखनीयं भवतु नाम, तदारूढा तु व्यक्तिः, आधारस्य स्तूपस्य कामपि सुषमां वर्धयन्त्यवर्तत। अये एवं मनोरमे दृश्ये प्रथमपदक्षेपमात्रेण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh
सकलमपि कवित्वं प्रहसनं परिणमतीति किमितोऽप्यधिकं अदृष्टस्य दारुणत्वं भवेदिति नियतं विचारणीयं भवति।

द्वितीयः परिच्छेदः

तत्र इष्टकस्तूपशिखरात्प्रवहमानं हासरवमाकर्णयन्नेवापूर्वकृष्णः उत्तरीयात् स्तगिकायाश्च कर्दममापतितं प्रोच्छन्नेव विलीनविग्रहः स्वगृहे उपस्थितः।

आकस्मिकेन सुतस्यागमनेन विधवा माता पुलकिता समजायत। तत्क्षणमेव पयसो दध्नः रोहितमत्स्यय चानुसन्धानाय भृत्याः प्राद्रवन्। प्रतिवेशिगृहेष्वपि कोऽपि कोलाहलः समजायत।

आहारस्यावसाने जननी पुत्रस्याग्रतो विवाहकथामवातारयत्। अपूर्वकृष्णस्तदर्थं सन्नद्धः एवावर्त्तत। प्रस्तावः पूर्वं वहुधा कृत एवास्त। पुत्रस्तु नव्यानां सरणिमनुवर्तमानः B. A. परीक्षायामुत्तीर्णतायाः प्राक् न परिणेष्यामीति निर्बन्धं कुर्वन् न परिणिनाय। इदानीं तु स B. A. परीक्षायां समुत्तीर्णः। जननी तदर्थमपेक्षमाणा अवर्तत। नेदानीमन्यथा कर्तुं शक्यते। अपूर्बकृष्ण उवाच–प्रथमतः कन्यासन्दर्शनमस्तु, परतो विवाहो भविष्यति। जननी प्रत्युवाच–कन्या तु सन्निहितैव, न तदर्थं त्वया मनः खेदयितव्यम्। अपूर्वकृष्णस्तु तामेव चिन्तयन् प्रत्युवाच 'अदृष्ट्वा कन्यां नाहं परिणेतुं प्रभवामि'। जननी नमस्यचिन्तयत्—केयं सृष्ठिबहिर्गता कथा! न कदाचित् श्रुतपूर्वा!! परन्तु सम्मता अभवत्।

तस्यां रात्रौ अपूर्वकृष्णो दीपं निर्वाप्य शय्यामाश्रयत्। निद्रा तु नोपगता। निशीथः समयः, वर्षा अपि अपप्तन्। वर्षाणां शब्दं निशीथस्य च निस्तब्धतां विजित्य कुतोऽपि प्रान्तात् कोऽपि उद्धसितस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मधुरकण्ठस्योच्चतरः सुमधुरो हासरवः विजनविनिद्रशय्यामधिशयानस्य तस्य कर्णौ मुखरीकरोति स्म । निर्बोधं मनस्तु आत्मानमुपसान्त्वयितुं प्रायतत - येन केनाप्युपायेन प्रातःकालीनं तदिदं पदस्खलनं संशोधनीयम् । बालिका तु नावाबुध्यत — 'योऽहमपूर्वकृष्णो बहुविधा विद्या आयत्ता अकरवम्, कलिकतायां बहूनि दिनानि अत्यवाहयम्, दैवात् पिच्छलायां भुवि स्खलितपदो यदि कर्दमितो भवामि, तथापि नोपहास्य उपक्षणीयो ग्रामीणस्तरुणो भवामि।'

अन्येद्युरपूर्वकृष्णः कन्याया दर्शनार्थं गतः। नातिदूरं गन्तव्यमवर्तत । तस्मिनेव ग्रामे तस्या उदवसितम् । सयत्नं किञ्चिदिवाधिकं सुसज्जित आसीत् । अन्तरीयमुत्तरीयं च वर्जयित्वा पट्टवस्त्रस्य परिच्छदं मस्तके च सुवर्तुलामुष्णीषं पादयोश्च सम्यक्तया मसृणीकृते उपानहौ निधाय कौषेयं छत्रं करे आदाय प्रातरेव प्रायात् ।

सम्भाव्यमाने श्वशुरगृहे पदार्पणमात्रेणैव सुमहतः समारोहस्य समादरस्य चोपक्रमः प्रावर्तत । सत्क्रियायामवसितायां यथाकालं काचन कम्पितहृदया कृतमज्जनमार्जनप्रसाधना, सीमन्ते दत्तसिन्दूरा, रक्तचीनांशुकपरिवृता बालिका तस्य पुरत उपानीयत । सा तु नीरवतया मस्तकं जानुनोरुपरि निदधती समासीना अवर्तत । काचन प्रौढा दासी तस्याः साहसोत्पादनाय पृष्ठतोऽतिष्ठत् । कन्याया एकोऽनुजो बालक स्तदीय परिवारेषु नवीनतयाऽनधिकारप्रवेशार्थमुपागतस्यास्य जनस्य उष्णीषं, घटिकायाः शृङ्खलां, नवोद्गतं श्मश्रु च सोत्सुकस्तन्मयतया निरीक्षितुं व्यापृतः । अपूर्वकृष्णः कियत्कालं तूष्णीमाधाय अवशेषे गम्भीरमूर्तिरपृच्छत् – 'किं पठसि त्वम् ?' वसनभूषणावृतात् लज्जास्तूपादस्मात् न किमप्युत्तरं लभ्यमासीत् । द्विस्त्रिः प्रश्नेषु प्रौढाया पृष्ठस्थिताया दास्या उत्साहजनके च करताडने बालिका मृदुना स्वरेण एकेन च निश्वासेन द्रुतमवादीत्–चारुपाठस्य द्वितीयो भागः व्याकरणसारस्य प्रथमो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भागः, भूगोलविवरणम् , पाटीगणितं भारतवर्षस्य चेतिहास इति । एतदवसरे बहिरशान्तगतेः संसूचकः कोऽपि दुर्धर्षः पदशब्दः अश्रूयत । सहसा च कृतधावना पृष्ठे चालुलितान् केशान् धुन्वन्ती मृण्मयी गृहाभ्यन्तरं प्राविशत् । अपूर्वकृष्णे दृक्पातमप्यकुर्वाणा द्रागेव कन्याया अनुजस्य राखालस्य हस्तयोराकृष्टुं प्रवृत्ता । राखालस्तु तदानीं स्वस्य पत्रेक्षणपरिचर्यायामकतान्तमनसा नियुक्त आसीत् , दृढमाकर्षणेऽपि नोदचलत् । दासी तु तस्याः संयतकण्ठस्वरस्य मृदुतामक्षुण्णां व्यवस्यन्ती यथायथं तीव्रस्वरेण तां तिरस्कर्तुं प्रारभत । अपूर्वं कृष्णः सकलमपि गाम्भीर्यं गौरवं च संरक्षन् सोष्णीषेण मस्तकेनाभ्रभेदी समास्त, स्वघटिकायाः शृङ्खलां च परामष्टुं प्रवृत्तः । मृण्मयी बहुधा प्रयतमानापि स्व सहचरं विचालयितुमपारयन्ती, तस्य पृष्ठे चपेटाघातं कृत्वा द्रागेव कन्यायामस्तकतोऽवगुण्ठनमपनीय झंझेव बहिर्गता । दासी त्वन्तस्तव्यमाना तर्जयितुं प्रवृत्ता, राखालश्च भगिन्या मस्तकादवगुण्ठनापसरणेन सकलकलः हसितुं प्रवृत्तः । न स पृष्ठे प्रदत्तं चपेटाघातमन्याय्यममन्यत । एवंभूताश्चपेटाघाताः परस्परमसकृद्दत्ताः सहनीयाः संजाताः । किं बहुना एकदा मृण्मय्याश्चिकुराः स्कन्धावतिक्रम्य पृष्ठस्य मध्यभागं यावल्लम्बमाना आसन् , राखालस्तु कदाचित् हठात्पश्चादुपेत्य कर्तरिकां तस्याः केशेषु व्यापारयति स्म । मृण्मयी तु समधिकं कुपिता तस्य हस्तात्कर्तरिकामाच्छिद्य, तया अवशिष्टान् चिकुरान् सशब्दं निर्दयं विच्छेद । तस्या मसृणमेदुराः केशगुच्छा शाखाच्युता द्राक्षागुच्छा इव भूमौ पेतुः । उभयोरेतादृशी शासनप्रणाली प्रचलन्ती अवर्तत ।

ततः परं सा नीरवा परीक्षासभायामधिककालं स्थातुं न प्राभवत् । पिण्डाकृतिः कन्यका कथमपि दीर्घमाकारमाधाय दास्या धृतविग्रहा अन्तःपुरं प्राविशत् । अपूर्वकृष्णः परमगम्भीरः गुल्फयोरासज्ज्य, उत्थाय बहिरागत्य प्रत्यावर्तितुं समुद्यत आसीत् । तस्य विस्मयाय

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथास्थानं सन्निवेशितं मसृणितं नवीनमुपानद्युगलं ततस्तिरोहितमपश्यत्, कुत्र वा गतमिति बहुधा प्रयतमानोऽपि नैव निश्चेतुमशकत्।

गृहस्थाः सकला अपि जना विषमा विव्रताश्च बभूवुः। अपराधिनि गालिं भर्त्सनां च ववृषुः। बहुधा अनुसन्धायापि अनुपलभ्य अपूर्वकृष्णः अनन्यगतिकः गृहपतेः पुरातनं छिन्नप्रायमुपानद्युगलं पादयोर्दत्वा, पट्टवस्त्रपरिच्छदः सोष्णीषः सुसज्जितश्च कर्दमाक्ते ग्राममार्गे सावधानश्चलितुं प्रवृत्तः।

पुष्करिण्यास्तीरे निर्जन पथप्रान्ते द्राक् एव उच्चकण्ठप्रसूतो मधुरो हासरवः असकृत् उद्वेलितः श्रुतः। सम्भवतः तरुपल्लवान्तरिता कौतुकप्रिया वनदेवता अपूर्वस्य तादृशमसङ्गतं छिन्नप्रायं पुरातनमुपानद्युगलं विलोक्य हठात् दुर्वारं हासं संवरितुमनीशा समजनि।

अपूर्वकृष्णः अप्रतिभः स्तब्धश्च किञ्चित् स्थित्वा यावदितस्ततो निरीक्षितुं प्रवृत्तः, तावन्निविडवनराजितो बहिरागत्य काचन निर्लज्जा अपराधिनी तस्य पुरतस्तदीयं नवीनमुपानद्युगलं निधाय पलयितुमुपाक्राम्यत्। अपूर्वकृष्णः द्रुतं तस्या हस्तौ धृत्वा तां वन्दिनीं चकार।

मृण्मयी इतस्ततो विक्षिप्य हस्तावाच्छिद्य पलायितुं प्रायतत, परंतु न अशक्नुत्। आलुलितचिकुरावृते परिपुष्टे सहास्ये दुष्टे च तस्या मुखे शाखान्तरालच्युताः सूर्यकिरणा पतन्ति स्म।

आतपोज्ज्वलां निर्मलां चपलां च निर्झरिणीम अवनतः कुतुकी पथिकः निविष्टया दृशा तलदेशं यावद्यथा निरीक्षते, तथा अपूर्वकृष्णः गभीरगभीरया दृशा मृण्मय्या ऊर्द्ध्वमुत्क्षिप्तमाननं तडित्तरले च नयने च निरीक्षांचक्रे। ततो धीरधीरो मुष्टिं शिथिलीकृत्य स्वकर्तव्यम-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पूर्णमेव स्थापयन् वान्दिनीमसृजत् । अपूर्वः कोपभरेण यदि तां हस्तयो धृ त्वा अताडयिष्यत् , तर्हि सा सविस्मया नावक्ष्यत् । परन्तु निर्जने पथि तादृशस्य अपरूपस्य गौरवशासनस्य अग्रे ग्रहीतुं नैव सा समर्था समजनि ।

नृत्यन्त्याः प्रकृतेर्नूपुरनिक्कण इव चपलो हासरवः सकलमाकाशं विकम्पयन्नवर्तत, अपूर्वकृष्णस्तु चिन्ताजर्जरितः अत्यन्तं धीर पद-निक्षेप पूर्वकं स्वगृहं प्रत्यावृत्तः ।

तृतीयः परिच्छेदः

अपूर्वकृष्णः सकलमपि दिनं छलं कृत्वा अन्तःपुरे मातुः सकाशं नागमत् । बहिरामन्त्रणमासीत् , तत्र भोजनं कृत्वा परावर्तत । अपूर्वकृष्ण इव कश्चन कृतविद्यो गभीरप्रकृतिको भावुको साधारण्या अशिक्षिताया बालिकायाः सकाशात् आत्मनो लुप्तं गौरवमुद्धतुं स्वस्य च स्वरूपस्य आन्तरिकस्य च माहात्म्यस्य प्रकृतं परिचयं दातुं कुत एतावदुत्कण्ठितो भवेदिति नियतं विचारणीयं भवति । एकस्या ग्रामटिकायाः काचन चपला बालिका तं साधारणं जनं कलयतु नाम, सा यदि क्षणमात्रं तं हासास्पदं विधाय, ततोऽनन्तर-मेव तस्यास्तित्वमपि विस्मृत्य राखालनामकेन केनचिन्निरक्षरेण निर्बोधेन बालकेन समं क्रीडितुं स्वस्य व्यग्रतां प्रकाशयतु नाम, किं तावता तस्य अवहीयते ? किमिति तस्या अग्रतो प्रमाणीकरणीयं यत्स 'विश्वदीप' नामकस्य मासिकपत्रस्य ग्रन्थसमालोचनाकार्यं निर्वहति, तस्य च स्थगिकाया सुवासितसारः, नवीनमुपानद्युगलं, रुविनिकर्पूरं, चित्रविचित्रा लेखककला, सगीतशिक्षापुस्तकं च टिप्पणी पुस्तकसनाथं निशीथस्य गर्भात् उषाया इव प्रकाशस्या-पेक्षायामास्ते । परन्तु मनस उपसान्त्वनं दुष्करम् । अस्याः पल्ली-वासिन्याश्चपलप्रकृतेर्बालिकायाः श्रीमान् B.A.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदवीविभूषितः अपूर्वकृष्णरायः कथमपि पराभवं स्वीकर्तुं न सन्नद्धः ।

सन्ध्यायामन्तःपुरे प्रविशन्तं तं माता अपृच्छत्, 'वत्स, कन्यका कीदृशी दृष्टा ?'

अपूर्वकृष्णः किञ्चिदिव शालीनोऽवादीत् 'मातः, कन्यका दृष्टा नाम, तास्वेकतमा मे रोचते ।'

माता तु विस्मिता प्रत्युवाच—'अयै त्वया कति नाम कन्यका दृष्टाः ?'

परिशेषे इतस्ततश्छलनाप्रदर्शनपूर्वकं प्रकाशितं चकार-यत्प्रतिवेशिन्याः वनलतायाः दुहिता मृण्मयी तस्याभिमता । एवं कृतविद्यस्य पुत्रस्य एतादृशी कन्यका अभिमता !

प्रथमतः अपूर्वोऽत्यन्तं विलज्जित आस्त । परन्तु यदा माता प्रबलामापत्तिं कर्तुं प्रवृत्ता, तस्य लज्जा क्वापि अपगता । स तु दृढमस्तको निवेदयति स्म मृण्मयीमन्तरा नान्यां कन्यां परिणेष्य-तीति । अन्यस्या जडपुत्तलिकाया बालिकायाः कल्पना यथायथा मनस्युदियाय, तया साकं विवाहार्थं वैतृष्ण्यं तथातथा उद्रिक्तं बभूव ।

द्वित्रेषु दिवसेषु उभयोर्मानाभिमानयोः अनिद्रानाहारयो-रावर्तनेऽपि अन्ते अपूर्वकृष्ण एव विजयी समपद्यत । माता तु प्राबोधयत्—मृण्मयी बालिका, तस्या माता उपयुक्तशिक्षादाने असमर्था, विवाहादनन्तरं तस्या हस्ते पतिता न चिरात्परिवर्तेत । क्रमेण च सा विश्वसितुमारभत--मृण्मय्या आननं सुन्दरं भवति । परन्तु यदा तस्या रूक्षा विलुलिताश्च केशाः कल्पनापथमारूढाः, तदा तस्य हृदयं नैराश्यपूर्णं समजनि । तथापि सा मनस्याशां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पोषितवती – दृढं चिकुरान् संयम्य तैलेन आलिप्य प्रसाधनेन तमिमं दोषं निराकर्तुं प्रभवेत् ।

ग्रामवासिनो जना अपूर्वकृष्णस्य तादृशकन्यावरणमपूर्वं मेनिरे। उच्छृङ्खलां मृण्मयीं सर्वेऽप्याद्रियन्तां नाम परन्तु वधूत्वेन स्वीकर्तुं न कोऽप्यकामयत ।

मृण्मय्याः पित्रे ईशानमजुमदाराय तमिममुदन्तं यथाकालमवेदयन् । स तु एकस्य यौथनौकाप्रतिष्ठानस्य लेखकव्यवसायी नदीतीर वर्तिनः एकस्य गुल्मागारस्य कस्मिन्नपि टिणच्छादपिहिते कुटीरे कृतवसतिः नौकानीतवस्तुजातं तुलयन्, भृतिपत्रं च विक्रीण्वन् कालं नयति स्म ।

तस्य मृण्मय्या विवाहप्रसङ्गं श्रुतवतश्चक्षुषो जलधारा प्रसृता। तत्र कियत् दुःखं कियांश्चानन्दोऽवर्तत, परिमातुं न किमपि साधनं दृश्यते ।

कन्याया विवाहावसरे विरामं प्रार्थयमान ईशानः प्रधानाधिकारिणः श्वेताङ्गसाहेवस्य सन्निधिमावदेनपत्रं प्रेषयामास। श्वेताङ्गसाहेवस्तु कारणमिदं नगण्यं मन्यमानो विरामं प्रत्याचख्यौ । अतो दशहरोत्सवावसरे विरामो लभ्येत, तावत्पर्यन्तं विवाहं स्थगयितुं स्वदेशं पत्रं प्राहिणोत् । अपूर्वस्य माता तु 'अस्मिन् मासे मुहूर्ताः शुभाः सन्ति, न विलम्बः कर्तुं शक्यते' इत्युवाच ।

उभयतो विफलप्रार्थनो व्यथितहृदय ईशानः प्रतिवन्धनमकृत्वा पूर्ववत् पण्यवस्तूनां तुलनं भृतिपत्रदानं च विदधानः काल क्षपयितुं प्रवृत्तः ।

ततः परं मृण्मय्या माता पल्लीवामिन्यो वृद्धाश्च मिलित्वा भाविकर्तव्यविषयान् बहुधीपदोष्टं प्रायतन्त ; क्रीडायामासक्ति, द्रुतं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गमनम्, अट्टहासं, बालकैः सह समालापम् आहारविहारादिषु च स्वाच्छन्ध्यं परिहर्तुमुपदिदिशुः, विवाहं विभीषिकारूपेण तस्या अग्रतः प्रतिपादयितुं कृतकार्या बभूवुः। शङ्कितोत्कण्ठितहृदया मृण्मयी मनस्यचिन्तयत् - तस्या यावज्जीवनं कारावासम्, अन्ते च शूलारोपणं ता समादिशन्ति स्म।

सा तु दुष्टा अश्वतरीव शरीरं वक्रीकृत्य पश्चादवनम्य चावोचत् नाहं विवाहं करिष्यामि।

चतुर्थः परिच्छेदः

परन्तु तथापि विवाहः कर्तव्य आपतितः। तदनन्तरं शासनस्यारम्भः समभवत्। एकस्यामेव रात्रौ मृण्मय्याः सकला अपि पृथिवी अपूर्वकृष्णस्य मातुरन्तःपुरे आवद्धा समजायत।

श्वश्रूस्तां संशोधयितुं पवृत्ता। मुखं सुकठोरं विधाय अवोचत् 'पश्य वत्से, त्वमिदानीं नैव शिशुर्भवसि, अस्माकं गृहे नैतादृशी उच्छृङ्खलता सोढुं शक्यते।'

श्वश्रूर्येनाभिप्रायेण तदवचोत्, मृण्मयी तदभिप्रायेण तदर्थं न जग्राह। सा अमन्यत, यद्यस्मिन् गृहे न सोढुं शक्यते, तर्हि तया गृहान्तरं गन्तव्यम्। अपराह्णे सा नादृश्यत। क्व गता, क्व गतेति अनुसन्धानं प्राचलत्। परिशेषे च विश्वासघातको राखालः तां तस्या गोपनीयात् स्थानादाविष्कृत्य अदर्शयत् सा तु बटगुल्मेषु राधाकान्तस्वामिनः परित्यक्तस्य भग्नस्य रथस्यान्तः समासीना अवर्तत।

श्वश्रूदेवी ग्रामवृद्धाश्चान्या तस्या हितैषिण्यो मृण्मयीं कथमुत्पीडयामासुः पठकाः पाठिकाश्च सहजतयोहितुं प्रभवन्ति।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रात्रौ यदा मेघा कलकलेन, स्वनेन साकं वर्षितुमारभन्त, तदा अपूर्वकृष्णः शय्यातो धीरधीरं मृण्मय्या अन्तिकमुपेत्य अग्रतो भूत्वा तस्याः कर्णयोर्मृदुमधुरेण स्वरेण अपृच्छत् मृण्मयि, किं त्वं मां न कामयसे ?

मृण्डमी तु उद्दीप्ता अवोचत् - 'न हिं'। 'न हिं'। नकदाचिदपि अहं त्वां कामयिष्यामि।' तस्या यावान् कोपः, यावांश्च शास्ति-विधानक्रमः, स सर्वोऽपि एकत्रीभूतः वज्रवत्पतन् कृष्णस्योपरि पतितः

अपूर्वकृष्णः क्षुण्ण उवाच - कुतो न कामयिष्यसे ? को वा दोषो मया त्वयि कृतः ? मृण्मयी अवादीत् —'किमिति मामुदूढ-वानसि ?'

अस्यापराधस्य समीचीनमुत्तरं दुर्लभम्। किन्तु अपूर्वकृष्णो मनसि निश्चिकाय, येन केनाप्युपायेन अस्य दुर्बाध्यं मनोऽवश्यं वशमापादनीयमिति

परेद्युः श्वश्रूः तस्यां विद्रोहिभावस्य सर्वाणि लक्षणानि दृष्ट्वा गृहमावध्य कपाटं पिहितवती। सा तु नवीना पिञ्जराबद्धा पक्षिणीव प्रथमत इतस्ततः संचरन्ती कोलाहलं कृतवती। पलायनस्य मार्गमासादयितुमक्षमा निष्फलक्रोधेन शय्यागतमास्तरणं दन्तैः निष्पीड्य खण्डशः कृतवती। भूमौ चाधोमुखी स्थित्वा मनसा-पितरमाह्वयन्ती क्रन्दितुं प्रवृत्ता।

तदानीं धीरधीरं पदक्षेपं कुर्वन् कोऽपि पार्श्वमागत्य उपाविशत्। सस्नेहं तस्या धूलिधूषरितान् चिकुरान् कपोलयोरुपरि आच्छिद्य यथास्थानं प्रापयितुं प्रायतत। मृण्मयी सबलं मस्तकं चालयित्वा तस्य हस्तमपासारयत्। अपूर्वः कर्णान्तिके मुखमानमय्य मृदुना स्वरेणावोचत्—अहं लुक्कायितः कपाटमुद्घाट-यामि। आगच्छ, वयं वृक्षवाटिकां गच्छावः मृण्मयी सबलं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मस्तकमालोड्य रुदन्ती रूढस्वरेणावोचत् 'न हि । अपूर्वकृष्णस्तस्याश्चिबुकमुद्धृत्य मुखमुन्नमयितुं प्रवृत्तोऽवादीत् 'सकृत् पश्य, क एष आगतः । राखालो भूपतितां मृण्मयीं दृष्ट्वा हतबुद्धिरिव द्वारदेशेऽवर्तत । मृण्मयी मुखमनुन्नमयन्त्येव अपूर्वस्य हस्तं न्यरुधत् । अपूर्वकृष्णोऽवदत्—राखालस्त्वया साकं क्रीडितुं समायातः । किं क्रीडितुं गच्छसि ।' सा तु विरक्तिभरिता प्रत्युवाच 'नहि' ।' राखालस्तु समयमननुकूलं मन्यमानः कौशलेन गृहाद्बहिरेत्य पलायमानोऽवर्तत । अपूर्वस्तु तूष्णीमुपाविशत् । मृण्मयी कृतक्रन्दना श्रान्ता निद्रातुं प्रवृत्ता । तदा अपूर्वस्तिमितपदो गृहान्निर्गत्य कपाटं पिधाय निर्गतः ।

ततः परस्मिन्नहनि मृण्मयी पितुः सकाशात्पत्रमेकमलभत । तत्र प्राणप्रतिमाया मृण्मय्या विवाहावसरे उपस्थातुमशक्तः विषण्णो-नवदम्पत्योरान्तरमाशीर्वादं प्राहिणोत् ।

मृण्मयी श्वश्रूसमीपमुपेत्य अवोचत् 'अहं पितुः समीपं गमिष्यामि ।' श्वश्रूरकस्मादेवमसम्भवां प्रार्थनां श्रुत्वा कृतभर्त्सना जगाद—'कुत्र वा पिता वर्तते—न ज्ञायते किं वदसि-पितुः सकाशं गमिष्यामीति ? सृष्टिबहिर्भूता एषा आस्पर्द्धा ! किमप्यनुक्त्वैव प्रातिष्ठत । मृण्मयी स्वगृहं गत्वा द्वारं निरुध्य नितान्तं हतः स्त्री जनो यथा देवतामर्थयते, तथा वक्तुमारभत—'पितः, त्वं मामितो नय, अत्र न कोऽपि मदीयो वर्तते, अत्रावस्थाने नाहं जीवितुं प्रभवामि ।'

गभीरायां रात्रौ स्वामिनि निद्रिते, सा निभृतपदं द्वारमुद्घाट्य गृहाद्बहिर्निर्गता । यद्यपि तदा तदा मेघा अदृश्यन्त, तथापि ज्योत्स्नाधवलितायां रात्रौ पथप्रदर्शनार्थं समधिक आलोकोऽवर्तत । पितुः समीपं गमने केन पथा गन्तव्यं, तत्तस्या नैव गोचरमासीत् । केवलं तस्य मनसि काऽपि धारणा अवर्तत—येन पथा पत्रवाहका धावन्तो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गच्छन्ति, तेन पथा पृथिव्याः सर्वत्र गन्तुं शक्यते। मृण्मयी धावतां पत्रवाहकानां मार्गमनुसरन्ती जगाम । चलन्ती श्रान्तशरीरा अजायत, रात्रिरपि प्रभातप्राया समजनि। वनमध्ये यदा इतस्ततो विचलन्तः द्वित्रा विहङ्गमाः, कोलाहलं कुर्वन्ति स्म, न च ते समयं यथार्थतो निरूपयितुमशक्ताः, तदा मृण्मयी मार्गस्य परिसरे नदीतीरे आपणमिव किमपि विस्तृतं स्थलमागता । ततः केन पथा गन्तव्यमिति यावन्न-निरूपयति, तावत्पत्रवाहकानां 'शम् शम्' शब्दोऽश्रूयत। पत्र भारं स्कन्धे कृत्वा सोदूर्ध्वश्वासं पत्रवाहकः उपस्थितः। मृण्मयी ससम्भ्रमं तदन्तिकमुपगत्य कातरा श्रान्तस्वरेणोवाच 'अहं कुशीगञ्जस्थस्य पितुरन्तिकं यामि । त्वं मां त्वया साकं नेतुमर्हसि' सोऽवदत् कुशीगञ्जः कुत्रेति नाहं जानामि।' एतावदेव अभिधाय तीर्थस्थ नौकाशायिनो नाविकान् प्रबोध्य, नौकामचालयत् । तस्य तु अनुकम्पनार्थं प्रश्नार्थं वा अवकाशो नासीत्।

पश्यन्त्या एव हठात् आपणो मुखरितो जातः। मृण्मयी तीर्थ-मवतीर्य कमपि नाविकमाहूय अवदत्—'मां कुशीगञ्जं प्रापयिष्यसि? नाविकस्योत्तरदानात् प्राक् पार्श्वस्थनौकात एको नाविक एत्यावदत्—मातः, मृण्मयि, ! कथं त्वमत्रासि ? कुतः समायाता ? मृण्मयी सोच्छ्वसितया व्यग्रतया सह अवोचत् अये वनमालिन्, कुशी-गञ्जस्थस्य पितुरन्तिकं गच्छामि । त्वं स्वनौकया मामादाय तत्र गच्छ।' वनमाली तस्या ग्रामस्थो नाविकः । स तु उच्छृङ्खलप्रकृति-मेनां बालिकां सम्यगेव जानातिस्म। सोऽवदत्—' पितुरन्तिकं गच्छसि ? साधु साधु आगच्छ, अहं त्वां तत्र प्रापयामि ।' मृण्मयी नौकामारोहत्।

नाविको नौकामचालयत्। मेघा उदिताः वृष्टिर्मुषलाधारा अपतत् । भाद्रपदमासस्य परिपूर्णायां नद्यां नौका दोदूल्यमाना

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राचलत् । मृण्मय्याः सकलमपि शरीरं निद्रया अभिभूतमजायत । अञ्चलं विकीर्य तदुपरि सा शयितुं प्रवृत्ता । दुरन्तेयं बालिका नदीदोलायां प्रकृत्याः स्नेहेन पालितः श्रान्तः शिशुरिव अकातरं निद्रया विवशीकृता अजायत ।

यदा जागरिता, तदा आत्मानं श्वशुर गृहे खट्वायां शयानमपश्यत् । तां जागरितां विलोक्य दासी तिरस्कर्तुमारभत । दास्याः कण्ठस्वरेण श्वश्रूरागत्य अत्यन्तं कर्कशया गिरा अतिपरुषं जल्पितुं प्रवृत्ता । मृण्मयी विस्फारितनेत्रा केवलं तस्या मुखं पश्यन्त्यतिष्ठत् । यदा तु सा तस्याः पितुः शिक्षादाने कटाक्षं कृतवती, तदा मृण्मयी द्रुततरं पार्श्वगृहं प्रविश्य अभ्यन्तरतः कपाटमर्गलाबद्धं चकार ।

अपूर्वकृष्णस्तु विलज्जितो मातुरन्तिकमुपेत्यावोचत्—'मातः को दोषः ? द्वित्रान् दिवसान् वधूं सकृत् पितुरन्तिकं प्रेषय ।'

माता तु अपूर्वकृष्णं 'न भूतो न भविष्यति' भर्त्सयितुं प्रवृत्ता । अन्ते च विद्यमानासु बहुषु बलिकासु किमित्येतादृशी अस्थिदाहकारिणी दस्युकन्या मनोनीतेति तमसकृत् तर्जयामास ।

पञ्चमः परिच्छेदः

एकदा सकलमपि दिनं बहिर्गाढा वृष्टिः, गृहाभ्यन्तरे च तदनुरूपो दुर्योगः प्राचलत् ।

ततः परस्मिन्नहनि गभीरायां रात्रौ अपूर्वकृष्णः मृण्मयीं निभृतनिभृतं प्रबोध्यावोचत्—मृण्मयि, तव पितुरन्तिकं गमिष्यसि? मृण्मयी सवेगमपूर्वस्य करमाकृष्य चकितचकिता जगाद 'गमिष्यामि ।'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपूर्वकृष्णस्तस्या कर्णयोरुपांशु अवोचत्—'तर्हि आगच्छ। आवां द्वौ मिलितौ निभृतं पलायावहे। अहं तीर्थे नौकां सज्जितां स्थापयित्वा आगमम्।'

कृष्मयी अत्यन्तं कृतज्ञहृदया सकृत् स्वामिनि दृष्टिपातं कृतवती। ततः ससम्भ्रममुत्थाय शाटिकां परिधाय बहिर्यातुं सज्जिता अभवत्। अपूर्वकृष्णो मातुर्दुश्चिन्तापरिहाराय पत्रमेकं तत्र निक्षिप्य तया साकं प्रातिष्ठत।

मृण्मयी तस्यामन्धकारावृतायां रात्रौ निर्जने निस्तब्धे च ग्रामपथे इदं प्रथमतया स्वेच्छया सविश्वस्ता स्वामिनः करं जग्राह। तस्या हृदयस्य आनन्दोद्वेगः तस्याः सुकोमलहस्तस्पर्शयोगेन स्वामिनः शिरासु शिरासु संचलितुं प्रवृत्तः।

नौका तस्यामेव रात्रौ प्राचलत्। अशान्ते हर्षोच्छ्वासे सत्यपि नातिचिरं मृण्मयी निद्रातुं प्रवृत्ता। परस्मिन् दिने का मुक्तिः! को वा आनन्दः! उभयोस्तीरयो र्बहवो ग्रामाः, बहव आपणाः शस्यश्यामलानि क्षेत्राणि, वनानि चादृश्यन्त। उभयोस्तीरयोः बहवो नौका गच्छन्तिस्म, आगच्छन्ति स्म। मृण्मयी प्रत्येकं तुच्छ-विषयेऽपि स्वामिनं सहस्रशः प्रश्नान् पृच्छति स्म। तस्यां नौकायां किमास्ते? ते कुत आगच्छन्ति तस्य प्रदेशस्य नाम किम्? एतादृशा अन्ये च प्रश्ना अपृच्छयन्त। येषामुत्तराणि अपूर्वकृष्णेन कलाशालायाः पाठ्यपुस्तकेषु नाधिगतानि, तस्य कलिकता-निवासस्याभिज्ञतयापि दुर्लभानि। बन्धवः श्रुत्वा विलज्जिता भवन्तु नाम, अपूर्वकृष्णः प्रत्येकं प्रश्नस्य उत्तरमयच्छत्। बहुषु चोत्तरेषु सत्येन साकमुत्तराणां नैव सम्वादोऽवर्तत। यथा तिलस्य नौकाम् अतसीनौरिति, पञ्चवहुणं रामनगरमिति, विचारालयं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राजकुलमिति च निर्देष्टुं न किञ्चिदिव कुण्ठतोऽजायत । एतैश्च भ्रान्तैरपि उत्तरैर्विश्वस्तहृदयायाः प्रश्नकारिण्याः सन्तोषानुभवे न किमपि प्रतिबन्धकमासीत् ।

परस्मिन् दिवसे सन्ध्यायां नौका कुशीगञ्जे उपस्थिता । टिणच्छदे गृहे एकस्मिन् मलीमसे काचप्रदीपे तैलवर्तिं प्रज्वाल्य एकस्याः क्षुद्रायाः पुस्तकाधान्या उपरि चर्मबद्धां बृहतीं पञ्जिकामेकां निधाय रिक्तगात्र ईशानचन्द्र आस्यन्दिकाया उपर्युपविश्य आयव्यय-समीक्षां कुर्वन्नास्त । तदानीं नवीनौ दम्पती गृहमविशताम् । मृण्मयी 'पितः' इति आहूतवती । तस्मिन् गृहे तादृशः कण्ठध्वनिर्नपूर्वं कदाचिद-श्रूयत ।

ईशानचन्द्रस्य चक्षुषोरविरतमश्रु प्रासरत् । स किं करिष्यति, किं वदिष्यतीति चिन्तयन्नपि न किमप्यलभत । तस्य दुहिता जामाता च कस्यापि साम्राज्यस्य युवराजमहिषी युवराजश्चेति तस्य प्रतीतौ, तदुचित सम्मानं सिंहासनं च कथं तादृशे तीर्थे कल्पयितुं शक्नुयामिति एतदेव तस्य दिग्विदिग्ज्ञानहीनायां बुद्धौ नैव निर्णेतुं शक्यमासीत् ।

तत आहारस्य विषयः, सोऽपि चिन्तनीय एव । दरिद्रो लेखक-व्यवसायी स्वहस्तेन सूपमन्नं च पक्त्वा खादति स्म । अद्य तु तादृशे आनन्ददिवसे किं करणीयं किं भोजनीयमिति चिन्ता अजायत । मृण्मयी अवोचत् पितः, त्रयोऽपि मिलित्वा पाकं कुर्म इति । अपूर्व-कृष्णः अस्मिन् प्रस्तावे सातिशयमुत्साहं प्राकाशयत् । गृहमध्ये स्थानाभावः, जनाभावः अन्नाभावश्च । परन्तु क्षुद्रच्छिद्रात् धूपो यथा चतुर्गुणवेगेनोत्तिष्ठति तथा दारिद्र्यस्य संकीर्णात् मुखात् आनन्दः परिपूर्णधारया उद्वेलितोऽजायत ।

एवं त्रीणि दिनान्यतीतानि । उभयोः सन्ध्ययोः बहवो नौकाः पोताश्चागच्छन्ति निर्गच्छन्ति च । सन्ध्यायां नदीतीरमेकान्ततो निर्जनं-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जायते। तदानीं का नाम अबाधा साधीनता! अयोऽपि मिलिताः बहुधा प्रायतन्त, तथापि भ्रमवशादेकमन्यथा कृत्वा पाकोऽक्रियत। पाकान्ते च मृण्मय्या वलयझङ्कारविभूषितेन हस्तेन परिवेषणं, जामातुः श्वशुरस्य च एकत्र आहारः। गृहिणीकार्ये त्रुटिप्रदर्शनपूर्वकं मृण्मयीं प्रति परिहासः, तेन तस्या आनन्दकलहो मौखिकोऽभिमानश्च परमुपभोग्योऽवर्तत। अन्ते अपूर्वकृष्णोऽत्रोचत, नाधिकं स्थातुं शक्यते मृण्मयी किञ्चिदधिकं स्थातुं प्रायतत। ईशानस्तु अलमेतावतेति न्यषेधत्।

प्रस्थानावसरे कन्यकां वक्षसा निपीड्य, तस्याः शिरसि करं निधाय साश्रुगद्गदकण्ठ ईशानः अवोचत्—'मातः, त्वं श्वशुरकुलमुद्योतयन्ती लक्ष्मीर्भव। तथा वर्तस्व यथा न कोऽपि ते कमपि प्रमादं द्रष्टुं प्रभवेत्।'

मृण्मयी कृतरोदनैव स्वामिना सह प्रत्यावर्तत। ईशानस्तु तस्मिन् द्विगुणनिरानन्दमयं संकीर्णं गृहं प्रविश्य दिनानि मासांश्च यथापूर्वं नियमिततया वस्तूनि तुलयितुं व्यापृत आसीत्।

षष्ठः परिच्छेदः

तदिदमपराधियुगलं गृहं प्रत्यावृत्तं दृष्ट्वा जननी अत्यन्तं गभीरभावेनातिष्ठत्। न किमपि वाक्यमुवाच। कतरस्यापि व्यवहारे नैव दोषमारोपयामास येन स तं क्षालयितुं प्रयतेत। अयं नीरवः अभियोगः, निस्तब्धः अभिमानः, लौहभार इव समग्रेऽपि गृहकृत्ये कमपि प्रभावमपातयत्।

कालक्रमेण च सोऽयमभिमानः असहनीयः समजनि। अपूर्वकृष्णो मातरमुपेत्य अवोचत्—'कलाशाला उद्घाटिता। इदानीमहं न्यायविद्यामध्येतुं कलिकातां गच्छामि।'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उदासीनेव माता अवोचत्—'वध्वाः किं चिकीर्षसि ?

अपूर्वकृष्णः अवोचत्—'वधूरत्र तिष्ठतु'

माता अवोचत्—'न हि वत्स, न तया मे प्रयोजनम् , त्वं तां सहैव नय ।' अपूर्वकृष्णः साभिमानमवोचत् 'अस्तु तथा' ।

कलिकतागमनार्थमायोजनं कर्तुं प्रवृत्तः । गमनादर्वाक् रात्रौ शय्यायां मृण्मयीं रुदतीमद्राक्षीत् ।

हठात् तस्य मनस्याघातो जातः ! सविषादमवोचत् — 'मया साकं कलिकतां गन्तुं किं तवेच्छा न भवति ?

मृण्मयी अवोचत्—"नहि" ।

अपूर्वकृष्णोऽपृच्छत् 'किं त्वं मां न कामयसे ?' नास्य प्रश्नस्य किमप्युत्तरमलभत सः । बहुषु स्थलेषु अस्य प्रश्नस्योत्तरमतीव सहजं भवति । परन्तु कदाचित् अनेन साकं मनस्तत्त्व घटितजटिलतायाः संश्रवो दृश्यते, येन बालिकायाः सकाशात् न तदुत्तरमाशास्यते ।

अपूर्वकृष्णोऽवदत्—किं राखालं विहाय गन्तुं तव मनो विषीदसि ?

मृण्मयी विनाऽऽयासमवोचत् — 'एवमेव'

बालके राखाले B. A. परीक्षोत्तीर्णस्य कृतविद्यस्य तरुणस्य सुचिरमतिसूक्ष्मा अत्यन्तं सुतीक्ष्णा च ईर्ष्या उदियाय । अवोचत्— 'बहुकालपर्यन्तं नाहं गृहमागन्तुं शक्नोमि' एतद्विषये मृण्मय्या न किमपि वक्तव्यमासीत् ।

'मन्ये वत्सरद्वयं ततोऽप्यधिकं कालं नागच्छेयम् ।' मृण्मयी अवोचत्—'त्वं प्रत्यावर्तनसमये राखालस्य कृते त्रिमुखीमेकां छूरिकां क्रीत्वा आनय"

अपूर्वकृष्णः शयानात्किञ्चिदिवोत्थाय अवोचत् 'त्वं तर्हि अत्रैव स्थास्यसि ?'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मृण्मयी अवोचत्—'अहं मातुरस्तिकं गत्वा स्थास्यामि ।'

अपूर्वकृष्णः निश्वासं परित्यज्य अवोयत्—'साधु तथाऽस्तु । यावत् त्वं ममागमनाय पत्रं न लिखिष्यसि, तावदहं नागमिष्यामि । मन्ये—अत्यन्तं सन्तुष्यसि ?'

मृण्मयी प्रश्नस्यास्य उत्तरं पुनरुक्तं मन्यमाना निद्रातुं प्रवृत्ता । अपूर्वकृष्णस्य तु निद्रा नायाता । स तु उपधानमूच्चैः कृत्वा तदुपरि आश्रित्य अतिष्ठत् ।

गभीरायां रात्रौ सहसा चन्द्र उदियाय तस्य कराः शय्याया उपरि निपतिताः । तेषामालोकेन मृण्मयीमवालोकयत् । दर्शं दर्शं म मन्यत येन राजकन्या रौप्यशलाकायाः स्पर्शेन केनचिदचेतना संस्थापिता । सकृत् स्वर्णशलाकायाः स्पर्शेन उन्निद्रितैषा बोधयितुं शक्यते, मालाविनिमयश्च सम्भवति । रौप्यस्य शलाका हासाः, स्वर्णसलाका च अश्रुजलम् ।

प्रभाते अपूर्वकृष्णः मृण्मयीं प्रबोध्य अवोचत् 'मृण्मयि, मम प्रयाणवेला आसन्ना, आगच्छ, त्वां तव मातुर्गृहे स्थापयित्वा आगच्छामि ।'

मृण्मयी शय्यां परित्यज्य उदतिष्ठत । अपूर्वकृष्णः तस्याः करौ धृत्वा अवोचत्—'मृण्मयि, अधुना मम काचन प्रार्थना वर्तते । अहं बहुवारान् तव साहाय्यं कृतवानस्मि । अद्य गमन समये तस्य पुरस्कारं दास्यसि ?'

मृण्मयी विस्मितोवाच 'कीदृशं पुरस्कारम् ?' अपूर्वकृष्णोऽवदत्—'त्वं स्वतः प्रवृत्ता सानुरागं मह्यमेकं चुम्बनमर्पय ।'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतदवसरे एकदा अवगुण्ठनवती मृण्मयी म्लानमुखी समागत्य श्वश्रूदेव्याः पादयोः पतित्वा प्रणनाम । श्वश्रूरुपजाताश्रुजला तां वक्षसि गाढं बद्ध्वा आननं विलोक्य विस्मयमभजत् । सा मृण्मयी क्व गता! एवं परिवर्तनं साधारणतः सर्वेषां न सम्भवति । सुमहत् परिवर्तनं समधिकं बलमपेक्षते ।

श्वश्रूरमन्यत-तस्या दोषान् सा एकैकक्रमेण संशोधयिष्यति । परन्तु अन्यएकोऽदृश्यः संशोधनकर्ता कमपि संक्षिप्तमुपायमवलम्ब्य मृण्मयीं नूतनं जन्म पर्यग्राहयत् ।

इदानीं मृण्मयी स्वां श्वश्रूं स्वरूपतो विवेद, श्वश्रूश्च स्वकीयां वधूं परिचिकाय । तरुणा साकं शाखाप्रशाखादीनां मिलनं भवति, तथा सकलमपि गृहकृत्यमखण्डतया सम्मिलितमासीत् ।

येयमेषा गभीरस्निग्धा विशाला च रमणीप्रकृतिः मृण्मय्याः सकलेऽपि शरीरे समग्रे चान्तरात्मनि प्रतिकलं भरितभरिता पदमाधत्त, सा च तस्या मनसि वेदनां जनयितुं प्रारभत ।

प्राथमिके आषाढे श्यामले सजले नवीने मेघे इव तस्या हृदये कोऽपि अश्रुभिर्विच्छुरितः सुमहानभिमान उदियाय । सोऽयमभिमानस्तस्याश्चक्षुषोश्छायामयसुदीर्घपल्लवोपरि अन्यां कामपि गभीरतमां छायां निचिक्षेप सा मनसि चकार 'माहमात्मनमवेदिषं नाम, त्वं किमिति मां न वेदितवान्? किमर्थमहं तदर्थं त्वया नानुशासिता? राक्षस्यहं यदा त्वया साकं कलिकतां गन्तुं नैच्छम् किमिति त्वं मां बलादाकृष्य न नीतवानसि? किमिति त्वया मम वचनं गृहीतम्, मम अनुरोधस्त्वया सम्मानितः, मम चावाध्यता किमिति त्वया सोढा?'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततःपरं यदा अपूर्वं कृष्णः प्रभाते पुष्करिणीतीरे निर्जने पथि तां वन्दिनीं कृत्वा किमपि अनुक्त्वा केवलं तस्या आननमवलोकयन्नवर्तत, सेयं पुष्करिणी, स पन्थाः, तत्तरुतलं, स च प्रभातातपः, सा च हृदयभारावनता, गम्भीरा दृष्टिस्तस्याः स्मृतिपथमुपगता। सा हठात् तस्य सर्वस्याप्ययं ज्ञातुं न प्राभवत्। ततश्च प्रस्थानावसरे यच्चुम्बनमपूर्वं कृष्णस्य अग्रतो भूत्वाऽपि नैवाकरोत्, तदिदमसम्पूर्णं चुम्बनं सम्प्रति मरुमरीचिकाभिमुखो तृषार्तो विहङ्गम इव मुमुर्मुहुस्तमेवातीतमवसरमनुधावति स्म, परन्तु तस्य पिपासा नैव चरितार्था अजायत। इदानीं तदा तदा सा केवलममन्यत - अयं तस्मिन् समये यद्यहमेवमकरिष्यम्, तस्य च प्रश्नस्यैवमुत्तरमदास्यम्, तदा यद्येवदभविष्यदिति।

अपूर्वस्य मनसि क्षोभोऽजायत यन्मृण्मयी तं स्वरूपतो ज्ञातुं न प्राभवत्। मृण्मयी तु अद्य एकान्त उपविश्य चिन्तयितुं प्रवृत्ता। 'स मां कीदृशीं कलयति, कीदृशीं वाऽवबोध्य गतः। अवश्यं स मां दुरन्तां चपलां निर्बोधामविवेकां च बालिकामज्ञासीत्। परिपूर्णया हृदयामृतधारया प्रेमपिपासां चरितार्थयितुं रमणी क्षमेति परिचयं न प्रापत्। अतएव सा अनुदिनं परितापेन लज्जया आत्मनो धिक्कारेण च परमपीड्यत। चुम्बनस्यानुरागस्य च गुणा अपूर्वकृष्णस्य ऽसकृत् परिशोधिताः। एवं किल तस्याः समयोऽतीयाय।

अपूर्वोऽवोचत्—त्वं यदि पत्रं न लिखिष्यसि, अहं नागमिष्यामि गृहम्।' तत्तस्या स्मृति पथमापतितम्। एकदा द्वारं निरुध्य, लिखितुं प्रारभत। अपूर्वेण तस्यै यानि विचित्राणि काकल खण्डानि दत्तानि, तानि आदाय चिन्तयितुं प्रवृत्ता। बहुधा प्रयत्य रेखां विवृत्य अङ्गुलिं मषीमलीमसां कृत्वा किमपि संबोधनमकृत्वा क्षुद्रैर्बृहद्भिश्चाक्षरैः सरलतया अलिखत–किमर्थं त्व-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपूर्वस्य तामद्भुतप्रार्थनां गम्भीरं मुखभावं च दृष्ट्वा हसितुं प्रवृत्ता हासं संवृत्य मुखं व्यादाय चुम्बितुं समुद्यता। समीपमुपसृत्य, अशक्नुवाना उच्चैर्जहास। एवं वारद्वयं वारत्रयं प्रयत्य विफलप्रयत्ना निरस्ता मुखे वस्त्राञ्चलमादाय हसितुं प्रवृत्ता। अपूर्वकृष्णः शासनच्छलेन तस्याः कर्णमूलमुदपीडयत्।

अपूर्वस्य पणस्तु अत्यन्तं कठिनः। दस्युवृत्तिमवलम्ब्य बलादवलुण्ठनं स आत्मावमाननां मन्मते स्म। स देवतेव सगौरवं स्वेच्छाहृतमुपहारमभिलषति स्म, स्वकरेण किमप्याहर्तुं न बहुमेने।

मृण्मयी नाहसत्। तां प्रत्यूषस्य आलोके 'न तेनेन पथा मातुर्गृहे अवस्थाप्य, अपूर्वकृष्णः गृहमागत्य मातरमवोचत्--'बहुधा व्यचिन्तयम्-वधूं यदि मया साकं कलिकतां नेष्यामि, तर्हि मम पठने सुमहानन्तरायो भविष्यति। तत्र न काप्यस्याः सहचरी वर्तते। त्वं तु तामस्मिन्गृहे स्थापयितुं नेच्छसि, ततोऽहं तां तस्यामातुर्गृहएव स्थापयित्वा आगच्छम्।'

सुमहता अभिमानेन सह मातृपुत्रयोः विच्छेदः समजनि।

सप्तमः परिच्छेदः

मातुर्गृहमागत्य मृण्मयी अन्वभवत्—तस्या मनो न कुत्रापि रज्यति। तस्य गृहस्य सकलमपि विपरीतं प्रतीयते स्म। समयो नात्येति। किं कर्तव्यम्, कुत्र गन्तव्यम्, केन सह आलपितव्यमिति विचिन्त्यापि न किमपि आससाद।

मृण्मयी हठात्प्रत्यबुध्यत-समस्ते गृहे सकलेऽपि ग्रामे न कोऽपि जनो वर्तते। मध्याह्ने यथा सूर्योपरागोऽभवत्। कथंचिदपि ज्ञातुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नापारयत् –कुतोऽद्य कलिकृतागमनार्थं प्राणा उत्क्राम्यन्ति, ह्यश्च रात्रौ कुत्रैषा आकाङ्क्षा विलीना आसीत्। जीवनस्य यमशं परिहर्तुं मानसमुद्विग्नमास्त, ततः पूर्वमेव तस्यास्वादः सम्पूर्णतया परिवर्तित आस्त। अद्य वृक्षात् च्युतं पक्वं पत्रमिव तदिदमतीतं वृन्तच्युतं जीवनं स्वेच्छया अनायासेन दूरमुच्छिद्यावपातितमिति।

श्रूयते हि पुरावृत्तेषु यन्निपुणा अस्त्रकारा एवं सुधारं करबालं निर्मान्तिस्म. येन छिन्नं द्विखण्डितमपि शरीरं मानवो नाज्ञासीत्, चलति च शरीरे अर्द्धखण्ड द्वयं विशकलितं भवति स्म। विधातुः करबालमपि तथा सुधारं सूक्ष्मं च। कदा तेन मृण्मय्या बाल्ययौवनयोरन्तराले आघातः कृतः, येन तद् द्वयं विशकलितमपि नाज्ञासीत्, अद्यतु संचरणे बाल्यभागो यौवनभागात् विच्युतः समजनि। मृण्मयी विस्मिता व्यथिता च केवलं पश्यन्ती अवातिष्ठत।

मातृगृहे तस्या स्तदिदं पुरातनं शयनं न शा स्वकीयं कलयां-चकार। तत्र यस्यावस्थानमुपेक्षितं न स सख्या वर्तते। इदानीं हृदयं सर्वात्मना कामयते स्म अन्यदेकमुदवसितम्. अन्यदेकमपवरकम् अन्यदेकं च शयनम्। तदिदं शयनं सा रिक्तमिवामन्यत।

मृण्मयीं ग्रामे वहिरुत्सर्पन्तीं न कोऽपि पश्यति स्म। तस्या उद्धतो हासरवोच न कुत्राप्यश्रूयत। राखाल स्तस्या विभेतिस्म। कीडनकथा मनसि नीदिसाय।

मृण्मयी मातरमुपगम्यावोचत्— मातः, मां श्वशुरगृहे प्रापय। श्वशुरगृहे प्रस्थानकालीनं पुत्रस्य विषण्णं मुखं स्मृतवत्या अपूर्वं कृष्णस्य मातुर्हृदयं विदीर्यमाणमास्त। स तु अभिमानवशादेव वधूं सम्बोध्य नो गृहे स्थापितवानिति तस्य स्नेहो मर्मखभिहतमवर्तत।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मदन्तिकं पत्रं न लिखसि ? कथं त्वं वर्तसे ? त्वं गृहमागच्छ' यत्सर्वं मनसो विवेच्यमभिहितम्, न किञ्चिदवशिष्यते परन्तु मानवं मनसो भावः किञ्चिद्बहुलीकृत्य प्रकाशनीयः। मृण्मयी तदपि जानाति स्म। तदर्थं पुनरपि विचिन्त्य बहुधा आलोच्य तत्र कानिचिद्वाक्यानि योजयित्वा अलिखत्—इदानीं त्वं कुतः मदन्तिकं पत्रं न लिखसि ? लिख। गृहमागच्छ। माता कुशालिनी वर्तते विश्वनाथः सुखमास्ते। अस्माकं कृष्णाया गोः कोऽपि वत्सःअजायत' एतावता लेखः समाप्तिं गतः। तमेतं लेखं कोषे निक्षिप्य प्रत्येकमक्षरेषु आत्मनोऽनुरागं पूरयित्वा अलिखत् श्रीयुक्तबाबु अपूर्वकृष्ण राय इति अनुरागो यावान् भवतु पाङ्क्तिर्न सरला नाप्यक्षराणि विस्पष्टान्यासन्।

पत्रोपरि नाम्नोऽन्यत्किमपि लेखनीयमिति न सा जानाति स्म। कदाचित् पत्रमिदं श्वश्र्वा अन्यया वा दृष्टिपथमवतरेदिति लज्जया तदिदं पत्रं विश्वस्तया दास्या प्राहिणोत्।

वक्तुं नावश्यकम्। पत्रस्य न किमपि फलमुपगतम्। अपूर्वकृष्णो न गृहं प्रत्यावृत्तः।

अष्टमः परिच्छेदः

माता अलक्षयत् विरामो जातः, पुत्रस्तु नायातः। साऽमन्यत—इदानीमपि पुत्रस्तस्यां कोपमावहति।

मृण्मय्यपि निश्चिकाय स्वामी तस्यां विरक्तः। तदा आत्मनो लेखं स्मृत्वा लज्जया अलीयत। स खलु लेखआत्मनः न तुल्य। तत्र न किमपि लिखितम्। मनसो भावो न प्रकटीकृतः। अवश्यं तादृशं लेखं पठित्वा स्वामी तां नितान्तं बालिकां मन्यते। बहुगुणितां चावज्ञामकरोत्। एवं विचिन्त्य सा शरविद्धे अन्त-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रात्मनि अदह्यत । दासीमसकृदपृच्छत्–किं स लेखस्त्वया डाकमञ्जूषायां क्षिप्त इति। दासी सहस्रशस्तां विश्वास्य अवदत् देवि, सोऽयं लेखो मया स्वहस्तेन डाकगतोऽक्रियत ।

परिशेषे अपूर्वकृष्णस्य माता एकदा मृण्मयीमवदत् मातः, अपूर्व एतावत्पर्यन्तं न समागतः। चिन्तयामि—स कलिकतां गत्वा तं दृष्ट्वा आगच्छामि। किं त्वं मया सह गमिष्यसि ?' मृण्मयी सम्मतिसूचकं शिरस आलोडनं चकार। गृहं च समागत्य द्वारं निरुध्य शयनमधिरूढा उपधानं वक्षसि गाढमाश्लिष्य हसन्ती इतस्ततश्च चलन्ती हृदयस्यावेगमुन्मुक्तं चकार। ततो गम्भीरा अजायत, विषण्णा अभवत्, सशङ्का चोत्थाय उपविश्य क्रन्दितुं प्रावर्तत।

अपूर्वकृष्णाय कमपि संवादमदत्वा एते द्वे अनुतप्ते रमण्यौ तस्य प्रसादं भिक्षयितुं कलिकतां प्रति प्रस्थिते। अपूर्वकृष्णस्य माता वध्वा सार्द्धं जामातुर्गृहमुपेत्य अतिष्ठत्।

तस्मिन्नेव दिने अपूर्वकृष्णः पत्रप्राप्तौ निराशः स्वप्रतिज्ञा–मवधीर्य मृण्मय्याः समीपं पत्रं लिखितुमियेष। न किमपि पदं स्फुरति स्म। स्फुरितमपि पदं न मनोमीतमजायत। तादृशेनैकेन पदेन संबोधनीयं येन आत्मनः प्रणयोऽभिमानश्च युगपदभिव्यज्येत न च तादृशं पदमुपलब्धमिति यावद्भाषां निन्दितुमुपाक्राम्यत्, तावदेकं पत्रं भगिनीपति सकाशादलभत। 'माता समागता, शीघ्रमागन्तव्यम् रात्रावत्रैव आहारादिकं करणीयम्, सर्वं कुशलम्। अन्तिम-वाक्येन दत्ताश्वासोऽपि अमङ्गलाशङ्कया विषण्णो जातः। नचिराच्च भगितीपतेर्गृहे उपस्थितः साक्षात्कार एव मातरमवदत्–मातः, सकलं कुशलं खलु ? माताऽवदत्, सर्वं कुशलम्। त्वं विरामे ग्रामं नायातः। अतस्त्वां नेतुं समागताऽस्मि।'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपूर्वकृष्णोऽवदत्–तदर्थमेतावत्कष्टं स्वीकृत्य अत्रागमनं नावश्यकमासीत्, न्यायविद्या दुरधिगमाइत्यादि।

आहारावसरे सहोदरी अपृच्छत्–भ्रातः, किमिति वधूं त्वया साकं नानीतवानसि ?'

भ्राता गम्भीरमूर्त्तिरवोचत्–'न्यायविद्या पठ्यतेइत्यादि।'

भगिनीपतिस्तु विहस्यावोचत्—सर्वमनृतम्। अस्मत्तो भयेन तामानेतुं न साहसं कृतम्।

सहोदरी अवोचत्-भयङ्कर एवेति सत्यम्। बालिका दर्शनेनैव विस्मयेनाभिभूता भवेत्।

एवं हासपरिहासाः प्राचलन्। अपूर्वकृष्णस्तु अन्तरखिद्यत। न किमपि तस्य मनसे अरोचत। तस्य मनसि उदियाय--माता यदा आगच्छति। मृण्मयी इच्छेच्चेदनायासेनगन्तुं शक्नुयात्। मन्ये माता तामानेतुं प्रायतत, सा तु न सम्मता आसीत्। अस्मिन् विषये संकोचवशात् मातरं किमपि प्रष्टुं नाशकत। सकलमपि मानव जीवनं विश्वस्य सृष्टिश्च विप्रतीपा भ्रान्तिपूर्णा चेति अबुध्यत।

आहारान्ते प्रबलवेगेन वायु पुरस्कृता प्रचण्ड वृष्टि रारभत। सहोदरी न्यवेदयत् –'भ्रातः, अद्य रात्रावत्रैव तिष्ठ।'

भ्राता अवदत्–नहि आवासं गच्छेयम्, सुमहत् कार्यमास्ते।

भगिनीपतिरवोचत्–'किं नाम कार्यं रात्रौ तत्र करणीयमास्ते ? अत्र एकरात्रिर्याप्यते चेत्तदर्थं तव न कस्यापि पुरतः कारणं व्याख्येयं भवेत्। का नाम भावना ?'

एवमादरनिर्वन्धै रनुरुद्धः अपूर्वकृष्णः अनिच्छन्नपि तां रात्रिं तत्र स्थातुमङ्गीचक्रे। सहोदरी अवोचत् 'भ्रातः, त्वामहं श्रान्तं क्लान्तं कलयामि। मा विलम्बं कुरु। आगच्छ शयनागारम्।'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपूर्वकृष्णस्यापि सा एव इच्छा । शयने अन्धकारे एकाकी चेदुज्जीवेत् । अन्यैः सहोत्तरप्रत्युत्तरे कर्तुं न तस्मै अरोचत ।

शयनागारं द्वारमासाद्य अपश्यत्–गृहं दीपविरहितमन्धकारावृतम् । भगिनी अवोचत्–'अये ! मन्ये वात्यया दीपो निर्वापितः । एषाऽहं दीपमानयामि ।'

अपूर्वकृष्णोऽवोचत्--न दीपस्यावश्यकता वर्तते । अहं तु रात्रौ विना दीपालोकं स्वपिमि ।

भगिनी प्रतिनिवृत्ता । अपूर्वकृष्णस्तु अन्धकारे सावहितः खट्वाभिमुखं प्रस्थितः । यावत्स्वट्वामारोढुं प्रायतत, तावदेव सहसा वलयनिक्वणेन साकं काचन सुकोमला बाहुवल्लरी तं गाढमावबन्ध अन्यच्च पुष्पपुटसन्निभमधरोष्ठं दस्युरिव समेत्य अविरलमश्रुजलसिक्तैरावेगभरितैश्चुम्बनैस्तं विस्मयप्रकाशनायापि नावकाशं ददौ । अपूर्वः प्रथमतश्चमकितः समजनि । ततश्चावुध्यत बहूनां दिनानामन्ते हासस्य बाधनेनासम्पूर्णा काचन चेष्टा तदा अश्रुजलधारया समाप्ता समपद्यत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारतीयं तपोवनम्

(अनुवृत्तम्)

लेखिका–श्रीमती केतकी देवी अध्यापिका

इयं न खलु कवेः कपोलकल्पना, परन्तु विश्वप्रकृतिषु यदेव सच्चिदानन्दभूतं चैतन्यं पूर्णतया अनुस्यूतम्, तेनैव साकमेतत् निसर्गसिद्धं भावजातं दृढ सवद्धमिति कविना, स्फुटीकृतम्।

अन्यच्चापि दृश्यते। प्रणयिनः स्वजना यथा देशान्तरप्रयाणोन्मुखान् जनान् अनुमोदयितुम् उपायनेन सम्भावयन्ति तथा वनदेवतानुमताः वनस्पतयोऽपि शकुन्तलां प्रीतिनिर्देशभूतालकारससूहैः तोषयामासुः।

तथाहि 'क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं,
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितैः—
दत्तान्याभरणानि नः किशलयच्छायापरिस्पर्द्धिभिः'

पतिगृहगमनवेलायां शकुन्तला यथा आसन्नतपोवनविरहेण विवशहृदयाऽऽसीत्, तपोवनपादपाः पशुपक्षिणश्चापि तथैव शकुन्तलाविप्रयोगशोकं सहिष्णव आसन्। तथाहि मृग्यस्तदा-अर्द्धावलीढदर्भकवला सत्यश्चकिताः स्थिताः, मयूरी च परित्यक्तनर्त्तना, अपसृतपाण्डुपत्रा लतिकाअपि अश्रूणि अमुञ्चन्निव। चक्रवाकः स्वप्रियामनादृत्य निर्णिमेषनयनाभ्यामपश्यत् ताम्।

आश्रमपदपरिहाणावसरे शकुन्तला गुरुजनान् अभ्यर्थयत, सखीद्वयम् समाश्लिष्टवती, तथैव तपोवनाधिदेवताः समुद्दिश्य प्रणनाम। स्वसृसम्मितां व्रततिं समाश्लिष्य च उवाच। 'लदा वहिणि!

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पच्चालिङ्गस्स मं साहामएहिं वाहुहिं । अज्ज पहुदि दूरवट्टिणी क्खु दे भविस्स" इति । उटजपर्यन्तचारिण्या गर्भभारमन्थराया मृग्याः सुखप्रसववृत्तान्तं तदन्तिकम् प्रापयितुं महर्षिकण्वं सा न्यवेदयत् । अपिच कियन्तं गच्छन्ती पन्थानमपश्यत् शकुन्तला तदीय-प्रावारकप्रान्तं समाकर्षन्तं तन्मार्गानिरोधिनं पुत्रकृतकं दीर्घापाङ्गनामानं मृगपोतकं, यम् आबाल्यं श्यामाकमुष्टिप्रदानेन सयत्नं सवर्द्धयामास सा, कुशसूचिविद्धमुखे व्रणविरोपण मिङ्गुदी तैल न्यषिञ्चत् । यथार्थमाह अनसूया यत् आश्रमपदे मृग-मानव-तरु-लतिकादिकोऽपि सुदृढचेताः सुधीरश्च नासीत यः तदानीं-शकुन्तलाविरहेण अभिभूतो नासीदिति । इदं तपोवनं स्थावर-जङ्गमरूप निखिल प्राणिभिः परिपूर्णम् । अत्र मानवानां तदितरेषां च कोऽपि भेदो नास्ति । सर्वाण्येव हि एतानि अन्योऽन्यस्नेहगुणेन ग्रथितानि । स्नेहेषु च एतेषां कियत्यपि कृत्रिमता कठोरता वा लेश-तोऽपि न वर्त्तते ।

रघुवंशेऽपि महाकाव्ये दृश्यते तपोवन सुलभा ईदृशी विशुद्धा प्रीतिः । सायंकाले समित्कुशफलान्याहृत्य तपस्विनः यदा वनान्तरात् प्रत्यावर्त्तन्ते अदृश्यहोमाग्निना ते आश्रमपदेषु प्रत्युद्याताः भवन्ति । ऋषिपत्नीभिः अपत्यनिर्विशेषं पालिता नीवारभागधेयोचिताः मृगाः उटजद्वार रोधिनः वर्त्तन्ते । आश्रमचत्वरैकपार्श्वे आतपशुष्कनीवार-धान्यानि एकत्रीकृतानि । निषण्णाः कतिपये मृगा आरब्धरोमन्थाः । मुनिकन्यका अपि आलवालपूरणादनन्तरं आशु त्यजन्ति पादपमूलं श्रान्तविहगानां जलपानं सुकरं कारयितुम् ।

मृगैः पक्षिभिः साकं सरलमानवाः कीदृशं साहजिकभावं संस्थापयन्ति तदेव आश्रमपदेषु दृश्यते, यद् वर्णने वयमसमर्थाः ।

तापसानां धर्मानुष्ठानेषु नित्यनैमित्तिककार्य्येषु च अमी मुनिजन-स्नेहोपलालिताः पशवः नूनं सहायकाः भवन्ति । कादम्बरी वर्णित जाबाल्याश्रमेष्वपि एतद् दृश्यं नेत्रपथमवतरति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र तिरश्चीना अपि परिचिता वानरा हस्ताकृष्टदण्डेन प्राचीनान्धतापसान् गृहान् प्रवेशयन्ति ततः निष्क्रामयन्ति च। ऋषिभ्योदनार्थं हरिणाः विविध कन्दमूलानि उत्तोलयन्ति स्म। आरण्यगजाः जलपूर्णशुण्डाग्रैः आरोपितशाखानामालवालपूरणे उद्यताः। ऋषिकुमाराः वन्यवराह-दन्तसंलग्नपद्ममूलान्याकर्षयन्ति। उपजातपरिचयैः कलापिभिः तत्र मुनिहोमहुताशनः पक्षपुटपवनेन सन्धुक्ष्यमाणः। इत्यहो मानव पशु पक्षिषु खलु अन्योन्यं निरतिशयाऽनुकम्पा!

भर्तृहरेः वैराग्यशतके वर्णितमस्ति यत् ध्यानपरायणानां योगिनाम् अङ्के निःशङ्कं निषण्णाः पक्षिणः तेषामनन्दाश्रुधारां पिबन्ति—

(धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायताम्।
आनन्दाश्रुजलं पिबन्ति शकुनाः निःशङ्कमङ्केशयाः॥

कण्डूयन्ते जरठहरिणाः स्वाङ्गं सङ्गे मदीये। इति।)

वेदाचारानुशीलनतत्पराः भारतीयाः स्थावरजङ्गमात्मकं जगत् केवलमेकस्मिन् सनातने पूर्णानन्दे चिन्मयेऽवाङ्मानसगोचरे ब्रह्मणि प्रतिष्ठितमिति सततमनुध्यायन्ति। गिरिनदीपादपवल्लीक्षित्यप्तेजोमरुद्व्योमादीनि एतानि अखण्डस्य ब्रह्मणः विराड्रूपतया विद्यमानानि। तदर्थं हि भारताधिवासिनः देवाः, मनुष्याः, पशवः पक्षिणः, कीटाः पतङ्गाः वृक्षाः, व्रततयः गुल्मा औषधयः धातवः ग्रावाणोऽपि ये के अपि वा भवन्तु सर्वे तस्य एकस्य भगवतः सत्तया ज्योतिषा च देदीप्यमानाः चिरं भास्वरा इति प्रकल्पयन्ति। ते सर्वत्र समदर्शिनः सन्तः वैषम्यावगाहिनीं भेदप्रतीतिविषयिणीं बुद्धिं नितरां परित्यजन्ति। तथाहि श्रुतिराह—

"या देवोऽग्नौ योऽप्सु यो विश्वं भुवन माविवेश
य औषधीषु यो वनस्पतिषु तस्मै देवाय नमोनमः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गीताऽप्युनुवदति —

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शन इति ॥

यच्च जङ्गमभूतम्, यदेव स्थावरभूतं यच्च दूरतः निकषा च तिष्ठति, यच्च अन्तः वहिश्च वर्त्तमानं तत् सर्वमेव तदीयरूपमिति, सर्वं हि ब्रह्मात्मकं ब्राह्मणोंऽशभूतम् —एतत् हि तत्वं तत् यत् सर्वत्र तदीयं पूर्णत्वमादाय समतया विद्यते। नाम, रूपम्, अस्ति भाति, प्रियत्वं, चेति आत्मनः पञ्चविधास्ववस्थासु नामरूपाभ्यां भेदप्रतीतावपि सच्चिन्मयत्वेन अयं सर्वव्यापी, सर्वेषां हृदिसन्निविष्टः—एको हि असौ महानात्मा। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यस्मिन् संप्रविशन्तीति तद्ब्रह्म तद्विजिज्ञासस्व इति –सृष्टि स्थिति प्रलयानां निमित्तभूतमुपादान कारणं स एकोऽपि सन् वहुधा विभाति। "आनन्द रूप ममृतं यद्विभातीति" श्रुतिवचनात् सर्वत्र समभावेन स्थितोऽयमानन्दरसात्मकमात्मानमुद्दिश्य श्रुतिराह मुमुक्षून् जनान् सम्बोध्य—

"मा हिंस्यात् सर्वभूतानि" इति।

आत्मैकत्वे प्रतिष्ठिते सति नास्ति कस्यचित् कुतोऽपि भयं वा द्वेषो वा। (तत्र कः शोकः को मोह एकत्वमनुपश्यत इति श्रुतेः अनेन समदृष्टि वलेन तपोवनेषु अपूर्वमिदं दृश्यं सुलभं भवति। व्याघ्रसिंह भल्लूक वृषभ हरिणसर्पादयः सर्वेऽपि मात्सर्यं परित्यज्य एकत्रिताः वेदिमूले निषण्णाः, गुरुशिष्ययोः वेदान्तालोचनं निविष्टचेतसा कर्णयन्तीव। विरोधिनां सत्त्वानामीदृशी प्रीतिः ऐन्द्रजालिकस्य वैद्युतिक यष्टिना न सं भवति, यथा संभवेत् मानवान्तःकरणसंजातविश्वप्रीतिधारया, । पातञ्जलयोगदर्शनेऽप्युक्तं "अहिंसा प्रतिष्ठायां तत् सन्निधौ वैरत्यागः इति। अहिंसा येन महात्मना

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवति प्रतिष्ठिता तस्य सन्निधिमात्रमपि लब्ध्वा इतरेऽपि शत्रुभावं विजहति । उक्तं हि श्रीविष्णुपुराणे तपःसाधनावसरे ध्रुवः न केनापि हिंस्रश्वापदेनाक्रान्तः । व्याघ्रो वा भल्लूको वा सर्वेऽपि चिन्मयचिरसुन्दरज्ञानेन तेनालिङ्गिताः । बौद्ध जातकेषु वयं शृणुमः, अङ्गुलिमालाभिधेयः कश्चिन् दैत्यः भगवतः बुद्धदेवस्य अहिंसाबलेन वशीभूतआसीत् । नवद्वीपचन्द्रः शचीनन्दनः श्री श्री चैतन्यचन्द्रोऽपि आक्रमणोद्यमिनौ 'जगाइ' 'माधाइ' भ्रातरौ अपि स्वकीयप्रेमपाशेन चिरमवध्नात् । महामानवो गान्धिरपि अस्यां हिंसाकलुषितायां कलिकालकलित विंशशताद्व्यामपि नोआखालियात्रायां हिन्दु इस्लामसम्प्रदायेषु ऐक्यभावमस्थापयत् विश्वप्रीतिश्च समसूचयत् ।

श्री दुर्गा सप्तशत्यामपि मेधस आश्रमः प्रशान्त श्वापदाकीर्णं इत्युपवर्ण्णितः । वाल्मिकीये रामायणीये वनकाण्डे अगस्त्याश्रमस्य अनुपमवर्ण्णनमहिंसाभावद्योतकम् ।

"यदा प्रभृति चाक्रान्ता दिगियं पुण्य कर्मणाम्
तदा प्रभृति निर्वैराः प्रशान्ताः रजनीचराः ॥
अयं दीर्घायुषस्तस्य लोके विश्रुत कर्मणः
अगस्त्तस्याश्रमः श्रीमान् विनीतमृग सेवितः ।
नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः
नृशंसः पापवृत्तो वा मुनिरेष तथाविधः ।

सर्ग ११।८३,८६,९०—

न केवलं परिव्राजकाः सन्न्यासिनश्च गृहस्थाअपि अरण्यनिवासं स्पृहयन्ति । सुदुस्त्यजां सुरेप्सितां राज्यलक्ष्मीं त्यक्त्वा धर्मिष्ठो रामचन्द्र आर्य्यवचसा धर्मपत्न्या साकं सहानुजः वनम् अगात् । वनवासः तेषां रामसीतालक्ष्मणानां नासीद् अप्रीतिकरः । तेऽपि तत्रत्यान् ऋषीणामाश्रमान्, तीर्थानि अरण्यानि पर्य्यटन्तः तीर्थयात्रा पुण्यं समचिन्वन् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तररामचरिते प्रथमेऽङ्के अयोध्याराजस्य पट्टमहिषी सीतादेवी वीथिकायामभिलिखितं रामचरितमयं चित्रपटं पश्यन्ती भूयो वनविहरणे भागीरथ्यवगाहने च स्वदोहदमभिव्यञ्जितवती। पाण्डवानां वनवासेऽपि आरण्यवासमाधुर्य्यानुभूतिः सम्यक् उपलक्ष्यते महाभारत बनपर्वणः पाठकाले।

एष हि तपोवनस्य महिमा यत् सर्वेऽपि भारतीयाः प्रकृत्युपासकाः प्रकृतिनिर्भरशीला आसन्। प्राकृतिकपरिवेशं हातुं समर्थाः भारतवासिनः। ग्राम मनुष्याः कृषिकार्यं वृत्तिमवलम्बन्ते आवैदिककालाद्। तस्मात् कारणात् कृषिप्रधानोऽयं देशः ग्रामवहुलश्च। आशास्महे वयं यत् आधुनिकशिल्पवहुलयुगेऽपि तपोवन जीवनस्य समदर्शनं, सारल्यं, विशुद्धा प्रीतिः, निसर्ग प्रीतिश्च भूयोऽपि आविर्भवतु–वयन्तु सर्वे प्रकृतिदेव्याः निसर्गमधुरम् अङ्कमाश्रयामः शान्ति लाभाय विश्वशान्तिस्थापनाय।

ॐ शान्तिः शान्तिः शान्तिः –

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गीतसीतावल्लभम्

(अनुवृत्तम्)

लेखक –श्री शितिकण्ठ कविकृतम्

षष्ठः सर्गः

अथ तं रुचिरकलापं धृतवरचापं वहन् मनस्तापम्
राममिदं पथि रामः परशुधरः कोपितः प्राह ।

गुण्डकिरी रागः

शाम्भवधनुरिति दलितमसारम्
वहसि मनसि बत मानमपारम् । १ ।
एतदरे ! राघव पूरय धन्व हरेः ॥ध्रुवः॥
क्षत्त्रियलयकुलिशादपि मत्तः
पृथग्विभेषि न किमसि विमत्तः ? । २ ।
नृपचय लोहित लोहित धारः
मम किमु नश्रुत एष कुठारः ? । ३ ।
भूधर भेदिनि मयि भुवि वीरः
त्वमसि मतो रघुवंशकरः । ४ ।
वीक्षणमपि तव नृप वध करुणां
दलयति कलयति रुषमपि तरुणम् ५ ।
जनकसुता तव राम विरामं
पश्यतु रतिरिव मृडहतकामम् । ६ ।
अत्रप कलयसि यदि मम नाम
निजमचिरादिह दर्शय धाम । ७ ।
श्री शितिकण्ठ कवेरतिमधुरं
गदितमिदं द्यतु पातकनिकरम् । ८ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विपुलमिदमोघं धन्व धुन्वन् मुरारेः
दशरथसुत शीघ्रं दर्शय स्वीयमोजः ।
सकल बल समेतं दुष्टकर्मा भवन्तं
तदनु मनुजकीटं द्वन्द्वयुद्धे दहेयम् ।।

अङ्गेषु व्यथमान एभिरधिकं श्रीराघवो वाक्शरै-
रादायारिकराद्धनुर्न र हरेस्तल्लीलयाऽपूरयत्
तल्लोकान्निखिलान्निहत्य सशरेणानीय तेजस्ततः
सानन्दं स्वपुरीमवाप जगतीचन्द्रो महेन्द्रोपमः

इति शितिकण्ठ कविकृतौ श्री गीतसीतावल्लभे महाकाव्येऽयोध्यप्रवेशो नाम षष्ठः सर्गः ।

सप्तमः सर्गः

अत्रान्तरे रघुपतेरभिषेककृत्यं
अन्वाहितं सपदि मन्थरया प्रयुक्ता ।
कैकेय्यस कृततनुर्मनुजाधिपस्य
खेदायसा क्षितितले शयनं चकार ।
प्रविशति सरुषि कलत्रे भुत्रमपि गात्रेण रोचिषां पात्रे
दशरथनृपतिः सभयं पटुचटु वचनं प्रियामाह ।

—मालवरागः—

अहह नवनीतमृदुमृदुलशयनोचितम्
वपुरमितधूलिचितममलसुखं नोदितम् ।१।
भूतले किमिह शयनं प्रिये वद सपदि चिन्तितम् ध्रुवः ।
चपल मयि चण्डि मृदु वचनमतिशीतलम् ।
रचय चिरममृतमपि यातु जगतितलम् ।२।
नयन विशिखेन हर मदनशरमुन्नतः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हसितसुधयापि कुरु लेपमसमं ततः ।३।
भवदतुलपदतलवहनगुरुगर्वतः ।
हसतु दिवमिन्दुमुखि भूमिरपि सर्वतः ।४।
अधिवसतु वेश्म कमलाऽद्य कतमस्य ते ।
त्यजतु वचसापि वद कस्य विमतस्य ते ।५।
वसुसदनमेतु वद कस्य रजनीश्वरः ।
भजतु तन्ममाशु वद कस्य स जनीश्वरः ।६।
त्वदभिमतमाशु वद यदपि मदप्रियम ।
तदपि करवाणि मम सत्यमधिकप्रियम ।७।
सरसशितिकण्ठकृविरुचिरयचनादरम् ।
हरतु भवभीतिमिदमनिशभजनादृतम ।८।
तत् किं पीडयसि प्रियं प्रियतमे यच्चिन्तितं तद्वदे-
त्युक्ता साह वरद्वयं वितर मे न्यस्तं पुरा यत्त्वयि ।
भूभर्त्ता भरतोऽस्तु गच्छतु पुरादद्यैव रामो वनम्
पीत्वा वाक्यमिषाद्विषाणि सहसा भेजे विषादं नृपः" ।१।
अथागतं राघवमिन्दुवक्त्रं सुमन्त्रयुक्तं प्रसमीक्ष्य हर्षात्
नृपं च मोहार्णवमध्यमग्नं कैकेयलं निष्ठुरवगुवाच ॥

---वरुण्राग:—

गुरुवचनादरधृतगुरुहर्षः
गुरुजनवत्सलविगलदहर्षः राम
वनमधुना प्रविश विलसतु
तदिव मधुना । ध्रुवः ।
इह भरतो मम भजतु नृपत्वम्—
ऋतवचनं गुरुमत्र सकुरु त्वम् ।२।
सदयो न पीडय गुरुमविगीतम्
वितत यशोहर वितथविभीतम् ।३।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वहुगुणभूपति रतिकटु वचनं,
गदितुमलं खलु ना प्रियवचनम् ।४।
गमनविलम्बनसमुदितशङ्कम् ,
इतरमिवोद्धर पितरमपङ्कम् ।५।
अपि भवदाननवीक्षणसज्जं
नयनयुगं मुकुलयति सलज्जम् ।६।
श्वश्रूरिति तव धार्मिक धात्रि,
कथय कथं रतिमुहह विधात्री ।७।
इति शितिकण्ठकवेरतिमधुरं
द्य तु गदितं भवसीमतिमधुरम् ।८।
विरम राम ! नृपस्वरसाद् वनं विश
विशांपतिमाशु विशोधय
गिरमिमामभिनन्द्य मनिन्दितां,
स्वजननीगृहमेत्य जगाद ताम् ।

—गुर्जरीरागः—

गुरुपदविनतप्रमुदितजनत स्तापसजनसेवितम्
सुरपुररुचिरादविदितमचिरात्फलदल धृतजीवितम् ।
प्रविशामि पुरा जननि वनम्, विधिना धृताधिरघुना । धृवः ।
न भरतजननी मदशुभजननी या सुतशिवमीक्षते ।
हृदपि कदैवं पितुरपि दैवं कारणमिह लक्ष्यते ।२।
नरपतिवरणे भवतु स भरतो भूपतिरपि भावितं
कटुतर वचनं त्वदहित वचनं कृन्तति मम जीवितम् ।३।
ज्वलदघशिखिनं नृपतिमसुखिनं मा वद मयि दूरगे
अतितर परुषां गिरमुदितरुषा धार्मिकधुरि पारगे ।४।
वसुरसवर्षा वधिगतहर्षा चिन्तय मम मङ्गलम्,
विरचय देवाधिपगुरुसेवा मा हर नयनाञ्जलम् ।५।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनरपि गहना त्कृतसुखदहनादागतमिह मां भृशम्
नतमतिधीरै नयनजनीरैः सपदि सेचयाकुशम् ।६।
सकृदपि भरते नृपपदनिरते विरसथ न हि मानसम् ।
कथमपि रघये स्तदनुगनिचयेऽप्यादरि वचसा रसम् ।७।
इति शितिकण्ठेरितमुपकण्ठे सज्जनमनसां पदम ।
रचयतु सततं हरतु च वितत पातकमतितापदम् ।८।

मद्यपान, मांसाशन, चौर्य निरोधः

लेखकः – कौत्सः सोमशर्मा साहित्य विद्याप्रवीणः

अथ कदाचिद्भगवान् बुद्धः स्वशिष्यवर्गेण सार्थवाहै र्धनिकवर्गै-श्चानुगम्यमानः मगधदेशान् प्रति ययौ । तस्य मध्येमार्गं शालवन-मिति महदरण्यं पुरतआसीत् । तन्मध्यादेव गन्तव्यम् तच्च तरुगुल्मा-दिभिर्निबिडतया, क्रूरमृगनिवासतया च मनुष्यसञ्चारायोग्यमासीत् । तन्मध्ये पादचारस्यावकाशोऽपि नासीत् ।

तस्मिन् वने निर्भयं बुद्धे पुरतो गच्छति तमनुसृत्य सार्थवाहा-दयोऽगच्छन् । एवं कियदूरं गच्छतस्तस्य मध्येमार्गमेको महा-सर्पः अभिमुखोऽभवत् । तं दृष्ट्वा, "सर्पराज, वयं भूतदयावन्तः, सदा परहिताभिलाषिणः, निर्वैराः, अजातशत्रवश्च, किमस्माभि-र्भवद्भिधानां प्रयोजनम्, इति मनसा ध्यायन्, अपश्यन्निव अजानन्निव तन्निकटेनैव कियद्दूरं पुरतो जगाम परन्तु स्वशिष्यादीनामपि किमपि नोक्तवान् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततस्तेनैव मार्गेण पश्चाच्छनै श्शनै रागच्छन्तस्सार्थ वाहादयः विस्तृतफणामण्डलं स्वीयफूत्कारेण तरुगुल्मलतादिकं कंपयन्तमिव स्थितं सर्पराजं दृष्ट्वाऽतीवभीताः "वयं मृताःस्मः, स्वीयफूत्कारेण तरुलतादिकं कम्पयन् विस्तृतफणामण्डलोऽयं सर्पराजः अस्मदभि मुखमेवागच्छति । हा हताःस्मः, त्रायस्वास्मान्, इत्युच्चैराचुक्रुशुः । तदाकर्ण्य, प्रत्यावृत्य, सर्पराजमुद्दिश्य भो सुब्रह्मण्य, अस्मत्परिजनोऽयं त्वां दृष्ट्वाऽतीवभीतो भवति । त्वं तावद्दीनबन्धुः, अतस्त्वदीयं पन्थानं त्वमनुसर. अस्मत्पन्थानमस्माकमुत्सृज, साधुजनसंञ्चारयोग्यः खल्वेष पन्थाः इत्यवोचत् । ततस्सर्पराज स्संकुञ्चित फणामण्डलस्तदीयार्थं जानन्निव स्वीयमार्गमनुसृत्य यत्र कुत्रापि ययौ ।

ततस्सुखेन तेषु कियद्दूरं गतेषु चौरमण्डलमेकन्तेषाममिमुखमायातम् । तेचमाहत्मानं दृष्ट्वा प्रशान्तगम्भीराकृतिरेष कोपि महाशय इव दृश्यते । तदेनं विसृज्य गते तस्मिन् सार्थवाहादीन्निगृह्य तदीयं धनवस्तुवाहनादिकं सर्वं हराम इति निश्चित्य कञ्चित्कालं तूष्णीमासन् । स महात्मा तेषां हृद्गतं पूर्वमेव विज्ञाय सस्मितं पूर्वमेव तान् प्रत्येवमवादीत् । "भोः किमालोचयथ,भवदीय-हृद्गताशय भवन्मुखान्येवाविष्कुर्वन्ति, विनैव भवदुक्तीः । भगवान् मानवानां जीवनार्थं विशालां भुवं, फलपुष्प सहितान् तरुगुल्मलतादीन्, विविधा वृत्तीश्च, आदावेव कल्पितवान् । एवं भगवता कृतेऽपि निर्णये अस्मदादीनामेतादृशान्यायाचरणेन, उदरपोषणार्थमेव विधचौर्य्याद्यन्यायकरणं विवेकहीन पशवादिलक्षणमित्योचत् ।

ततश्चौरा स्सविनयमेवमूचुः । आर्य, भवदर्शनेनैवास्माकं शीलपरिवर्तनं जातम्, भवदीयसस्मितालापैः हृद्गतं क्रौर्यमन्तर्हितम् । परन्तु किं कुर्मो वयम्, अस्मदीयाः पूर्वे सर्वेप्येवं विधामेव वृत्तिमवलम्ब्य जीविकां निरवर्तयन् । अस्मात्कमप्येतामेव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
वृत्तिमुपादिशन् पितृपैतामहादिकानारभ्यास्मत्कुलस्यैषैव वृत्तिर्नैनामस्मदीयां वृत्तिं विहाय तामन्यां कामपि वृत्तिं कर्तुं शक्नुमो वयम् गच्छन्तु भवन्तः। गतेषु भवत्सु सार्थवाहादिधनिकवर्गान्निगृह्य तदीयं धनवस्त्रादिकं चोरयिष्याम इत्यवोचन्।

ततस्स भगवान् सार्थवाहादीनाहूय तदीयं धनादिकं गणयित्वा, वसुधान्तरालस्थितात् खनेस्तावद्धनं गृहीत्वा, चौरेभ्यो दत्वा, सार्थवाहादिभिः सुखं जगाम। एवमनेकवारान् भुवी रत्नादिकमप्यानीय चौरेभ्यः अदात्।

तदा चौरास्तदीयं दयाधर्मादि गुणजातं विलोक्य ह्रिया किञ्चिदवाङ्मुखाः परस्परमेवं चिन्तयामासुः। अहो एतस्य दयाधर्मगुणौ लोकातीतौ (असाधारणौ) एतस्य सेवया महत्पुण्यं लभ्यते, अस्मद्गृहं नीत्वा सर्वथाऽस्यातिथ्यं करणीयमिति निश्चित्य तत्समीपं गत्वा, "स्वामिन्, अस्मदातिथ्यमङ्गीकृत्य पतितानुद्धरास्मान्। अस्माकं पुण्यगतीः कल्पयेति सविनयमभ्यर्थनाञ्चक्रुः। तदीय प्रार्थनामङ्गीकृत्य तै स्सह तदीयं गृहमगात्स महात्मा पाकानन्तरं स्वशिष्यैः सह बुद्ध एकस्यां पङ्क्तावुपविष्ट आसीत्। अन्यस्यां च चौरा उपविष्टा आसन्। ततः परिवेषणमभूत्। परिवेषणे च तदीयनित्याभ्यासानुसारेण मदिरासवं मांसादिकं च परिवेषयामासुः। परिवेषणानन्तरं च सर्वं दृष्ट्वा किमेतत्पानीयमिति तानपृच्छत्। ते च आर्य, एष मदिरासवः. एतेन विना अस्माक भोजनं न सम्भवति। विशेषतो भवादृशानामभ्यागतानां सत्कारविषये इत्यूचुः। अपि च एतदस्माकं नित्यपानीयम्। तस्य माधुर्यंचैतादृशमिति वक्तुमशक्यम्। एतानि मांसान्यपि सुवासनयैव तेषामास्वाद्यतां घोषयन्ति। भवादृशानामतिथीनामागमनावसरे इतिअधिकं किमस्माभिः क्रियते इत्यवोचन्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तन् श्रुत्वा, भगवान् भोः सत्यमुक्तं भवद्भिः, प्रतिदिनं भवद्भिर्निषेव्यमानाः युष्मद्भिररचिता एव पदार्थाः भवद्भिः परिवेषिताः। न तत्र दोषः, परन्तु नवीनमेकं मामाहूतवन्त इति विस्मृतं भवद्भिः। लोकैः प्रायः सर्वैरपि नवीनागतबन्धुसमागमे तत्तदभीष्ठानुसारेण परिवेषणं क्रियते। यद्यद्वस्तु नवीनागतबन्धुभ्यो रोचते, तद्यथाशक्ति यत्नपूर्वकं परिकल्प्यते। एवं भवद्भिरपि यद्यन्ममाभीष्टं भवति तत्तन्मम्पादनीयम्, शिशुभिरपि कटुतिक्तादि प्राशने वमनं क्रियते एष मदिरासवः न कदाचिदभ्यस्तपूर्वो मया। एवमेव मांसाशनमपीत्यवोचत्।

तदाकर्ण्य चौराः अभिवादनपूर्वकं सविनयमेवमूचुः। आर्य ! देवैरपि सुरापानं क्रियते। ब्रह्मवंशोद्भवा असुराअपि मांसभक्षणं कुर्वन्ति, कोऽत्रदोषइत्यब्रुवन्। तदा बुद्धः यादृशपदार्थसेवने पानीयपानेच दोषो नास्ति, गुणोपि नास्त्येव, परन्तु यादृशाहारसेवनेन पानीयपानेन च अस्मदीयारोग्यस्य भङ्गः, मनोबुद्धीन्द्रियाणां च चांचल्यं भवति तादृशाहारपानीयादिकं सर्वदा निन्द्यम्। अपि च जीवहिंसां विना न कदाचिदपि लभ्यते खलु मांसं येन केनापि। मांसशब्दार्थस्सम्यगभिज्ञातश्चेद्भवद्भिरपि मांसभक्षणं न कदाचिदपि क्रियेत। श्रूयतां मांस शब्दार्थं कथयामीत्येवमवोचत् "मां स भक्षयते यस्माद्भक्षयिष्याम्यहं च तम् एतन्मांसस्य मांसत्वम्।"एव मार्यैरुक्तम्। अत्र मांसशब्दे मांसः, इति पदद्वयं वर्तते। सः मां यस्माद्भक्षयते। तस्मादहमपि तं भक्षयिष्यामीति तस्यार्थः। तथा हि त्वमस्मिन् जन्मनि यः कश्चन मृगपक्ष्यादिकं हत्वा भक्षयसि, जन्मान्तरे (अन्यस्मिन् जन्मनि) भवान् तद्रूपो (मृगपक्ष्यादिरूपो) भविष्यति-स च मनुष्यरूपतामेत्य त्वां भक्षयिष्यतीति तात्पर्यम्। अतएव लोके प्राणिनस्सर्वे परस्पर सम्बन्धिन इत्युच्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपिच देवानामपि सुरापानमस्तीति यदुक्तं, तत्रापि श्रूयतां देवैः पीतं तु नैतादृशं तत्तु पुष्पमकरंदादिभिः क्रियते। यत्तु राक्षसैः मांसभक्षणं क्रियत इत्युक्तं, तत्रापि, तेनैव हेतुना ब्राह्मणजातावुत्पन्नानामपि तेषां राक्षसत्वव्यवहारः। अतः यादृशाहारभक्षणेन आरोग्यस्य नाशो न भविष्यति, मनोबुद्धींद्रियादीनां चाञ्चल्यादिकञ्च न भविष्यति, तादृशाहार स्सर्वदा सर्वैस्सेव्यः। अपिच ईदृश मदिरासवपानादेव लोके सर्वदा घोरं हत्याचौर्यादिकं भयति, भविष्यति च। मांसमप्येतादृशमेव। नित्यमेतादृशपानीयाहारादिसेवानादेव भवन्तस्सर्वे एतादृशा नीच वृत्तयस्संजाताः। यद्येतादृशम् आहारपानीयादिकं भवद्भिर्नियमेन इतःप्रभृति विसृष्टं भवेत्तदा-हत्याचौर्यादिकमपि स्वत एव निवृत्तं भविष्यति इत्यवोचत्।

तेऽपि बुद्धबोधनात् प्रत्युत्पन्नमतयो भूत्वा, मद्यमांसादिकं परित्यज्य शाकसूपादिभिरन्यं पाकं कृत्वा परिवेषणं चक्रुः। ततः स्वशिष्यैस्सह भोजनं कृत्वा, चित्तशुद्धौ तेषां पञ्चशीलादिकमुपदिदेश। ततः प्रभृति मद्यमांसादि भक्षणं विहाय पञ्चशीलादि बुद्धधर्मानुसारेण शुद्धचित्तवृत्तयः क्रमेण मुक्तिं गतास्सर्वे। ।इति॥

श्रीवेंकटेश्वराष्टकम्

लेखकः–श्रीविश्वनाथ सोमशर्मा, साहित्य विद्याप्रवीणः

श्रीवेङ्कटेशं जगदेकदेवं,
कलौ प्रसिद्धं, कलिदोषनाशम्।
स्वाभीप्सितार्थप्रदमाश्रितानां,
श्रीसप्तगोत्राधिप देवमीडे ।१।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रियो निवासं, श्रितपारिजातं,
श्रीकण्ठमित्रं, सुरसंघसेव्यम्।
धर्मावतारं, धरणीसुरेड्यं,
श्रीवेङ्कटेशं, शरणं प्रपद्ये ।२।

श्री वेङ्कटेश, जगदीश्वर, भूसुरेंद्र—
ब्रह्मेश्वरादि सुरपूजितपादपद्म,
भक्ताननन्यशरणान्, सहसोद्धरास्मान्,
संसारवार्धिपतितान् करुणार्द्रं दृष्ट्या ।३।

श्रीवासुदेव, यदुपुङ्गव, कैटभारे,
गोविंद केशव, मुकुन्द, नृसिंह विष्णो।
श्रीजानकीश, रघुपुङ्गव, रावणारे।
स्वामिन् प्रसीद, मम देहि करावलंबम्।४।

उन्मीलने मीलने च, चक्षुषो दर्शनं विभो
सर्वदा देहि गोविन्द तेन धन्यो भवाम्यहम् ५।

कलौ सुजातान् कलिदोष पूर्णान्
कर्मस्वसक्तान्, कृपणान् दरिद्रान्
भक्तांस्त्वदीयान् परिपालयास्मान्
लोकश्च शोकोपहतं समस्तम्।६।

त्वन्नामस्मरणे रक्ति भक्ति चानुत्तमां त्वयि
सर्वदा देहि गोविन्द तेन तृप्तो भवाम्यहम्।७।

श्री वेङ्कटेश, मधुसूदन, रुक्मिणीश,
वैकुण्ठवास, नरसिंह, हरे, मुरारे।
शेषाद्रिवास, सुजनावन, भक्तपोष
मां, पाहि केशव, सदा करुणार्द्रदृष्ट्या।८।

वेङ्कटेशं जगन्नाथं गोविन्दं पुरुषोत्तमं,
भक्ताभीष्टप्रदं देवं नौमि, श्रीवत्सवक्षसम्।९।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नारदकामराजीयम्

(अनुवृतम्)

लेखकः—श्री श्रद्धाकर सूपकारः M.P. साहित्याचार्यः

माइ गड्! (My god) सर्वमस्माकं जल्पितं निभृतंश्रुतम्!
आकर्णितं कथं नाम ? किमदृश्यो रहःस्थितः ?
न गतं बाल्यचापल्यं नो लज्जा ! किं प्रजल्पसि ?
किं मे शरीरे बाणांस्त्वं व्यापारयितुमिच्छसि ?
किं नारदमुखादेषा 'आइडिआ' (Idea) समागता ?
किमप्रेलस्य मासस्य प्रथमो दिवसो न हि ?
धूर्तानां चक्रवर्ती त्वं, नारदः कलहप्रियः
किमावां क्षेप्तुमिच्छा वां ? कौतुकं चैव पश्यथः ?
वयं दन्दह्यमानाःस्मो युवां मोदेन पश्यतम् !
अस्माकं गृहगाथेयं ! किमेषा विपुलीकृता ?
रङ्गो यदिकलङ्काय ? कीदृशं वां भवेद्यशः ?
(दूरभाषणयन्त्रं यथायथं स्थापयन्ती कराभ्यां
शिर आहन्ति, अन्याश्च देव्यस्तामनुगच्छन्ति ।)

(यवनिका पतति)

अकसितं प्रथमं दृश्यम्

—०—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यान्तरम्

ततः परो दिवसः। देवसभा प्रचलति। मध्ये सिंहासनद्वयं रिक्तमास्ते। उभयोः पार्श्वयोर्बहूनि आसनानि। तेषु सूर्य-चन्द्रयमाग्निवरुणादय उपविष्टाः। सभामध्ये उर्वशीचित्ररथयोः-र्द्वैतनृत्यं प्रवर्तते। इन्द्रो मुरजं वादयति। सर्वेषां मुखेषु विषादस्य अन्यमनस्कतायाश्च छाया। नृत्यमवसितम्। सूर्य इतस्ततो विचरन् विभ्रान्तः समजनि। तस्य मस्तकस्थ किरीटादालोकः प्रसरति स्म।

सूर्यः—किमियं कामराजस्य नारदस्थोत योजना ?
किमद्य प्रभृति- स्वर्गे नारीराज्यं चलिष्यति ?
किं देवाः सकलाः स्वर्गे क्लीवत्वं समुपागताः ?
ज्येष्ठोऽहं देववृन्देषु, तेजस्वी तपनस्तथा।
इन्द्रादिभ्योऽधिको विश्वे जीवये प्राणिनः समान्।
स्वामित्वं स्वर्गराज्यस्य न्यायतो मम युज्यते।
कुबेरोऽप्याहरच्चैतत् शचीदेवीप्रसादतः।
रामचन्द्रो नृपालः क्व क्व च नापित रामकः !
वज्रधारी महेन्द्रः क्व ? क्व शचीबिविलम्पटः !
कुबेरः कुत्सितो रूपे प्रकृत्या कृपणः परम्।
अवृणोत्तं शची देवी मायामोहवशीकृता
तेनायं स्वर्गराज्यस्य कुबेरोऽधीश्वरो भवेत् ?
धनदेन च दत्तः स्यादुत्कोचः कार्यसिद्धये।
तेनास्य देवलोकस्य का वा हानिर्न सम्भवेत्।
न चेदं न्याय्यमाभाति परिवर्तनमिष्यते।
पूर्वं हस्ती सुवर्णस्य कलसं यस्य मस्तके
न्यधात् सोऽधिपतिः सर्वैः स्वीकृतः समवर्तत।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गणतन्त्रयुगे चास्मिन् सा प्रथा विलयं गता,
राजा निर्वाच्यतेऽद्यत्वे लोकानामधिकैर्मतैः ।
अभविष्यन्निर्विरोधं तज्जयः सर्वसम्मतः ।
नारदकामराजीय योजनायाः फलेन हि ।
वृत्तमेतन्न मन्येऽहं साधु मन्ये कथंचन ।
तस्माद्देवगणैः कार्यो विद्रोहो नान्यथा गतिः ।
मतैः संगृहीतैरन्यं देवराजं विधेमहि ।।
देवराज पदप्रार्थी बुभूषामि यतोऽधुना
देवपुर्यां समैर्देवैर्मान्यो गण्यो भवाम्यहम् ।।
वरुणाग्नीन्द्रचन्द्राद्या देवा शृणुत मे वचः ।
परिस्थितिं समालोच्य विदधीत प्रतिक्रियाम् ।

इन्द्रः – किं कर्तव्यविमूढोऽहं दृष्ट्वा प्रहसनं नवम्
कुवेरोऽधिपतिर्जातः, शचीदेवीप्रसादतः !
न कुवेरं सुराः सर्वे कामयन्ते पतिं हृदा ।
त्वं चेत्प्रार्थी समे देवा त्वामेव वृणुयुर्ध्रुवम् ।।
परं पश्य कियत्कालं कुवेरस्यानुशासनम् ।
अयोग्यता प्रकाश्या चेत्, स स्वयं विरतो भवेत् ।
तव पक्षे भवेत्सर्वमनुकूलं न संशयः ।

(एतदवसरे शचीदेवी कुवेरश्च प्रविश्य मध्येस्थितं सिंहासनद्वयमधिरोहतः । पुनरपि उर्वशीचित्ररथयोः द्वैतनृत्यं प्रवर्तते । परन्तु नृत्ये न कस्यापि मनो लग्नम् । सर्वेऽपि विषण्णा अधोमुखाश्च स्थिताः)

कुवेरः (नृत्यावसाने)
चित्रगुप्त, नियुक्ता या रम्भाद्या नृत्यकर्मणि ।
कियद्वा वेतनं ताभ्यः प्रतिमासं प्रदीयते ?
कियान्व्ययो भवत्यस्मिन्, नृत्यकार्ये, प्रकाशय ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नृत्ये गीते तथा सोमे न रागो मम वर्तते ॥

चित्रगुप्तः—नवनतति लक्षाणां मुद्राणां दीव्रते भृतिः ।
एकलक्षोऽधिकस्तासां परिच्छेदप्रकल्पने ॥
मार्दङ्गिकास्तथा ये च वैणिकाद्याः कलाकराः
त्रिंशल्लक्षमिता मुद्राः प्रतिमासं भजन्ति ते ॥
ताम्बूलसिगरेड् वीडि पन्नीरादिप्रसाधने
दशलक्षमिता मुद्रा वीयन्ते प्रतिमासकम् ।
तदा तदा नियुक्तानां शिल्पिनां वेतनं तथा ।
दशलक्षमितं नाभ, संहृत्य प्रतिमासकम्
सार्द्धकोटिमिता मुद्रा वीयन्ते नृत्यकर्मणि ।

कुवेरः– सार्द्धककोटिर्मासस्य ! वत्सरस्य च कोटयः
अष्टादश च वीयन्ते केवले नृत्यकर्मणि !
धिग् धिग् देवगणान् सर्वान् तावता हि धनेन वै
कार्खाना सोमसम्वद्धा परिजातस्य फेक्टरी ।
'टेरलिन्' कारखाना च पञ्चवार्षिक योजनाम्
प्रकल्प्य स्थापनीया स्यात् । तथा शतसहस्रशः
पुष्पकाख्यविमानानि प्रस्तोष्यामः समन्ततः ।
एकेन वज्रपातेन लक्षबोल्ट क्षयो भवेत्,
सूर्यस्य च दिवारात्रौ तेजसोऽपचयो वृथा ।
अयुतार्वमिता सूर्यतापकेलरी प्रत्यहम्
वृथाऽपचीयते नाम, तस्याः साधूपयोगतः ।
सहस्रं कारखानाः स्युश्चालिता, नात्र संशयः ।
तदाऽलसः सुधर्मायां न कोऽपि स्थातुमर्हति ।
प्रत्येकं देव देवीनां कृते पुष्पकमेककम् ।
सोमरसस्य घट्येका पानार्थममृतस्य च
आहारार्थं कलस्येका व्यवस्थीयेत प्रत्यहम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथापि वित्तमुद्‌वृत्तमवशिष्येत चाधिकम् ॥
मानवृद्धिमहं कांक्षे जीवनस्य सुरालये ।
न कोऽप्यत्रावतिष्ठेत क्षुत् पिपासार्तिपीडितः ॥

शची—एतावता देवलोके नवीनं संविधानकम्
प्रवर्तितं यथा देवराजस्त्वं हि महामतिः ।
जीवनमानदण्डो हि पृथिव्यामधिको यतः
तत्रत्या रसिकाः सर्वे, न कोऽपि तत्र वाञ्छति
आगन्तुं नीरसं स्वर्गं, स्वर्गात्पृथ्वी विशिष्यते ।
नरकं च वरं स्वर्गात् प्रगतिर्नात्र विद्यते ।
न काऽपि योजना ह्यत्र कल्पितोन्नतिहेतवे ।
नवीना योजना सा हि प्रवृत्ता चेद्‌यथाविधि
स्वर्गोऽयं लोभनीयः स्यादाहारादिषु सर्वथा ।
ततो नृत्ये तथा रङ्गे नैव सक्ता भवेम हि ॥

कुबेरः—तदर्थं श्रूयतां देवैर्घोषणा मे प्रकल्पिता ।
आदित्यतेजसो ह्रासः सर्वादौ परिकल्पितः ।
स त्वं स्वतेजसो लक्षाद्भागमेकं गृहाण वै ।
रोहिण्या च समं रात्रौ विहर म्लानदीधितिः ।
रोहिण्या चेप्सितं चैतन् निर्देशो नारदस्य च ।
विश्रामं भज भो सूर्य, दीप्तिं म्लानां प्रकल्पय ।
तव त्यागेन स्वर्गोऽयं समृद्धः सम्भविष्यति ।
तव तेजोऽवशेषैः स्युरसंख्या यन्त्रणालयाः ।
नवीनानि च यन्त्राणि सुबहूनि लभेमहि ॥

सूर्यः—किन्तु सुरपते, किञ्चिद् वक्तव्यमवधारय ।

कुबेरः—(अवधीर्य)
न श्रोतुमभिवाञ्छामि, तेजसोऽपचयस्तव
अभिधातुं विषीदामि, बाधते मां निरन्तरम्
निष्पत्तिस्तु कृता नाम, नात्र कार्या विचारणा ॥

यमः—(उत्तेजितः) किन्तु-Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुवेरः—(अवधीर्य)

त्वद्विषये प्राप्ता अभियोगा हि दारुणाः
नरके च न संख्यातुं शक्यन्ते ते, कुतो वद ।
कारागारस्य संस्कारो मर्त्ये हि बहुधा कृतः ।
न तत्र दृश्यते कोऽपि विप्लवो नापि यातना ।
चैरास्तथा ग्रन्थिभिदो धातुकाश्च प्रतारकाः ।
सोल्लासं तत्र वर्तन्ते साम्प्रतं विगतक्लमाः ।।
पलान्नभोजनं स्वेच्छाविहारोनाट्यदर्शनम्
रेडियोत्थित संगीतं सदा तेषां विनोदने ।
नरकं ते समागत्य भुञ्जते बहु यातनाः
अग्निजाः शूलजाश्चैव तथा कामगता अपि
अङ्गच्छेदनजा रक्तसृतिर्हि बाधतेतराम् ।।
विभीषिकाः प्रदर्श्यन्ते मानसोद्वेजिकास्त्विह ।
न साधु कलये ह्येतत् निष्काषय ततः परम् ।
दण्डं शारीरिकं चास्मात्, सौकर्यं च प्रकल्पय ।।

यमः—श्रूयतां देवराजेन निष्कृतिं मे प्रकल्पय ।
निवेदये धर्मराजः सकलं विषयं त्वयि ।
अवस्था मर्त्यलोकस्य सर्वथा भिद्यते प्रभो ।
तत्रत्या हि जनाः सर्वे भेदभावविवर्जिताः ।
चोरस्य च सतो मध्ये न कोऽपि भेद ईक्ष्यते ।
मन्त्रिणो हि पदं लभ्यं मतैस्तत्र समो जनः
अन्ततो मासमेकं हि करगारे वसेदिति ।
देशप्रियं तथा चौरं सज्जनं वापि दुर्जनम् ।
काराध्यक्षो न शक्नोति विवेक्तुं तेन तत्र सः ।
सकलानेकरुपेण चक्षुषा परिपश्यति
आकलय्य समान् भाविमन्त्रिणः स समाहितः ।
सम्भावयति तान् सर्वान्, न च दण्डं प्रयच्छति ।
अत्र तु लभते पापी दण्डं स्वाकृतकर्मणः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न चास्ति नियमः कश्चिद् देवराजपदाप्तये
अन्ततो नरके वासो मासमेकं प्रकल्प्यते ।
कुम्भीपाकं पुरस्कृत्य निरया रौरवादयः ।
एते सर्वे प्रदीयन्ते प्रायश्चित्ततया बुधैः ।
मद्यपो लम्पटश्चैव रौरवे परिषीदति ।

कुवेरः – मद्यपानं मर्त्यलोके पापत्वेन विगण्यते
सोमपानं कुतः स्वर्गे न पापं परिचक्षते ?
कुतो वा स्वर्गवास्तव्यो विहृत्य बहुभिः समम् ।
अप्सरोभिर्निरातङ्कं लम्पटो न भवेदिह ?

यमः – दुष्कृतेऽनुष्ठिते स्वर्गे पुण्यस्यापचयो भवेत् ।
क्षीणपुण्यः स्वर्गलोकाद्विच्युतो भवति ध्रुवम् ।
किं तावता विचारेण यममन्यं प्रकल्पय ।
नरकस्याधिकारं च तस्मै धेहि, विमुञ्च माम्
नेच्छामि यमरूपेण स्थातुं क्षणमपि ध्रुवम् ।।

(प्रतिष्ठते)

कुवेरः – चित्रगुप्त, गृहाणास्य यमस्य सकलं भरम् ।
यमस्य गर्वः खर्वोऽस्तु सभाभङ्गस्तु साम्प्रतम् ।

(शच्या सह सिंहासनादुत्थाय प्रस्थितः)

सूर्यः – धन्योऽसि यम, धन्योऽसि समीचीनं त्वया कृतम् ।
कीदृशो देवलोकोऽयं प्रगासीदधुना पुनः
कीदृशः कश्मलो जातः, सुराः सक्तन् निशम्यताम् ।
संकोचामि यदि स्वीयान् पावनान् किरणान् मम
मध्याह्नेऽपि दिवा चौराः प्रबलाः स्युर्न संशयः ।।
पशवः पक्षिणश्चापि नरा नार्यश्च जङ्गमाः
स्थावराश्च प्रकुर्वन्ति करैर्मे प्राणधारणम् ।
सदा रात्रिर्भवेत्सृष्टौ, प्रलयः सम्भवेन्ननु ।।
कुवेरो विपुलानर्थान् संचेष्यति न संशयः ।
कोऽर्थः सेत्स्यति नष्टायां सृष्टौ वा किं प्रयोजनम् ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यन्त्रालयैः ? कथं नाम जीवमानं समेधताम् ?
नष्टेषु सर्वजीवेषु कुवेरः परितुष्यति
लभते चामितानर्थान्, स्वार्थः सेत्स्यति सर्वथा।
आदेशो यमलोके च धर्षितस्ततप्रभावतः।
पापिष्ठेभ्योऽधमेभ्योऽपि न च दण्डः प्रदीयते।
देशोऽयं सर्वथा सन्न., न च पुण्यार्जने स्पृहा।
न कदापि प्रजायेत, स्वर्गेण नरकं समम्
मद्यपानं लम्पटत्वं चौर्यं च सन्धिभेदनम्।
कुवेरस्य हि राज्येऽस्मिन् प्रवलं सम्भविष्यति॥
नारदस्य प्रभावेण शचीदेव्याः प्रसादतः।
कुवेरस्य हि साम्राज्यं विना बाधां विना श्रमम्।
स्वैरिणी क्षमता तेन प्रसारं याति सर्वतः
मद्यं सोमरसैः सार्द्धं प्रसरिष्यन्ति सर्वतः।।
कुवेरस्य विरोधे चेदविश्वास प्रकल्पना
नचिरात्पारिता भूयात्, तदा स्वर्गस्य दुर्गतिः
रोद्धुं शक्या भवेन्नाम न चोन्सन्ना भवेम हि॥
नरकस्य च स्वर्गस्य मध्ये च नान्तरं भवेत्
लभेमहि तदा सर्वे निर्वेदं, नात्र संशयः
तस्माद्देवगणाः सर्वे शीघ्रं जागृत! जागृत!!
उत्तिष्ठत दिनादस्मात् संगृह्णीत मतानि च।
कुवेरस्य विरोधे चेदविश्वासप्रकल्पना
परिता स्यात्तदा सुस्था भवेम वहिरन्तरा॥
आगच्छत मया सार्द्धं मिन्द्राग्निवरुणादयः
स्वर्गस्योद्धारणार्थाय कुरुध्वं जीवितं पणम्।
देवराजं नवं स्वर्गे प्रतिष्ठाप्य सुरालयम्
समुन्नतं विधास्यामो नापरा गतिरिष्यते॥

सूर्यः इन्द्रस्य हस्ते 'फाउण्टेन पेन' कागजं च ददाति
यवनिका पतति।

—समाप्तम्—

ब्रह्मपुरस्य शिरोमणि मुद्रालये श्री अनन्त त्रिपाठि शर्मणा
मुद्रितं प्रकाशितं च २०२२।
Funding by IKS-MoE

नीलाद्रिनाथ शतकम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(अनुवृत्तम्)

लेखक—श्री पुरुषोत्तम मिश्रः

विनाके सीरहस्तस्य यद्भयान्नालमासितुम् ।
विना केशी रहस्तस्य सोऽभेदीश त्वया सुराः ।८७।

अन्वयः—हे ईश यद्भयात् सुराः तस्य सीरहस्तस्य विना विनाके आसितुं नालम्, स केशी त्वया रहः अभेदि ।

व्याख्या—हे ईश प्रभो कृष्णावतार जगन्नाथ यस्य केशिदानवस्य भयाद्भीतेः सुरा अमराः तस्य प्रसिद्धस्य सीरहस्तस्य लाङ्गलहस्तस्य बलरामस्य विना विनाके विशिष्टस्वर्गलोके आसितुं स्थातुं नालं न समर्थाः, स केशी केशिदानवस्त्वया रहसि एकान्ते अभेदि भिन्नः विनाशितः । अत्र प्रथमतृतीयपादयोर्यमकालङ्कारः ।८७।

ननन्द महितामास्ये कृत्वाऽऽक्रान्तः पदा फणी
न नन्दमहितामास्येशान ते प्राप्य देवताम् ।८८।

अन्वयः- हे ईशान, फणी नन्दम् आस्ये कृत्वा ते पदा आक्रान्तः, अहिताम् आस्य महितां देवतां प्राप्य किं न ननन्द ?

व्याख्या—हे ईशान प्रभो कृष्णावतार जगन्नाथ, फणी सर्पः नन्दं तव पितरमास्ये मुखे कृत्वा गिलित्वा, ते तव पदा चक्षुषि आक्रान्तः पीडितः अहितां सर्पत्वमास्य परिहृत्य महितां पूजितां देवतां देवत्वम् अपि प्राप्य किं न ननन्द मपि तु ननन्दैव । अत्र प्रथमतृतीयपादयोर्यमकालङ्कारः ।८८।

यात्रा ते माथुरी कृष्ण गान्दिनेयेन साधिता ।
त्वां नाप्याप्यवतो रात्रौ गां दिने येन साधिता ।८९।

अन्वयः—हे कृष्ण, येन त्वां न आप्य साधिता दिने रात्रौ आपि, तेन गान्दिनेयेन गाम् अवतः ते माथुरी यात्रा साधिता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या–हे कृष्ण कृष्णावतार जगन्नाथ, येन अक्रूरेण त्वां न आप्य नलब्ध्वा दिने रात्रौ रात्रिन्दिनं साधिता मनोव्यथासहितता आपि प्राप्ता। तेन गान्दिनेयेन गान्दिनीपुत्रेण अक्रूरेण गां पृथिवी रक्षतः ते तव माथुरी मथुरासम्बन्धिनी यात्रा गमनं प्रयाणं साधिता सम्पादिता। अत्र द्वितीय चतुर्थ पादयोर्यमकमलङ्कारः।८६।

राजकं वसनाशेन योनास्तं त्वं शिरः समे
राजकं वस नाशेन कंसस्येशोद्धृतं हृदि।६०

अन्वयः—हे ईश वसनाशेन अेन त्वया राजकं शिरः अस्तम्, कंसस्य नाशेन च राजकम् उद्धृतम्, सः त्वं मे हृदि वस।

व्याख्या—हे ईश प्रभो कृष्णावतार जगन्नाथ, वसनेषु कंसस्य कृते नीयमानेषु आशा तृष्णा यस्य तादृशेन त्वया रजकस्य धावकस्य सम्बन्धि राजकं धावकसम्बन्धि शिरो मस्तकमस्तं क्षिप्तम्, येन च त्वया कंसस्य नाशेन वधेन राजकं तेन निगृहीतो राजसमूहः उद्धृतं सः तादृशः त्वं मे मम हृदि वस तिष्ठ। अत्र प्रथमतृतीयपाद-योर्यमकमलङ्कारः।६०।

सदानं दन्तिनं देव वीक्ष्य कृष्ण त्वया हतम्।
सदा नन्दन्ति नन्दे व हृष्टाः कंसस्य तज्जिताः।६१।

अन्वयः—हे कृष्ण, सदानं कंसस्य दन्तिनं वीक्ष्य तज्जिताः, नन्दे सदा हृष्टा व देवाः नन्दन्ति ।

व्याख्या–हे कृष्ण कृष्णावतार जगन्नाथ, दानेन मदजलेन सहितं सदानं मदमत्तं कंसस्य सम्बन्धिनं दन्तिनं कुवलयापीडं त्वया हतं विनष्टं वीक्ष्य दृष्ट्वा तेन कुवलयापीडेन जिताः पराजिताः, नन्दे त्वत्पितरि सदा हृष्टाः व मुदिताश्च देवा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नन्दन्ति प्रमोदमनुभवन्ति । अत्र वशब्दश्चार्थे । अत्रापि प्रथम-तृतीय पादयोर्यमकमलङ्कारः ।९१।

हन्तुं ते त्वोत्थिते रङ्गे यया चाणूरसेनया ।
शिशोः प्रहारैः सैवासून् ययाचाणूरसेऽनया ।९२।

अन्वयः--हे कृष्ण, यया चाणूरसेनया रसे रङ्गे त्वा हन्तुम् उत्थितम्, सा अनया एव शिशोः ते प्रहारैः अणुः सती असून् ययाच ।

व्याख्या–हे जगन्नाथ ! यया चाणूरसेनया चाणूराधिष्ठित-सैन्येन रसे रस्यमाने रङ्गे राजसभायां त्वा त्वां हन्तुं नाशयितुमु-त्थितम, उदस्थायि, नास्ति नयो नीतिर्यस्या सा तादृशी सा चाणूर-सेनैव शिशोः बालरूपस्य ते तव प्रहारैराघातैः अणुः कृशा निर्जितेत्यर्थः सतीअसून् प्राणान् ययाच प्रार्थितवती 'रक्षणीया वय'मिति सकरुणं प्रार्थितवती । अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कार ।९२।

हत्वेश कंसं तेऽघादीन् या तु चाणूर रक्षसा ।
अन्तस्त्रसं तं मूर्तिर्मे या तु चाणूर रक्ष सा ।९३।

अन्वयः--हे ईश, या ते (मूर्तिः) अणुः अपि अघादीन् चाणूर-रक्षसा सह तं कंसं च हत्वा त्रस ररक्ष तु ते मूर्तिः मे अन्तः यातु ।

व्याख्या--हे ईश प्रभो कृष्णावतार जगन्नाथ, या ते तव मूर्तिः स्वरूपं अणुः अपि स्वल्पाऽपि शिशुरूपाऽपि अघादीन् अघासुरप्रभृतीन् चाणूररक्षसा चाणूरराक्षसेन सह तं प्रसिद्धं कंसं च कंसासुरं च हत्वा मारयित्वा त्रसं संसारं ररक्ष, विपदो मोचयामास, सा तु सैव ते मूर्तिर्मे मम अन्तर्मानसं यातु प्राप्नोतु । अत्र द्वितीयचतुर्थपादयोर्यमक-मलङ्कारः ९३

विप्रलब्धिनतवार्तया रुक्मिण्या हरणाद्विभो ।
विप्रलम्भि तवार्तया लब्ध्यै किं मा नृपावलिः ९४।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
अन्वयः—हे विभो, तव लब्ध्यै विप्रलम्भितवार्तायाः आर्तायाः रुक्मिण्याः हरणात् नृपावलिः किं मा विप्रलम्भि ?

व्याख्या—हे विभो प्रभो कृष्णावतार जगन्नाथ, तव लब्ध्यै लाभाय त्वां पतित्वेन प्राप्तुं विप्रलम्भितवार्तायाः विप्रेण ब्राह्मणद्वारा सन्देशं प्रेरयन्त्याः आर्तायाः आतुराचरणेन क्षुब्धायाः रुक्मिण्या हरणात् नृपावलिः राजसमूहः किं मा विप्रलम्भि किं न वञ्चितः ? अपि तु वञ्चित एव। ब्राह्मणद्वारा प्रेषितं सन्देशमधिगत्य नृपावलिं वञ्चयन् रुक्मिणीं हृतवानसीत्यर्थः। अत्र प्रथमतृतीयपादयोर्यमकमलङ्कारः। ९४।

कृपयेशाप वृषाऽपि ते सुदामा
न वहारैः रवरो घने नतांसः।
श्रियमालोक्य युयोज यां स्वकामा—
न वहारैः रवरोधने न तां सः।९५।

अन्वयः-हे ईश, धनेन वृषा अवरः अपि ते कृपया नवहारैः नतांसः सुदामा यां श्रियम् आप, सः अवरोधने ताम् आलोक्य स्वकामान् अवहारैः युयोज।

व्याख्या-हे ईश प्रभो कृष्णावतार जगन्नाथ, धनेन अवरो हीनः दरिद्रः अपि तव कृपया अनुकम्पया नवहारैः नूतनहारसमूहैः बहुहारैरित्यर्थः नतांसः नतस्कन्धः सुदामा तव सखा ब्राह्मणः सुदामा यां श्रियं समृद्धिमाप लेभे, स वृषा समृद्धत्वेन प्रसिद्ध इन्द्रः अवरोधने सुदाम्नः अन्तःपुरे तां श्रियमालोक्य दृष्ट्वा स्वकामान् स्वस्याभिलाषान् अवहारैः विवर्तनैः युयोज तादृशसमृद्धिलाभस्यासम्भवात् निवर्तयामासेत्यर्थः। अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः।९५।

नापराधो बद्धकामिः सबाणोऽवापि नाकिना।
रक्षितुं त्वयि दोश्छेदात्स बाणो वा पिनाकिना।९६।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे ईश, सवाणः बद्धकामिः स बाणः त्वयि अपराद्धः नाकिना पिनाकिना वा दोश्छेदात् रक्षितुं न अवापि ।

व्याख्या—हे ईश कृष्णावतार जगन्नाथ, बाणेन शरेण सहितः, बद्धो बन्दीकृतः कामिः कामपुत्रोऽनिरुद्धो येन तादृशः स प्रसिद्धो बाणो बाणासुरः त्वयि अपराद्धः पौत्रस्यानिरुद्धस्य बन्धनात् तवापराधं कृतवान्, नाकिना स्वर्गाधिपतिना इन्द्रेण पिनाकिना वा पिनाक-नाम दुर्जयं धनुर्धारयता महादेवेन वा महादेवेन च दोश्छेदात् रक्षितुं परित्रातुं न अवापि न प्राप्तः। तव पौत्रमनिरुद्धं बन्दीकृत्य बाणः त्वत्तो बाहुच्छेदं प्राप। नेन्द्रो नापि महादेवस्तं रक्षितुं समर्थं आसीदित्यर्थः। अत्र द्वितीयचतुर्थोपादयौ र्यमकमलङ्कारः ।९६।

गिराऽर्थितं स्वस्त्रिदशेशितुः सुरा—
नपारिजातं वसुधामसत्यया ।
न पारिजातं वसुधाम सत्यया
हरे त्वया नेतुमहो विजित्य किम् ।९७।

अन्वयः—हे हरे त्वया सत्यया असत्यया गिरा अर्थितं स्वः-जातं त्रिदशेशितुः वसुधाम परिजातम् अहो सुरान् विजित्य वसुधां नेतुं न अपारि किम् ?

व्याख्या- हे हरे कृष्णावतार जगन्नाथ, त्वया सत्यया स्व-प्रेयस्यां सत्यभामया असत्यया गिरा कुतूहलपरवचनेन अर्थितं याचितं, स्वः स्वर्गे जातं, त्रिदशेशितुः सुरपतेः वसुधाम रत्नवत् परिपाल्यं पारिजातं पारिजातवृक्षम् अहो, आश्चर्ये सूरान् देवान् विजित्य पराजित्य वसुधां पृथिवीं नेतुं प्रापयितुं किं न अपारि न शक्तम् अपितु पारितमेव। त्वं खलु प्रेयस्या सत्यभामयाऽभ्यर्थितः पारिजातं देवान् विजित्य मर्त्यलोकमानीतवानसीति भावः। अत्र द्वितीयतृतीयपादयोर्यमकमलङ्कारः ।९७।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हत्वा तेन हृता हठात् क्षितिभृतां कन्याततिस्त्वां क्षतं
पीत्वा स्वद्धृदयाऽऽगतं किमकृतार्थाऽऽसीद्बिसानां हरे।
राजीवायतदृष्टिभिर्नरक रक्षोऽभाऽस्वकाराशया
राजीवायतदृष्टिभिर्नरकरक्षोभास्वकाराऽऽशया ।९८।

अन्वयः--हे हरे, नरकरक्षः हत्वा आगतम् , आयतदृष्टिभिः क्षतं, त्वां पीत्वा, तेन हठात् हृता, अस्वकाराशया, नरकरक्षोभा बिसानां राजीव स्थिता, स्वका, अभा, आराशया, त्वद्धृदया, क्षितिभृतां कन्याततिः किम् अकृतार्था आसीत् ?

व्याख्या--हे हरे कृष्णावतार जगन्नाथ, नरकरक्षः नरकासुरं हत्वा मारयित्वा आगतं तेन वन्दीकृता राजकन्यका उद्धर्त्तुं वन्दिशालायामुपस्थितम् आ समन्तात् यान्ति गच्छन्तीति आयाः सर्वतो गामिन्यः याः तस्य नरकासुरस्य ऋष्टयः शक्तिविशेषास्ताभिः क्षतं क्षतविग्रहं त्वां पीत्वा सतृष्णमवलोक्य तेन नरकासुरेण हठाद्बलेन हृता अपहृताः,नास्ति स्वः स्वकीयो यत्र सा अस्वकीया तस्याम् आत्मीयजनविरहितायां कारायां शेरते इति अस्वकाराशयाः कारागृहे वन्दीकृता इत्यर्थः अतएवः नरकरैः मनुष्यहस्तैः क्षोभो दलनं यस्यास्तादृशी बिसानां मृणालानां राजीव समूह इव स्थिता परिमृदितमृणालीकल्पेत्यर्थः, सु अत्यन्तमकं दुःखं यस्या सा स्वका अतीवदुःखिता अतएव अभा कान्तिविरहिता आरासु चर्मभेदिशस्त्रेषु आशयो यासां ता आराशया आराभिरात्मानं व्यपादयितुमुद्यताः, त्वयि हृदयं मानसं यासां तादृश्यः क्षितिभृतां राज्ञां कन्याततिः कन्यासमूहः किमकृतार्था आसीत् ? न, कृतार्थैवासीत्। अत्र तृतीयचतुर्थपादयोर्यमकमलङ्कारः ।९८।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सचिवे त्वय्यपि खाण्डवेऽर्जुना—
दवराजा वसुदेव नन्दने ।
जितशक्रादुददीपि वह्निना
दवराजा वसुदेवनन्दने ।६६।

अन्वयः—हे ईश, असुदे वसुदेवनन्दने त्वयि सचिवे सति नन्दने व खाण्डवे दवराजा वह्निना अवराजौ अपि जितशक्रात् अर्जुनात् उददीपि ।

व्याख्या--हे ईश प्रभो कृष्णावतार जगन्नाथ, असुदे प्राणप्रदे वसुदेवनन्दने वसुदेवपुत्रे त्वयि सचिवे सहाये तिष्ठति सति, नन्दने व नन्दनवने इव खाण्डवे खाण्डववने अत्र वार्थे वशब्दः । दवे वने राजते इति दवराट् तेन वह्निना अग्निना अवराजौ सामान्यसंग्रामेऽपि जितशक्रात् पराजितमहेन्द्रात् महेन्द्रं पराजितवत इत्यर्थः अर्जुनात् अर्जुनं प्राप्य उददीपि उद्दीप्तम् । अत्र द्वितीयचतुर्थपादयोर्यमकमलंकारः ।६६।

स मयेन सभा व्यतार्यपार्थे यदहो कृष्ण बलीयसी सुरार्थ्या
समये न सभाव्यताऽऽर्यं पार्थे स्वजनार्थास्तमनास्त्वमेव हेतुः ।००१

अन्वयः—हे आर्य हे कृष्ण, मयेन अपार्थे पार्थे समये सुरार्थ्या सभा यत् व्यतारि. अत्र स्वजनार्थास्तमनाः सः त्वम् एव हेतुः न ? अहो सभाव्यता बलीयसी ।

व्याख्या हे आर्य सहानुभाव कृष्ण कृष्णावतार जगन्नाथ मयेन मयदानवेन अपार्थे धनविहीने पार्थे युधिष्ठिरे समये राजसूययागकाले सुरार्थ्या देवैः प्रार्थनीया देवानामपि स्पृहणीया सभा यत् व्यतारि वितीर्णा दत्ता अत्र तादृश सभादाने स्वजनानां स्वाश्रितानां पुरुषाणामर्थेषु प्रयोजनेषु अस्तं निक्षिप्तं मनो येन तादृशः स प्रसिद्धः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वमेव हेतुः कारणं न ? अपि तु त्वमेव कारणमित्यर्थः अन्यथा निर्धनस्य पार्थस्य तादृशसभालाभो दुर्घट इत्यर्थः। अहो आश्चर्यम्, सभाव्यता भाग्येन अदृष्टेन सहितता बलीयसी सुमहती। अत्र प्रथम-तृतीयपादयोर्यमकमलङ्कारः।१००

कुरुवैभवनाशनेन चेतोऽदयमीशेक्षितमेव दुर्जने।
कुरु वै भवनाशनेन चेतो विदुरस्यैक्षि कृपा निजे निज माम्।१०१।

अन्वयः—हे ईश, कुरुवैभवनाशनेन चेतः दुर्जने अदयम् ईक्षितमेव। विदुरस्य भवनाशनेन निजे कृपा किं न ऐक्षि ? इतः मां निजं वै कुरु।

व्याख्या—हे ईश प्रभो कृष्णावतार जगन्नाथ, कुरूणां दुर्जनानां कौरवाणां वैभवस्य समृद्धेर्नाशनेन तव चेतो मानसं दुर्जने दुष्टे जनेऽदयं निर्दयमीक्षितं दृष्टम्। विदुरस्य भक्तस्य भवने गृहे अशनेन भोजनेन निजे स्वकीये जने कृपा अनुकम्पा किं न ऐक्षि न दृष्टा, अपितु दृष्टैव। इतः अस्मात् कारणात् मां निजं स्वकीयं दासं कुरु विधेहि। अत्र प्रथमतृतीयपादयो र्यमकमलङ्कारः।१०१।

प्रेम्णाऽऽप्यं त्वां रथेऽयुङ्क्त काम्बले श्वेतवाहनः।
त्वं तु सेनां सखा नेश कांवलेऽश्वे तवाहनः।१०२।

अन्वयः—हे ईश, तव सखा श्वेतवाहनः प्रेम्णा आप्यं त्वां काम्बले रथे अश्वे अयुङ्क्त। त्वं तु वले कां सेनां न अहनः ?

व्याख्या—हे ईश प्रभो कृष्णावतार जगन्नाथ, तव सखा मित्रं श्वेतवाहनः अर्जुनः प्रेम्णा भक्त्या आप्यं लभ्यं त्वां काम्बले कम्बल-परिवृते रथे स्यन्दने अश्वे अश्वचालने अयुङ्क्त नियोजितवान्। त्वं तु वले सैन्यं कां सेनां न अहनः अवधीः सर्वमेवावधीरित्यर्थः अत्र द्वितीय चतुर्थपादयो र्यमकमलङ्कारः।१०२।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हेतुः स्ववशताऽव्यत्नापार्थ सा रथ्यसंज्जना।
यत्त्वयाऽकार्यस्य कृतपार्थसारथ्य सज्जना ।१०१।

अन्वयः—हे अपार्थ कृतपार्थसारथ्य, यत् त्वया अस्य सज्जना अपि सा रथ्यसज्जना अकारि, अत्र स्ववशता हेतुः।

व्याख्या–हें अपार्थ परिपूर्णकाम निष्काम हे कृतं स्वीकृतं पार्थस्य अर्जुनस्य सारथ्यं येन तादृश कृष्णावतार जगन्नाथ, यत् सन्ति अस्य अर्जुनस्य सन्तो जना यस्यां तादृश्यपि सा निकृष्ठजनोचिता रथ्यानां रथे योजितानामश्वानां सज्जना सज्जीकरणमकारि कृता, अत्र एतादृशनिकृष्टजनोचितरथाश्वसंचालनकर्मणि स्वानां स्वकीयानां भक्तानां वशता पारतन्त्र्यं हेतुः कारणम्। भक्तस्य अर्जुनस्य तोषणाय तादृशमपि कर्म कृतवानसीति भावः। अत्र द्वितीय चतुर्थपादयोर्यमकमलङ्कारः। १००।

समम दानवमालिकाकुलेशे
समदा नवमालिकाकुलेशे।
समदाऽनवमालिकाकुलेशे
समदानव माऽलिकाकुले शे ।१०१।

पदच्छेदः—सम दानवमालिकाकुलेशे समदाः नवमालिका कुलेशे समद, अनवमालिकाकुलेशे समदान् अव मा अलिकाकुले शे।

अन्वयः—हे सम, अलिकाकुले समद, नवमालिकाकुलेशे अनवमालि-काकुलेशे शे दानवमालिकाकुलेशे समदान् समदाः, मा अव।

व्याख्या—हे सम, मया लक्ष्म्या सहित, अलिकेन ललाटेन आ समन्तात् कुं पृथिवीं लाति गृह्णातीति अलिकाकुले भक्त्या भूमौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ललाटस्पर्शपूर्वकं प्रणमति जने समद सर्वप्रद कृष्णावतार जगन्नाथ, नवमालिकाभिर्नवमालिकाकुसुमैराकुलः आकूलीकृत आवर्जित इत्यर्थः ईशो महादेवो येन तादृशे, अनवमानामनिन्द्यानां सुन्दरीणामालिषु समूहेषु तत्पत्नीष्वित्यर्थः काको: शोकभीत्यादिसम्भवस्य स्वरस्य लेशो यस्य तादृशे, शे श्यति तनूकरोतीति शस्तस्मिन् शे शत्रुनाशके, एवम्भूते दानव मालिकाया दानवसमूहस्य कुलेशे कुलप्रभौ समदान् सगर्वान् तादृशदानवकुले ये त्वयि गर्व मावहन्ति, तान् समदाः सम्यक् खण्डये:, मा मामव रक्ष। त्वं प्रणतजनेभ्यः सर्वं ददासि, ये त्वयि सगर्वाः, तान् हंसि। प्रणतं मां रक्षेत्यर्थः। अत्र चतुर्णामपि पादानां यमनात् सर्वपादयमकालङ्कारः।१०१।

सा रङ्गे येन नारीणां धीः कामभयदं श्रुतेः।
सारं गेयेन नारीणां त्वां वेत्त्यर्च्यं स्म नास्तु मे।१०२।

अन्वयः– हे ईन, या अरीणां धीः श्रुतेः सारं त्वां रङ्गे कामभयदं वेत्ति स्म, या च नारीणां धीः रङ्गे गेयेन अर्च्यं त्वां कामभयदं वेत्ति स्म, सा धीः किं मे न अस्तु ?

व्याख्या–हे ईन प्रभो कृष्णावतार जगन्नाथ, या अरीणां शत्रूणां धीर्बुद्धिः श्रुतेर्वेदस्य सारं सर्वस्वं त्वां रङ्गे युद्धे काममयदमतिशयेन भीतिप्रदं वेत्ति स्म जानाति स्म या च नारीणां ललनानां धी:रङ्गे नृत्यस्थले गेयेन संगीतेन अर्च्यं पूज्यं त्वां कामभयदं कामभयखण्डयितारं वेत्ति स्म, सा धीः मे मम किं न अस्तु न भवतु अवश्यं भवत्वित्यर्थः। अत्र प्रथमतृतीयपादयोर्यमकमलङ्कारः।१०२।

अहिंसा दयसे बुद्ध सर्वत्र त्वं जितस्मरः।
अहिं सादयसेऽबुद्ध तत्को नेति भवं पदैः।१०३।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे बुद्ध, जितस्मरः त्वं सर्वत्र दयसे । तव च अहिंसा पदैः भवमज्ञान् सादयस तत कः न अबुद्ध ?

व्याख्या – हे बुद्ध बुद्धावतार जगन्नाथ, जितः वशीकृतः स्मरः कन्दर्पो येन तादृशः त्वं सर्वत्र दयसे दयां करोषि । तव च अहिंसा, प्रसिद्धेत्यर्थः । त्वं पदैः 'अहिंसा परमो धर्म' इत्यादि वाक्यैर्भवं संसारमहिं सर्पं सादयसे नाशयसीति को जनः न अबुद्ध अवेदीत् सर्वोऽप्यवुद्धेति भावः । अत्र प्रथमतृतीय पादयोर्यमकमलङ्कारः १०३।

अनुकम्पाहितरसालसया पश्य मां दृशा ।
अनुकं पाहि तरसा सर्वज्ञ, त्वत्पदस्मृतौ ।१०४।

अन्वयः—हे सर्वज्ञ, त्वत्पदस्मृतौ अनुकं माम् अनुकम्पाहित-रसालसया दृशा पश्य, तरसा पाहि ।

व्याख्या—हे सर्वज्ञ बुद्धावतार जगन्नाथ, तव पदोश्चरणयोः स्मृतौ स्मरणे अनुकं कामुकं मामनुकम्पया दयया आहितो यो रसोऽनुरागस्तेन अलसया दृशा दृष्ट्या पश्य विलोकय, तरसा वेगेन मां पाहि रक्ष । अत्र प्रथमतृतीयपादयोर्यमकमलङ्कारः ।१०४।

यवनान्निहन्तुमदयोऽभ्युदित प्रतिघोऽटकेन वसुधामसिना ।
प्रतिघोटकेन वसुधामसिना त्वमीनासतो भ्रमसि कल्कितनुः ।१०५।

अन्वयः—हे ईन कल्कितनुः त्वम् असतः प्रति अभ्युदितप्रतिघः सन् अदयः व यवनान् सुधामासिना असिना निहन्तुम् अटकेन घोटकेन वसुधां भ्रमसि ।

व्याख्या – हे ईन प्रभो जगन्नाथ, कल्कितनुः कल्किरूपावतार-स्त्वम् असतो दुर्जनान् प्रति अभ्युदितः संजातः प्रतिधः क्रोधो यस्य तादृशः सन् अदयो व निर्दय इव यवनान् म्लेच्छान् सुधा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमृतमेव मासिः कलङ्कापसोदनार्थं विनियुज्यमानविलेपनद्रव्यं यस्य तादृशेन असिना खड्गेन निहन्तु मुच्छेत्तु मटकेन गतिशालिना घोटकेन अश्वेन वसुधां पृथिवी भ्रमसि भ्रमिष्यसि । अत्र द्वितीय-तृतीयपादयोर्यमकमलङ्कारः।१०५।

रुरुदुर्म्लेच्छततयोऽसिं धुनाने नवेऽपि ताः ।
रक्षितास्त्वयि याः कल्किन् सिन्धुनाऽनेन वेपिताः ।१०६।

अन्वयः—हे कल्किन्, नवे अपि त्वयि असिं धुनाने सति याः अनेन सिन्धुना रक्षिताः, ताः म्लेच्छततयः वेपिताः रुरुदुः ।

व्याख्या—हे कल्किन् कल्क्यवतार जगन्नाथ, नवे नूतने अपि त्वयि असिं खड्गं धुनाने चालयति सति, याः म्लेच्छततयो म्लेच्छ-समूहाः अनेन सिन्धुना समुद्रेण रक्षिताः गुप्ताः, ताः म्लेच्छततयो म्लेच्छसमूहाः वेपिताः भयेन कम्पिताः सत्यः रुरुदुश्चक्रन्दुः । अत्र द्वितीयचतुर्थ पादयोर्यमकमलङ्कारः ।१६।

स्तोतुं क्रीडन् कथं शक्यो नापारि स हयोमया ।
शिवेन त्वं वर्णयितुं नापारि सहयो मया १०७।

अन्वयः—हे हय, यः त्वम् अपरि क्रीडन् उमयासह शिवेन वर्णयितुं नअपारि, स हयः त्वं कथं मया स्तोतुं शक्यः।

व्याख्या—हे हय हयग्रीवावतार जगन्नाथ, यः त्वम् अपगता ध्वस्ता अरयः शत्रवः यस्मिन् कर्मणि तद्यथा स्यात् तथा क्रीडन् उमया पार्वत्या सह शिवेन महादेवेन वर्णयितुं न अपारि न शक्तः, स महादेवेनापि वर्णयितुमशक्यः हयो हयग्रीवावतारस्त्वं मया मन्दधिया कथं किमिति स्तोतुं शक्यः न कदाचित् शक्य इत्यर्थः । अत्रापि द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ।१०७।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कविकाव्यायतरसान्दोलितास्याय ते नमः ।
कविकाव्याय तरसा हयग्रीवास्तचेतसे ।१०८।

अन्वयः–हे हयग्रीव, कविकाव्यायत–रसान्दोलितास्याय तरसा कविकाव्याय अस्तचेतसे ते नमः ।

व्याख्या–हे हयग्रीव हयग्रीवावतार जगन्नाथ, कविकया वल्गया व्यायतं विस्तरितं रसेन चान्दोलितमास्यं मुखं यस्य तादृशाय, तरसा वेगेन कविकाव्याय कवेः शुक्रस्य काव्यं स्तुतिरूपं श्रोतुमस्तचेतसे दत्तमानसाय ते तुभ्यं नमः प्रणामः । अत्र प्रथमतृतीयपादयोर्यमकमलङ्कारः ।१०७।

क्लेशाज्जनान् समुद्धर्तुं–
मादत्तात्रेयतो हिता ।
भूमन् यैस्ते गर्हिताज्ञा
मा दत्तात्रेयतो हिता ।१०९।

अन्वयः–हे भूमन्, इयतः क्लेशात् जनान् समुद्धर्तुम् आदत्ता अत्र हिता दत्तात्रेयता यैः गर्हिता, ऊहिता ते किं मा अज्ञाः ?

व्याख्या–हे भूमन् अचिन्त्यप्रभाव इयत एतावतः कलयितुमशक्यात् क्लेशात् जनान् समुद्धर्तुं मोचयितुम् आदत्ता स्वीकृता अत्र संसारे हिता हितकारिणी दत्तात्रेयता दत्तात्रेयरूपं यैर्दुर्जनैः गर्हिता निन्दिता ऊहिता वितर्किता च ते किं मा अज्ञा न मूर्खाः, अपितु मूर्खा एव । अत्र द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ।१०९।

निस्तीर्य त्वां भजे नाथ
कदाऽपदमदाहतः ।
इमां हृदोऽहं सुखितः
कदापदमुदाहृतः ।११०।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे नाथ, अपथमदाहतः अहम् इमां कदापदं निस्तीर्य, हृदः अदाहतः सुखितः कदा त्वां भजे ?

व्याख्या—हे नाथ प्रभो जगन्नाथ, अपदे अस्थाने यो मदो गर्वस्तेन आहतो ध्मातः. अहं इमामनुभूयमानां कदापदं कुत्सितां संसारासक्तिरूपामापदं निस्तीर्य तीर्त्वा हृदयस्य अदाहतः दाहाभावेन परितापविरहात् सुखितः तृप्तः कदा कस्मिन् काले त्वां भजे सेविष्ये ? शीघ्रमादिशेत्यर्थः । अत्रापि द्वितीयचतुर्थपादयोर्यमकमलङ्कारः ।११०।

निरयनिरयसिन्धौ मज्जनोन्मज्जनार्ते
पतितपतितयाऽस्मिन् ख्यात एवार्तबन्धो ।
नय न नयनकोणं सानुकम्पं कृपालो
परमपरमपुण्यः कामये नाथ किञ्चित् ।१११।

अन्वयः—हे आर्तबन्धो हे कृपालो हे नाथ, निरयनिरयसिन्धौ मज्जनोन्मज्जनार्ते, पतितपतितया ख्याते एव अस्मिन् सानुकम्पं नयनकोणं नय । परम् अपुण्यः अहम् अपरं किंचित् न कामये ।

व्याख्या—हे आर्तबन्धो कृपालो दयामय नाथ प्रभो जगन्नाथ, निरये शुभावहविधिरहिते निरयसिन्धौ संसाररूपनरकसमुद्रे सज्जनोन्मज्जनावर्तनैरार्ते पीडिते, पतितानां भ्रष्टचरित्राणां पतितया प्रभुतया ख्यात एव प्रसिद्धे एव अस्मिन् जने सानुकम्पं सदयं नयनकोणं कटाक्षं नय पातय । तावतैवास्य मोक्षः । परमतिशयेन अपुण्यः पुण्यविरहितः अहमपरं किञ्चित् न कामये प्रार्थये ।१११।

तरलतरलताग्रप्रायचाञ्चल्यभाजो
यमनियमनिवृत्तेः कामकारालयस्य ।
भवविभवविशेषोन्मादतापोपशान्त्यै
मदनमदनटस्य श्रीपते [illegible]र्देवे ।११२।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे श्रीपते, तरलतरलताग्रपायचाञ्चल्यभाजः यमनियमनिवृत्तेः, कामकारालयस्य मदमदननटस्य दुर्मतेः मे भवविशेषोन्मादतापोपशान्त्यै भव ।

व्याख्या—हे श्रीपते लक्ष्मीपतिरूप जगन्नाथ, तरलतरं यल्लताग्रं तत्प्रायं यच्चाञ्चल्यं तद्भजतीति तस्य, यमस्य नियमस्य च निवृत्तिर्यस्मिन् तादृशस्य कामस्य कन्दर्पस्य कारालसो वन्दिगृहं तस्य मद उन्मादको यो मदनः कामस्तस्य नटस्य दुर्मते दुष्टबुद्धेर्मे मम विभवविशेषैरैश्वर्यजालैर्य उन्माद तस्य तापोपशान्त्यै तापनाशनाय भव, तापं नाशयेत्यर्थः ११२।

समरसमरसेषु स्वेषु नित्यानुषक्तं
सुतनुसुतनुदीश त्वत्कथायां विरक्तम् ।
वदनवदनसो मे शोभते नैव चित्तं
तदनुतदनुजारे जातु नैतज्जहीहि ।११३।।

अन्वयः हे ईश, अरसेषु स्वेषु समरसं नित्यानुषक्तं सुतनुसुतनुत्, त्वत्कथायां विरक्तं मे चित्तम् अनसः वदनवत् नैव शोभते । तत् हे अनुतदनुजारे जातु एतत् न जहीहि

व्याख्या—हे ईश प्रभो जगन्नाथ अरसेषु अनुरागविहीनेषु स्वेषु स्वकीय पुत्रकलत्रादिषु नित्यं सर्वदा अनुषक्तमासक्तं, सुतनुं स्त्रियं सुतं पुत्रं च नौति स्तौतीति तादृशं, तव कथायां प्रसङ्गे विरक्तम् मे चित्तं मानसं अनसः नासिकाविरहितस्य पुरुषस्य वदनवत् नैव शोभते न राजते । तत्तस्मात् हे अनुतदनुजारे न नुता ये दनुजा दानवास्तेषां शत्रो जातु कदापि एतत् चित्तं न जहीहि न परित्यज ।११३।

शरणशरणमात्रव्याकुलेन प्रकाशो--
ऽरुषि परुषिता या आकरे चेदयोऽये ।
भवसि भवसिते त्वं मानसे मे न हृष्यत्—
सुरतसुरततायाः किं फलं भक्तबन्धो ।।११४।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः – हे हृष्यत्सुरत हे भक्तबन्धो शरण शरण भावाऽयाकुले अपरुषि परुषितायाः आकरे अयोग्ये भवसिते मे मानसे त्वं न प्रकाशो भवसिचेत् सुरततायाः किं फलम् ?

व्याख्या–हे हृष्यन्ती तृप्यन्ती सुरता देवसमूहो यस्मात् तथा, विध, हे भक्तानामाश्रितानां बन्धो मित्र जगन्नाथ, शरणं गृहमेव शरणं रक्षितृ यस्य, तस्य भावेनऽयाकुले व्यक्ते न अपरुषि सक्रोधे परुषितायाः कर्कशतायाः आकरे सनौ अयोग्ये अनुपयुक्ते, भवे संसारे सिते बद्धे मे मानसे त्वं न प्रकाशो प्रकाशितो भवसि चेत्, तर्हि सुरततायाः कृपालुतायाः किं फलं न किमपि फलमित्यर्थः। कृपालोस्तव भक्तस्य मम मनसि प्रकाशः समुचित इति भावः ।११४।

कलितकलितरेण व्यर्थमेवास्तमायु–
गिरिशगिरि शरारोरप्यनास्था हितायाम् ।
दरददरददीश भ्रान्तमेतन्मनो यां
शमनशमनकीर्ते पाहि पाहि प्रपन्नम् ॥११५॥

अन्वयः–हे शमनशमनकीर्ते हे ईश, कलितकलितरेण व्यर्थमेव आयुः अस्तम्। मे हितायाम् अपि गिरिशगिरि शरारोः अनास्था, एतत् दरवत् मे मनः अरवत् भ्रान्तम्। प्रपन्नं मां पाहि पाहि।

व्याख्या - हे शमनस्य यमस्य शमना वारयित्री कीर्ति र्यस्य तथा विध, ईश प्रभो जगन्नाथ, कलितकलितरेण अत्यन्तं कृतकलहेन मया व्यर्थमेव निरर्थकमेव आयुर्जीवनमस्तं विक्षिप्तम्, हितायामपि मङ्गलकारिण्यामपि गिरिशगिरि शिववचने शरारो र्धातुकस्य मे मम अनास्था अनादरः। एतत् दरवत् भयग्रस्तं मे मानसम् अरवत् चक्रारसदृशं भ्रान्तं भ्रमवदस्ति, प्रपन्नं त्वदाश्रितं मां-पाहि पाहि, रक्ष रक्ष ।११५।

कमलकमलसेनाध्यायि नान्तः पदं ते
बलितबलितया नाऽनाभि रैं ...णोऽपि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषमविषमपायि स्वानुगस्नेहदम्भा—
दरुणदरुणबन्धो हीश मां मोहबन्धः ॥११६॥

अन्वयः – हे अरुणबन्धो, हे ईश, अलसेन मया अन्तः ते पदं न अध्यायि, वलितवलितया वा एकः क्षणः अपि न अनायि स्वानुगस्नेहदम्भात् विषमं विषम् अपायि । हि मां मोहबन्धः अरुणत् ।

व्याख्या – हे ईश प्रभो जगन्नाथ हे अरुणस्य गरुडस्य बन्धो जगन्नाथ, अलसेन मया कमलकं पद्मसदृशं ते पदं न अध्यायि न ध्यातम्, वलितः कृतः बलिः पूजा येन, तस्य भावः,तया कृतपूजा-विधिना वा एकः क्षणः अपि मूहूर्तमेकमपि न अनायि न अतिवाहितः । स्वानुगेषु स्वाश्रितेषु स्नेहदम्भात् स्नेहच्छलेन विषमं दारुणं विषमपायि पीतम् । हि यतः मोह एव बन्धः मामरुणत् रुद्धमकार्षीत् । मोहग्रस्त-त्वादेव सर्वं तत्कृतवानहमिति भावः ११६।

वरद वरदयालो मोहपाथोधिमग्ने
भवति भवतिरोधानैकहेतौ न लग्ने ।
कृति निकृतिनिकायस्याशुशोच्ये मयि त्व !
वितर वितरणाशं त्वत्स्मृतिं नावमीश ॥११७॥

अन्वयः हे वरद हे वरदयालो ईश, मोहपाथोधिमग्ने भवति-रोधानहेतौ भवति न लग्ने निकृतिनिकायस्य कृति वितरणाशे शोच्ये मयि त्वत्स्मृतिं नावम् आशु वितर ।

व्याख्या-हे वरद वरदायिन् वरदयालो श्रेष्ठकृपालो ईश प्रभो जगन्नाथ, मोह एव पाथोधिः समुद्रस्तत्र मग्ने निमग्ने भवस्य संसारस्य यत्तिरोधानं विलयस्तस्य हेतौ कारणे भवति त्वयि न लग्ने नासक्ते निकृतिनिकायस्य कपटसमूहस्य कृति कारके विशिष्टे तरणे मोक्षे आशाऽभिलाषो यस्य तादृशे, शोच्ये शोचनीये मयि तव स्मृतिं त्वत्स्मरणरूपां नावं नौकां वितर देहि ।११३।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वरकवरकलापं विभ्रतं दोर्भिरब्जं
दरमदरमरिं च स्वैर्गदां कौस्तुभं च ।
घनमघनमनेकं लज्जयन्तं रुचा त्वा-
ममर मम रमेश, स्वान्तरं नो जहातु ।११८।

अन्वयः–हे अमर हे रमेश वरकवरकलापं, स्वैः दोर्भिः अब्जं दरम्, अरिं, गदां विभ्रतं कौस्तुभं च विभ्रतम्, अदरं, रुचा अघनं धनम् अनेकं लज्जयन्तं त्वां मम अन्तरं नो जहातु ।

व्याख्या–हे अमर, मृतिरहित रमेश लक्ष्मीपते जगन्नाथ वरः श्रेष्ठः कवरकलापः केशरूपभूषणं यस्य तादृशं स्वैः निजैर्दोर्भिर्बाहुभिः अब्जं पद्मम् दरं शङ्खमरिं चक्रं गदां च बिभ्रतं धारयन्तं तथा कौस्तुभं मणिं च विभ्रतम् , अदरं निर्भयं, रुचा कान्त्या नास्ति घनः सान्द्रो यस्मात्तादृशं घनं मेघमनेकं बहुधा लज्जयन्तं सलज्जं कुर्वन्तं त्वां मम स्वान्तरं स्वहृदयं नो जहातु न त्यजतु । सर्वदा चिन्तयत्वित्यर्थः ।११८।

पुरुषोत्तमेऽतिपतितस्य यान्तु ते
गृणतोऽर्थये वरद नाम कामपि ।
पुरुषोत्तमेऽस्ति पतितस्य यान्तु ते
स्मरतस्तनुं समति मेऽसवः परम् ।।११९।

अन्वयः–हे पुरुषोत्तम हे वरद, अतिपतितस्य पुरुषोत्तमे पतितस्य, ते नाम गृणतः, समति तव कामपि तनुं स्मरतः मम असवः यान्तु इति परम् अर्थये ।

व्याख्या–हे पुरुषोत्तम पुरुषश्रेष्ट हे वरद वरदायिन् जगन्नाथ अतिपतितस्य नितान्तपापिनः पुरुषोत्तमे क्षेत्रे पतितस्य स्थितस्य ते तव नाम गृणतः कीर्तयतः, समति बुद्धिपूर्वकं तव कामपि तनुं कामपि अवतारमूर्तिं स्मरतः मे मम असवः प्राणाः यान्तु निर्गच्छन्तु इति परमेतदेव अर्थये याचे ।११९।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अयोग्यैरपि मद्वाक्यसुमनोभिः सभाजितः ।
स्वैस्त्वं प्रसीद नाथैतैः सुमनोभिः सभाजितः ।१२०।

अन्वयः--हे नाथ, अयोग्यैः अपि मद्वाक्यसुमनोभिः समाजितः, स्वैः एतैः सुमनोभिः सभाजितः त्वं प्रसीद ।

व्याख्या--हे नाथ प्रभो जगन्नाथ, अयोग्यैरननुरूपैरपि मम वाक्य रूपैः सुमनोभिः पुष्पैः सभाजितः पूजितः, तथा एतैः स्वैः स्वकीयैः सुमनोभिः पण्डितैः सभासु जित उपस्कृतः त्वं प्रसीद प्रसन्नो भाव ।१२०।

सुवर्णपुष्पग्रथिता मालेव यमकावलिः
नीलाचलेशपदयो रर्पितेयं मया मुदा ।१२१।

अन्वयः--सुवर्णपुष्पग्रथिता माला इव सुवर्णपुष्पग्रथिता इयं यमकावलिः मुदा नीलाचलेशपदयोः अर्पिता ।

व्याख्या--सुवर्णपुष्पैः सुवर्णकुसुमैः ग्रथिता कल्पिता अथवा अत्यन्तावर्ण विशिष्टपुष्पैर्निर्मिता मालेव इयं सुवर्णा ललिताक्षराण्येव पुष्पाणि तैर्विरचिता इयं यमकावलिः नानाविधयमकालङ्कारसमूहः अथवा नानाविधयमकालङ्कार विशिष्टमिदं नीलाद्रिनाथशतकं मुदा हर्षेण नीलाचलेशस्य जगन्नाथस्य पदयोश्चरणयोरर्पिता प्रीतिपूर्वकं दत्ता ।१२१।

प्रसङ्गतः सुकाव्येऽपि खलादङ्कयतो जने ।
विद्वांसो दवयन्ति स्वं खलादपि नलादपि ।१२२।

अन्वयः--विद्वांसः सुकाव्ये अपि प्रसङ्गतः अङ्कयतः स्वलात् अपि नलात् अपि स्वं दवयन्ति ।

व्याख्या--विद्वांसः पण्डिताः सुकाव्येऽपि उत्तमे अपि काव्ये प्रसङ्गतः अवकाशकमेण अङ्कयतो दोषारोपणं कुर्वतः खलात् दुष्ट-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जनात् तथा अङ्कयत छिद्रं कुर्दतो नलादपि स्वनत्मानं दरयन्ति निवर्तयन्ति दूरे रक्षन्ति ।१२१।

नरसिंह वारणपतौ महीमिमां गलितानयामवति पौरुषोत्तमे
रसकालबाणविधु सम्मिते शके रचितेयमाशु कविरत्नसूरिणा ।१२२

इति श्रीमत्कविरत्न पुरुषोत्तममिश्रविरचितं नीलाद्रिनाथ-शतकं समाप्तम् ।।

अन्वय.-पौरुषोत्तमे नरसिंहवारणपतौ इमां गलितानयां महीम् अवति, रसकालबाणविधुसम्मिते शके कविरत्नसूरिणा इयम् आशु रचिता ।

व्याख्या–पौरुषोत्तमे पुरुषोत्तमगजपतितनुजे नरसिंहवारणपतौ नरसिंह गजपतौ गलितः अनयो यस्यास्तादृशीमिमां मही-मवति पाल-यति कविरत्न सूरिणा कविरत्नाभिधेन पुरुषोत्तममिश्रनामकेन सूरिणा पण्डितेन इयं यमकावलिराशु स्वल्पकालेन रसाः षट् काला-स्त्रयः, बाणाः पञ्च, विधुरेकः एतत्सम्मिते शके अङ्कानां वामतो गतिरितिन्यायेन १५३६ सम्मिते शकाब्दे रचिता कृता ।१२२।

शाकेऽब्दे वसुनागगोत्रविधुगे मेषं गते भास्करे
वैशाख्यां बुधवासरे शुभतिथौ वौद्धे जनेरुत्सवे ।
देहल्यां शतकस्य काऽपि विवृतिर्नीलाद्रिनाथप्रभो-
र्भारद्वाजकुलोद्भवेन कृतिनाऽनन्तेन सम्पूरिता ॥

। समाप्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हनुमत्सन्देशम् †

लेखकः—श्रीमधुसूदन तर्कवाचस्पतिः

भीतभ्रान्ता दनुजवनितातर्जनाभर्त्सनाभिः
साध्वीगेया जनकतनया क्षीणकाया कदाचित् ।
अश्रौषीत्तां गिरमतिहितां स्वीयहृद्यो व चक्रे
स्निग्धच्छायातरुषु वसतिं समगीर्याऽऽश्रमेषु ।१।

पीयूषोर्मिस्फुरदुरुगिराऽतोषयद्यः श्रुती मे
तुष्टिं दुष्ट्योरपि स तनुतादित्थमेषा लपन्ती ।
वृक्षस्कन्धावतरणपरं मारुतिं धातुरज्यद्—
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।२।

---

† इदं हि खण्डकाव्यं मेघदूतस्य पद्यानामन्तिमचरणानादाय विरचितम् । अत्र सीतया हनुमता स्वभर्तुरुद्देशेन प्रहितः सन्देशो विषयीकृतोऽस्ति । तदिदं काव्यं श्रीमधुसूदन मिश्र-तर्कवाचस्पतिमहोदयैर्विरचितम् । वाचस्पतिमहोदया उत्कले लब्धप्रतिष्ठा नापरिचिताः सुरभारतीसेवकानाम् । एतैर्ध्वन्यालोकस्य काप्यभिनवा टीका विरचिता । साहित्य-रत्नाकरस्यापि नौकाभिधा व्याख्या अरचि । तदिदं टीकाद्वयं मुद्रितं प्रकाशितं च वर्तते । एतैर्बहवो ग्रन्था विलिखिताः । तेषु ताराशशाङ्क-हनुमत्सन्देशहस्तिशतकादयः परमुपादेया भवन्ति । हनुमत्सन्देशस्य स्वोमज्ञा व्याख्याऽपि कृताऽस्ति । विस्तरभयात्सेयं व्याख्या परिहीयते केवलं मूलमात्रं सहृदयेभ्य उपाह्रियते । क्रमशस्तैर्विलिखिता अपरेऽपि ग्रन्था उपाहरिष्यन्ते । स्वर्गतानां तेषामात्मातृप्तिर्भवेदित्याशास्ते मनोरमा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्यग् बुद्ध्वा प्रियचर इति प्रत्यभिज्ञानयोगा-
दूचे तं सा रघुमणिदशा तादृशी यादृगुक्ता।
पक्ष्म क्षेपं न मृशति यदालोकने यः, स तस्मिन्
कण्ठाश्लेष प्रणयिनि जने किं पुनर्दूरसंस्थे ।३।

प्राप्यादेशं वरजविहितं तत्पदाम्भोजसेवा-
सक्तो ग्लायन्निव मयि तदा प्रैरयत्त्वां नु देवा।
लब्ध्वामुद्रामनुमतिमतोऽकामयः कर्तुमत्र
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ! ।४।

धीमन्नेमं मदवनपरं क्लिष्टवाग् दष्टमर्मा
दुष्टादृष्टग्लपितहृदया सन्निकृष्टादपास्य।
त्राहि त्राहीत्यनुगदमये नार्थयं कां न वल्लीं ?
कमार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।५।

हंहो शाखिन् विपिनघटनातत्त्वचक्रैकसाक्षिन्
मां क्रूरात्माऽहरदिति बलाद्रावणो नाम दैत्यः।
सन्देष्टव्यः स हि रघुपतिर्यत्तदोर्यथितो द्रु-
र्याच्ञा च मोघा वरमधिगुणे नाधमेऽलब्धकामा ।६।

नो मे दुःखं परमसहनं वत्सरेणापि वाच्यं
ब्रूयास्त्वेवं प्रियसहचरं देवरं मेऽनुरोधात्।
वाणासारैरसुरनगरी शीघ्रमेषा विपास्या
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ।७।

स्मृत्वा स्मृत्वा प्रियविरहजं दुःखजातं विशीर्णै
धृत्वा धैर्यं नयनजजलं रोधयन्त्यात्व भाषे।
पत्यौ दूरे विरहविधुरा का हि जीवेज्जगत्यां
न स्यादन्योऽप्यहमिव जनो यः पराधीन वृत्तिः ।८।
विज्ञेयस्ते रघुपतिरसौ-श्रीमती पादपद्मे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मारं स्मारं जनकतनया जीवति प्राणमात्रम् ।
तिर्यञ्चोऽपि विजनविपिने प्रावृषीवाम्बुवाहं
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।९।

व्यापन्नं मां मनसि कलयञ्जातु मा भूदुदस्यः
क्रूरक्रव्यात्कुलवलयितैकाकिनी का नु जीवेत् ?
गाढः प्रेमा तव मयि परं सान्त्वयन्मां समन्तात्
सद्यः प्रति प्रणयि हृदयं विप्रयोगे रुणद्धि ।१०।

हन्ताधातुं चरणरजसा कान्त कान्तासहस्रं
दक्षस्यापि भ्रमवशतया युज्यते ते न हेला ।
कालोपायावितरजनवन्न त्वया प्रेक्षणीयौ
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ।११।

कर्णौ दीर्णौ कटुचटुगिरा, भग्नसंज्ञा रसज्ञा
निद्राऽतीता मलकवलिता स्पर्शशक्तिर्मदीया ।
नासा भिन्ना प्रखरपवनैर्दर्शनेऽक्ष्णोः कथं मे
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ।१२।

रक्षोऽप्यक्षं निशितपशिखैः क्षेपयित्वा धरण्या—
मुन्मोच्याऽहं सदयभवने स्यामृशन्ती कियद्वा
श्यामाश्वस्ता शमयितुमलं को विनान्नं बुभुक्षां
क्षोणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य ।१३।

यद्भाव्यं तद्भवतु सधृति स्तात्पदेव प्रतीक्षे
यावज्जम्भासुरपरिकरक्षिप्तदम्भोलिनादी ।
पौलस्त्योरःक्षतजरुधिरं नो पिबेन्मार्गणस्ते
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ।१४।

आलोच्यैवं मम ... रितरीं तावकीनामुपेक्षां
स्वन्ताऽस्मथं, मयि रघुपते, साऽनुकम्पा क्व याता ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या ते पूर्वं समजनि पदं वीक्ष्य काकेन दत्तं
बर्हेणात्र स्फुरितरुचि नागोपवेशस्य विष्णोः ।१५।

निश्चिन्वन्तीमपि तव कृतीर्मामियं क्लेशधारा
देगतीवं व्यथयतितमां स्वनुजार्येण सार्द्धम् ।
यास्येऽयोध्यापुरमिति न प्रतीयां तवाहं
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ।१६।

बाल्येऽपि त्वं प्रशमितमखद्रोहिदुर्द्धर्षरक्षा
जिस्सङ्कुलीकृतभृगुपतो रावणं किं न हन्याः ?
क्षुद्रोऽपि स्वाकृतिकृतनान्न प्रतीकारकृत्ये
प्राप्तेऽमित्रे भवति विमुखः किं पुनर्यस्तथोच्चै ।१७।

तस्माद्वीर प्रवरवरणान् दारुणैं दर्शयित्वा
बाणैः, श्रीमन् निशिचरपुरो रावणादीन् हनिष्यन् ।
गोलाङ्गूलावलिवलयिता भाहि दुर्वादलाभो
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ।१८।

पादप्रान्ते तव रघुपते याचते किङ्करीयं
दासीक्लेशानपि विसृमरां स्तेऽवादान् प्रमार्ष्टुम् ।
शीघ्रं बाणैर्व्रणसरणिकां कल्पयास्यामरारे-
र्भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ।१९।

यावद्बन्धो दिशिदिशि यशोराशिशीतांशुबिम्बं
ध्वान्तध्वंसि प्रखरकिरणैर्वीर्यभानावुदीने ।
क्षान्त्या तावन्न खलु, समये भस्मवत्तेजसा तु
रिक्तः सर्वो भवति लघुता पूर्णता गौरवाय ।२०।

ये नीवारैरुपचितचरा लालिताः पुत्रकल्पा
यातायाते शिशुवदनुगा दण्डके पूर्वमासन् ।
आगन्तुस्ते मदपहरणे लक्षितं लोचनाभ्यां
शारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ।२१।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यापाद्यैनं त्रिदशवनिताकुन्तलाकृष्टिलोलं
मोक्ष्यन्ते चेत्सुरयुवतयस्त्वं यथा लब्धदारः ।
स्तोष्यन्ति त्वाममरनिकराः प्राप्य पूर्वोज्झितानि
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि ।२२।
क्रूरात्माऽसौ दनुसुतपतिः शातनीयोऽतिशीघ्रं
विज्ञाप्यो मे हृदयदयितो राघवेन्द्रोऽतिवीर्यः ।
वन्याजीवैश्चिरपरिचयाद्बान्धवैः रुद्धवर्त्मा
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् २३।
ध्वस्ते चास्मिन्नमरललनासेव्यमानांघ्रियुग्मे
मुक्ताः सत्यो विबुधवनिताः पूर्वसौभाग्यमीयुः ।
तासां नेत्रोत्पलजसलिलैर्विष्णुपद्याः प्रवाहाः
सम्पत्स्यन्ते कतिपय दिन स्थायि हंसा दशार्णाः ।२४।
निःसीमोग्रा जलधिपरिखा दैवतैरप्यलंघ्या
लङ्कामेतामहितनगरीं दुष्प्रधर्षां तनोति ।
दूरादुत्सारयति निखिलान् यामिकाया यदीयं
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ।२५।
यद्ध्वा वन्धां शरसरणिकां लंघयन्नम्बुधेस्तं
वेलामालातरलममलं शैलमीयाः सुवेलम् ।
दृश्याकल्पाद्यविरलतलेयः सदा दानवीना—
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ।२ ।
अत्राक्रीडे सततविकसत्पुष्पभारावकीर्णे
विश्रान्तः सन् क्षणमभिमतं मार्गमाश्रित्य यायाः ।
यं पुष्णाति प्रकृतिसुभगो दोहदोद्धूतधूम—
च्छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ।२७।
तीव्रामर्षादहितविहिताद्ग्धगात्रो हि धीमन्
शैले तस्मिन् कृतविहरणस्त्वं प्रियम्लपां लभस्व ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऐणोयानामिह विहरतां तत्तलावण्यलीला-
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ।२८।
पारावारप्रस्थ रप्रवज्जानमारुह्य वाहं
प्रत्युद्यातो विविध सुमनःसौरभैः सार्द्धं मस्मिन् ।
साम्मुख्यं ते मयि कलयिता मूर्च्छनान्मातरिश्वा
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।२९।
गम्भीरस्य स्वकुलमहिमोद्योतिनो सत्यवाचो
धीरोदात्तस्याखिलसुगुणामोदिनः स्वामिनो मे ।
ब्रह्मर्षीणां सदसि दितिजध्वंसने स्वप्रतिज्ञा
कार्श्यं येन त्यजति विधिना स त्वयैवोपायः ।३०।
लङ्कासंकेतितमरिपुरं दुर्गमं भिन्धि दुर्गं
दीर्णाशुष्मासुषितविदितस्फारसारैरुदारैः ।
दीप्तागारैर्गिलितगगनैर्यद्वरण्यां नगण्या—
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ।३१।
तप्तस्नेहं जलचुलुकवद्दीपयेन्नूनमेनं
सामोपायः सपदि यदसावुग्रतोदग्रितोष्मा ।
नात्रावत्तेः प्रशमकणिकामात्रजन्मा जडम्ना
शिप्रा वातः प्रिय ! तम इव प्रार्थनाचाटुकारः ।३२।
रत्नग्रामं वरुणनिलयात्स्वच्छलङ्कादिकांश्च
शष्पश्यामान् मरकतमणीन् विद्रुमाणां च भङ्गान्
गृह्णीतेऽसौ, कतिपयदिनैर्येन सर्वेऽपि नूनं
सम्पत्स्यन्ते सलिलनिचयास्ते यमाशावशेषाः ।३३।
रम्भोरूणां विहरणसुखप्राप्तये ये प्रदेशा
विख्यायन्ते सुरनरवरानन्तलोकान्तराले
दुर्दान्तोऽयं विहरति दुराकाङ्क्षया तेषु तेषु
लक्ष्मीं पश्यन् ललित वनितापादरागाङ्कितेषु ।३४।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उर्वीं मर्वा स्फुरति सभयैवोर्वरीभूय भूयः
प्रासादान्तः किरति सलिलं यन्त्रतन्त्री प्रचेताः ।
पुष्णात्याग्नेयमपि किरणान् सर्वदा सेव्यतेऽसौ
तोयक्रीडानिरतयुवतिस्तनानतिक्तैर्मरुद्भिः ।३५।
देवानिष्टं घटयतितमामेवमेवं दुरात्मे--
त्युक्त्वा काचिद्दनुजतनयाऽऽश्वासयन्त्याबभाषे ।
',तस्य ध्वंसं त्वमिह ललिते क्षिप्रमुज्ज्म्भिताना-
मासन्द्राणां फलमधिकलं लप्स्यसे गर्जितानाम्' ।३६।
तस्मान्मैत्रावरुणिमुनितो लब्धदिव्यास्त्रशस्त्रो
निस्तीर्णाब्धिं व्रज तरसा दुर्दमस्यास्य दुर्गम् ।
हर्म्यं ध्वस्य त्रिदशसुदृशो वीर्यरुद्धा विशुद्धा—
नामोदयन्ते त्वयि मधुकरश्रेणीदीर्घान् कटाक्षान् । ७।
चण्डीकान्तस्मरणरसिकाखण्डताखण्डनीते
चण्डाचारं दनुजनगरं तत्पोदण्डमण्डः ।
स्वन्तो हित्वा रचयतु हरः स्वाचले त्वं समर्थे
शान्तोद्वेगस्तिमितनयनं हृष्टभक्तभवान्या ।३१।
त्वय्यासन्ने दनुजदहनोद्दामजीमूतमूर्ते
लङ्कातङ्का सुरयुवतयो दर्शिका खे तदा स्युः ।
धीरं धुन्वन् सुरवरधनुर्धीर तद्बाणधारा –
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्तराः ।३२।
रक्षःपक्षप्रलयविषये पूर्वनाचाप्रतिज्ञो
मानार्हाणामतुलमहसामग्रतस्तापसानाम् ।
तत्कुर्वीथा स्त्रिजगदहितान्नित्यमाश्लिष्टमृत्यून्
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ।४०।
रक्षोराजोऽनुचरपटली पाशिवच्चं चुरीति
विश्वग् विश्वाप्रकरणपरा पण्डकण्डूलादोष्णः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाणैस्तां त्वं जहि रघुपते लोकशोकप्रकाशे
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ।४१।
आर्तत्राणेश्वर दिशि दिशि भ्राम्यतो भूरिभूते—
रत्नश्रेणीहरणसरणीजांधिकान्मायिनोऽस्मात् ।
भीभूतानि त्रिभुवनभुवां सुभ्रुवां तद्यतेथा—
मोघीकर्तुं चटुल शफरोद्वर्तन प्रेक्षितानि ।४२।
वारं वारं हरिणनयनाकर्षणोत्साहसिक्यात्--
ध्वस्तं तादृग्बलमपि जतस्थानगं, नो विरम्यात्
प्रेङ्खत्पत्रिप्रवरपिहितश्चेदसौ दुष्प्रवृत्ति
ज्ञातास्वादो विवृतजघनाङ्को विहातुं समर्थः ।४३।
स्त्र ामिन् सर्वस्थलविलसितं पौरुषं तावकीनं
मध्ये सौधं जलधिपरिखा दुर्गमे दुर्गगर्भे ।
अत्यासीनान् दशमुखमुखानीर्बया पाचयेद्धि
दीतो वायुः परिणमयिता काननोदुस्त्रराणाम् ।४४।
जेतव्याश्चेन्ति जगदहिता वीर, ते ते त्वयैव
क्षत्रारात्ति भृगुसुत पत्ति कुर्वता सावकीर्णम् ।
यः सेनानीं व्यजयत बलादाशुगाल्या खुरल्या--
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ।४५।
शक्तोऽपि त्वं प्रियतम जबादाक्रमस्वादितस्तं
लङ्कायोषित्प्रबरकबरं भूधरं तं सुबेलम् ।
कोदण्डीयैरसुरयुवतिदक्षवाहूरुचक्षुः
पश्चादद्रिग्र हणगुरुभिर्गर्जितैर्नत्तयेथाः ।४६।
शौर्यैश्वर्य प्रखर महसां निर्यतां वीर्य गर्वान्
त्वत्काण्डालीच्छिदुर शिरसांरक्षसामश्रुसिन्धुः ।
गीर्वाणालीं रमयतु गवालम्भजां स्मारयन्तीं
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ।४७।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

विश्वग्रास प्रवण दनुजोदग्रकालाभ्रभानी
चण्डोच्चण्डाशुगमनिगमैराशु विद्रावितायाम् ।
त्वां मन्येरन् प्रतिपदलसत्कीर्ति संगीतवर्णै-
रेकं मुक्तागुणमिव भुवः शेषमध्येन्द्र नीलम् ।४६।
दृप्यद्दुष्टप्रतिभटघटादुर्गमारण्यदुर्गं
विद्युद्दामप्रतिमविशिखैराशु कृन्तन् कुठारैः ।
आशा आलोकय निजयशोज्योत्स्नया स्वं मघोनः
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ।५०।
अस्य ध्वस्तेऽकुलबलशुचौ सर्वगीर्वाणशत्रौ—
मन्येऽशङ्कः स हि सुरपतिस्ते तु साहायकः स्यात् ।
यो दैत्यानां विषमसमरे प्रागहो बाणवारि-
धारापातैस्त्वमिव कमलान्यम्यवर्षन्मुखानि ।५१
शङ्के पङ्केरुहमुख मखध्वं सिरक्षः सपक्षान्
लक्षं लक्ष्याननु खरशरासारसन्धिश्रमेण ।
प्राणायाम प्रवणमरुते वारिदारेण दूरा—
दन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ।५२।
क्रव्यात्कालानलकदलनाल्लोकमुन्मोचयन्ती
चेष्टाऽशेषसुरवरगिरः स्पष्ट मावर्जयेद्वः ।
गङ्गोद्धर्त्तुं सगरतनयानुद्यतादौ स्मयेन
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ।५३।
नानारङ्गैरमररमणी राजिरभ्येत्य गगनात्
सा सर्वाङ्गामिह विहरतां साङ्गसङ्गीतरङ्गम् ।
एषाऽप्यस्या क्षणमिव दलत्कज्जलानन्दबाष्पैः
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ।५३।
अन्तर्भीतः स तृणललिताखर्ववीरान्तरोऽपि
रक्षोराजो रजतशिखरिश्रीलसौधच्छदे वः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्रष्टुं तिष्ठन् सपदि कलयन्माषराशिप्रकाश:
शोभां शुभ्रत्रिनयन वृषोत्खातपङ्कोपमेयाम् ।५५:

रक्षोलक्षं विशिखनखरैरादरादर्दयित्वा
कारागारादमरनिकरान् कल्पकल्पक्षणांशान् ।
उन्मोच्यादौ सफलय वलाद्दीनबन्धो स्वशक्ती–
रापन्नार्ति प्रशमनफला: सम्पदो ह्युत्तमानाम् ।५६।
ये ये नद्धा: करिकलभवत् कालपाशैस्तदानीं
ध्वंसोदकं समरमभितो वीरसिंहेन कुर्यु: ।
तांस्तान् कुर्या विशिखनखरैश्छिन्नभिन्नानशङ्क:
के वा न स्यु: परिभवपदं निष्कलारम्भयत्ना: ।५७।
राहुस्थूला: पवनजवना ये तु बेतालवीरा
रक्षोरथ्या नियमनिगडैराद्दता नित्यधाम्न: ।
विश्वोद्धारव्यसनसुखिनस्तेऽखिला: पूरयेयु:
सङ्कल्पं ते स्थिरगणपदप्राप्तये श्रद्दधाना: ।५८।
मूर्द्धक्लेदोत्पतनजनित ध्वानतालेऽसुराणां
शस्त्राघाताद्विकललुठनोन्नर्तने काकुगीतौ ।
तद्वासोद्यापनविधिरणेऽनल्पकल्पान्तकर्तु:
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्र: ।५९।
भङ्गात्कीर्तिव्रततिपटलं दानकालीनभूमे-
र्भ्रात्रा साकं विशिखखननीखोदितायास्वयैव ।
सन्तापार्तीर्हरतु हरितामाश्रयन् पिष्टपद्रु-
श्याम: पादो वलिविनयनाभ्युतस्येव विष्णो: ६०।
वन्दीनिर्म्मोचन विधिबलात्कुन्दवृन्दानुरूपं
ध्वान्तच्छाय प्रवलदनुजध्वंसनादिन्दु कल्पम् ।
लङ्कायां वो विलसतु यशो वीरकङ्कालकूटं —
राशीभूत: प्रतिदिनमिव त्र्यम्बकस्याट्टहास: ।६१।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आलोक्यैतत्स्वबलदलनं तिन्दुकारण्यभासा
लज्जाऽवर्णव्यतिकरगलत्तेजसा रावणेन ।
अध्यस्ताया रुचमनुचितां चिन्तयेऽट्टलिकाया
अंसन्यस्ते सति हलभृतो मेचके वाससीव ।६२।

एष क्रोधादपरिगणयन् जीवितं द्राग् गृहीत्वा
शक्ति नेयात्परिचितफलां यावदायोधनोर्वीम् ।
तावत्कुर्या निहतदितिजैः फेरवाणां समुद्यत्-
सोपानत्वं कुरु मणितटारोहणायाग्रचारी ।६३।

स्त्रीणामार्त्तिर्ग्लपयतितरामन्तरं वैरिणोऽपि
तस्मादुच्चैर्भवनवलभौ द्रष्टुमायोधनं ते ।
यास्तिष्ठेयुर्दनुजमहिला धान्वतैरेव मुग्धाः
क्रीडालोलाः श्रवणपरुषै र्गर्जितैर्भाययेस्ताः ।६४।

युद्धाग्नेनं जनवनदवं स्यन्दनादापतन्तं
शस्त्रासारैः शमय सहसा व्यापयन् स्वापवादम् ।
अस्त्रज्योतिस्तडिदुपहितस्त्वं रणैरेवमेवं
नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम् ।६५।

आरुह्यैनं गिरिमतिमतौ दुर्दमं दानवेन्द्रं
निघ्नत्यस्त्रैः स्वर्वाय रघुमणे मन्त्रयित्वाप्रत्युक्तैः ।
द्यौदेवद्रुप्रकरसुमनोवर्षि नूनं विदध्या-
न्मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ।६६।

पूर्वार्द्धम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्तरार्द्धम्

इत्थम्भूते प्रिय परमिदं शिंशिपावृक्षमूहे
तत्त्वावासं पुरमिति मनोरञ्जकं रञ्जितान्ताः ।
शश्वत्स्मेरं वलयितसरास्तोरणाभाः सचापं
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ।१।

रक्षःस्त्रीणां स्मरणभयकृद्वाक्स्वभावाकृतीना -
मासां मध्ये स्थितिरपि समाह्लादयेत्तर्हि तद्वत् ।
आलीनां मे तनुजपुलकं गर्हयामास गोष्ठ्यां
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ।२।

दंष्ट्राशूलैः करशबलितध्वान्तताम्रस्थलोकै -
र्व्यादायास्यं कुणपवनिता भीषयन्ति स्म यासु ।
भीमक्लेशा अपि मयि भुवस्ता इमा ये भवेयु-
र्नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः प्रदोषाः ३।

आह्लादेरन् हृदयभिदुरा अप्यलं मानसं मे
तास्ता वायो मुख विवरतो निःसृता सर्पिणीवत् ।
आसां या या स्थिरतरुणता सम्पदत्युन्मदानां
वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ।४।

पापिष्ठेन प्रणयघन! मत्तर्जनायेरितानां
कोऽप्यक्रूरादतिकटुतराद्गर्जनाद्दानवीनाम् ।
लप्स्ये तोषं तमहमपि यः स्वप्नवद्यो महेऽभूत्
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ।५।

आमम्नान्तश्चं मदतिवृहत्पिङ्गताक्षेक्षणाभिः
क्रव्यादीभिर्मुहुरुपचितोल्लङ्घनायाममूभिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थल्यामस्यामपि निजजनुभूमिभावो ह्युदीयात्
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ।६।
दर्पोद्रेकाद्रिपुविरचिता मर्त्यमात्रप्रतीत्या
नूनं यत्ना भवति निखिलास्ते मयीवाफलाः स्युः ।
दीपभ्रान्त्या रहसि निहिता देव रत्नार्चिरुत्से
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ।७।
अद्य स्वाप्नं किमपि भणिता एकया काचिदन्या
रीढापीडा सृजननिपुणा अप्यलं विस्मयार्ताः ।
स्वेदाम्भोभिर्मम तु निकटाल्लौहतन्त्रीशिराला
धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ८।
हन्त प्राणाधिक गुणमणे कान्त हे कान्तमूर्ते
नानाकष्टैरिति जलमिदं वृष्टमक्षिद्वयेन ।
ज्ञास्ये तेभ्यो जनितमिति, ये तापमन्तःपुरे ते
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ।९।
स्व स्व प्राणाभरणरमणीरत्नरङ्गानुरक्ता
गीर्वाणार्दिस्त्रपुर तरुणास्त्वद्गुण ग्रामगाथाः ।
उच्चैर्गातुं निजनिजपुरान्निर्भयं नाथ यावद्-
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति १०।
मा मा क्रुष्टुं स्वपथमनु हा कुट्टिनी हस्तिनीवत्
तास्तन्नुन्ना अपि निजसखीस्तर्कयिष्यामि वन्दीः ।
सम्भारौघैरधिकरुचितैर्मद्विमोहाय यासां
नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ।११।
एवं नानाकपटरचनैः सामदानोपजापै-
र्मामक्षुण्णप्रकृतिमवयन् यन्न हन्तुं प्रवृत्तः ।
तस्य स्वायुर्विषमकलहो यत्वहं नो हताऽसं
तस्यारम्भश्चतुरवनिता विभ्रमैरेव सिद्धः ।१२।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लङ्कातङ्कातिशयनिपुणं भावयन्ती भवन्तं
तांस्तान् खेदानपि हृदयतोऽपास्य वञ्चायमाणान् ।
तुच्छीकुर्वे सुरवरपदं, सर्वदा नाथ यस्मि-
न्नेकः सूते सकलमबलामण्डनं कल्पवृक्षः ।१३।
वाक्सीमानं त्रिदशमहिलादुर्दशा हाऽतिशेते !
रोदं रोदं नयति दिवसान् हीनतेजा विडौजाः ।
तद्दोर्दण्ड प्रखरपटिमोत्तापतो म्लायतेऽसौ
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ।१४।
वांच्छावल्ली परिणतफला जीयतां निर्जराणां
मुन्पूरेणोर्वरतु परितः सर्वचेतो मरूर्वी ।
ब्रह्मस्थानं कठिननियमायासगम्यं प्रयत्ना--
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ।१५।
यद्यद्बाधावरकमिति वा ध्यातपूर्वं मयाऽऽसीत्
तत्तत्सर्वं भवति शरणेऽवेद्य वेदनार्ता ।
बेलाशैले जलदमसकृद्बालदुर्वादिलाभं
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ।१६।
यत्प्रेमेर्ष्या प्रसरसुरभिस्तैजसी वैरकोपात्-
युद्धामोदं तव वलयितोन्मादिनीयं मदुक्तिः ।
नैतच्चित्रं यदिह बकुलश्चेतनश्रेणीतोऽपि
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनाऽस्याः ।१७।
वेदानध्यापयतु स विधिः शस्त्रविद्यां मरुत्वान्
नाट्योपायान् हर इति स आज्ञापयद्देवभेदान् ।
भीतभ्रान्ता अनुदिनमलं स्वस्वकर्माहं-तत्तद-
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः १८।
तस्मात्प्राणप्रियतम भवान् क्षिप्रमागत्य चेमां
पादाम्भोजापचितिविधिना किङ्करीं सत्करोतु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वत्सान्निध्याद्दत इह ;गनो नाप्नुयाच्छान्तिमल्पां
सूर्यापाये न खलु कमलं पुष्यति स्वाममिख्याम् ।१६।
धृत्वाऽनेके करकिशलयं कान्त कल्याणिनीनां
तीर्णास्तत्तत्कलुषजलधेस्त्वं तु मत्तो विपन्नः ।
तन्मां धिग् धिक् किमिति मुदिरः पातयेन्नो निहन्ति
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ।२०।
किं मामेनां कबलयति नालक्षणां कालशक्ति--
र्हाहा पाणिग्रहणमकरोद्या भवन्तं विपन्नम् ।
युष्मद्योग्या भवितुमुचिता रूपलावण्यभाग्यै--
र्या तत्र स्याद्युवतिविषये सृष्टिराद्यैव धातुः ।२१।
मत्तः श्रीमन् नृपतिसमितौ रुद्रकोदण्डभङ्गात्
प्रत्यावृत्तौ परमगुरुणा विग्रहाद्भार्गवेण ।
चेतोवृत्तिस्तव रघुपतेऽतोऽपि लोकापवादा-
ज्जाता मन्ये शिशिरमथिता पद्मिनीवाऽन्यरूपा ।२२।
मद्भाले हा विलिखितमिति क्रूरधात्रा किमेतान् --
न द्रष्टासि स्वजनकमुखं भूप्रसूता भवन्ती ।
यो गृह्णीयात्तव करमसावीश्वरोऽप्यम्वुदाना--
न्निन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्ते विभर्त्ति ।२३।
खेदोद्भिन्ना त्वमपशरणा दुष्टपापिष्ठदैत्या--
च्छ्रूयाश्चेतः श्रवणभिदुरं क्रूरकुत्साप्रकाशम् ।
मूढस्यास्य वनचररुषः पितृनिष्कासितस्य
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ।२४।
स्वाभाग्योत्थं यदिदमखिलं कृच्छ्रमेका त्वभोक्षं
तद्वा बाधा किल गुणमणे मां तथा नाक्रमेत ।
त्वं तद्भागीत्यहमिह यथा चेक्लिशीमि प्रतीत्या
भूयो भयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ।२५।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पारो नासां विषमविपदां यं स्मरन्ती दिनानां
क्षेपेऽशक्ष्यं दनुजजरतीतर्जनादुर्जराणाम् ।
आवेद्यं वा त्वयि किमधिकं येऽधुना दुर्लभा मे
प्रायेणैते रमण विरहेष्वङ्गनानां विनोदाः ।२६।

हन्त स्वामिन्नपि धरणिजामङ्कपर्यङ्कपृष्ठात्
तूलीतल्पे क्षणमपि समारोपयो यां न जातु ।
एषा नूनं स्थलकमलिनीत्यूहते प्रेक्ष्य पाप-
स्तामुन्निद्रामवनिशयनां सद्मवातायतस्थः ।२७।

आनन्दाश्रुक्षरणसरणिं प्रेक्ष्य यस्याः कपोले
जाताशङ्कोऽतिपथशपथैश्चाटुचित्रैरबुद्धाः ।
त्रासात् त्रातुं सुमुख सुमुखीभूयतामाशु दोषां
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ।२८।

प्रत्यावृत्तः सुभग सदसश्चेद्विलम्ब्य क्षपाया-
मन्वायान्तीं कलितसलिलां यां विलोक्यान्वतप्थाः ।
तां व्यास्मार्षीः कथमशरणां रोदनोच्छूननेत्रां
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ।२९।

वारंवारं रुचिरनयनाम्भोरुहं दर्शयित्वा
यां त्वं प्राणाधिक करुणयाऽतोतुषीः कोशलायाम् ।
तां मामद्यापि न वितरसि स्वप्नभिक्षां त्वदीक्षा-
माकांक्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ।३०।

घोरारण्ये रहसि रभसा कुन्तलान्मार्जयित्वा
नानाभङ्गि प्रणयसुभगं प्रत्यहं यामयंसीः ।
अश्रुक्लेदाकुलितजटिलां नापनोत्तुं क्षमेतां
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ।३१।

यस्याः प्रेक्ष्य प्रणयगरिमोद्गारसौभाग्यलक्ष्मीं
मोक्षापेक्षां जहदपिगणः स्वाङ्गनात्वं विवव्रे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तां मामीदृग्व्यसनविवशामाकलय्यात्र कष्टं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ।३२।

मद्दुर्भाग्यं व्यधटचदये भर्तृसाम्राज्यमग्रे
हैमं तादृङ् मृगमघटय द्दुर्धटं तेन किन्तु ।
यद्यागच्छेदरिपुरमिमां केकयाधीशनप्तुः
प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत् ३३।

दीनामेनां सदयमचिरादुद्धरोद्धारिचञ्चो !
हित्वा श्वश्रूश्वशुरजनतां त्वानुयातां बराकीम् ।
कालक्षेपे जनकतनयाजीविताशा हि मत्वा
मीनक्षोभाच्चलकुबलयश्रीतुलामेष्यतीति ।३४।

विद्विड्दुर्गं त्वयि कपिभटैर्वीरवर्यायियासौ
सवां वन्द्यो वयमिह जगद्वेदितुं शक्नुमस्तत् ।
वामो वाहुर्नयनमपि यत्तत्क्षणं मद्विधानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्त्वम् ३५।

सा किं सोढा विरहविपदं ग्रावभूद्रात्रिकां ते
भूषाभाषाप्रकृतिरुचिभिर्विश्वविस्मापकं य ।
स्वेदस्रोतःप्लुतमपि पुरा वाचिकीर्षत्क्षणं या
सद्यः कण्ठच्युत भुजलताग्रन्थि गाढोपगूढम् ।३६।

या विश्लेषग्लपितहृदया श्रीमुखालोकने ते
वीक्षोत्कण्ठाऽऽकुलयदपि यां गाढमाश्लिष्यमाणाम् ।
तां मां कच्चित्सपदि सदयोद्धृत्य खेदं जिहीर्षु-
र्वक्तुं धीरस्तनित वचनैर्मानिनीं प्रक्रमेथाः ।३७।

यातृश्वश्रूश्वशुरमधुरस्फारसौधावलीत-
स्त्वत्तो मेने विषमपि तथा दण्डकं श्लाघनीयम् ।
अङ्कस्थाऽपि त्रसति च घनात्पान्थवृन्दानि कर्तु-
र्मेन्द्रस्निग्धैर्ध्वनिमिरबलावेणीमोक्षोत्सुकानि ।३८।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सा विच्छेदस्मरणविचलच्चेतना किन्तु सोढा
मद्विश्लेषं परमत इति प्रत्ययः किं न तेऽस्ति ?
श्वासस्थित्यै श्वसनतनयं नान्यथा प्रेषयिष्यः
कान्तोदन्तः सुहृदुपगतः संगमात् किञ्चिदूनः ।३९।
निस्त्राणं मे शमनसदनाभ्यर्णगप्राणरज्जोः
साध्यं नर्तेऽप्रमितवलिनां वैरिणां मूलघातात् ।
दूतेनास्मान्ननु नरमणे मां यदाश्वासयस्त्वं
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ।४०।
दूतादस्मादखिलचरितं ते ममाकर्णयन्त्याः
साक्षाच्चक्षुर्विषयग इवाभासि मामुद्दिधीर्षुः ।
प्रेमावेगोत्पुलकपटलहृतःक्षणं कान्तकीयः
सङ्कल्पैस्तैर्विशत विधिना वैरिणा रुद्धमार्गः ।४१।
ग्राह्यो दोषो वचसि भवता मामकीने न कश्चित्--
चेतःकुण्डे दनुजपतिना स्वाहितो रावणेन ।
विस्मृत्याज्यैश्चिरमपि हुतः स्वेन खेदाश्रयाश-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ।४२
तस्येदं किं फलमिह मया भुज्यते त्वं पुरा मां
निर्बध्नन्तीं घनमपि वनं यामि सार्द्धं त्वयैव ।
यच्चावोचः सुतनु सुषमाशेमुषीचापलानां
हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति ।४३।
मध्येरात्रं दनुजरतीराजिषु स्वप्नभाक्षु
किञ्चिन्मात्राधिगतसमया त्वां तु वृन्तैर्विलिख्य ।
पश्यन्त्या मेऽश्रुभिरुपचितैर्मूर्तिरालुप्यते ते
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ।४४।
भावावेशादुपगतमिव त्वां प्रतीत्याह्वयन्तीं
क्रव्यादीनां पुनरभिभवै मां तु निद्रादरिद्राम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पश्यन्तीनां दनुजदरतः खे विलीयामरीणां
मुक्तास्थूलास्तरुकिशलये ष्वश्रुलेशाः पतन्ति ।४५।

दृष्टः स्पृष्टस्त्वमिति मनसि प्रत्ययेऽरुत्यपीदं
दारैर्भर्तुः प्रकृतिसुलभं भालयन्त्या मयेति ।
आमृष्यन्ते प्रियतम निजाङ्गानि हन्तादरेण
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ।४५।

आर्तत्राण प्रणयधन हे क्लेशविस्मारिमूर्ते
स्वान्तं विस्मारयितुमखिलं खेदमुद्योगवत्याम् ।
मूर्च्छार्त्तायां मयि तु तदिदं पूर्वतोऽतीवजाग्रद्-
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ४६।

आपन्मग्नामगतिमधुना भावना मां बिभर्ति
स्वर्शलभ्यं सुखमिह पुरा शङ्क्यविच्छेदमापम् ।
एतद्दुःखं तदनु च यथाऽऽप्नोमि मोदं तथाऽप्ह्ये
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ।४७।

प्राणानेवं विसरण परान् प्रणिमि द्राङ् निगृह्य
त्वं चाप्येनां मतिधृतिमुषां ग्लानिमुत्सृज्य धीरः ।
अत्रोपायानुपचिनु रयात्तत्परं खाभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ।४८।

एतन्नूनं प्रियतम मया पिष्टमुत्पिष्यते यद्-
यः प्रेमेर्ष्यामलमत चिरं दर्शयन्नानुकूल्यम् ।
एतन्मात्रं रहसि गदितो हा परीहासतोऽपि
दृष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति ।४९।

त्वां मन्मन्यं सदयहृदयं दुःखनिर्मोचनेऽपि
व्यापृण्वानं विधुरहृदया यत्पुनश्चेष्टयामि ।
तत्ते प्रेम्णः फलमविकलं किन्तु विच्छेदभावा
इष्टे वस्तुन्युपचितरसाः प्रेमराशी भवन्ति ।५०।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वामिन् सर्वं त्वयि निगदितं वक्तुमाकांक्षितं यत्
नास्मिन्निर्यन्त्रितरचकवन्मेऽस्ति दोषावकाशः।
तस्मात्प्राणेश्वर करुणया दोषवर्जं मदुक्तेः
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः।५१।

एतत्सीताऽवददिति जगत्प्राणवंशावतंस
प्राप्ताम्यर्णंस्त्वमनुवदिताऽशङ्कितस्तं शरण्यम्।
रक्ष कोपाद्यदि च विचलेदेष वाच्यस्तदेति
प्रयुक्तं हि प्रणयिषु सतामिप्सितार्थक्रियैव।४२।

आप्रोद्वाहाच्छिरसि निहितं रत्नमेतद्दधीथा
विश्वस्थात्त्वं रघुकुलमणिर्येन नूनं हनुमन्।
आयुःकीर्तिप्रतिभट घटाघात वीर्येण भुङ्क्त्वा
मा भूदेवं क्षणमपि न ते विद्युता विप्रयोगः।५३।

उत्तरार्द्धम्

प्रियासन्देशादिप्रवणपरपद्यान्त्यचरणैः—
स्वपद्यानां कान्तं प्रति च प्रतिसन्देशनवताम्।
क्रमात्पूर्तिः पूर्वोत्तरविषय भूसंगतिमती
दुराराध्या तस्मादहमिह विगेयो न कृतिभिः।५४।

इह क्षोभसन्धुक्षितो रौद्रवह्निः
क्व माधुर्यधुर्यो रसो विप्रलम्भः।
विविच्येति विज्ञा रसज्ञा रसज्ञा
समज्ञाऽप्यवज्ञाञ्जनैर्नाञ्जनीया।५५।

समाप्तम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुवादकस्य आत्मकथा

शिक्षाप्रियस्य Much Ado About Nothing नामकं नाटकं 'मनोरमा'याः पञ्चमवार्षिकासु संचिकासु 'महारम्भो लघु क्रिया' इति नाम्ना यथाक्रमं प्रकाशितम् । तदवसरे अतिरिक्ततया पञ्चशतं प्रतयो मुद्रापिताः । ता एता इदानीं ग्रन्थाकारेण प्रकाश्य सहृदयानां पुरत उपस्थापयामि । तदिदं शिक्षाप्रियग्रन्थमालाया द्वितीयं कुसुमम् ।

अनुवादावसरे मया न काऽपि स्वतन्त्रता अवलम्बिता । आक्षरिक एवार्थो भावश्च यथायथं सन्निवेशितः । पद्यानां पद्यैर्गद्यानां च गद्यैरेवानुवादः कृतः । नाटककर्तुर्मौलिकता यथा न कुत्रापि प्रतिहन्येत, तदर्थं सुमहान् प्रयत्नः कृतः । कियदहं तत्र कृतार्थ इति नावधारयामि । 'हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा' सदसद्विवेकपटवः सहृदया एव तत्र प्रभवन्तीति मे मनीषा ।

नाट्योल्लिखितानां व्यक्तीनां नामानि मया किञ्चिदिव विपरिवर्तितानि । तदिदं परिवर्तनं भारतीयानां सुरभारतीसेवकानां रुचिमनुकूलयितुं कृतमास्ते । परन्तु मम केचन सुहृद्वरास्तदिदं परिवर्तनं न सहन्ते । Shakespeare शब्दस्य 'शिक्षाप्रिय' इति परिवर्तनं न ते मर्शितुं प्रभवन्ति । एतादृशं परिवर्तनं मोक्षमूलर Muxmuller) भट्टपादैः प्रथमत ऋग्वेदस्य प्रकाशनावसरे कृतम् । German इत्यस्य शर्मण्य इति Oxford इत्यस्य गोनर्द इति Professor Muxmu-ller इत्यस्य च मोक्षमूलरभट्ट इति च व्यपदेशाः कृताः । एवमेव 'सहृदया'याः सम्पादका स्तत्रभवन्तः स्वर्गताः कृष्णमाचार्यपादा अपि Midsummernight's Dream इत्यस्य वासन्तिकस्वप्नमिति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यपदेशः कृतः। सेयं सरणिर्महाजनैरनुसृता । ज्यौतिषशास्त्रे बहूनां यावनिकशब्दानामेवमेव किञ्चिद्विपरिणामेन संस्कृतेऽनुप्रवेशो लक्ष्यते । कविकुलगुरुः कालिदासोऽपि तिथौ च जामित्रगुणान्वितायामिति जामित्रशब्दं व्यवाहरत् । सोऽयं शब्दः Geometre शब्दस्य रूपान्तरमेव । अपभ्रंशशब्दानामपीयमेव गतिः । अतोऽहं तामिमामेव सरणिमनुसरामि । प्रतिपादकानामपि आशयमहं जानामि । ते किल मन्यन्ते—नाम्नां तादृशपरिवर्तने वाचकानां मनसि कोऽपि आयासः पदमादधीत । आदधीतेति नात्र सन्देहः । तदर्थं साजात्यमक्षुण्णं स्थापयितुं यथाशक्ति प्रयत्नः कृत एवास्ते । अत्र सावहितमनसा मया न यादृच्छिकता अवलम्बिता परन्तु यथा तास्ता व्यक्तीः स्थानानि च प्रत्यभिज्ञातुं वाचकानां न कोऽपि समधिक आयासो भवेत्, तथा साजात्यं संस्थापितम् । Viola = विमला, England = इलाखण्ड Orsino = आश्विन, Curio = केयूरकः Leonato = लीलानाथ, Hero = हीरा, Padua = पादुका, Benedick = विनोदकः, Beatrice = विचित्रा, एवमादिषु, मन्ये, वाचकास्तास्ता व्यक्तीः प्रत्यभिज्ञातुं न कमपि क्लेशं गणयेयुः।

अवसरे चापरमिदमपि प्रतिपादयामि यदनुवादकस्य कृत्यं स्वयं रचयितृभ्योऽपेक्षया गरीयः । अनुवादकः स्वयं न किमपि कर्तुं प्रभवति। तस्य करचरणं सुदृढेन निगडेनाबद्धम । स किल मौलिकतामक्षुण्णां स्थापयितुं प्रयतते। तत्र भ्रमप्रमादा अवश्यमापतेयुः। अतः सहृदया यत्र यत्र प्रमादं त्रुटिं स्खलितं वा अवलोकयेयुः तानि सर्वाणि अनुगृह्य मां ज्ञापयेयुर्येनाहं तान् शोधयितुं प्रभवेयं, भविष्यति च सावधानो भूयासम्।

एकेनैव मया पूर्वपत्र (Proof संशोधनं कृत मिति स्वकीयान् प्रमादानुट्टङ्कितुं न प्राभवम् । उच्चावचा अपि मुद्रणदोषा नैव सम्यगवेक्षिताः । तेन भ्रमप्रमादा अवश्यम्भाविनो भवन्ति । अक्षर-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संयोजकाश्चानभिज्ञसंस्कृतभाषा इति कृतान्यपि संशोधनानि न परिशीलयन्ति, द्विगुणांश्च प्रमादान् कुर्वत इति विदितचरमपि न प्रतिकर्तुं प्रभवामि । सर्वथा क्षन्तव्यमात्मानमभ्यर्थये ।

Merchant Of Venice इति नाट्याचार्यस्य शिक्षाप्रियस्य नाटकं 'वेणीशसार्थवाह' नाम्ना मनोरमायाः षष्ठवर्षस्य सञ्चिकासु प्रकाश्यमानं वर्तते । तदिदमनुवाद्येषु रूपकेषु प्रथममपि शिक्षाप्रिय-ग्रन्थमालायास्तृतीयकुसुमत्वेन न चिरात्प्रकाशमेष्यतीति सप्रमोदं निवेदयामि ।

भगवत्याः कमलालयायाः प्रसन्नविमलाया दृष्टेरभावेन अकिञ्चनेनानुवादकेन मनोरमतया नेदं प्रकटितमिति विषीदामि द्वितीये च संस्करणे तदिदं सुचारुरूपतया प्रकाशं यास्यतीति आशां बध्नान एवास्मि ।

शिक्षाप्रियस्य सुखान्तेषु रूपकेषु Merchant Of Venice, Much Ado About Nothing, Twelfth Night, As You Like It इति चतुर्णामनुवादः संसाधितः तानि च यथाक्रमं वेणीशसार्थवाहः 'बह्वारम्भो लघु क्रिया' 'द्वादशी रात्रिः' 'यथा ते रोचते' इति व्यपदिष्टानि । इदानीं तस्य दुःखान्तेषु रूपकेषु Hamlet रूपकं 'हमेलात' इति नाम्ना अनूद्यमानं वर्तते । तदिदं च 'मनोरमा'याः सप्तमवर्षस्य सञ्चिकासु वाचकेभ्य उपहरिष्यत इति कृतमतिरस्मि । ईश्वरस्यानुकम्पायां शिक्षाप्रियस्येतराणि प्रसिद्धानि रूपकाणि गीर्वाणवाण्या अनूद्येरन्निति विश्वसन् विरमामि ।

इदमपि सहृदयेभ्यः सप्रमोदं निवेदयामि यद् 'द्वादशी रात्रिः' केन्द्रीयप्रशासनस्य संस्कृतसमित्या अभिनन्दिता । तत्र भवतां डाक्टर श्रीरामकृष्ण शर्म महोदयानां प्रसादस्य पात्रं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समजनि । संस्कृतसमिते निर्देशानुसारेण द्वादशरात्रेः शतं खण्डानि केन्द्रीय संस्कृत विभागेन क्रीतानि, विभिन्नेभ्यः संस्कृतानुष्ठानेभ्यश्च वितीर्णानि । एवमेव उत्कलशिक्षानिर्देशकैरपि द्वादशरात्रेरष्टचत्वारिंशतखण्डानि क्रीतानि विभिन्नेभ्यश्च संस्कृतानुष्ठानेभ्यो वितीर्णानि एतदर्थमहमुभयत्र आत्मनः कृतज्ञतां ज्ञापयामि, तावता द्वादशरात्रिः कोऽपि प्रचारो जात इति सन्तुष्यामि ।

शिक्षप्रियस्य नाटकानि संस्कृते अनूदितानि सुरभारती-सेवकानावर्जयेयुरिति विभावयता मया तेषामनुवादे पदक्षेपः कृतः । तावता सुरभारत्या काऽपि सेवा कृता भवतीति विश्वसिमि । यदि अनया सेवया सुरभारतीसेवकानां कोऽपि प्रमोदो जायेत, तर्हि आत्मनः श्रमं सार्थकं परिगणयेयम् । आश्रवः

श्री अनन्त त्रिपाठि शर्मा
अनुवादकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरुषोत्तम मिश्रः

'मनोरमा'याः चतुर्थ पञ्चमवर्षयोः सञ्चिकासु प्रकाशितस्य नीलाद्रिनाथशतकस्य प्रणेता श्रीपुरुषोत्तममिश्रः कश्चनासाधारणो विपश्चिदास। एष हि कोलाचल मल्लिनाथसूरीव बहूनां संस्कृत-काव्यनाटकादीनां केवलं नैव व्याख्याता अवर्तत,परन्तु उच्चावचानि ग्रन्थरत्नानि प्राणयत्। एतावदवधि अनेन प्रणीता ग्रन्था नैव प्रकाशिता आसन्, केवलं 'मनोरमा, अस्य कृतिष्वन्यतद् नीलाद्रिनाथशतकं सहृदयेभ्यो वाचकेभ्य उपाहृतवती। द्वितीयं च ग्रन्थरत्नं ''यमकभागवतं षष्ठवर्षस्य सञ्चिकासु प्रकाशयितुं कृतादरा वर्तते। पण्डिततल्लजस्य कविरत्नयास्य सामान्यः परिचयः सुहृदयेभ्य उपाह्रियते।

कालः

संस्कृतसाहित्ये अन्येषां कवीनामिवास्य समयनिरूपणे न वयमन्धतमसाच्छन्ना भवामः। एष हि स्वकृतिषु स्वकृतानां ग्रन्थ-रत्नानां रचनाकालः सम्यगेव प्रकटीकृतवान्।

अस्य नीलाद्रिनाथशतकस्योपसंहारे पद्यमिदं विलिखितमास्ते —

"नरसिंहवारणपतौ महीमिमां
गलितानयामवति पौरुषोत्तमे।
रस काल बाण विधु सम्मिते शके
रचितेयमाशु कविरत्न सूरिणा"

पद्यादस्मात् नीलाद्रिनाथ शतकं रस (६) काल (३) बाण (५) विधु (१) सम्मिते शके १५३६ तत्प्रतिरूपके १६१४ खीष्टाब्दे रचितमिति प्रतीयते। एवमिव अनेन कृताया अनर्घराघवस्य टीकाया अन्ते पद्यमिदं दृशोः पन्थानमवतरति—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वीरश्री पुरुषोत्तमक्षितिपतेः पुत्रे नृसिंहे क्षमा-

नाथे शासति मेदिनीं गजपतौ खेष्विन्द्रियेन्दौ शके।

प्रीत्यै सद्गुणिनां मयाऽप्यनुनयाट्टीका मुरारेः कृता

तां सन्तः परिशीलयन्तु बहुशो भूयो नतः प्रार्थये ॥

अस्माच्च पद्यात् अनर्घराघवस्य टीका ख (०) इषु (५) – इन्द्रिय (५) इन्दु (१) सम्मिते अर्थात् १५५० शकाब्दे तत्प्रतिरूपके १६२८ खीष्टाब्दे रचितेति प्रतीयते।

अनेन प्रणीतायां सुबन्तप्रदीपिकायां निम्नोद्धृतं पद्यं दृश्यते—

अङ्के श्री पुरुषोत्तमस्य वसुधाभर्तुश्चतुर्विंशति–
ख्याते बाल्यवता मया विरचिता व्युत्पन्नसंप्रीतिदा।
याचे मूर्ध्नि निधाय पाणियुगलं नम्रो गुणग्राहिणः
पुंस्त्रीक्लीबसुबोधिकां च सुधियः संशोधयन्तु स्फुटम् ॥

अत्रोद्धृतः खुर्दाधिपतेः पुरुषोत्तमस्य देवस्य गजपतेश्चतुर्विंशत्यङ्कः खीष्टीयेन १६२१ संवत्सरेण संवदतीति श्री केदारनाथ–महापात्र महोदया (Curator Orissa State Museum, Bhubaneswar) अभिप्रयन्ति। ❀

❀ The above verse clearly states that the work was finished in the 24 th Anka year of King Purushottama Deva, who was the king of Khurda Raj family as will be shown below. This Anka year of Purushottama Deva I. the founder of the Khurda Raj family fell in 1621 A. D. which may bee taken as the date of composition of this work on Grammar,

(Vide Nos 3 to 4 of Vol VIII, of the Orissa Historical Research Journal, 1960)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
महामहोपाध्यायैः श्रीहरप्रसाद शास्त्रिभिरपि अनेन विरचितायां मनोहारिणीनामिकायां हंसदूतस्य टीकायां दृश्यत इति अत्र उल्लिखितं पद्यमुद्धृतम् *

अङ्के श्रीनरसिंहदेवभूमितिलकस्याम्भोधिसंख्ये मया
कालेनापि कृता यथायथमियं टीका सतां प्रीतये।
यस्यां यद्यदलेखि विभ्रमवशाद् यद्वा भ्रम त्वम्भ्रमा-
च्छोध्यं तत्तदमेध्यमेव निपुणैर्याचे नतः साञ्जलिः ॥

अत्रोद्धृत श्रीनरसिंहदेवस्य भूमितिलकस्य चतुर्थोऽङ्कः ख्रीष्टीयेन १६२६ संवत्सरेण संवदतीति त एव श्रीकेदारनाथमहापात्रमहोदयाः प्रतिपादयन्ति। †

पद्यचतुष्टयस्य परिशीलनेन नीलाद्रिनाथशतकं, सुबन्तप्रदीपिका, हंसदूतस्य मनोहारिणी टीका, अनर्घराधवस्य टीका च यथाक्रमं १६१४, १६२१, १६२६, १६२८ ख्रीष्टीयसंवत्सरेषु विरचिता इति प्रतिपादित भवति। अपि च सुबन्तप्रदीपिका बाल्यवता तेन प्रणीतेति स्ववचनेन कविरत्नोऽयं सप्तदश शताब्द्याः प्रथमे भागे समुत्पन्न इति वक्तुं शक्यते।

एष हि अनर्घराधवस्य प्रथमद्वितीयाङ्कयोः टीकावसाने एवमुल्लिखति--

---

* Notices of Sanskrit Manuscripts by M. M. H. P. Shastri.

† I took this Narasinha Deva to be a king of the Parlakhemudi Raja family. But in view of the second verse quoted above, it can now be definitely ascertained that the King Narasinha Deva referred to in the above verse is identical with the King of that name of the Khurde Raja family

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"पाराशर्यमुखारविन्दविगलद्गूढार्थवाक्यावली–
व्याख्याव्याकुललब्धकर्णपटलीसिद्धान्तदीक्षागुरुः ।
सोऽभून्नारदबुद्धिदः सुमनसामानन्दमिश्रः सुधी–
स्तत्पुत्रीयमुरारिकाव्यविवृतावङ्कोऽयमाद्यो गतः ॥"
"व्याकुर्वन्तमनेकधा शुककृतां गूढार्थवाक्यावलीं
यं दृष्ट्वा विदिता बुधैरपि बुधा वैयासकिं मेनिरे ।
सोऽभूच्चण्डवितण्ड पण्डितचयै रानन्दमिश्रो नुत–
स्तत्पुत्रीयमुरारिकाव्यविवृतावङ्को द्वितीयो गतः ॥"

उपर्युद्धृताभ्यां पद्याभ्याम् अस्य पिता आनन्दमिश्रस्तात्कालिकैः पण्डितवर्यैरभिनन्दितः असाधारणः विद्वानवर्तत, तेन च विद्वन्मनोहारिणी काचन भागवतस्य व्याख्यालिख्यतेति प्रतीयते ।

एवमसौ हंसदूतस्य व्याख्याया मनोहारिण्या उपसंहारे पद्यमिदं व्यलिखत्–

'उद्यद्व्याकृति भव्यकाव्यरचनाऽनङ्कारसांख्यश्रुति–
स्मार्त्तनिक पुराणनाटककथाकोषादिभाषाविदः ।
धीरश्रीधरमिश्रपादकमलाद्भ्रातुर्मम ज्यायसो
ऽधीतं यत्तदिह व्यलेखि यदिदं गीतं हि तन्मामकम् ॥

पद्याच्चास्मात् श्रीधरमिश्रोऽस्य ज्यायान् भ्राता, स च व्याकरणे, काव्येषु, अलङ्कारेषु, सांख्ये, श्रुतिषु स्मृतिषु, पुराणेषु,

---

in whose reign he also wrote his commentary on अनर्घराघवम् The fourth Anka of Gajapati Narasinha Deva run from 15, 8. 1623 to 15. 8.1624 A.D.

(Vide Nos 3 and 4 of Vol VIII of the Orissa Historical Research Journal, 1960)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाटकेषु कथाकोषादिषु च लब्धप्रतिष्ठः, तस्मादेव चानेन का अपि विद्या अधीता इति प्रतीयते । परन्तु श्रीधरमिश्रेण कृता आनन्द-मिश्रेण च कृताः केऽपि ग्रन्था नाद्यावधि दृक्पथमायाताः ।

संगीत सरणिकर्ता च नारायण मिश्रः अस्य पुत्र इति संगीत-सरणावुल्लिखितमस्ति ।

एवमस्य वंशावली प्रस्तूयते—

श्री अनन्द मिश्रः

श्रीधर मिश्रः — श्री पुरुषोत्तम मिश्रः

श्री नारायण मिश्रः

अयं हि शाण्डिल्यगोत्रज इति अनेन विरचिताया नैषधीयटीकाया अन्तिमपद्येभ्यः प्रतीयते । तेष्वन्यतमत्पद्यमत्र सहृदयानां मनोरञ्जनाय उद्धियते—

शाण्डिल्यान्वयदुग्धवरिधिसुधाधामा धरित्रीतला-
लंकारो मधुरानवद्यगुणवानानन्दमिश्रोऽभवत् ।
तत्सूनोः पुरुषोत्तमस्य विदुषामानन्दहेतौ कृतौ
श्रीमन्नैषधकाव्यचारुचिवृतौ सर्गोऽयमाद्यो गतः । इति ।

एतस्य पुत्रो नारायण मिश्रोऽपि स्वकृतौ संगीतसरणौ आत्मानं शाण्डिल्यवंशावतंसायितसकलशास्त्रकुशल–संगीत–साहित्यविद्यार्णव–कर्णधार कविरत्न पुरुषोत्तममिश्रस्यात्मजं निर्दिशति । तेनाय शाण्डिल्य-गोत्रज इति निस्सन्देहं वक्तुं शक्यते ।

स्थानम्

इदानीमस्य जन्मस्थलं निरूपयामि । अनेन कृतानां हि टीकानां 'पुरिपढिटीका' इति उत्कले विशेषतो गञ्जाममण्डले बहुलः प्रचारो वर्तते । गञ्जाममण्डले च पाढीति समाख्यया कश्चन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रोत्रियब्राह्मणसम्प्रदायो वर्तते। सोऽयं सम्प्रदायो यदा कपिलेन्द्र–देवस्य औरसपुत्राः पित्रा कृताभिषेकेण पुरुषोत्तमदेवेन विवदमाना दक्षिणां दिशमाश्रित्य गञ्जाममण्डले खण्डामुष्टि (खेमुण्डी) राज्यं समस्थापयन्, तत आरभ्य प्रवर्तमानोऽस्ति। कालक्रमेण तदिदं खण्डामुष्टि राज्यं खेमण्डी - पारलाखेमण्डीरूपेण द्विधा विभक्तमासीत्। खेमण्डीराज्यं च स्वल्पखेमण्डीवृहत्खेमण्डीति द्विधा विभक्तमासीत्। सर्वेष्वपि एषु त्रिषु राज्यखण्डेषु पाढीसम्प्रदायस्यादिपुरुषा राजगुरुत्वेन पुरोहितत्वेन, राजसभापण्डितत्वेन दानाध्यक्षत्वेन च नियुक्ता अवर्तन्त। कालक्रमेण चैतत्सम्प्रदायस्य कूटस्था विद्वांसो महुरीराज्यं चित्कटिराज्यं च स्वपाण्डित्यबलेनायत्तं चक्रुः। एवं गञ्जाम-मण्डले प्रतिष्ठिते राज्यपञ्चके भारद्वाज गोत्रीयाः शाण्डल्यगोत्रीयाश्च विपश्चितो मिश्रोपाधिकाः खेमण्डीराज्येषु त्रिषु, काश्यपगोत्रीया नन्दोपाधिका विपश्चितो महुरीराज्ये, कौशिकगोत्रीयाश्च दाशोपाधिका चित्किटिराज्ये राजप्रतिष्ठता असंख्यानि शासनानि तेभ्यस्तेभ्यो नृपतिभ्य अधिगत्य कृतवसतयोऽजायन्त इदानीमपि तेषां वंशधरा भारद्वाजगोत्रीया बृहत्खेमण्ड्यां पुटमार्यां (पोडामारी) पारलाया मुक्तापुरशासने, शाण्डिल्यगोत्रीया वाहुदातीरवर्तिनि जकरग्रामे, काश्यपगोत्रीयाः पद्मपुरे, कौशिकगोत्रीयाश्च चित्किटिसमीपवर्तिनि खजुरियाशासने च वर्तते। अस्य सम्प्रदायस्य कुटस्थः सर्वेऽपि वेद-पाठिनः पण्डिताश्चावर्तन्त। अतएव अस्मिन् सम्प्रदाये 'पाढी' 'पण्डा' इति पाठिपण्डित शब्दाभ्यामुद्भूतमुपाधिद्वयं प्राधान्यमलभत। पूर्वोक्तमिश्रनन्ददाशाद्युपाधयश्च तिरोहिता आसन्। शाण्डिल्यगोत्रीयः अस्माकं पुरुषोत्तममिश्रस्तमिमं सम्प्रदाय-मधिकरोति। अतएवास्य 'पुरिपाढी'ति प्रसिद्धिरपि वर्तते। अस्य च जन्मस्थानं गञ्जाममण्डलान्तःपाती 'जकर' इत्याख्यया प्रसिद्धो ग्रामः। अद्यावधि एतस्य वंशधरा जकरग्रामे तत्समीपवर्तिषु मुक्ता-पुर-वीरपद्मनाभपुरशासनादिषु वर्तन्ते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीवन चरितम्

एष हि विद्वत्कुले जनिमधिगत इति प्रागवोचम् । जनश्रुतिरेयं प्रचलति यदेष वाल्ये मातुलस्य तदानीं सर्वतन्त्रस्वतन्त्रत्वेनविशेषतो वैयाकरणत्वेन प्रसिद्धस्य चिरिक्रिटि समीपवर्ति खजूरीय (खजुरिया) शासनमधिवसतो नरहरिशास्त्रिणः सकाशात् व्याकरणमधिजगौ । पितुरानन्दमिश्रात् भ्रातुश्च श्रीधर मिश्रात् अन्यानि शास्त्राणि अधीतवान् । संगीतं तावदस्य कुलविद्या । अस्य पिता 'नारदबुद्धिद' इत्युल्लिखितः । अस्य च पुत्रोऽनन्तमिश्रः संगीतसरणिं निबबन्ध । अत एवासौ पितुः संगीतविद्यामायत्तीचकार । असौ हि पुरुषोत्तमदेव-गजपति महाराजस्य, तदन्ते तत्पुत्रस्य च नरसिंहदेवस्य संसदमलङ्कर्वाणोऽपि सगीताध्यापनार्थं पारलाखेमण्डीमगच्छत् , तत्र च पद्मनाभ गजपति महाराजस्य तनुजन्मानं नारायणदेवं संगीतमध्यापयन्नवर्तत । पुरुषोत्तमदेवाच्चासौ 'कविरत्न' इत्युपाधिं लेभे । अन्तिमं च जीवनं पुरुषोत्तमक्षेत्रे ऽत्यवाहयत् । पुरुषोत्तमक्षेत्रे च मर्त्यं शरीरं परितत्याज । एष हि परमभागवत आसीत् । नीलाद्रिनाथ शतकं, यमक-भागवतं चास्य परमभागवतत्वं प्रमाणयतः ।

अनेन बहवो ग्रन्थाः प्रणीता इति जनश्रुतिर्वर्तते । परन्तु नैतावदवधि अनेन विरचित एकोऽपि ग्रन्थः प्रकाशमुपगतः । अनेन प्रणीतं नीलाद्रिनाथशतकं 'मनोरमा'याश्चतुर्थपञ्चमवार्षिक सञ्चिकासु धारावाहिकरूपेण प्रकाशितम् । इदानीं च पुस्तकाकारेण प्रकाश्यते । यमक भागवतमप्यनेन प्रणीतं मनोरमायाः षष्ठवार्षिक-सञ्चिकासु क्रमशः प्रकाशयिष्यते । अनेन प्रणीता 'हंसदूतस्य, अनर्घ-राघवस्य नैषधीयचरितस्य च टीका गञ्जाममण्डले उपलभ्यन्ते व्यवह्रियन्ते च । नीलाद्रिनाथशतकं प्रकाशितम् । यमकभागवतं च मत्सन्निधौ वर्तते, 'मनोरमा'यां च प्रकाशयिष्यते । संगीतनारायणं नाम संगीतपुस्तकं गङ्गवंशावतंसस्य पद्मनाभगजपतिमहाराजस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तनुजन्मना गजपति नारायण देवेन लिखितम् । स चायं गजपति-नारायणदेवः अस्माकं कवेः शिष्यः । तेन च संगीत नारायणे गुरोरपर-ग्रन्थद्वयस्योल्लेखः कृतः । एवं तत्रोल्लेखो दृश्यते–

(क) 'अस्मद्गुरु कविरत्न पुरुषोत्तममिश्राणां रामचन्द्रोदय प्रबन्धे "ताटक सुत नाशकं नौमि कौशिक यागरक्षकम् " इति

(ख) 'अत्रास्मद्गुरु कविरत्नमिश्राणां प्रसिद्ध तालसंग्रहादौ" इति ।

तेन रामचन्द्रोदयं तालसंग्रहश्च अनेन विरचिते इति प्रतीयते । अन्ये के नाम ग्रन्थाः प्रणीता, नाद्यावधि ज्ञायते ।

संगीतनारायणमप्यस्यैव कृतिः । परन्तु स्वशिष्यनाम्ना प्रकाशितमिति श्रूयते । एतादृश जनश्रुतौ किमपि सारस्यं वर्तत इति वक्तुं शक्यते । गजपति नारायणेनापि स्वयं लिखितम्–

'यदधीतं कविरत्न पुरुषोत्तममिश्रतो मया सुधिया,
तत्प्रकटीकृतमस्मिन् सुधियः परिशोधयन्तु शतश' इति
"नीलाद्रिकन्दरानन्दि मन्दरालयवन्दितम् ।
वन्दे वन्दारुमन्दरामन्दिरामन्दिरं महः ।।"

इति मङ्गलाचरणपद्यमपि गुरोरविकलमुद्धृतम् । सकलश्च विषयो गुरोरुपदेशानुसारेण लिखितइति च स्वयमेव स्वीकृतम् । तत्पुरुषोत्तममिश्रेण लिखितं भवतु वा नवा गुरोर्वाक्यं लिखितमिति नास्ति सन्देहः ।

पुरुषोत्तममिश्रः कविर्व्याख्याता चासीदिति नास्ति सन्देहः । तस्य व्याख्यातानां काव्यानां च परिचयः पृथक् पृथक् दास्यते । इदं तु निश्चप्रचं यत्स संगीते साहित्ये च परां प्रशस्ति गत इति । तदीयव्याख्यानानां च कोऽपि विशेषो वर्तत इति पृथक् प्रति-पादयिष्यते ।

—०—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिक्षाप्रियग्रन्थमालाया द्वितीयं पुष्पम्

बह्वारम्भो लघुः क्रिया

MUCH ADO ABOUT NOTHING

By

WILLIAM SHAKESPEARE

अनुवादकः

पण्डित कविराजः

श्री अनन्तत्रिपाठि शर्मा M.A , P.O.L , M.P.

साहित्यशिरोमणिः, मीमांसाविद्याप्रवीणः, आयुर्वेदाचार्यः,

आयुर्वेदचक्रवर्त्ती

(पारलाखेमुण्डि-संस्कृतकलाशालायाः भूतपूर्वः प्रधानाध्यापकः)

ब्रह्मपुरम् (ओडिशा)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुद्रयिता प्रकाशकश्च

श्री अनन्त त्रिपाठि शर्मा

शिरोमणि मुद्राशाला, ब्रह्मपुरम्,

गञ्जाम मण्डलम्

प्रथमं संस्करणम्

।१९५६।

मूल्यं तिस्रो रूपिकाः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाट्योल्लिखिता व्यक्तयः

पुरुषाः

१। दानापीडः = आरागणस्य राजा
२। दानयक्षः = जारजस्तस्य भ्राता
३। कुमुदकः = फ्लरिन्सवास्तव्यो वीरः
४। विनोदकः = पादुकावास्तव्यो वीरः
५। लीलानाथः = महीशानायाः शासकः
६। अनन्तः = तस्य भ्राता
७। बालसारथिः = दानापीडस्य संगीतज्ञः
८। कर्णाटः = दानयक्षस्य अनुचरः
९। वैरोचकः = " "
१०। प्राज्ञेशो मठाधिपतिः = चर्चालयपुरोहितः।
११। दुर्गतारिः = प्रधानराजभटः
१२। वीर्यशाली = रक्षी राजभटः
१३। नागरिकः = नगरस्य लेखाधिकारी।

स्त्रियः

१। हीरा = लीलानाथस्य दुहिता
२। विचित्रा = लीलानाथस्य भ्रातुष्पुत्रिका
३। मार्गरीतिः = हीरायः परिचारिका
४। ऊरुशीला " "

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाटकोल्लिखितानां व्यक्तीनां मौलिकरूपाणि

१। दानापीड:=Don Pedro, Prince of Arragan

२। दानयक्षः=Don John, His bastard brother

३। कुमुदक:=Claudeo, a young lord of Florence

४। विनोदक:=Benedece, a young lord of Padua

५। लीलानाथ:=Leonate. Governor of Messina

६। अनन्त:=Anteneo, his brother

७। बालसारथि:=Belthasar, attendant on Don Pedro

८। कर्णाद:= } Conrade } =Fallowers of Dan John

९। वैरोचक= } Boracheo }

१०। प्राज्ञेशो मठाधिपति:=Friar Francis

११। दुर्गतारि:=Dogebery Chief constable

१२। वीर्यशाली=Verges=constable

१३। नागरिक:=Saxton

१४। हीरा=Hero, daughter of Leonate

१५। विचित्रा=Bectrice niece to Leonate

१६। मार्गरीति= } Margaret } Gentle women attending on Hero

१७। ऊरुशीला= } Uersila }

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आमुखम्

शिक्षाप्रियः षोडशशताब्दीयः । षोडशशताब्द्या लेखकाः कवयश्च जीवनचरितलेखने नैव बद्धादरा अवर्तन्त । शिक्षाप्रियेण स्वयं स्वजीवनचरितं न लिखितम्, नापि तदानीन्तनेन अपरेण । अतस्तस्य जीवनचरितमद्यावधि यदुपगतं तत्सर्वं जनश्रुतिमूलकमेव ।

तस्य मृत्योरेकशतवत्सरानन्तरं 'रो' नामकेन सुधिया एका पुस्तिका विलिखिता । पुस्तिकेयं क्षुद्राकारा शिक्षाप्रियस्य ग्रन्थानां समालोचनाप्रवणाऽपि तस्य जीवनचरितं सक्षिप्ततया विवृतवती तत्रत्यानि तथ्यानि सुप्रसिद्धात् अभिनेतुः 'वेटारटले' नामकात् सगृहीतान्यासन् । ततः परमेकशतवत्सरेभ्योऽनन्तरं बहुभिर्मनीषिभिर्बहुधा प्रयतमानैरुच्चावचानि तथ्यानि संगृहीतानि । तेषु अव्रि-उड्-अलडिश प्रभृतीनां नामानि उल्लेखमर्हन्ति । १७१० खीष्टाब्दे 'मेलोना' नामा विपश्चित् शिक्षाप्रियस्य जीवनचरितं ग्रन्थाकारेण प्राकाशयत् । तदनन्तरमपि डाइस्-हालिहालिओएल-कलियार-नाइटप्रभृतिभिरपि सुधीभिर्बहूनि तथ्यानि संगृहीतान्यासन् । एवं प्राचीनैः संग्रहकारिभिर्बहुधा प्रयतमानैर्यानि तथ्यानि संगृहीतानि, तैरेवोपादानैः शिक्षाप्रियस्य जीवनचरितं किञ्चिदिव ज्ञातुं शक्यते ।

महाकविरयं १५६४ खीष्टाब्दस्य एप्रिलमासस्य २३ त्रयोविंशे (केषाञ्चिन्मते षड्विंशे) दिवसे वरवक्रच्छायान्तरा-(Warwick Shire)न्तः पातिन्यां ष्ट्राट् फोर्ड्नामिकायां ग्रामटिकायां जनिमलभत । अस्य जनकः जह्नशिक्षाप्रियः (John Shakshpeare) कृषिजीवी अवर्तत । पट्टवस्त्रमांसव्यवसायी गोमहिषादिक्रयवि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
क्रयादिषु च बद्धादर आसीत् । एषां हि सम्भ्रान्तो लोकप्रियश्च बभूव । तस्या ग्रामटिकाया पौरमुख्योऽपि बभूव । शिक्षाप्रियस्य माता 'मोरी अडेन' नाम्ना परिचिता आसीत् । साऽपि उच्चकुलप्रसूता समृद्धस्य रवर्ट नामधेयस्य तन्नगरवासिन एव दुहिता । विवाहावसरे जह्लशिक्षाप्रियः अनल्पां भूमिं यौतुकरूपेण अलभत । सेयं भूमिस्तस्य कृषिजीविकायां परमुपकारं कृतवती । तयोर्दशसु सन्ततिषु अस्माकं महाकबिः शिक्षाप्रियस्तृतीयो भवति । महाकविरयं यस्मिन् गृहे जनिमलभत, तदिदं साम्प्रतमपि तीर्थागारत्वेन सुरक्षितं वर्तते ।

महाकवेरस्य बाल्यं जीवनमन्धतमसाच्छन्नं वर्तते । तस्यामेव ग्रामटिकायामेकस्यां पाठशालायां विद्याभ्यासमकरोत् । सर्वदा पितुर्वाणिज्ये साहायकमाचरन्नसौ पाठे नैव समधिकामासक्ति-प्रादर्शयत् । अत्र अध्ययनावसरे आङ्ग्लभाषायां समधिकां व्युत्पत्ति-माससाद । ग्रीक् ल्याटिन्भाषयोरपि व्यवहारोपयोगि ज्ञानमुपार्जि-तवान् । एष हि चतुर्दशे वत्सरे पाठशालामत्यजत् । पितुः कृषिकार्ये व्यवसाये च साहाय्यं कर्तुं बद्धमतिरसौ पाठशालां तत्याज,न चोन्नतां शिक्षामवापेति जनश्रुतिर्वर्तते । Love's Labour Lost नामकस्य नाटकस्य हलपर्णाशः (Holefernes) अस्याध्यापकस्य रूपान्तर-मिति समालोचका अभिप्रयन्ति । एतत्पात्रस्याश्रयेण स स्वगुरोर्गुण-दोषान् प्रादर्शयदिति प्रतिपादयन्ति ।

पाठत्यागानन्तरं स पितुर्व्यवसाये कीदृशं साहाय्यमकरो दिति विज्ञातुं न किमपि साधनमस्ति । यौवनारम्भे स कस्यचित् न्यायोपजीविनः सन्निधौ कंचित्कालमवर्तत । अतएवास्य नाटकेषु न्यायसम्बद्धा विषया उल्लिखिता दृश्यन्ते । अस्मिन् समये तस्य पितुर्वाणिज्यमवनत्युन्मुखमास्त । ऊनविंशतिवर्षीयोऽसौ आत्मनो वयसा अष्टवर्षाधिकां कांचन 'आने हातवती' (Anne Hathaway)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नानिकां महिलामुदवहत् । सोऽयं विवाहः १५८२ वत्सरे निव्यूढ आसीत् । १५८३ वत्सरे च तस्याः काचन कन्यका उत्पन्ना । सैयं सुशानेत्यभ्यधीयत । १५८४ वत्सरे च यमजौ सन्ताना-वुत्पन्नौ । तयोरेकः पुत्रः अपरा च कन्यका । पुत्रस्य नाम हेमलात (Hamlet) इति कन्यकायाश्च नाम जुडिया (Judith) इति । पुत्रोऽयमेकादशे वत्सरे उपरतः । महाकवेर्दाम्पत्यजीवनं नैव प्रीतिप्रदमवर्तंतेति श्रूयते । विशेषतोऽयमस्मिन्नेव समये ग्रामवासिनो धनाढ्यस्य सारथोमासलुसिनामकस्य न्यायविदो वृक्षवाटिकां विनाऽनु-मतिं प्रविश्य फलादिकं हरिणांश्च आदधातिस्म । ज्ञातसारेण च तेन बहुवारं दण्डितः । तदुद्देशेन च व्यङ्गकवितामुल्लिख्य प्रतिशोधं निनाय । नितान्तं कुपिताच्च तस्मात् भीतभीतो ग्रामं परितत्याज । पितुर्व्यवसायेऽवनतिः, असदृशं दाम्पत्यजीवनं प्रतिवेशिनो धनाढ्यात् लुसीनामकात् न्ययविदश्च दण्डभीतिस्तस्व गृहत्यागे कारणमवर्तत । अस्यैव न्यायविदश्चरित्रं Hanry VI नामकस्य रूपकस्य Justice Shallow नामके पात्रे प्रतिफलितं वर्तते । सोऽयं गृहत्यागः १५८४ वत्सरे सम्पन्न आसीत् ।

बहुभिः क्लेशैरुत्पीडितो महाकविः स्वग्रामं पुत्रदारांश्च उपेक्ष्य जीविकामर्थयमानो लण्डन नगरे उपस्थितः । तदानीं लण्डन-नगरमुन्नतेश्चरमसीमायामवर्तत । 'ब्लाक् फ्रायार्सथियेटर' नामकं प्रेक्षागृहं तदा लब्धप्रतिष्ठमवर्तत । श्रूयते तत्रायं कविः प्रथमतोऽश्व-पाल–(Horse boy) त्वेन नियुक्त आसीत् । रूपकदर्शनार्थमागतानां सादीनां सम्भ्रान्तानां दर्शकानामश्वसंरक्षणमस्य कर्तव्यमासीत् । कालक्रमेणासौ प्रेक्षागृहस्याभ्यन्तरमासाद्य अभिनेता नाटककारश्च समजनि । प्रथमतोऽसौ प्राचीनानि नाटकानीषद्विपरिणमय्य विलिखतिस्म । तत्र च सिद्धहस्तोऽसौ स्वतन्त्रतया रूपकाणि रचयितुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
प्रावर्तत। अस्य च रूपकाणि प्रेक्षकाणां मन आहर्तुमलमासन्। स्वकृतानां नाटकानां प्रदर्शने एष अभिनेताऽप्यवर्तत। श्रूयते—असौ 'हेमलाते' (Hamlet) प्रेतस्य भूमिकायां 'यथा ते रोचते' नाटके च अदन्त (Adam) भूमिकायां परं कृतित्वं दर्शयतिस्म। अभिनेतृत्वेनाप्यस्य काऽपि ख्यातिरजायत। इतरेषामभिनेतृणां नामभिः सहास्यापि नाम उद्घोषितं वभूव। १५६४ खीष्टाब्दे तमसानदीतीरे व्लाक् फ्रायार्सथियेटरकर्तृपक्षैः 'ग्लोब्थियेटर' नामकं प्रेक्षागारं संस्थापितम्। तत आरभ्यासौ ग्लोबथियेटरनामके प्रेक्षागृहे कृताभिनयो नाटकलेखकत्वेन परां प्रसिद्धिमुपगतः। प्रायशो दशभिर्वर्षैरस्य नाटककारत्वेन सर्वत्र प्रतिष्ठा आसीत्। तस्य चेयं प्रतिष्ठा सोवपत्तनाधीशस्य Earl of Santhampton) प्रोत्साहेन सम्भवपरा वभूव। तस्यैव च प्रसादेन राज्ञ्या एलिजावीथ्या (Queen Elizabeth) सम्मानस्य पात्रं समजनि। तदानीमस्य यशो विभवेन साकं समेधते स्म। स स्वग्राममागत्य विक्रीतपूर्वाणि सर्वाण्यपि पैतृकानि रिकथानि पुनः क्रीतवान्। स्वजन्मभूमौ ष्ट्राटफोर्डनगरे अपूर्वमेकं (New place) प्रासादं च क्रीतवान्। लण्डननगरे च चाम्बरलेन प्रतिष्ठितसमितौ 'ग्लोवथियेटर' समितौ चांशभागी समपद्यत।

लण्डननगरावस्थानसमये तेन ३७ सप्तत्रिंशत् रूपकाणि लिखितानि। प्रायशः प्रतिवर्षं रूपकद्वयं लिख्यते स्म तस्य। प्रथमं रूपकं Love's Labour Lost इति अन्तिमं च Tempest इति समालोचका अभिप्रयन्ति।

नाटककारत्वेनएतस्ययशः सौरभं सर्वत्र प्रसृतमासीत्। सौत्रपत्तनाधीश, 'एसेक्स' अधीशः लर्ड्मन्नोक प्रभृतयः राज्ञी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बह्वारम्भो लघुः क्रिया

MUCH ADO ABOUT NOTHING

प्रथमोऽङ्कः

प्रथमं दृश्यम्

स्थानम्—लीलानाथस्य१ प्रासादः

ततः प्रविशन्ति लीलानाथः, हीरा,२ विचित्रा३ दूतश्च।

लीलानाथः—लेखादस्मात् अवगच्छामि-आरागणस्य अधिपतिर्दानापीडः अद्यरात्रौ महीशानाया४ मुपस्थास्यते।

दूतः-साम्प्रतं सोऽत्यन्तं सन्निहितो भवेत्। इतो कोशत्रयमित एव दूरे, तं विहाय समागतोऽस्मि।

लीलानाथः—अस्मिन् आयोधने कियन्तो नाम भद्रमुखा निहताः अभवन्?

दूतः—अत्यन्तमल्पाः, न च तेषु कोऽपि गणनीयो वर्तते।

लीलानाथः स खलु विजयो विजयो नामः, यत्र किल विजेता स्वभटान् अक्षतान् आदाय परावर्तते। इतो विभावयामि यदुत दानापीडः समधिकां सम्भावनां व्यतरत्तरुणाय फ्लरेन्सनिवासिने कुमुदाय५।

१। लीलानाथः—Leonato

२। हीरा—Hero

३। विचित्रा—Beatrice

४। महीशाना—Messina

५। कुमुदः—Claudio

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दूतः—अर्हत्येव स सर्वात्मना तादृशीं सम्भावनाम् । स्थान एव च दानापीडः सम्भावनां प्रादर्शयत् । स हि किशोरएव वयोऽतिगानि कार्याणि निर्वहति, मेषरूपेण च सिंहस्य कर्म कुरुते । वस्तुतस्तु यदहं वाचा प्रकटयितुं प्रभवामीति भवान् कलयति ततोऽप्यधिकां सम्भावनामर्हति ।

लीलानाथः—महीशानायां तस्य एकः पितृव्यस्तिष्ठति । स खलु परं प्रमुदितो भवेदेतदाकर्ण्य ।

दूतः—तस्मा अपि मया लेखो दत्तएवास्ते । प्रमोदोऽपि तस्मिन् उपलक्षितः । स च प्रमोदस्तावान् संजातो येन दुःखस्य संकेतमश्रुजलं विना नैव पर्यमीयत ।

लीलानाथः—किमसौ लोतकप्रवाहेण प्लावितः समजनि ?

दूतः—समधिकपरिमाणेन ।

लीलानाथः—नूनं सानुक्रोशतायाः कश्चन परिवाहः । विरलानि किल तथा सरलानि मुखानि, यानि एवमश्रुजलैः क्षालितानि भवन्ति । क्रन्दने प्रमोदनापेक्षया प्रमोदे क्रन्दनं कियदधिकं ललितं भवति !

विचित्रा—अपि नाम भद्रमुखः धुन्धुमारः संग्रामात्प्रतिविवृत्तो न वा ?

दूतः—भद्रे, नाहं तादृशं नाम जानामि । न कोऽपि तथानामा सकलास्वपि सेनासु वर्तते ।

लीलानाथः कस्य कृते त्वं पृच्छसि भ्रातुष्पुत्रि !

विचित्रा—पादुकाया अधिवासिनं विनोदकं२ मम मित्रमनु पृच्छामि ।

दूतः—अये सः ! स खलु प्रतिनिवृत्त, : समधिकं तथा प्रमुदितो यथा न कदाचिदवर्तत ।

---

१ । पादुका—Padua

२ । विनोदकः—Benedick

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विचित्रा– एष एव हि महीशानायां पट्टिकाः संस्थाप्य शरायोधने कामदेवाय आह्वानमकरोत् । मम पितृव्यस्य हास्यकारश्च कामदेवस्य प्रतिभूः शकुनिशरायोधने प्रत्याह्वानम् अकार्षीत् । प्रार्थये तावत्कथय - कति नाम तेन समरे घातित। भक्षिताश्च । ब्रूहि कति नाम तेन घातिताः यदहं प्रत्यज्ञासिषं सर्वानपि घातितान् भक्षयितुम् ।

लीलानाथः–भ्रातुष्पुत्रि. त्वं तावद् भद्रमुखं विनोदकमतिमात्रं विद्रूपयसि, नाहं संशये, स तु तव विद्रूपाणां समुचितं प्रतिवचनं दास्यत्येव ।

दूतः– भद्रे, तेन समरे, कापि समीचीना सेवा अक्रियत ।

विचित्रा– स खलु पर्युषितखाद्यभाण्डागारः । भोक्तुमपि पारङ्गमः अत्यद्भुतभक्षणकर्ता, बुभुक्षा चास्य परं प्रखरा विद्यते ।

दूतः– असाधारणो योद्धा च भवति भद्रे !

विचित्रा– यत्सत्यमेष महिलासु शूरो भवेत् । पुरुषेषु तु कीदृशः ?

दूतः – अभिज्ञातगुणैरुपस्कृतोऽसौ प्रभुषु प्रभुः, मनुष्येषु च मनुष्यो गण्यते ।

विचित्रा — यत्सत्यं स तथैव । नैवावरो भवति नगण्यवस्तुनः । तथा गणनायां तु वयं प्रकृत्या मरधर्माणो भवामः ।

लीलानाथः– नान्यथा सम्भावयतु मम भ्रातुष्पुत्रिकां महाभागः । अस्या विनोदकस्य चान्तरा कश्चन मधुरः संग्रामः प्रचलितोऽस्ति । उभावपि नावहीयेते, उभयोरपि चातुरीकलहः प्रवर्तत एव ।

विचित्रा– तावता न किमपि लभते सः । आवयोरतीते संमर्दे तस्य पञ्चसु चातुरीषु चतस्रो विलयं गताः । एकैव साम्प्रतमधि करोति । तया चासौ मोदतामात्मानं च स्वकीयादश्वाद् व्यवच्छिन्नत्तु । तदेव तस्यावशिष्टं वभवं येन स कश्चन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जन्तुरिति परिचीयेत। को वेदानीं तस्य सहचरो विचारशालो वर्तते ? यतोऽसौ प्रतिमासमेकमेकं भ्रातरं सशपथ स्वीकरोति।

दूतः– कथमेतत्सम्भवतु ?

विचित्रा– अत्यन्तं सहजतया सम्भवति। तस्य उष्णीषस्य आकृत्या तुल्यं तस्य मतं परिवर्तते, क्षणे क्षणे च प्रतिफलकमिव परिवर्तते।

दूतः– भद्रे, यथा पश्यामि नासौ भद्रमुखस्तव ग्रन्थेषु वर्तते।

विचित्रा– नहि नहि। यद्यभविष्यत् तदा ग्रन्थागारमहमग्निसादकरिष्यम्। प्रार्थये तावत्—कथय को वेदानीं तस्य सहचरो वर्तते ? किं न कोऽपि तरुणो वर्तते यः खलु पिशाचेनाभियातुं तेन साकं समुद्रयात्रायै साहसते !

दूतः– स खलु उदात्तस्यावदातस्य कुमुदकस्य साहचर्येण प्रायशो वर्तते।

विचित्रा– हा भगवत्। तर्हि स आमय इव तस्मिन् आपतिष्यति, स आमकरोग इव च झटिति आक्रमिष्यति, यावत आक्रान्तः सद्य एवोन्मादं गच्छति। सर्वथा देवस्तस्योदात्तस्य कुमुदकस्य श्रेयो विदधातु। यद्यसौ विनोदकेन परिगृहीतस्तर्हि सहस्राणि व्ययेत ततो विमुक्तिलाभाय।

दूतः– भद्र, अहं भवत्या सौहार्दमलिलषामि

विचित्रा– तथाऽस्तु, कुरु समीचीनं सौहार्दम्।

लीलानाथः– भ्रातुष्पुत्रि, किं मन्ये, न कदाचित्त्वमुन्मादिनी भूयाः।

विचित्रा– न कदापि यावज्जनवरीमासस्य प्रखराः करा आपतन्ति,

दूतः– अये दानापीड आपतति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततः प्रविशन्ति दानापीडः, दानयक्षः१, कुमुदकः
विनोदको, वस्त्रासारः २

दानापीडः–सखे, परमोदार लीलानाथ, विपदो वरितुं त्वं सन्नह्यसि। जगदिदं ताः परिजिहीर्षति, त्वं तु त्राः सभाजयसि।

लीलानाथः–नेतः पूर्वं कदाचित् भवत्प्रसादरूपा आपदो मे भवनं समागताः। यतस्ता आपदो गताः, इतःपरं भद्राणि भवेयुः। तदैव विपदः पुनरापतेयुः, भद्राणि च तिरोभवेयुः, यदा भवानितः प्रतितिष्ठेत।

दानापीडः– तर्हि त्वं सान्तःकरणस्ता उपगूहसि ! मन्ये एषा सा ते दुहिता भवति।

लीलानाथः—तस्या जननी तथा तां मामसकृद्वदति स्म।

विनोदकः– किं भवान् सन्दिग्ध आसीत्, येन तामपृच्छत्।

लीलानाथः—भद्र विनोदक, तदा त्वं शिशुरासीः।

दानापीडः– भद्र विनोदक, सर्वथा युज्यते ते वितर्कः। तावता वयं प्रतीमः त्वं कीदृशो मानवः। ततभवती सर्वथा पित्रा संवदति। तत्रभवति, मोदस्व, त्वमिदानीमुदारः पितेव उदारा सम्पद्यसे।

विनोदकः– भद्रमुखो लीलानाथस्तस्या जनक इति न सा स्वभुजे पितुर्मस्तकं निदधीत, यतो समग्रायां महीशानायां सा स इव, सोऽपि सेव।

विचित्रा– अये विस्मयमावहामि–त्वं तथालपन् वर्तसे ! भद्र विनोदक ! यद्यपि न कोऽपि त्वां गणयति।

विनोदकः– अये तत्रभवति डाकिनि ! इदानीमपि त्वं जीवन्तो वर्तसे !

१। दानयक्षः = Don John

२। वस्त्रासारः = Balthasar.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विचित्रा– कथमेतत्सम्भवति ? कथं डाकिनी म्रियतां यावत्सा भद्र-विनोदकसदृशं सुश्लाघनीयमाहारं लभते ! उदाराऽपि प्रकृतिर्डाकिनी सम्पद्येत यदि त्वं तस्या सम्मुखमापतेः ।

विनोदकः— तर्हि सा कञ्चुकमिव वहुरूपेति वक्तव्यं भवति । परन्तु इदं निश्चप्रचं यद्गुत सर्वा अपि महिला मां कामयन्ते, केवलं त्वं विशिष्यसे । हृदयं सम्प्रधार्थं अवगच्छामि न मे हृदयं कदाचिद् दृढं भवति, परन्तु न कामपि महिलां कामयते ।

विचित्रा– तदेतत्परमं भागधेयं महिलानाम् अन्यथा ताः शठेन कामुकेन प्रतारिता अभविष्यन् । सर्वथा देवोऽभिनन्दनीयो भवति । मदीयं च शोणितं सुशीतलं वर्तते । तेनाहं तव छेकोक्तिं शृणोमि, अन्यथा 'त्वाम् सर्वथा कामय' इति शपतः प्रेमिकस्यापेक्षया काके बद्धदृष्टिं बुक्कन्तं शुनकं श्रोतुं वहु मन्ये

विनोदकः– भगवान् तत्रभवत्यास्तादृशं मनोभावं चिरमक्षतं स्थापयतु, येन भद्रमुखास्तथेतरे वा जना एकस्याभूतपूर्वस्य नखलाञ्छितस्य मुखस्य दर्शनाद्रक्षिता भविष्यन्ति ।

विचित्रा– नखलाञ्छनं न ते मुखस्येव कस्यापि मुखस्य विच्छायताया अपेक्षया समधिकां विच्छायतामाधातुं प्रभवेत् ।

विनोदकः– साधु साधु, दुर्लभ एतादृशः शुकानुवादी शिक्षकः ।

विचित्रा–मम मुखस्य एकः खगस्तव मुखस्यैकस्मात्पशोर्महीयान्

विनोदकः–मम अश्वस्तव जिह्वाया वेगमलप्स्यत चेत्समीचीनम-भविष्यत् । अनवरतं सम्यगनुवर्तत । कृतार्थोऽस्मि । भगवतो नाम्ना वच्मि-विरता भव ।

विचित्रा–सर्वदापि त्वमुपसंहरसि भगवदाश्रयेण । परिचितपूर्वं एव त्वम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानपीड़ः—लील.नाथ, एते वयं समवेताः। भद्र! कुमुदक, भद्र विनोदक! मम प्रियसुहृल्लीलानाथः सर्वानपि व आमन्त्रयति स्म। अन्ततो मासमेकमत्र आवत्स्याम इति मया अभिहितम्, स तु हृदयेन प्रार्थयते तादृशं किमपि संविधानं येन वयं समधिकं कालं स्थास्यामः। सशपथं दृढं वच्मि-नासौ दाम्भिकः, परन्तु हृदयेन सह नाथते।

लीलानाथः—यदि शपथं करोषि, तर्हि नेदं प्रथमतया करोषि। (दानयक्षं प्रति) देव, भवतः स्वागतं व्याहरामि। भवतो भ्रातुर्महाराजस्यानुगत इति भवत आश्रवो भवामि।

दानयक्षः—अभिनन्दामि त्वाम्। नाहं वावदूक केवलं भवते धन्यवादानर्पयामि।

लीलानाथः—देवः प्रसीदतु पुरतो प्रसरितुम्।

दानापीडः—करं ते प्रसारय लीलानाथ, सर्वे वयं युगपद् गच्छामः। (कुमुदकं विनोदकं च विहाय अन्ये सर्वे प्रस्थिताः)

कुमुदकः—विनोदक, अपि नाम निरीक्षिता सामन्तलीलानाथस्य कुमारिका ?

विनोदकः—अवलोकिता, न पुनर्निरीक्षिता।

कुमुदकः—किमेषा काचन सम्भ्रान्ता ललना न भवति ?

विनोदकः—किं त्वं सम्भ्रान्तस्येव मम विवेकानुमतं यथायथं चोत्तरमाशासानः पृच्छसि उत प्रकृत्यनुमोदितमुत्तरम्। जानास्येव त्वमहं प्रकृत्या वामासु वामशीलो भवामि।

कुमुदकः—नहि नहि! प्रार्थये अहं ते शालीनमभिमतम्।

विनोदकः—किमर्थम्? यत्सत्यमहं विभावयामि सा तावदत्यन्त-प्रशंसार्थमतीवह्रस्वा, प्रशस्तप्रशंसार्थमतीवपिङ्गला, बहु-प्रशंसार्थं चातीवलघुर्भवति। केवलमेतावदेव तस्या विषये अभिप्रैमि। यदि सा यथा दृश्यते, तथा न स्यात्,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदा असुन्दरी भवेत् परन्तु यतः सा यथा दृश्यते, तथा भवति, न सा मह्यं रोचते ।

कुमुदकः–किं मां क्रीडनकं विभावयसि ? प्रार्थयेऽहम्, सत्यं ब्रूहि कथं त्वं तां विभावयसि ?

विनोदकः–किं त्वं तां क्रेतुमभिलषसि ? येन तथा विषयमनुसन्दधासि ।

कुमुदकः– किमेतादृशं रत्नं, समग्रमपि भूमण्डलं क्रेतुं प्रभवति ?

विनोदकः–अये ज्ञातम् ! तर्हि एतद्विचारणीयं भवति । प्रथमं ब्रूहि– किमेतद् विषादाञ्चितभ्रुवा वदसि अथवा हास्यप्रायस्य विदूषकस्य भूमिकामाधाय वदसि-यदुत अन्धः कन्दर्पश्चतुरो मृगावेक्षकः, अग्निदेवश्च असाधारणस्तक्षक इति । आगच्छ केन वा पथा त्वया सह संचरणे मादृशो जनस्तव चित्तवृत्तिमनुवर्तेत ?

कुमुदकः–मम दृष्ट्या एषा मधुरतमा महिला, नैतादृशी मया दृष्टपूर्वा ।

विनोदकः–प्रतिचक्षुर्विनापि अहं द्रष्टुं प्रभवामि । नाहमत्र तादृशं वैलक्षण्यं पश्यामि । अत्र तस्याः स्वसा वर्तते । तादृशं कोपनत्वमन्तरा सा तु सुषमया मेमासस्य प्रथमो दिवसो डिशम्वरमासस्यान्तिमदिवसमिव तामतिशेते । अस्तु मन्ये- न त्वं तस्याः स्वामी भवितुमिच्छसि । अपि सत्यम् ?

कुमुदकः–अवश्यं, न परिणेतव्यमिति प्रतिज्ञा कृता । परन्तु हीरा मे यदि प्रणयिनी सम्पद्यते, तर्हि तत्राहं स्थिरप्रतिज्ञः स्थास्यामीति न विश्वसिमि ।

विनोदकः–अये एवं पर्यवसितं भवति ! किमिति भूमण्डले नैक-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपलभ्यते, यस्तिरोहितं शृङ्गं१ विना मुकुटं धारयेत्। किमहं षष्ठिमतीतं नैकमपि ब्रह्मचारिणं पश्येयम्?। अस्तु यथेच्छं समाचर। ग्रीवायां युगधुरां बधान। तथैव लाञ्छनमपि धारय। रविवासरेषु च प्रणयस्य विषादच्छाया-मनुभव२। अये, पश्य दानापीडस्त्वां विचेतुं इतः प्रत्यावृत्तः।

(दानापीडस्य प्रवेशः)

दानापीडः--किं तद्रहस्यं येनात्र त्वमाबद्धोऽसि, न च लीलानाथ-मनुगतः?

विनोदकः--मामनुजानातु देवः--अहमुत्तरं दास्यामि।

दानापीडः--अहं त्वां प्रथममभियुक्तं करोमि।

विनोदकः--शृणु कुमुदक, शृणु। अहं मूक इव रसनां नियन्तुं पारयामि। तवापि तदेवाभिप्रेतमित्यवधारयामि परन्तु किं करोमि? मम अभियोगं सकृदालोचय। अथमसौ प्रेमातुरः। कया सहेति देवेन नियतं प्रष्टव्यं भवति। अवधारयतु देवः संक्षेपेण वच्मि-हीरया, लीलानाथस्य कुमारिकया।

कुमुदकः--यदनेन अभिहितं, तत्तथेति वक्तव्यं भवति।

---

१ अकयानः (Actain) स्नानं कुर्वन्तीं दयनां लोकयन् स तया हरिणत्वेन परिणामितः, स्वकुक्कुरैः खण्डशः कृतः। कृतदारपरिग्रहा जनाः सशृङ्गा मृगा इति शिक्षाप्रियसमये प्रसिद्धिरास्त।

२ आदित्यवासरेषु अकृतदारपरिग्रहा मोदन्ते, कृतदारपरिग्रहाः प्रणययातनामनुभवन्तीति समयः।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनोदकः--देव, इदं पूर्वमाभाणकमिव । ३

'नेदं तथा न च तथेति न चापि वाच्यम् ।
सत्यं, तथा हि घटतां भगवत्प्रसादात् ।

कुमुदकः--यदि मे चित्तवृत्तौ न किमपि परिवर्तनमाशु भवति, भगवान् प्रसीदतु न च तथाकरोतु--र्तहि सा मे मनो हरति ।

---

३ एकस्मिन् ग्रामे काचन मयूरी (Mary) नामा तरुणी, तस्या द्वौ भ्रातरावर्वर्तताम् । एकदा ग्रीष्मर्तौ ते स्वग्रामं गताः । तत्र वहवस्तान् सभाजयितुमुपस्थिता अभवन् । तेषु फलसनामा कश्चन प्रियदर्शनस्तरुणोऽवर्तत, स तु मयूर्याः प्रियपात्रमवर्तत । असकृत्तेषां गृहे आहारं करोति स्म, मयूरीं स्वगृहमामन्त्रयति स्म । एकस्मिन् दिवसे मयूरी एकाकिनी प्रातस्तस्य गृहे उपस्थिता गृहाभ्यन्तरं प्रविष्टा एकस्यापवरकस्य देहल्यां 'धीरो भूया न चातिमात्रं धीरो भूया' इति विलिखितमपश्यत् । द्वारमुद्घाट्य प्रविश्य च तत्र पूगीभूतान्यस्थिपञ्जरादीनि ददर्श । विस्मिता यावत्प्रत्यावर्तुमैच्छत्, तावत् केशेषु आकृष्य कामपि ललनामादाय प्रविशन्तं खड्गपाणिं तं ददर्श । सा च प्रच्छन्ना तस्थौ । फलसश्च प्रविश्य युवतिं करेण जघान । छिन्नश्च सवलयः करः प्रच्छन्नाया मयूर्या अङ्के अपतत् । सा च तेनालक्षिता प्रत्याजगाम । कालान्तरे यदा आहारार्थं तस्या गृहमायातः, तदा परिवेशयन्ती सा स्वप्नवृत्तान्त इति सकलं विषयं वर्णयामास । सोऽपि शृण्वन् प्रतिवाक्यतया 'नेदं तथा न च तथे'ति श्लोकमावर्तयतिस्म । अन्ते च सा क्रुद्धा 'इदं सत्यमिदं सत्यं सत्यमेतन्न संशयः । छिन्नः सवलयो हस्त एष तत्र निदर्शनम् ।' इत्युक्त्वा सवलयं छिन्नहस्तं प्रादर्शयत् । समवेता जनास्तं खण्डशो व्यदारयन्' इति कथाऽनुसन्देया ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानापीडः--साधु साधु यदि, त्वं तां कामयसे। सा हि अत्यन्तं स्पृहणीया वरवर्णिनी भवति।

कुमुदकः--देव, मां छलयितुं तथा भणसि।

दानापीडः--यत्सत्यम्, ममान्तरङ्गं प्रकटयामि।

कुमुदकः--देव, विश्वासेन साकं ब्रवीमि-मयाऽपि अन्तरङ्गोऽभिहितः।

विनोदकः--अहं तु सत्यविश्वासाभ्यामुभाभ्यां वच्मि, देव, मयाऽपि हृदयमाविष्कृतम्।

कुमुदकः--हृदयेनानुभवामि--अहं तां कामये।

दानापीडः--सा च तेऽनुरूपेति अहं विभावयामि।

विनोदकः--अहं तु नानुभवामि कथं सा कामनीया भवति, नापि जानामि कथं साऽनुरूपा भवतीति। अग्नौ निक्षिपन्तु, शूले वा आरोपयन्तु, सोऽयं ममाशयो न कदाचित् परावर्तेत। तथा आशयान एव शूले आरोपितो वह्निज्वालायां वा निक्षिप्तो म्रियेय।

दानापीडः--सदैव च त्वं सुषमायाः परमविद्वेषी, तथैव च मरिष्यसि।

कुमुदकः--अपि चासौ न कदाचिदन्यथा परिवर्तेत, यावदन्तिमं शासनं तं तथा कर्तुं न चोदयिष्यति।

विनोदकः--काचन महिला मां गर्भे धारितवतीति तामभिनन्दामि, सा च मां परिपोषितवतीति तथैव प्रश्रयेण साकं तामभिनन्दामि। परन्तु नाहं कपाले शुनामाहरणार्थं शृङ्गं वादयिष्यामि नापि अदृश्यरूपायां काञ्च्यां भेरीं ध्मास्यामि। ललना मां क्षमन्तां नाम--मां विश्वसितेति मृषा नाहं तारछपामि, न च कामप्यहं विश्वसिमीति दृढं प्रतिपादयामि परिणामतः अहं शुभ्रतरं स्थास्यामि, ब्रह्मचारी निवत्स्यामि।

दानापीडः--अहं तु त्वां प्रेम्णा पाण्डुरं द्रक्ष्यामि, यावत् मे प्राणा न निर्यास्यन्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनोदकः--देव, पाण्डुरो भवेयं नाम क्रोधेन अथवा रोगेण अथवा क्षुधया, न पुनः प्रेम्णा । यद्यहं कदाचिद्रक्तहीनो भवामि, मद्य-पानेन रक्तं संवर्ध्य वर्णमधिगच्छामीति प्रमाणयसि, तदा मे चक्षुषी प्रेमगीतिकागायकानां तूलिकया उत्क्षिप्ते कुरु, मां च वासगृहस्य द्वारद्देशे अन्धस्य कामस्य सङ्केतस्वरूपमुद्बन्धय ।

दानापीडः--साधु साधु । यदि कदाचित् त्वं स्वप्रतिज्ञातो विच्युतो भवेस्तदा अस्माकं सुमहत उपहासस्य भाजनं सम्पद्येथाः ।

विनोदकः--यदि तथा भवामि, तदा मार्जारमिव मां पञ्जरे निक्षिप्य गुलिकया विध्येः । वेधकश्च आदिमो धनुर्धर इव स्व भुजयोः विजयकेतनं वहतु ।

दानापीडः--अस्तु कालेन विज्ञायेत

अदम्यो वत्सतरः कालेन युगन्धरो भवति ।

विनोदकः--अदम्यो वत्सतरः कालेन युगं वहतु नाम, यदि कदाचित्स-चेतनो विनोदकस्तथा भवेत् तर्हि वृषस्य कपालात् शृङ्गं निखानय, मां च तथा विरूपं चित्रय यथा प्रपाया अन्तिके 'भृत्यर्थमश्वो दृढस्तिष्ठती'ति उल्लिख्यते, तथा 'अत्र परिणीतो विनोदकस्तिष्ठती'ति समुन्नतैरक्षरैरुल्लेखय ।

कुमुदकः--यदि कदाचिदेवं सम्पद्येथास्तदा त्वमुन्मत्तो भवेः ।

दानापीडः--यदि कामस्य तूणीरं बर्णोशनगरे नैव शरैः शून्यमभविष्यत् तदा न चिरेण त्वं तेषां शरव्यमभविष्यः ।

विनोदकः--स्पृहयामि तादृशाय भूकम्पाय ।

दानापीडः--अस्तु । यथासुखं समयमतिवाहय । भद्र विनोदक, यथासमयं लीलानाथ उपगन्तव्यो विज्ञापनीयश्चाहं तस्य रात्रिभोजनवेलायां नियत मुपस्थास्ये यदनेन सुमहदायोजनं कृतमास्ते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वनोदकः--तादृशाय सुकर्मणे समर्थ इत्यात्मनि बहुमानमावहामि तदहं तव निदेशम् —

कुमुदकः--(सोपहासम्)

'स्वगृहाद्देवतां यामि यदि स्यात्स्वगृहं मम'

दानापीड़ —"षष्ठो जुलायिमासस्य तव स्निग्धो विनोदकः"

विनोदकः— नोपहस नोपहस। तव सम्भाषणस्य तत्त्वं केवलं भासुरैर्वहिरावरणैरलङ्कृतं, यानि किल न परस्परं सम्वघ्नन्ति अन्यस्योपहसनादर्वाक आत्मानं सकृत् परिशीलय। विषयमिमं तवैव हस्ते निदधामि—परिचिन्तय। (निष्क्रान्तः)

कुमुदकः— देवेनात्र मे सहायकेन भवितव्यम्।

दानापीडः—त्वामत्रोपदेष्टुं प्रमोदमावहामि। ब्रूहि किमत्र विधेयम्। तवोपकारं साधयितुं कठिनोऽपि पाठो मे सुबोधो भवेदित्यवधेहि।

कुमुदकः—देव, लीलानाथस्य किमन्या सन्तति रस्ति ?

दानापीडः—नान्या वर्तते श्रीमतीं हीरां विहाय। सैव तस्य दायाधिकारिणी। अपि नाम त्वं तां कामयसे ?

कुमुदकः—दृष्टाऽभियानवेलायां देव वीरस्य चक्षुषा
नावकाशस्तदा लब्धः समरे व्यापृतात्मना,
धर्तुं नामापि कामस्य। साम्प्रतं समरो गतः,
तदीया भावनाश्चापि विलीना, रिक्तमन्तरम्।
आविशन्ति समाधुर्याः कामनाः प्रणयाश्विताः,
रूपं मनोहरं तस्या भासते साम्प्रतं पुरः।
तेनात्मानं विजानामि तस्यां रक्तं तदादधि॥

दानापीडः—तेन त्वं प्रेमिको भूयाः श्रावयेश्च प्रियं वचः
यदि कामयसे हीरां मानसे तृप्तिमावह।
तया तज्जनकेनापि मन्त्रयेऽहं यथाविधि॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सा ते प्रणयिनी भूयात् किमेतत्तव नेप्सितम् ?
किं नाऽयं प्रणयोदन्तः सर्वथा साधु चित्रितः ?
कुमुदकः—कथं त्वं प्रणयक्लेशं झटित्येवावगाहसे !
मधुरं च समाधत्से प्रीतिव्यापारमञ्जसा ?
अहं तु विस्तृततरैरालापैरात्मनो रतिम्
विज्ञापयितुमिच्छामि न त्वरामहमर्थये ॥
दानापीड—नद्याः समधिकं सेतुं किं कर्तुमभिवाञ्छसि ?
यदेवापेक्षितं यत्र, करणीयं तदेव हि ।
यत्त्वं कामयसे चान्तस्तदेव करवाण्यहम्
प्रणयिन्या योजये त्वां, प्रतीकारः स एव ते ।
अद्य भोजनवेलायां रात्रौ प्रहसनं भवेत् ।
तत्र ते रूपमाधाय हीरां सन्तर्पयाम्यहम् ।
आवर्जयामि तां कान्तां तव नाम्ना मधूक्तिभिः ।
गाढं तां रञ्जयिष्यामि विविधैः प्रेमजल्पितैः
तां विधाय दृढं रक्तां त्वयि, तज्जनकं ततः
निवेदयामि युवयोरन्योन्यं प्रेमबन्धनम्
एवमेषा वरारोहा तव भार्या भविष्यति ॥
साम्प्रतं सकलान् भावान् कार्यतः साधयामहे ।
(निष्क्रान्तः)

❀द्वितीयं दृश्यम्❀

स्थानम्—लीलानाथस्य प्रासादस्यैकमपवरकम्
ततः प्रविशतो लीलानाथः अनन्तश्च

लीलानाथः—भ्रातः ! को वा विशेषः ? कुत्र ते तनय
किमसावद्य संगीतं परिचालयति ?
अनन्तः—स तु तत्र नितरां व्यापृतश्चास्ते । परन्तु भ्रातः ! स्वप्नेऽपि
अचिन्तितपूर्वं कमप्यद्भुतं संवादं निवेदयितुमिच्छामि ? ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लीलानाथः– किमयं शुभावहः संवादः ?

अनन्तः–फलेन परिचीयेत । आवरणं तु मनोहारि । बहिः शुभावहो भाति । राजा सामन्तः कुमुदकश्च परस्परं सन्निहिततया मम वृक्षवाटिकायां सञ्चरन्तौ मन्त्रयमाणौ ममानुचरेण अन्तरितविग्रहेण श्रुतौ । राजा कुमुदकमभणत् स मम भ्रातुष्पुत्रिकां तव दुहितरं कामयते इति । स किल तमिम-मनुरागमद्य रात्रौ नृत्यावसरे तस्यै प्रकटयिष्यति, तस्यां स्वीकृतवत्यां समयं साम्प्रतिकमनुकूलं कलयिष्यति, त्वां च विदितार्थं करिष्यति ।

लीलानाथः– किमसौ अनुचरो बुद्धिशाली, यस्ते तथा न्यवेदयत् ?

अनन्तः–अत्यन्तं बुद्धिमान् भवति । तमिमं त्वदन्तिकं प्रेरयामि । स्वयं प्रष्टुमर्हसि ।

लीलानाथः–नहि नहि । तमिमं सम्वादं स्वप्नमिव निगूढं स्थापयाम, यावत् स्वयं वहिर्न प्रकाशितो भवति । परन्तु मम दुहितरं विदितार्थां कर्त्तुमिच्छामि, येन सा समुचितमुत्तरं दातुमवकाशं लभेत, यदि दैवात्तथा भवति । तेन गच्छ त्वम्, तां तथा निवेदय । (भृत्याः प्रचलन्ति, भ्रातुष्पुत्रं प्रचलन्तं दृष्ट्वा) वत्स, त्वं स्वकर्त्तव्यं सम्यक् जानासि अये मर्शय माम् । आगच्छ भ्रातः, मया सार्द्धम् । त्वदुपदेशं सर्वथा पालयामि । प्रियतर वत्स, अद्य त्वया सावहितेन भाव्यम् !

(निष्क्रान्तः)

※तृतीयं दृश्यम्※

स्थानम्–लीलानाथस्य प्रासादस्य अपरमपवरकम् ।

ततः प्रविशतो दानयक्षः कर्णादक्ष

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्णादः—देव, किमापतितम् ? कुतो वा अगाधे विषादे वर्तसे ?

दानयक्षः–यत्किल विषादं जनयति, तस्य न कोऽपि परिच्छेदोऽस्ति । तत एव विषादोऽयं सीमामत्येति ।

कर्णादः– कारणमवश्यमनुसन्धेयं भवति ।

दानयज्ञः–अनुसंहितं कारणम्—किं वा तेन सेत्स्यति ?

कर्णादः–अधुना न किमपि सिध्यतु, दुःखं तु सहनीयं भवेत् ।

दानयज्ञः-विस्मयेऽहम् यत्त्वं शनिलग्ने संजात इति प्रथयसि, अथच अवसादरूपं सांघातिकं व्याधिमुपशमयितुं प्राकृतिकमुपचारं करोषि । नाहमात्मानं निगूहितुमिच्छामि "विषीदामि यदि विषादस्य कारणं वर्तते । स्मयामि, यदि स्मितस्य कारणं वर्तते, न च अन्यस्य सांहाय्यमपेक्षे । अश्नामि, यदा क्षुधा वर्तेत, न चान्यस्य निदेशमपेक्षे । तन्द्रायां सत्यां निन्दामि, न कस्यापि उपरोधमपेक्षे । हसामि यदा प्रमुदितो भवामि, न चान्यस्येङ्गितमपेक्षे ।

कर्णादः–सत्यम् । परन्तु न तथा अवसादस्य प्रकाशः करणीयः यावदयं ते सहनीयो न भवति । न चिरात् त्वं भ्रातुर्विप्रतीपमाचरितवानसि, इदानीं च कृतसन्धिना तेन प्रसादस्य पात्रीकृतोऽसि । भवतु नाम परिवर्तनम् अशक्यम, तदर्थं त्वया तदीयं भाव चित्तं चानुवर्तमानेन भाव्यम् । आत्मनएवोपकाराय समयोयितमाचरणीयम् ।

दानयज्ञः—अहमरण्यमालतिर्भवितुं स्पृहयामि, न पुनस्तस्य प्रसादे उद्यानलालितो गोलापः । प्रकृत्या अहम् संयतः अवहेलितस्तिष्टामि न पुनरन्यस्य प्रणयमाच्छेत्तुमात्मानं नियन्तुं प्रभवामि । एतद्विषये नाहं श्लाघनीयः साधुर्भवितुं पारयामि, परन्तु नात्र कोऽपि सन्देहो यदहं सरलो नृशंसः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत्राहं नासारज्ज्वा नियन्त्रितः, पादावष्टम्भकेन च संयमितः। सुतरां स्यकीये पञ्जरेऽपि नाहं गातुं प्रभवामि। मुखं वर्तत इति दशामि। प्रवृत्तिरस्तीति यथेष्टमाचरामि ।इदनीमहं स्त्रं रूपं ययायथमाश्रयामि न पुनः परिवर्तितुमभिलषामि ।

कर्णादः—किमात्मनोऽसन्तुष्टत्वस्योपयोगो न शक्यते कर्तुम् ?

दानयक्षः—अवश्यं करिष्यते, यतः प्रकृतिरेवमेतादृशी । अये को वा अत्र आपतति ?

(वैरोचकस्य१ प्रवेशः)

वैरोचक ! को वा विशेषः ?

वैरोचकः—प्रत्यावृत्तोऽस्मि महतो रात्रिभोजनोत्सवात् । राजा तव भ्राता लीलानाथेन राजोचितसमुदाचारेण सम्भावितः। अहं प्रत्यासन्नस्य विवाहस्य संवादं निवेदयामि ।

दानयक्ष.—किमसौ अस्माकमनिष्टसाधनयोजनायाः किमपि करणं भवेत् ? कोऽयमनात्मज्ञो विवाहेनात्मानमुद्बन्धयितुं समीहते ?

वैरोचकः—अये ! देव्या नाम्ना शपामि, अयमसौ तव भ्रातुर्दक्षिणो हस्तः।

दानयक्षः—कः ? स एव सुभगाग्रेसरः कुमुदकः ?

वैरोचकः—आम, स एव।

दानयक्षः—उपयुक्तो वीरः। का सा ? का सा ? यस्यां व्यापारयत्यसौ चक्षुः ?

वैरोचकः—देव्या नाम्ना वदामि—हीरायां लीलानाथस्य कुमारिकाया-मुत्तराधिकारिण्याम् ।

दानयक्ष.—अयममौ समुद्यतस्तरुणो हैमन्तकः कुक्कुटाण्डः२! कथं त्वया अवगतम् ?

---

१ वैरोचकः = Borachico

२ हैमन्तकः कुक्कुटाण्डो निर्भिन्नो न प्रबलाय कुक्कुटाय प्रकल्पते। तद्वदयमप्राप्तवयस्कः कुमुदको नैव योग्यो वरइत्यर्थः ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैरोचकः– गृहधूपनाधिकारे नियुक्तोऽहं यावदेकं परित्यक्तमपवरकं धूपयामि, तावत्तत्र राजा केयूरकश्च परस्परं करेण करमाददानौ गाढं मन्त्रयमाणौ उपस्थितौ । अपवरकस्य कोणे अपवाहितात्मना मया तयोरालापः श्रुतः । इदं हि सिद्धान्तितं यद्राजा प्रथमतः आत्मनः कृते हीरामावर्जयिष्यति । आवर्जितां च तां कुमुदकाय अर्पयिष्यति ।

दानयक्षः–आगच्छ आगच्छ । तत्रैव गमिष्यामः । इदमेव मे अवसादस्य इन्धनं भविष्यति । अयमेव नवीनोदर्कः मम अधःपतनस्य सर्वविधं गौरवमावहति । यदि कथमप्येनं लाञ्छितं कुर्यां, तर्हि सर्वथा कृतकृत्यो भवेयम् । किं युवां कृतनिश्चयौ ? मम च साहायकमाचरिष्यथः ?

कर्णादः–बाढम् । देव, आमरणान्तम् ।

दानयक्षः–तर्हि सुविशालं रात्रिभोजनोत्सवमेव गच्छामः । तेषां विजयोल्लासो मम दुःखोच्छ्वासमतिवर्तते यदि नाम पाचका मम मतानुयायिनोऽभविष्यन्, किं वा वयं नाकरिष्याम ? किं वा वयं कार्यं साधयितुं गच्छामः ?

वैरोचकः– सर्वथा वयं देवमनुसरामः ।

(निष्क्रान्ताः सर्वे ।)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीयोऽङ्कः

* प्रथमं दृश्यम् *

स्थानम् – लीलानाथस्य प्रासादस्यैकमपवरकम् ।

ततः प्रविशन्ति लीलानाथः, अनन्तः, हीरा वस्त्रासारः विभवतश्च परिवारः ।

लीलानाथः – रात्रिभोजने किं सामन्तो दानयक्षो न सन्निहितः ?

अनन्तः – न मया दृष्टः ।

विचित्रा – कियत्तिक्तः स भद्रमुखो विलोक्यते ! नाहं कदाचित्तं द्रष्टुं पारयामि विना हृदयवेदनां, तस्य दर्शनादनन्तरं घटिकावधि ?

हीरा - स किल मानसस्य काऽपि विषादमयी छाया ।

विचित्रा – समीचीनमेतदभविष्यत् यद्येष स्वस्य अर्द्धांशेन विनोदकस्य चार्द्धांशेन मिलितेन निर्मितोऽभविष्यत् – यदेष प्रतिमेव न किमपि वक्ति, अपरश्च मातुर्दुर्ललितः प्रथमः सन्तान इव बहु प्रलपति ।

लीलानाथः— तदेतदुक्तं भवति – यदि सामन्तविनोदकय रसनाया अर्द्धं दानयक्षस्य मुखाभ्यन्तरे, दानयक्षस्य मनोऽवसादस्य चार्द्धं विनोदकस्य मुखे सन्निवेश्य तादृशमुखान्तरेण तादृशमुखेन च कोऽपि पुरुषः संघटितो भवेत् –

विचित्रा— स च करचरणेन प्रियदर्शनः ससृद्धभाण्डागारश्च भवेत् , तर्हि स जगत्यां सकला अपि ललना विवशयितुं प्रभवेत् – अवश्यं यदि स ललनानां हृदयमावर्जयितुं जानीयात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लीलानाथः – यत्सत्यं भ्रातुष्पुत्रिके, विभावयामि त्वं कदापि अनुरूपं स्वामिनं नासादयेः, यदि रसनां तथा प्रखरं व्यापारयेः।

अनन्तः —यत्सत्यमेषा तत्र परमभिशप्ता विभाव्यते।

विचित्रा--परमभिशप्तेति शप्तातोऽधिका। जानामि भगवतो विलसितं, जनश्रुतिश्च प्रचलति। भगवान् शप्तायाः गोः कृते ह्रस्वं शृङ्गं प्रेरयति परमभिशप्ताया गोः कृते तु न किमपि प्रेरयति।

लीयानाथः--ततः परमभिशप्तायास्तव कृते भगवान् नैव शृङ्गं प्रेरयेत्।

विचित्रा–तथैवास्तु। भगवान् न कदापि मम स्वामिनं प्रेरयतु। तदर्थं प्रतिदिनं नतजानुस्तं प्रार्थये। हे भगवन्, नाहं जातश्मश्रुमुखं स्वामिनं शय्यासङ्गिनं सोढुं प्रभवामि, वरमहं स्वास्तीर्णं प्रच्छदपट विरहितं शयनमधिशये।

लीलानाथः--तर्हि अजातश्मश्रुमुखे स्वामिनि प्रसादमधिगच्छेः।

विचित्रा--किं वा तेनाहं करवाणि ? नारीपरिच्छदेन प्रसाध्य किमहं तं मम परिचारिकावर्गे नियोजयामि ? यः किल जातश्मश्रुः, स तरुणादधिको भवति, अजातश्मश्रुस्तु, मानवादवहीयते तरुणादधिको मे न रोचते। अजातश्मश्रुणे तु नाहं रोचे। परमहं षट्पणिकां भल्लूकनर्तिकाया वृत्तिमुपजीव्य तदीय-मर्कटान् नरकं प्रापयामि।

जनन्तः--शोभनम्, तर्हि त्वं नरकं गमिष्यसि ?

विचित्रा—नहि नहि। नरकस्य द्वारदेशमेव, न तु नरकम्। सश्रृङ्गो दुर्विनीताया भर्तेव कश्चन प्रेत आगत्य वदिष्यति विचित्रे, स्वर्गं याहि, नात्र त्वादृशीनां ब्रह्मचारिणीनां कृते स्थानमस्ति। तदाऽहं मर्कटान् तस्मै अर्पयिष्यामि, परमपितुश्चान्तिकमुप-यास्यामि स्वर्गलाभाय। स तु स्थानं दर्शयिष्यति, यत्र

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किल ब्रह्मचारिणो निवसन्ति । तत्र चाहं नक्तन्दिवं समाहित-चेता यापयिष्यामि ।

अनन्तः–(हीरां प्रति) अस्तु-अहं विश्वसिमि त्वं पितुः शासन-मनुवर्तमाना स्थास्यसि ?

विचित्रा--यत्सत्यं मम भगिन्या मर्यादानुसरणं कर्तव्यमापतति । तत एषा वदिष्यति, 'पितः, यथा ते रोचते,' अपश्यं यदि स वरः सुदर्शनो भविष्यति । अन्यथा इयमपरा मर्यादा भविष्यति, वदिष्यति च 'पितः, यथा मे रोचते' ।

लीलानाथः--यत्सत्यम्, अहं स्पृहयामि-त्वामनुरूपेण भर्त्रा समागतां द्रष्टुम् ।

विचित्रा--न तथा सम्भवति यावद्विधिर्मनुष्यं पार्थिवादन्यैरुपादानैर्न निर्माति । किं नेदं महिलानां दुःखाकरं यदुत ताः प्रघर्षिता भवन्ति वीरायापि निर्लिप्ताय स्वजीवन-मर्पयन्ति कस्मैचित् सुखविरहितायाऽपि पार्थिवविग्रहाय । पितृव्य, नाहं कमपि कामये । आदिपुरुषस्य पुत्रा मे भ्रातरो भवन्ति । यत्सत्यं धर्मश्चास्माकं तादृशैः सह सम्पर्कं पापं कलयति ।

लीलानाथः--जाते, सर्वं मनस्यवधेहि यन्मयोक्तम् । कदाचिद् राजा तेऽभिमतं तथा पार्थयेत, अतः समुचितमुत्तरं प्रथमत एवावधारय ।

विचित्रा--भगिनि, स खलु संगीतस्यैव दोषः यदि पदक्षेपः समयानुसारी न भवति । यदि राजा नितरामधीरो भवति, ब्रूहि तं सर्वत्रापि काचन सीमा वर्तते । नृत्ये धीरधीरेण च पदक्षेपेण तस्योत्तरं देहि । हीरे, किञ्चिदवहिता शृणु-आवर्जनं विवाहः पश्चात्ताप-श्चेति तिस्रो विधाः प्रणयस्य । सर्वमप्येतत् स्कच्देशीयं जीगनृत्यमिव विभाव्यते । प्रथमा हि स्कच्जीगनृत्यमिव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्रता उत्तमा साडम्वरा च। द्वितीया विधा विवाहः साटोप आचारवहुलः कश्चन क्रमः। तत आगच्छति पश्चात्तापः। तेन च मन्दमन्देन पदक्षेपेण पञ्चपदीं द्रुतमनुसरति, यावन्मृत्योः समाधिमाश्रयति।

लीलानाथः--भ्रातुष्पुत्रिके, त्वं सर्वमपि विसंष्ठुलं कलयसि।

विचित्रा–प्रखरे मे नयने। पितृव्य, दिवालोकेनाहं देवालयं द्रष्टुं प्रभवामि।

लीलानाथः:--नर्तयितार आपतन्ति। भ्रातः, सावहितो भव, यथायथं तिष्ठत।

(सर्वेऽपि मुखावरणै राच्छन्नाः)

ततः प्रविशन्ति दानापीडः, कुमुदकः, विनोदकः, वस्त्रासारः, दानयक्षः, वैरोचकः, मार्गरीतिः, उरुशीला, विभवतश्च परिवारः। सर्वेऽपि मुखावरणैराच्छन्नाः।

दानापीडः– वरवर्णिनि, अपि प्रसीदसि तव वयस्यमनुगन्तुम्?

हीरा–यदि मन्दं मन्दं चलसि, मधुरं च विलोकसे, नच किमपि भाषसे, तदाऽहं ते सहचरी भवेयम्। मनस्युदिते च निर्गच्छेयम्।

दानापीडः– अवश्यं मम साहचर्येण।

हीरा–तथा वदेयं, यदा मेऽभिरुचिर्जयेत।

दानापीडः–कदा वा तेऽभिरुचिर्जयेत तथा वक्तुम?

हीरा–यदा ते मुखं प्रियदर्शनमाकलयेयम्। देवो दयताम्–तव मुखं तु मुखावरणेन साकं दुर्दर्शनं भाति।

दानापीडः–मदीयं मुखावरणं फिल्‌मनस्य कुटीरम्* अन्तरन्तरात्मा वर्तते।

* फिल्‌मनस्य कुटीरम्। एकदा बृहस्पतिः शुक्रश्च मानववेशेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हीरा-- तर्हि कुटीरं किमिति तृणैश्छन्नम् ?

दानापीडः—स्वैरमालप, यदि प्रणयकथासु कुतूहलम् (हीरामादाय प्रस्थितः)

वस्त्रासारः— मन्ये, त्वं मां कामयसे ।

मार्गरीतिः— न हि तथा । तवैवोपकाराय वच्मि मम बहवो दुर्गुणा वर्तन्ते ।

वस्त्रासारः—के नाम ते ?

मार्गरीतिः— अहं स्तुतिवाक्यानि प्रकटं वाचयामि ।

वस्त्रासारः— अहं तु तत एव त्वामधिकं स्पृहयामि । यतः श्रोतारश्चामेति तान्यभिनन्देयुः ।

मार्गरीतिः—प्रसन्नो देवो मामनुरूपं नर्तयितारं प्रापयतु ।

वस्त्रासारः—आम ।

मार्गरीतिः —प्रसन्नो देवश्च नृत्यशेषे तं मत्तोऽन्तरितं करोतु । आमेत्यनुब्रूहि अनुवाचक !

वस्त्रासारः— नावशिष्यन्ते शब्दाः । मूकीकृतश्चायमनुवाचकः ।

उरुशीला—सम्यगेव प्रत्यभिजानामि त्वाम् । त्वं तावत्सामन्तः अनन्तः ।

अनन्तः —संक्षेपेण वदामि नहि तथा ।

उरुशीला—अहं त्वां प्रत्यभिजानामि—तव शिरश्चालनपरिपाट्या ।

अनन्तः —यत्सत्यमहं तमनुकरोमि ।

उरुशीला—न च त्वं तस्य तादृशान् दुर्गुणाननुकर्तुं प्रभवसि, यदि

पर्यटन्तौ न कुत्राप्यादरं प्रापतुः । फिर्जियावासी फिल्मनः प्रणयिन्या बौशिषा सह तावामन्त्र्य स्वकुटीरे सच्चकार । तयोः सपर्यया प्रीतौ तौ तदीयकुटीरं देवालयत्वेन परिवर्तितवन्तौ, तौ च तारितवन्तौ ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वं स एव न भवसि । स एवायं ते क्रमः, येन त्वं शुष्कं हस्तं चालयसि स एवासि त्वम्, स एवासि त्वम् ।

अतन्तः—संक्षेपेण वदामि नाहं सः, नाहं सः ।

उरुशीला— मा भूदतिप्रसङ्गः । प्रकृतमनुसरामः किमिति त्वं विभावयसि— नाहं त्वां प्रत्यभिज्ञातुं प्रभवामि तवात्यद्भुतया चातुर्या । तिष्ठतु सा चातुरी । जोषमेधि । स एवासि त्वम् । गुणाः स्वयं विकशन्त्येव । नातः परं विशेषेण ।

विचित्रा—किं त्वं तं न वदिष्यसि यो मां तथा निरदिशत् ?

विचित्रा—नहि पारयामि । क्षमस्व माम् ।

विचित्रा—नापि त्वमात्मनो नाम प्रकाशयिष्यसि ?

विचित्रा— नाधुना ।

विचित्रा— 'अहं डाकिनी, मदीया च चातुरी सरस- कथाशतकादुपाहृते'ति सामन्तो विनोदकोऽवदत् ।

विनोदकः—कोऽसौ विनोदको नाम ?

विचित्रा--निश्चितया अवधारयामि— त्वं तं जानासि ।

विनोदकः—नाहं जानामि—विश्वसिहि ।

विचित्रा- नासौ त्वां कदाचिदुपाहासयत् ?

विनोदकः— प्रार्थयेऽहम्, ब्रूहि तावत्, क एषः ?

विचित्रा—किमर्थम् ? स एष राज्ञो हास्यकारी भवति नितरामलसो मूढः । तस्य केवलमेको गुणो वर्तते—सः असम्भावनीयानि दुर्घटनानि सृजति । नापरः प्राकृताज्जनः तदुक्तौ श्रद्दधाति । यदि तस्य काऽपि प्रशस्तिरस्ति, तर्हि सा न तस्य चातुरीकृता परन्तु दुष्प्रकृतिकृता । स जनान् युगपत् तर्पयति कोपयति च । तृप्ता जनास्तस्मिन्नुपहसन्ति क्रुद्धाश्च तमवघ्नन्ति । निश्चितं जानामि— सोऽयम् अत्र समवेतोऽस्ति । तस्मा अहं स्पृहयामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनोदकः—यदा स दृष्टिगोचरो भवेत्, तदा त्वदुक्तीः सर्वांस्तस्मै निवेदयामि ।

विचित्रा—अस्तु निवेदय निवेदय । स तु केवलं मयि द्विवा कटूक्तीः प्रकटीकरिष्यति यथा समराहत आयुधेषु । यदि ममायं नगण्यः परिहासस्तस्य श्रुतिगोचरो भविष्यति, न च प्रतिहतः, स परं विषण्णो भविष्यति, क्षुब्धं च विस्मरिष्यति । तदर्था चाहारावली वितथा भविष्यति, यतः स न किमपि भक्षयिष्यति तस्यां रात्रौ ।(संगीतं प्रवर्तते)वयमस्माकं नायकाननुसरामः ।

विनोदकः—सर्वान्तःकरणेन ।

विचित्रा—नहि नहि । यदि ते विप्रतीपमाचरन्ति, अहं तान् निष्काषयिष्यामि अनुपदम् ।

(नृत्यं प्रवर्तते । नृत्यान्ते सर्वे निष्क्रामन्ति, केवलं दानयक्षं, वैरोचकं, कुमुदकं च विहाय)

दानयक्षः—मम भ्राता नियतं हीरायामासक्तः । तस्या जनकायापि स्वाभिलषितं निवेदयितुं तं दूरं नीतवान् । ललनाः सर्वास्तमनुसरन्ति । केवलमेक एव आवृतमुखावरणोऽवशिष्यते ।

वैरोचकः स चायं कुमुदकः । तस्यावसादेनाहं तं प्रत्यभिजानामि ।

दानयक्षः—किं त्वं सामन्तविनोदको न भवसि ?

कुमुदकः—त्वं तु मां सम्यगेव जानासि । स एवाहम् ।

दानयक्षः—सामन्त, त्वं तु मम भ्रातुरत्यन्तं सन्निहितः । मम भ्राता तु हीरायां बद्धप्रेमा । प्रार्थयेऽहं त्वाम् । सकृदेनमुद्बोधय तस्या अपयातुम् । आभिजात्येन नैषा तस्य अनुरूपा भवति । अत्र त्वया अनुरक्तेन भृत्येनेव कृत्यमाचरणीयम् ।

कुमुदः—स तस्यामनुरक्त इति कथं त्वं जानासि ?

दानयक्षः—हीरायाः पुरतः प्रेमविषये शपन्तं तमहमश्रृणवम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैरोचकः--अहमपि तथवाश्रृणवम् । अद्यैव रात्रौ तां परिणेष्यतीति शपथोऽपि कृतः ।

दानयक्षः--आगच्छतम् , भोजनशालामेव गमिष्यामः । (दानयक्षो वैरोचकश्च निष्क्रान्तौ)

कुमुदकः--विनोदकस्य नाम्नाऽहं यद्यप्युत्तरयामि तौ
श्रृणोमि स्वस्य कर्णाभ्यां दुःसंवादमिमं स्फुटम् ।
इदं तथ्यं, न सन्देहो राजा तां कमते स्वयम् ॥
नियतं मित्रता तिष्ठेत् सर्वत्र सर्वकर्मसु
केवलं न स्थिरा ह्येषा प्रणये प्रीतिकर्मणि ।
अतः प्रणयिनः सर्वे स्वयमेव परस्परम् ,
आलपन्ति स्वजिह्वाभिः पश्यन्ति च स्वचक्षुषा
न विश्वसन्ति दूतेषु, सुषमा चैन्द्रजालिका
विद्रावयति सौहार्दं कामिनीः शोणितं तथा ॥
प्रमाणितमिदं तथ्यं मूढेन विस्मृतं मया
औदासीन्यं समाश्रित्य विश्वासो निहितः परे ।
प्रतारितोऽस्मि तेनाहं, शुभं हीरे, सुखं भवेत् ।

विनोदकस्य पुनः प्रवेशः ।

विनोदकः—वयस्य कुमुदक !

कुमुदकः—सोऽहमस्मि ।

विनोदकः—सकृदायाहि मया साकम् ।

कुमुदकः—कुत्र ?

विनोदकः—अग्रवर्तिनं विल्वद्रुमं यावत् त्वदीयकार्यैणैव । वयस्य कुमुदक, कथमेनां मालां धारयितुमिच्छसि ? किं त्वं कुशीद-वृत्तिर्वणिक् स्वर्णहारमिव स्वगलायां प्रणयविषादस्यं प्रतीकमिव धारयिष्यसि उत सेनापतेर्जयकेतनमिव भुजे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धारयिष्यसि । अवश्यमेषा माला यथाकथंचित् धारणीया, यतस्ते हीरा राज्ञा स्वायत्तीकृता ।

कुमुदकः— राजा तया सुखमेधताम् ।

विनोदकः – तदेतदुक्तं पालितान् पशून् निर्यातयितुं सदोन्मुखस्य साधोः पशुव्यवसायिनः इव कुतूहलोद्दीपकम् । त्वया साकमेवं व्यवहरतो राज्ञः किमिदं समुचितं जातम् ?

कुमुदकः—मा भूदतिप्रसङ्गः । मुञ्चतु मामेकाकिनम् ।

विनोदकः – अये ! त्वमिदानीमन्ध इव परिदिव्यसि! तव मांसं बालेनापहृतम् । त्वं तु स्तम्भं ताडयसि !

कुमुदकः– यदि तथा न भवति, अहं त्वां विहाय गच्छामि ।

(निष्क्रान्तः)

विनोदकः—अहो दुर्भाग्यहतकोऽयम्! शरविद्धः पशुरिव गुहामाश्रयेत् । अहो आश्चर्यम् मदीया वरवर्णिनी विचित्रा मां यथार्थतो जानीयात्, न च सा जानति ! 'राज्ञो हास्यकार' इति निर्दिशति! भवतुः, तेनैव विरुदेन अहं परिचितो भवेयं, यतोऽहं सदाविनोदी । परन्तु नाहं तथात्मानं छलयितुं प्रभवामि । नाहं तेन विरुदेन कदाचित् प्रथितः । तदिदं लाघवकरं तिक्ततावर्धकं च । केवलं विचित्रया मयि सन्निवेशितम् । सा किल तेन जगदिदं विभ्रमयति, मां च लघूकरोति । भवतु प्रतिशोधं नयेयम् ।

दानापीडस्य पुनः प्रवेशः

दानापीडः – भद्र विनोदक ! क्वासौ सामन्तः कुमुदकः ? अपि नाम स त्वया दृष्टः ?

दकः—यत्सत्यं देव, मया संवादवाहिकाया भूमिका अभिनीता । परित्यक्ते मूषिकावासभूमिप्रान्तरे आवास इव स मया रिक्तो विषादपूर्णश्च विलोकितः । स च मया निवेदितः मन्ये च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथार्थतो निवेदितः, यद् देवेन तस्येप्सिताया वरवर्णिन्या मानस-मावर्जितम्। स च मया विल्ववृक्षस्यान्तिकमासादितः, तदर्थ-मेकां मालां कल्पयितुं, यया स संयम्येत, आहोस्विद् दण्डमेकं विधातुं, येनासो विताड्येत ।

दानापीडः—विताड्येत ! केनापराधेन ?

विनोदकः—कस्यचन शिक्षार्थिनः सुस्पष्ठेन पापेन, यः किल मनोहरस्य नीडस्य दर्शनेन नितरामाह्लादितः स्वसहचरं दर्शयति, सहचरश्च तमपहरति।

दानापीडः—किम्, तमिमं सरलविश्वासं पापं कलयसि ? पापं तु अपहारके ।

विनोदकः—तथापि दण्डस्य निर्माणे मालायाश्च ग्रथने न किमपि प्रतिवन्धमाचरति, यतो माला तेन स्वयं परिधेया, दण्डश्च त्वयि निपातनीयो भवति, यतस्त्वं यथाहं विभावयामि, तस्य शिक्षार्थिनो नीडमपहृतवानसि ।

दानापीडः—अहं तु नीडाधिवासिनो विनेष्यामि गातुं। ततश्च प्रत्यर्पयिष्यामि तत्प्रतिभुवे।

विनोदकः—यदि नीडाधिवासिनस्त्वदुक्तमनुवदेयुस्तर्हि त्वदुक्तं तथ्यं कलयामि।

दानापीडः—भाविनी विचित्रा त्वयि विप्रतीपा। तया सह कृतनर्तनः पुरुषः त्वं तस्या परमपाकरोरिति वदति स्म ।

विनदकः—सा तथा मां निष्ठुरं निन्दितुं प्रवृत्ता येन प्रस्तरोऽपि तरलितोऽभविष्यत्। एकेनापि पत्रेण श्यामलितो देवद्रुमः प्रति-निन्दितुमुपाक्रमिष्यत् । मदीयं मुखावरणमपि तां निन्दितुं सजीवं संजातम्। सा मामवादीत्—मां तिरस्करणीच्छन्नम-जानन्ती, यदहं राज्ञो हास्यकार इति धूलिधूसरितात्मेधैमें दुरितनभोमण्डलात प्रचण्डवातावेगाद्दुर्दिनादपि दुर्दर्शनश्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सा तु एवमसकृत् क्षिप्रतरं मामुपहसति स्म येनाहं समरे आयुधैराविद्धो भट इव स्तम्भीभूतोऽभवम् । सा तु अपवाद-बाणान् वर्षति स्म, प्रत्येकं च वाणो मां मर्मणि विध्यति स्म। विषवाक्यानीव तस्य निश्वासास्तथा प्रखरा आसन् येन तां निकषा न कोऽपि जीवन् वर्तेत, मन्ये, कुमारिकामपि संक्रमय्य कलुषितां कुर्युः। पतनात्प्रागवस्थितस्यादिपुरुषस्य सम्पत्तिं यौतुकत्वेन आनयन्तीमपि तां न परिणेष्यामि । सा हि हेर्क्युलासमपि शकलीकुर्यात् तदीयांश्च शावकानग्निसमेधने नियोजयेत् । क्षन्तव्योऽस्मि न तस्य। विषये किमपि वक्तव्यं न नामाप्युच्चारणीयम् । सा हि सुवसनसज्जिता साक्षात् प्रतिहिंसा, एटेदेव्या अवतारः। प्रार्थये भगवन्तं, तस्या विनयनाय कमपि मान्त्रिकं प्रेरयतु। तया साकमवस्थानाऽपेक्षया निरये अवस्थानं मठाधिष्ठानमिव तृप्तये प्रकल्पेत । तस्याः संश्रवस्य परिहाराय जना ज्ञातसारं तत्र गमनाय पापमाचरन्ति। यत्सत्यं सर्वविधा अपि अशान्तयो विभीषिका उपद्रवाश्च तामनुधावन्ति।

दानपीडः-अये पश्य–सेयमापतति ।

ततः प्रविशन्ति कुमुदकः, विचित्रा, हीरा, लीलानाथश्च ।

विनोदकः–देव, प्रसीद, नियोजय मां स्वेप्सितसाधनाय पृथिव्याः पारमपि गन्तुम्। देवस्येङ्गितेन पृथिव्या अपरं पार्श्वं गन्तुं सन्नद्धोऽस्मि । देवस्य प्रसादनाय एसियामहादेशस्यान्तिमात्कोणादपि दन्तकाष्ठमाहरिष्यामि, (१) प्रेष्टरजोह्नपादस्य

१। प्रेष्टरज्योह्नपादः–प्रेष्टरजोह्नः (Prester john) अजियर्स-वंशधरः। एष हि तेनेद्यु (Tendue) राज्यस्याधीश्वरः। अस्य राज्यं सुविशालमवर्तत । एष स्वर्गमपि स्वराज्यस्याङ्गं कर्तुं मियेष ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दीर्घतामपि सम्पादयिष्यामि, तार्त्तर्यधीश्वरस्य(१) श्मश्रुतोऽपि केशमाहरिष्यामि । देवस्याभिमतं चेत् पिग्मिभिः (२) साकमपि दौत्यं करिष्यामि, न पुनरनया हार्पीडाकिन्या (३) सह निमेषत्रयमपि आलपितुमिच्छामि । किं देवस्य कोपि नियोगो नास्ति येनाहमनुगृहीतो भवेयम् ?

दानापीडः– न कोऽपि । केवलं तव साहचर्यंकामये ।

विनोदकः–हा भगवन् ! देव, नाहमत्र स्थातुं प्रभवामि । अत्र ह्येकं व्यञ्जनं, यदहमास्वादयितुं न शक्नोमि । जिह्वास्वरूपया अनया महिलया अवस्थातुं न सहेय । (निष्क्रान्तः)

दानपीडः– आगच्छ भद्रे, आगच्छ । सामन्तविनोदकस्य हृदयं त्वया हारितम् ।

विचित्रा– सत्यमाह देवः । स तस्य हृदयं कियत्कालं मह्यमदात् । मया स्वहृदयं कुशीदरूपेण तस्मै दत्तम् । तस्मादसौ द्विहृदयो जातः । विशेषतस्त्वसौ द्यूतच्छलेनाऽपि मे हृदयं व्यजयत । तस्माद्देवो वक्तुं प्रभवति मया हृदयं हारितमिति ।

दानापीडः-स परं निर्यातितस्त्वया, परं निर्यातितस्त्वया !

विचित्रा–तदहं विभावयामि । स किमपि कर्तुं समर्थः । स एष कुमुदकोः मया समानीतः, यस्य विचयायाहं देवेन नियुक्ता ।

दानापीडः--अये किमेतत् ! सामन्त, किमिति त्वं विषण्णः ?

---

१ । तातारदेशस्याधीश्वरः अत्यन्तं प्रबलपराक्रमः दुर्धर्षश्च प्रथितः । एषः Khan of Tartory त्वेन प्रसिद्धः ।

२ हार्पी=Harpy–काचन विचक्षणा भीषणाकृती राक्षसी अधोभागेन खगाकृतिरूर्द्ध्वभागेन च महिला । आहार्य हस्ताभ्यामकृण्य प्रखरनखैः विदार्य आहारं करोति स्म ।

३ । पिग्मी=Pigmy । खर्वाकृतयो जना नीलसरितः तीरवासिनः, अत्यन्तं दुर्धर्षाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः–देव, नाहं विषण्णः ।

दानापीडः–किं तर्हि रुग्णोऽसि ?

कुमुदकः–देव, नापि रुग्णः ।

विचित्रा–सामन्तो हि न विषण्णः, न रुग्णः, न प्रसन्नः नापि कुशली, साक्षात् सिविलरूपकम् । लकुचफलमसूयाया वर्णं धारयति ।

दानपीडः–भद्रे, मन्ये त्वदीयं वर्णनं यथार्थम् । सशपथं वच्मि, यदि स तादृशः, तर्हि अन्तः प्रतारितः । भद्र कुमुदक, एवमियं हीरा त्वदर्थं मया आवर्जिता, तस्या जनकोऽपि परामृष्टः, तदीयं शुभाशंसनमाप्यासादितम् । इदानीं विवाहस्य दिवसं निर्देष्टुमर्हसि । भगवान् तव क्षेमं साधयतु ।

लीलानाथः–भद्र सामन्त, मदीयां तनुजां, तथा साकं मम सम्पत्तिमपि गृहाण । देवेन सम्बन्धो निर्धारितः, सर्वे च सम्बन्धमिममभिनन्दन्ति ।

विचित्रा–भद्र सामन्त, ब्रूहि-तवायं समयः ।

कुमुदकः—तूष्णीम्भाव एवात्र यथार्थं त आनन्दस्य निर्देशकः । नगण्योऽहं मानवो न प्रभवामि कियदन्तः प्रमुदितोस्मि । सुन्दरि, यथा त्वं सर्वात्मना मदीया, अहमपि सर्वात्मना त्वदीया भवामि । एवमहमात्मानं तुभ्यमर्पयामि विना कमपि संकोचम्, प्रमोदं चाखण्डमनुभवामि तव तादृशविनिमयेन ।

विचित्रा–सहोदरि, आलपेदानीं त्वम् । यदि वक्तुं न प्रभवसि तर्हि स्थम्भयैनं वक्तुं चुम्बनेनाधरं मुद्रयित्वा ।

दानापीडः–भद्रे यथार्थतस्त्वं प्रफुल्लान्तःकरणा ।

विचित्रा–देव, तदर्थं देवमभिनन्दामि । विमूढा ह्येषा सर्वथा समीरणाभिमुखमास्यं धारयति । सामन्तस्य च कर्णे कथयति-सा तमन्तरेण कामयते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः—एवमेवैषा कथयति भद्रे ।

विचित्रा —देव, सम्बन्धास्तु सम्भवन्ति । सर्वोऽपि संसाराय स्पृहयति केवलं मां विहाय । अहं तु सूर्यसन्तप्ता । भिक्षार्थी भिक्षामिव पतिं कामयमानाऽहं रथ्यायाः प्रान्तमाश्रयामि ।

दानापीडः—भद्रे विचित्रे, त्वदर्थमेकमासादयिष्यामि ।

विचित्रा —तव पितुःसरूपाय एकस्मै वरं स्पृहयामि । किं देवस्यानुरूपः न कोऽपि भ्राता वर्तते, तव पिता अस्युतमान् स्वामिनः समपादयत् यदि नाम ललनास्तदन्तिकमुपागमिष्यन् ।

दानपीडः—किं त्वं मां कामयिष्यसे भद्रे ?

विचित्रा—न हि देव, यद्यहं नापरमासादयेयं कार्यदिवसेषु । प्रतिदिनं देवो हि महार्घो भवति वोढुम् । अभ्यर्थये, क्षमस्व माम्, अहं किल उत्पन्ना विना विषयं सोल्लासमभिधातुम् ।

दानापीडः—तव मूकता मां बाधते । त्वं सदा सोल्लासा वर्तसे नास्त्यत्र सन्देहः, उल्लासपरिपूरिते समये संजाताऽसि ।

विचित्रा—नहि तथा । देव, सत्यं मे माता क्रन्दतिस्म प्रसववेदनया यदाहं संजाता किन्तु तदा तारका नृत्यन्ति स्म । भगिनि, भगवांस्ते सुखं वितरतु ।

लीलानाथः—भ्रातुष्पुत्रिके, मया उक्तपूर्वेषु कार्येषु तत्परा भूयाः ।

विचित्रा—क्षन्तव्यमात्मानमभ्यर्थये । एषाऽहं गच्छामि त्वदुक्तमनुष्टातुम् । (निष्क्रान्ता)

दानापीडः—सत्यमेषा सदानन्दमयी प्रत्युत्पन्नमतिर्महिला ।

लीलानाथः—अस्यामवसादस्य न किमप्युपादानमस्ति । न कदापि विषीदति । परन्तु स्वप्नावसरे तदा तदा विषादमुत्स्वप्नायते हसन्ती च प्रतिबुध्यत इति मे पुत्रिका भणति ।

दानापीडः—परतुर्नामकरणमपि नैषा सोढुं प्रभवति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लीलानाथः—न हि तथा । सा हि प्रणयार्थिनः स्वप्रतिभया अननुरूपान् विभाव्य उपहसति ।

दानापीडः—एषा हि विनोदकस्य परमनुरूपा सहधर्मिणी भविष्यति ।

लीलानाथः—हा भगवन् ! देव, यदि तौ विवाहितौ सप्ताहाभ्यन्तर एव परस्परम् उन्मादितौ भवेताम् ।

दानापीडः—भद्र कुमुदकः, कदा वा त्वं देवालयं प्रविविक्षसि ?

कुमुदकः—देव, श्वः । समयस्तु परं वाधते यावत्प्रणयकृत्यानि सर्वाणि सम्पाद्यन्ते ।

लीलानाथः न कथमपि सोमवासरादर्वारक् । वत्स, सप्तैव खलु रात्रयोऽवशिष्यन्ते । स चायं समयो नितरामल्पो भवति मनसोऽनुरूपाण्यायोजनानि प्रकल्पयितुम् ।

दानापीडः—भद्र कुमुदक, किमिति प्रश्वसन् शिरश्चालयसि एतादृश-विलम्बे । आगच्छ । एतदन्तरे समयो नैव अलसं यापनीयो भवेत् । एतदन्तरे अहं हक्युंलेशस्य कृत्येष्वन्यतमत् साधयामि । विचित्राया विनोदकस्य च पर्वताकारेण पारस्परिकं प्रेम उज्जीवयिष्यामि । यदि यूयं त्रयं मदुक्तमनुसृत्य समुचितं सहायकमाचरिष्यथ, तर्हि न कोऽपि सन्देहः वर्तते, उभावपि परस्परं मिलितौ करिष्यामि ।

लीलानाथः—देव, सन्नद्धोऽहं भवन्तमनुयातुं दशानां रात्रीणां जागरणेनाऽपि ।

कुमुदकः—देव, अहमपि सन्नद्ध एव ।

दानापीडः—आयुष्मति हीरे, त्वमपि सन्नद्धा भवेः ।

हीरा—देव, मम भगिन्या अनुरूपवरप्राप्तये भद्रमहिलोचितं सकलमपि करिष्यामि ।

दानापीडः—अहं जानामि-विनोदकस्तस्या नाननुरूपो वरो भवेत् । अहं तं सर्वथा अभिजानामि । स किल अभिजाते कुले जातः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परीक्षितो वीरः, प्रमाणितः साधुप्रकृतिकश्च । विचित्रया साकं कथं व्यवहरणीयमिति व उपदेक्ष्यामि । अहं च विनोदकं तथा युष्माकं साहाय्येनावर्जयिष्यामि येन सोऽसाधारणचतुरोऽपि कान्तासु विप्रतीकप्रकृतिकोऽपि विचित्रायामनुरक्तो भविष्यति । यदि वयमेवं कुर्मः कामस्तावत्सकामो भवेत् । तदीयशराणां धनुषश्च नावश्यकता भवेत्, यतो वयं तस्य यश उज्जृम्भयामः, प्रणयव्यापारे च तस्य प्रतिमुत्रः सकलं कार्यं साधयामः । आगच्छत मया सार्द्धम् । अहं करणीयमुपदेक्ष्यामि ।

(निष्क्रान्ताः)

द्वितीयं दृश्यम्

स्थानं तदेव ।

दानयक्षस्य वैरोचकस्य च प्रवेशः

दानयक्षः—एवमेतत्—सामन्तः कुमुदको लीलानाथस्य दुहितरं परिणेष्यति ।

वैरोचकः—अथ किम् ? देव, अहं तु विवाहमिमं विघटमितुं शक्नोमि ।

दानयक्षः—यत् किमपि रोधनं विघटनं विध्वंसनं वा मम पथ्याय सम्पद्येत । तस्य दर्शने एव मेऽन्तरात्मा असूयया अवषीदति । यद्यत् तस्य मनोविघाताय प्रकल्पेत, तत्तन्मम अभीप्सितमेव । अथ कथं त्वं विघटयिष्यसि विवाहमिमम् ?

वैरोचकः—अवश्यं न साधुना उपायेन । देव, परन्तु तथा निगूढं सम्पादयिष्यामि, यथा न कोऽपि मयि असाधुतां संशयीत ।

दानदक्षः—संक्षेपतो वर्णय मम पुरतः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैरोचकः— मन्ये, संवत्सरादर्वाक् निवेदितपूर्वमेव यदहं हीरायाः वयस्याया मार्गरीतेः प्रसादे तिष्ठामि ।

दानयक्षः—आम, स्मरामि ।

वैरोचकः—रात्रेः यस्मिन् कस्मिन्नपि निभृते मुहूर्ते भर्तृदारिकाया अवरोधवातायनान्तिके तां बहिर्दिलम्बमानामवस्थापयितुं शक्नोमि ।

दानयक्षः— किं वात्र बीजं वर्तते अस्य विवाहविघटनस्य ?

वैरोचकः—भवानेव तत्र विषमाघातुं प्रभवति । उपसर्पतु भवान् राजानं भवतो भ्रातरम् । न विस्मरतु तमसकृद्बोधयितुं यत्तथाऽभिजातस्य कुमुदकस्य हीरासदृश्या दुष्प्रकृतिकया स्त्रिया सह विवाहसंविधानेन गौरवं तावदधः पातितम् तदवसरे च कुमुदकस्य गुणानां प्रशस्तिं यथाशक्ति वर्णयतु ।

दानदक्षः—किं नाम मे साधनमस्ति तथाप्रमाणयितुम् ?

वैरोचकः—यथेष्टं साधनमस्ति राजानं दुर्बोधयितुं, कुमुदकं मोहयितुं, हीरां दूषयितुं, लोलानाथं च मारयितुम् । किं भवान्, इतोऽपरं कमप्युपायं पश्यति ?

दानतक्षः—तानि साधयितुं यत्किमपि कर्तुं सन्नद्ध एवास्मि ।

वैरोचकः—प्रस्तुतो भवतु । अहं तावत् दानपीडं कुमुदकं चैकत्र समुचिते समये संघटयिष्यामि । निवेदयतु तौ यथा हीरा मयि आसक्तेति भवान् जानाति । दर्शयतु भवान् तयोः समधिकां सम्भावनाम् । वदतु च भ्रातुः सम्बन्धमिमं घटयतः गौरवं संरक्षितुं तथा अभिजातस्य कुमुददस्य आत्मानं वरवर्णिनीमभिनयन्त्या दुष्प्रकृतिकया हीरया सह विवाहे सम्भाव्यमानां मर्यादाच्युतिं च विघटयितुं भवानेव पुरस्तात् प्रकटयतीति । अवश्यं तौ विना परीक्षणेन नैव विश्वास-मेष्यतः । तदानीं निदर्शनमिदं दर्शयतु । तदिदं निदर्शन-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मवश्यं तयोर्विश्वासं जनयिष्यति । विवाहात् पूर्वरात्रौ अहं हीराया अवरोधवातायनस्य सन्निधि हीरे-मार्गरीते इत्यामन्त्रयन् स्थास्यामि । मार्गरीतिरपि मां कुमुदकेति भणिष्यति । तदानीं हीरा यथा तत्र न सन्निहिता भवेत्तथा संविधास्ये । भवान् तौ तावद् दर्शयतु । सर्वमिदं सत्यमिवावभासेत । हीराया अविश्वस्तता प्रमाणिता भविष्यति । तस्याः प्रणये सन्देहः असूया च युगपदुदेष्यतः, फलतः सर्वाणि विवाहस्यायोजनानि विपर्यस्तानि भविष्यन्ति ।

दानयक्षः—यादृशं वा विषमयं फलितं भवतु सर्वमिदं रूपायितं करिष्यामि । त्वमपि कार्यसाधने सुचतुरो भव । सहस्ररूपिकास्ते पारितोषिकम् ।

रोचकः—भवान् कार्यसाधने तत्परो भवतु । मदीयं चातुर्यं न मामवधारयेत ।

दानयक्षः—सोऽहमधुना विवाहस्य निर्दिष्टां तिथिमवबोद्धुं गच्छामि ।

(निष्क्रान्तः)

❀ तृतीयं दृश्यम् ❀

स्थानम्—लीलानाथस्य वृक्षवाटिका

ततः प्रविशति विनोदकः

विनोदकः—बालक !

बालकः—प्रभो, अयमस्मि ।

विनोदकः—मम शयनकक्षस्य वातायने किमपि पुस्तकमस्ति । उपनयतत् । अहं वृक्षवाटिकायां तिष्ठामि ।

बालकः—एषोऽहं प्रत्यावृत्त इत्यवधेहि महाभाग,

विनोदकः—जानामि तत् । तथाऽपि इतो निर्गच्छ, पुनरपि पुस्तकेन साकं परावर्तस्व । (बालको निष्क्रान्तः) अये परं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विस्मयमावहामि यदेक एव मनुष्यः अत्यन्तमन्यो विमूढः सम्पद्यते, स यदा कामाय स्वकीयान् विभावानर्पयति । य एष परान्, परुषमुपहसतिस्म स एष प्रणयस्याहुतिभूत्वा अन्येषां वचनीयताया विषयो भवति । तादृश एवायं कुमुदकः । जानाम्यहं य एष रणभेरीं रणदुन्दुभिं च विहाय नान्यसंगीतक्रमकामयत, स एष इदानीं नूपुरं शिञ्जिनीं च श्रोतुमुन्मनायते । यः खलु एकदा समीचीनं कवचमेकं द्रष्टुं दश योजनान्यपि पादचारं गच्छति स्म, स एष परिधेयस्य नवीनस्य परिच्छदस्य स्वरूपं निर्णेतुं दसापि रात्रीर्जागरितस्तिष्ठति । य एष साधुरिव योध इव सरलं समयानुकूलं च मितमभाषत स एष इदानीं वावदूकः संजातः, पङ्क्ति भोजनोत्सवे चित्राणि व्यञ्जनानीव चित्राणि वचनानि व्याहरति । किमहमपि तथा परिणतो भवेयं कुमुदकस्य च दृष्ट्या विलोकितो भवेयम् । नाहं वक्तुं प्रभवामि, तथा न भवेयमिति । नाहं शपथं करोमि यदेष कदाचिन्मां बहुरूपं परिणमयेत् । परन्तु अत्र शपथं करोमि—यावदेष मां बहुरूपतया न परिणमयति, तावदेष मां नैव विमूढं कर्तुं प्रभवति । एका ललना सुन्दरी-तथापि सुस्थोऽहम् । अन्या प्रज्ञावती, तथाप्यहं सुस्थः । अपरा सुशीला तथाप्यहं सुस्थः । यावत् सर्वेऽप्येते गुणा एकस्यां ललनायां न समवेता भवन्ति तावत्काचन ललना न मम स्पृहणीया सम्पद्येत ।

सा समृद्धा भवेत्—नात्र संशयः, प्रज्ञावती, नान्यथाऽहं तस्याः, सुशीला, अन्यथाऽहं न तां स्पृहयामि, सुरूपा, नान्यथाऽहं तां विलोकयेयम्, मृदुला, नान्यथा मेऽभिमता भवेत्, अभिजाता, नाहमप्सरसं कामये, सुभाषिणी सुसंगीतज्ञा च सा मे प्रणयिनी भवेत् । तस्याः केशानां वर्णोऽपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवतानां स्पृहणीयो भवेत्। अये राजा! सशरीरश्च कामः! यावदात्मानं वृक्षवाटिकायामन्तरितं करिष्यामि। (वृक्षवाटिकान्तरितस्तिष्ठति)

(ततः प्रविशन्ति दानपीडः कुमुदको लीलानाथश्च)

दानपीडः— आगच्छ। किं संगीतं शृणुमः?

कुमुदकः—देव, एवमेव। अये! कथं प्रदोषवेला स्थिरा शान्ता च विभाव्यते, संगीतश्रवणायास्मान् आमन्त्रयतीव।

दानपीडः—(जनान्तिकम्) पश्य—कथं विनोदकेन वृक्षवाटिकायामात्मा अपवाहितः।

कुमुदकः—(जनान्तिकम्) साधु साधु। देव, संगीतेऽवसिते लब्धं जम्बूकं अर्धभाजं सम्पादयामः।

(ततः प्रविशति बालतुषारः (१) संगीतयन्त्रेण साकम्)

दानपीडः—आगच्छ बालतुषार, आगच्छ। वयं तदेव संगीतं श्रोतुमिच्छामः।

बालतुषारः—प्रसीदतु देवः। नायासयतु मे कण्ठकम्। अस्मात् द्विरुच्चारितः स्वरः न कर्णयोः प्रीतिमादधाति।

दानपीडः—इदमेव हि निदर्शनमुत्कर्षस्य यत्स्वगुणेषु नूतनतया दोषारोपणम्। प्रार्थये, गाय तदेव संगीतम्। नातः परमहं वृणोमि।

बालतुषारः—वरणस्य समुल्लेखाद्गास्यामि यत्तवेप्सितम्।
उपक्रामन्ति बहवः प्रेमिकाः स्वप्रियान्तिके
नानुरूपोऽस्मि ते जाने तथापि वरयामि ते
यतः सर्वात्मना गाढं त्वामेव कामयाम्यहम्।

दानपीडः—अयमेव गाय तद्गानं, विलम्बो नैव सह्यते
स्वमतं कुरु संगीते विततं, यदि ते मतम्॥

१। बालतुषारः = Balthasar

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वालतुषारः - कुरु सार्द्रहिते श्रोत्रे गीते गीते मतिं कुरु।

नात्रगीतं किमप्यस्ति गीतमेतत् त्वदीप्सितम् ॥

दृग्नपीडः—अये सुश्लिष्टः अक्षरविन्यासः ! 'गीते गीते' अत्रगीतम्' 'गीतम्' इत्यादीनि नियतं मनोहराणि।

(संगीतं प्रवर्तते)

चिनोदकः—अये दिव्यः स्वरः ! किं तस्यात्मा सन्तर्पितः । किमिदं नाद्भुतं अद्भुत मेषान्त्रत तुकल्पितास्तन्त्र्यो मानवानां शरीरेभ्य आत्मन आकर्षन्ति। भवतु नाम । शृङ्गमेकं स्पृहयामि धनविनिमयेन, यदेतत् सम्प्रति ममाभिमतम्।

संगीतम्

न खलु न खलु कान्ताः !
खेदयध्वं स्वचित्तम्
प्रवचनपटवो हि
मानवाः सर्वकालम्।
दधति चरणमेकं
तीरभूमौ तथाब्धौ
चरणमपरमेते,
नैकभावं भजन्ते ।१।
तदिति जहित खेदं
यान्तु ते देशमिष्टम्
भजत मनसि तृप्तिं
वेषभूषाभिरामाः।
तिरयत निजखेदं
गीतिका मूर्च्छनाभिः
न खलु कुरुत खेदं
मानसे तत्प्रयुक्तम् ।२।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जहित जहित गीतिं
　　वेदनायाः समन्तात्
ननु बिदितचरं वो
　　वचनं मानवानाम् ।
विशति तपसि यत्रैः
　　शोभनेष्वप्यहःसु
न जहति निजकीयां
　　प्रकृतिं दुर्विदग्धाः ।३।

दानापीडः–यत्सत्यं परमरमणीयं गानमिदम् ।

बालतुषारः–देवः, गाता तु नितरां मन्दः ।

दानापीडः–अरे नहि नहि । यथार्थतस्त्वं तावत् सुगायकः । न च त्वादृशः अपर इदानीमुपलप्स्येत ।

बालतुषारः–यदि कोऽपि शुनक एवमबुक्किण्यत् (मभषिष्यत,) तर्हि सोऽवश्यं निर्यातितोऽभविष्यत् । परन्तु ईश्वरोऽभिनन्दनीयः भवति यदिदं भषणं न कस्याप्यनिष्टस्य सूचकं भवति परन्तु यदि रात्रौ पेचकस्य शब्दः श्रूयते, तर्हि अनुपदमनिष्टमाशङ्क्यते ।

दानापीडः–अये त्वं तथा कलयन् प्रमोदसे ? बालतुषार, अर्थयेऽहम् ललितललितान्यत्यद्भुतानि गीतानि संकलय । श्वो रात्रौ हीरादेव्या अवरोधस्य वातायनोपकण्ठे तानि वयं श्रोतुमिच्छामः ।

बालतुषारः— देव, यथाशक्ति प्रयतिष्ये ।

दानपीडः—तथैवास्तु । साधय त्वम् (बालतुषारो निष्क्रान्तः) । लीलानन्द, एहि तावत् । किं त्वमेव मामवादीरद्य यत्तव भ्रातुष्पुत्रिका विचित्रा वीरे विनोदके अनुरक्ता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विस्मयमावहामि यदेक एव मनुष्यः अत्यन्तमन्यो विमूढः सम्पद्यते, स यदा कामाय स्वकीयान् विभावानर्पयति । य एष परान्, परुषमुपहसतिस्म सं एष प्रणयस्याहुतिभूत्वा अन्येषां वचनीयतायाः विषयो भवति। तादृश एवायं कुमुदकः। जानाम्यहं य एष रणभेरीं रणदुन्दुभिं च विहाय नान्यसंगीतकमकामयत, स एष इदानीं नूपुरं शिञ्जिनीं च श्रोतुमुन्मनायते । यः खलु एकदा समीचीनं कवचमेकं द्रष्टुं दश योजनान्यपि पादचारं गच्छति स्म, स एष परिधेयस्य नवीनस्य परिच्छदस्य स्वरूपं निर्णेतुं दशापि रात्रीर्जागरितस्तिष्ठति । य एष साधुरिव योध इव सरलं समयानुकूलं च मितमभाषत स एष इदानीं वावदूकः संजातः, पङ्क्तिभोजनोत्सवे चित्राणि व्यञ्जनानीव विचित्राणि वचनानि व्याहरति । किमहमपि तथा परिणतो भवेयं कुमुदकस्य च दृष्ट्वा विलोकितो भवेयम् । नाहं वक्तुं प्रभवामि, तथा न भवेयमिति । नाहं शपथं करोमि यदेष कदाचिन्मां बहुरूपं परिणमयेत्। परन्तु अत्र शपथं करोमि—यावदेष मां बहुरूपतया न परिणमयति, तावदेष मां नैव विमूढं कर्तुं प्रभवति। एका ललना सुन्दरी-तथापि सुस्थोऽहम्। अन्या प्रज्ञावती, तथाप्यहं सुस्थः। अपरा सुशीला तथाप्यहं सुस्थः। यावत् सर्वेऽप्येते गुणा एकस्यां ललनायां न समवेता भवन्ति तावत्काचन ललना न मम स्पृहणीया सम्पद्येत । सा समृद्धा भवेत्—नात्र संशयः, प्रज्ञावती, नान्यथाऽहं तस्याः, सुशीला, अन्यथाऽहं न तां स्पृहयामि, सुरूपा, नान्यथाऽहं तां विलोकयेयम्, मृदुला, नान्यथा मेऽभिमता भवेत्, अभिजाता, नाहमप्सरसं कामये, सुभाषिणी सुसंगीतज्ञा च सा मे प्रणयिनी भवेत् । तस्याः केशानां वर्णोऽस्तु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवतानां स्पृहणीयो भवेत् । अये राजा ! सशरीरश्च कामः ! यावदात्मानं वृक्षवाटिकायामन्तरितं करिष्यामि । (वृक्ष-वाटिकान्तरितस्तिष्ठति)

(ततः प्रविशन्ति दानपीडः कुमुदको लीलानाथश्च)

दानपीडः— आगच्छ । किं संगीतं शृणुमः ?

कुमुदकः—देव, एवमेव । अये ! कथं प्रदोषवेला स्थिरा शान्ता च विभाव्यते, संगीतश्रवणायास्मान् आमन्त्रयतीव ।

दानपीडः—(जनान्तिकम्) पश्य—कथं विनोदकेन वृक्षवाटिकाया-मात्मा अपवाहितः ।

कुमुदकः—(जनान्तिकम्) साधु साधु । देव, संगीतेऽवसिते लब्धं जम्बूकं अर्धभाजं सम्पादयामः ।

(तत प्रविशति बालतुषारः (१) संगीतयन्त्रेण साकम्)

दानपीडः—आगच्छ बालतुषार, आगच्छ । वयं तदेव संगीतं श्रोतु-मिच्छामः ।

बालतुषारः—प्रसीदतु देवः । नायासयतु मे कण्ठकम् । अस्मात् द्विरुच्चारितः स्वरः न कर्णयोः प्रीतिमादधाति ।

दानपीडः—इदमेव हि निदर्शनमुत्कर्षस्य यत्स्वगुणेषु नूतनतया दोषारोपगमम् । प्रार्थये, गाय तदेव संगीतम् । नातः परमहं वृणोमि ।

बालतुषारः—वरणस्य समुल्लेखाद्गास्यामि यत्तवेप्सितम् ।

उपक्रामन्ति बहवः प्रेमिकाः स्वप्रियान्तिके

नानुरूपोऽस्मि ते जाने तथापि वरयामि त्वां !

मतः सर्वात्मना गाढं त्वामेव कामयाम्यहम् ।

दानपीडः—अथये गाय तद्गानं, विलम्बो नैव सह्यते

स्वमतं कुरु संगीते विततं, यदि ते मतम् ॥

१ । बालतुषारः = Balthasar

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बालतुषारः - कुरु सावहिते श्रोत्रे गीते गीते मतिं कुरु ।

नात्रगीतं किमप्यस्ति गीतमेतत् त्वदीप्सितम् ॥

दन्तपीडः—अये सुश्लिष्टः अक्षरविन्यासः ! 'गीते गीते' 'अत्रगीतम्' 'गीतम्' इत्यादीनि नियतं मनोहराणि ।

(संगीतं प्रवर्तते)

चिनोदकः—अये दिव्यः स्वरः ! किं तस्यात्मा सन्तर्पितः । किमिदं नाद्भुतं यदुत मेषान्त्रत तुकल्पितास्तन्त्र्यो मानवानां शरीरेभ्य आत्मन आकर्षन्ति । भवतु नाम । शृङ्गमेकं स्पृहयामि धनविनिमयेन, यदेतत् सम्प्रति ममाभिमतम् ।

संगीतम्

न खलु न खलु कान्ताः !

खेदयध्वं स्वचित्तम्

प्रवचनपटवो हि

मानवाः सर्वकालम् ।

दधति चरणमेकं

तीरभूमौ तथाब्धौ

चरणमपरमेते,

नैकभावं भजन्ते ।१।

तदिति जहित खेदं

यान्तु ते देशमिष्टम्

भजत मनसि तृप्तिं

वेषभूषाभिरामाः ।

तिरयत निजखेदं

गीतिका मूर्च्छनाभिः

न खलु कुरुत खेदं

मानसे तत्प्रयुक्तम् ।२।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जहित जहित गीतिं
वेदनायाः समन्तात्
ननु विदितचरं वो
वञ्चनं मानवानाम् ।
विशति तपसि षत्रैः
शोभनेष्वप्यहःसु
न जहति निजकीयां
प्रकृतिं दुर्विदग्धाः ।३।

दानापीडः—यत्सत्यं परमरमणीयं गानमिदम् ।

बालतुषारः—देवः, गाता तु नितरां मन्दः ।

दानापीडः—अरे नहि नहि । यथार्थतस्त्वं तावत् सुगायकः । न च त्वादृशः अपर इदानीमुपलभ्येत ।

बालतुषारः—यदि कोऽपि शुनक एवमबुक्किष्यत् (मभषिष्यत,) तर्हि सोऽवश्यं नियन्त्रितोऽभविष्यत् । परन्तु ईश्वरोऽभिनन्दनीयो भवति यदिदं भषणं न कस्याप्यनिष्टस्य सूचकं भवति परन्तु यदि रात्रौ पेचकस्य शब्दः श्रूयते, तर्हि अनुपदमनिष्ट-माशङ्कयते ।

दानापीडः—अये त्वं तथा कलयन् प्रमोदसे ? बालतुषार, अर्थयेऽहम् ललितललितान्यत्यद्भुतानि गीतानि संकलय । श्वो रात्रौ हीरादेव्या अवरोधस्य वातायनोपकण्ठे तानि वयं श्रोतु-मिच्छामः ।

बालतुषारः— देव, यथाशक्ति प्रयतिष्ये ।

दानपीडः—तथैवास्तु । साधय त्वम् (बालतुषारो निष्क्रान्तः) । लीलानाथ, एहि तावत् । किं त्वमेव मामवादीः यत्त्व भ्रातुष्पुत्रिका विचित्रा वीरे विवोदके अनुरक्ता ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः (जनान्तिकम्) पातय पातय जालम्, खगः सन्निहितः। (संचालय संचालय अश्वम्, लक्ष्यं सन्निहितम्) (प्रकाशम्) न मया स्वप्नेऽप्याशासितं यदेषा कस्मिंश्चिन्मानुषेऽनुरज्येतेति।

लीलानाथः नो नो, न मयापि सम्भावितम्। परं चेदमत्यन्तं वि मयावहं यदेषा तस्मिन्नेव वीरे विनोदके तथा अनुरक्ता यं सा सततं तथा जुगुप्समानेव बहिः प्रकटयति स्म।

विनोदकः—कथमेतत्सं भवतु? किं वात स्तदभिमुखः प्रवहति?

लीलानाथः यत्सत्यं देव, नाहं विभावयितुं प्रभवामि। परन्तु तस्मिन् तस्या अनुरागस्तथा प्रगाढः, यदस्यान्तः मनसापि कलयितुं न शक्यते।

दानापीडः—मन्ये सा तथा अभिनयन्ती छलयति।

कुमुदकः—ममापि तथैव विश्वासः।

लीलानाथः—हा भगवान्! कथमियं छलना भवितुमर्हति। न कदाचिदेवं विकाशं प्राकृतिकस्य स्फुरद्रूपस्य प्रेम्णः यदेषा प्रकटयति, छलना सम्भवति।

दानापीडः—कीदृशं प्रेम्णो विकाशं सा दर्शयति?

कुमुदकः—(जनान्तिकम्) आमिषं सम्यक् योजय येन झसो वडिशं ग्रसति।

लीलानाथः—कीदृशः प्रेम्णो विकाश इति पृच्छसि? ननु मम कुमारिकये दानीमेव कथितं यथैषा चिन्ताविक्लवा उपविशति। देवोऽपि तामेनां द्रष्टुमर्हति।

कुमुदकः—तत्यं तथैव सा अकुरुत।

दानापीडः—कथम् कथम्? अर्थयेऽहं ब्रूहि। त्वं तावन्मां विस्मापयसि! ममासीद् धारणा सा किल प्रणयविरोधिन्या भावनाया निदर्शनमिति।

लीलानाथः—सशपथं वच्मि-ममाऽपि तादृश्येव भावना अवर्तत विशेषतो विनोदकस्य विषये।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनोदकः—छलनेति विभावयेयं परन्तु पक्वश्मश्रुरसौ वदति । एतादृश्यां प्रशान्तायामाकृतौ नैव छलना निगूढा स्थातुमर्हति ।

कुमुदकः—(जनान्तिकम्) संक्रान्तप्रभावोऽसौ संजातः । कौशलं विस्तारय ।

दानापीडः—किमेषा स्व ममुराग विनोदकस्य ज्ञातसारं कृतवती ?

लीलानाथः—नहि नहि सा शपति—न कदाचित्तथा कर्त्तुं प्रभवामि स एष तस्या निर्बन्धः ।

कुमुदकः—युज्यते तयैव तव कुमारिका भणति । सा कथयति—याऽहमसकृत् तं सपराभवं सोपहासं व्याक्षिप्त मकरवम्, साऽहं कथं लिखितुं प्रभवामि त्वामहं कामय इति ।

लीलानाथः—तमनु लेखनार्थ मुपक्रमावसरे एषा तथा वदति । परन्तु मे दुहिता वदति सा तु अवश्यं लिखिष्यति पूर्णं पुटमेकं तदर्थं नैशपरिच्छदेन विशंति वारान् रात्रै उजाग्रती स्थास्यति यावत्पत्रस्य परिसमाप्तिः ।

कुमुदकः—पुटमेकनिति त्वं वदसि । तव कुमारिका तु मन्ये परिहासेन तथोक्तवती !

लीलानाथः—नायं परिहासः सत्यमेव सा पत्रमलिखत् । यावच्च सा तत्पठति स्म तत्र विचित्राविनोदकयोरुल्लेखमश्रृणोत् ।

कुमुदकः—तर्हि तथा सम्भवति ।

लीलानाथः—सा च तत्पत्रं निष्काकारेण सहस्रधा त्रुटितवती, आत्मानं च गर्हितवती । कथं तथा अशालीना पत्रं तस्य सविधं लिखामि, यमहं जानामि अवश्यमवज्ञास्यति मामिति । सा अवदत्-अहं तस्याचरणमात्मन आचरणेन निरूपयामि । अवश्यमहं तमवज्ञास्यामि, यदि स मामनु पत्रं लिखिष्यति । यद्यप्यहं तं कामये तथापि तथा करिष्यामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः:—ततः सा नतजानुः पतति, क्रन्दति अवसीदति, हृदयमाहन्ति, केशानावर्तयति, शपति, प्रार्थयते च 'अयि सुभग विनोदक, ईश्वरो मे शान्तिं वितरतु'

लीलानाथः—तथैव सा करोति । मम पुत्रिका च व्याहरति--तस्याः प्रणयोत्मादोऽत्यन्तगाढतां गत इति बिभेति च कदाचित्सा किमप्यत्याहितं कर्तुमपि व्यवस्येदिति ।

दानापीडः—अहं विभावमामि--इदं शुभोदर्कं भवेद्यदि अ-यैर्विनोदकः विदितार्थः क्रियेत, यदि सा स्वमनुरागं प्रकटयितुं न प्रभवति ।

कुमुदकः—को वष लाभः ? स तु एतदेकं खेलनकं करिष्यति, परिहासैः परामर्शैश्च तां मनस्विनो मत्यधिकमायासयिष्यति ।

दानापीडः -यदि स तथा आयासयिष्यति, तर्हि दण्डनीयो भविष्यति। सा तु अत्यधिकं महनीया वरवर्णिनी, विना सन्देहं च प्रशस्तशीलशलिनी ।

कुमुदकः—तथा सा सर्वातिशायिनी चतुरा

दानापीडः--सर्वेषु विषयेषु न तु विनोदकीय अनुरागे ।

लीलानाथः -हा भगवान् ! तादृशे मृदुले शरीरे प्रज्ञायाः प्रणयस्य च द्वन्द्वं प्रवृत्तम् । निदर्शनानि च दशाधिकानि अस्माभिरुपलभ्यन्ते-प्रणयस्य विजयः संजातः । अहं किल तस्याः पितृव्यः, अभिभावकश्च । तदर्थं परं विषीदामि । विषादस्य च कारणं वर्तते ।

दानापीडः-यदि सा मयि तादृशं प्रेम प्राकटयिष्यत्तर्हि अहम् अन्यत् किमप्याविगणय्य तामहमर्द्धाङ्गिनीमकरिष्यम् । अर्थयेऽहम् वेदयन्तु भवन्त एतद् विनोदकाय । शृणुमः किमिति सोऽभिधास्यति ।

लीलानाथः—किमिदं क्षेमायेति भावयसि ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः—हीरा विभावयति—अवश्यं सा मरिष्यति । यतः सा वदति—सा म्रियेत, यदि स तां न कामयेत , सा म्रियेत, यदि सा स्वं प्रणयं तस्मै निवेदयेत् । सा म्रियेत, यदि स तामावर्जयितुमापतेत् , न च सा स्वकीयं प्रकृतिविरुद्धं विप्रतीपत्वं ह्रासयेत् ।

दानापीडः—सम्यगेव सा व्यवस्यति । यदि सा स्वयं निवेदयेत् , तर्हि इद माशास्यते, स तं प्रणयमवजानीयात् यतोऽसौ, भवतां विदितचर एव, प्रकृत्यैव निर्घृणो भवति ।

कुमुदकः—स खलु अत्यन्तं सुभगो भवति ।

दानापीडः—यत्सत्यं स बहिरत्यन्तं सुभगाकृतिर्दृश्यते ।

कुमुदकः—ईश्वरस्य नाम्ना वच्मि, ममापि स एवाभिप्रायः—एषः अत्यन्तं चतुरः ।

दानापीडः—यत्सत्यं स चातुर्यस्य कानिचित् निदर्शनानि प्रदर्शयति ।

कुमुदकः—देव, अहं तमसाधारणं वीरं गणयामि ।

दानापीडः—सत्यं स खलु हेक्टरसदृश इत्यवेहि । समराणां संचालने स चतुर इति त्वं गणयेः, यतोऽसौ तावत् परिवर्जयति समरम् अतीवसतर्कतया परावर्तनेन अथवा ख्रीष्टभक्त इव भीतभीतः परिचालयति ।

लीलानाथः—यदि स ईश्वराद्बिभेति, तर्हि अवश्यं शान्तिं स्थापयेत् , यदि स शान्तिं भनक्ति तर्हि अवश्यं भयेनोत्कम्पेन च समरं प्रविशेत् ।

दानपिडः—तथैव स कुर्यात् यतोऽसौ ईश्वराद्बिभेति । यद्यप्यवश्य तस्य सुविशालेषु परिहासविजल्पितेषु न किमपि भयस्य निदर्शनं विलोक्यते । भवतु । तव भ्रातुष्पुत्रिकयाः कृते अहं विषीदामि । किं वयं विनोदकमुपसर्पामस्तस्याश्च प्रणयं निवेदयामः ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः– न कदापि तं निवेदयतु । वरमेषा सत्परामर्शैरात्मनः प्रणयं नियमयतु

लीलानाथः- न तथा सम्भवति । सा खलु प्रथमतः स्वकीयं हृदयं- नियमयतु

दानापीडः—तथाऽस्तु । सविशेषं वृत्तान्तं तव दुहितुः सकाशादुपलभेमहि । इदानीं विषयोऽयमेतावता विश्राम्यतु । अहं तु विनोदकं सर्वात्मना आद्रिये । अभिलषामि च स सकृत्, आत्मानमुदारतया परीक्षताम्, कियदसौ महानुभावायास्तादृश्या वरवर्णिन्या अनुपयुक्त इति ।

लीलानाथः - देव, उपसर्पतु, भोजनं सज्जीकृतमास्ते ।

कुमुदकः—(जनान्तिकम्) एतावता यदि स तां न कामयेत, तर्हि नाहमात्मानं विश्वसिमि ।

दानापीडः - ईदृशमेव जालं तस्याः कृतेऽपि विस्तारितं भवतु । तच्च तव कुमारिकया तत्सहचरीभिश्च सम्पादनीयम् । इदमस्माकमास्वादनीयं खेलनकं भवेत्, यदुभौ परस्परमभिमन्येयातां यत्तौ परस्परं गाढमनुरक्ताविति, यद्यपि वस्तुतो न कोऽप्यनुरागो वर्तते । तदेव दृश्यं मूकतयाऽभिनीयमानं द्रष्टुमहमभिलषामि । प्रथमतस्तां भोजनायामन्त्रयितुं तस्यान्तिकं प्रेरयामः ।

(दानापीडः, लीलानाथः कुमुदकश्च निष्क्रान्ताः)

विनोदकः – (बहिरात्मानं प्रकाश्य)नेयं छलना भवितुमर्हति । संलापस्तु गभीरतया कृतः । हीरादेव्याः सकाशात् तैस्तथ्यमुपलब्धम् । ते तां भाविनीं दयमाना इव प्रतिभान्ति । तस्याः प्रणयं ते सर्वात्मना अभिनन्दन्त इव लक्ष्यन्ते । मां कामयते ! किमर्थम् ? अवश्यं मानयितव्योऽयं प्रणयः ! मामनु तेषामभिप्रायः श्रुतः । ते वदन्ति सा मां कमयत इत्यहमात्मानं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुमन्ये। ते वदन्ति—वरं सा म्रियेत न तु प्रणयस्य कमपि संकेतं मह्यं प्रेरयेत्। न परिणेष्यामीति न मया आलोचितम्। नाहमात्मनि बहुमानमावहामि। त एव खलु सुखिनो ये किल आत्मनो दोषान् निगूढतया परेभ्यः शृण्वन्ति, तांश्च प्रतिकर्तुं प्रभवन्ति। ते कथयन्ति भविनीयं सुन्दरी! अवितथमेतत्। अहमपि तत्र साक्ष्यं ददामि। सुशीला! तथैव, नाहमन्यथा कल्पयितुं प्रभवामि। अपि च चतुरा, परन्तु मां कामयते। यत्सत्यं नेदं तस्याश्चतुरतायाः समधिकं निदर्शनं, नापि बिमूढताया विशालो विकाशः, यतोऽहं नितान्तं तस्यामनुरक्तो भवेयम्। प्रणयस्य च प्रतिदानं करिष्यामि प्रणयेन। अवश्यमहं परिहासानां विप्रतीपवचनानां च सम्मुखीनो भवेयम्, यतोऽहं तादृशं बहुकालपर्यन्तं परिणयस्य परिपन्थी आसम। परन्तु किमेकस्य मतिगतौ विभेदो न पदमादधाति? योऽयमाहारो यौवनेऽभिनन्द्यते सोऽयं वार्द्धके नैव सहनीयो भवति। परिहासाः, विद्रूपवचनानि—ता इमाः काकलगुलिकाः किं मनुष्यस्य चित्तवृत्तेर्निरोधिका भवेयुः? न हि, संसारोऽवश्यं जनाकीर्णो भवेत्। यदाऽहमवदं मरिष्याम्यहं ब्रह्मचारीति, तदा नोलोचिषं विबाहपर्यन्तं जीविष्यामीति। अये विचित्रा आयाति! अद्य तु अतीवरूपवती विलोक्यते! अहं च तस्या मुखे प्रणयस्य संकेतमवधारयामि।

(विचित्रायाः प्रवेशः)

विचित्रा—अनिच्छन्त्यप्यहं रात्रिभोजनाय भवन्तमामन्त्रयितुं प्रहिताऽस्मि

विनोदकः—सुन्दरि विचित्रे Funding by IKS-MoE त्वां, खेदहेतोः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विचित्रा—भवतो ममाभिनन्दने यावान् खेदः, न मया ततोऽधिकः खेदोऽनुभूतः । यद्येतत्खेदकरमभविष्यत्, ततो नाहमागमिष्यम् ।

विनोदकः—तर्हि सन्देशहरणे त्वमानन्दमनुभवसि ।

विचित्रा—सत्यम्, तावन्तमेव, यावन्तं भवान् तीक्ष्णीकृतया छूरिकाया काकस्य विनिपातेन अनुभवेत् । किं ते बुभुक्षा न बाधते ? अस्तु, नमस्ते । (निष्क्रान्ता)

विनोदकः—अये ! "अनिच्छन्त्यप्यहं रात्रिभोजनाय भवन्तमामन्त्रयितुं प्रहिताऽस्मि ।" अत्र निगूढः कोऽप्यर्थो वर्तते ! 'भवतो ममाभिनन्दने यावान् खेदः न मया ततोऽधिकः खेदोऽनुभूतः' अस्यार्थो भवदर्थमनुभूतः यः कोऽपि खेदः अभिनन्दनखेद इवाकिञ्चित्करः ! यद्यहं तां न सम्भावयेयं, तर्हि नृशंसो भवेयम्, यद्यहं तां न कामयेयं तर्हि हिब्रुर्भवेयम् । अयमहं गच्छामि, तां चावर्जयामि ।

(निष्क्रान्तः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीयोऽङ्कः

❀ प्रथमं दृश्यम् ❀

स्थानम्—लोलानाथस्य वृक्षवाटिका ।

ततः प्रविशन्ति हीरा, मार्गरीतिः, उरुशीला च ।

हीरा—मार्गरीते वयस्ये मे द्रुतं याहि चतुष्किकाम् ।
विचित्रा कृतसंलापा राज्ञा कुमुदकेन च,
तत्र स्याद्, ब्रूहि तां कर्णे यथा त्वं श्रुतवत्यसि
उरुशीलां तथा मां च भ्राम्यन्त्यौ विजने वने,
केवलं त्वत्कथामेव कुर्वन्त्यौ रहसि स्थिता ।
तथा कुतूहलं तस्या वर्धयेथा यथा च सा
परमुत्कण्ठिताऽऽगच्छेदालापमावयो रहः
श्रोतुं स्थिता निकुञ्जेऽस्मिन् संवृते मधुगुच्छकैः†
सूर्यतापसमुद्भिन्नैः रोधयद्भिश्च तत्करान्
राजानुग्रहसंपुष्टैरपि तद्द्रोहकारिभिः ।
मदेन बहुधाऽऽविष्टैः पुरुषैरिव सर्वथा ॥
तत्र स्थिता यथालापं शृणुयादावयो रहः
तथा त्वया सयाधेयं नियोगस्तेऽयमर्पितः ।
सम्यक् साधय कार्यं त्वं याहि, नौ विसृजाधुना ॥

उरुशीला—अवश्यमानयेयं तां बोधयित्वा समन्ततः । (प्रस्थिता)

हीरा—उरुशीलेऽवधेहि त्वं विचित्राऽत्र यदाऽऽपतेत्,
तदाऽऽवां विहरिष्यावो विपिनेऽस्मिन् समन्ततः ॥
केवलं च करिष्यावो विनोदकगतां कथाम् ।

---

† मधुगुच्छक—Honey suck'es

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उच्चारिते मया तस्य नाम्नि त्वं स्तुहि तं मुहुः,
प्रशंस सर्वथा शौर्यं रूपं शीलं गुणांस्तथा।
आलपेयं-कथं रक्तो विचित्रायां विनोदकः।
अन्तःसीदति तत्प्रेम्णा, कामः सम्प्रति सायकान्
व्यापारयेद् दुष्प्रधर्षान्, कार्यं सेत्स्यति सर्वथा।।

(पश्चान्निगूढपदाया विचित्राया निकुञ्जे प्रवेशः)

(जनान्तिकम्)

आरभस्व. कथं पश्य विचित्रेयमलक्षिता।
निकुञ्जे पदमाधत्ते भीतभीतेव लेपिनी (१)
तत्समीपं गमिष्यावो यथाऽऽवां श्रृणुयात्स्फुटम्।।

उरुशीला – विनोदस्य पराकाष्टा यदि स्रोतसि राजते।
खेलन् स्वर्णमयैः पक्षैर्मीनो बडिशसंयतम्
आमिषं ग्रासनीयः स्यात् प्रथमं रहसि स्थिताम्
निकुञ्जे संवृते गाढं मधुगुच्छैः समन्ततः
आवर्जयावो मधुरैरालापैरचिराद् भृशम्।।

उरुशीला—न भेतव्यं निजं कृत्यं समाधास्ये सुकौशलम्।

हीरा—ततोऽन्तिकं गमिष्यामो यथास्याः श्रवणे समम्
लोभनीयं मधुवचस्तदावर्जनहेतुकम्
श्रृणुयेतां न चाप्येकमक्षरं वर्जितं भवेत्।।

(समीपमुपगम्य)

उरुशीले ब्रुवे सत्यं साऽत्यन्तं निष्ठुरा हृदा।
जानामि सकलास्तस्य वृत्तयः परुषाः खराः।।

---

(१) लेपिनी = Lipwing काञ्चन पक्षिणी या नीडे परैरुपद्रुता निभृतपदा स्थानान्तरमाश्रयते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्येनस्यारण्यकस्येव

उरुशीला— प्रार्थये किमिदं ध्रुवम्

विनोदकः कामयते विचित्रां परमार्थतः ?

हीरा—तथा कथयतो राजा नवो मे प्राणवल्लभः ।

उरुशीला—किं ताभ्यां चोदिताऽसि त्वं तस्या एतन्निवेदितुम् ?

हीरा— चोदिताऽऽसं परं तौ हि मया सम्यग् निबोधितौ

विनोदकस्य क्षेमं चेदुभाभ्याभीप्सितं, तदा

विनोदको वोध्रनीयः प्रेम्णा योद्धुं यथार्थतः

वेदनीयो विचित्रायै प्रणयो न कदाचन ॥

उरुशीला—अकार्षीः किं तथा त्वं ? किं युवाऽन्यो भाग्यवानिव

विचित्रयेप्सितां शय्यामधिरोढुं न सोऽर्हति ?

हीरा—आः कामस्य शपे नाम्ना सोऽर्हत्येतन्नसंशयः

सुभगोत्तमसंसेव्यं शयनं धरणीतले ॥

परंतु रचितं धात्रा हृदयं तादृशं दृढम्

गर्वाप्लुतं नापरस्या विचित्राया इव क्वचित् ॥

पश्यास्या नेत्रयोर्ज्वालाः सूचयन्ति समन्ततः

निर्घृणत्वं तथाऽवज्ञां, साऽऽत्मानं बहुमन्यते

प्रज्ञयाऽधःकरोत्यन्यान्न्यक्करोति जगत्समम् ।

न प्रीतिं दर्शयेत्त्वयापि, न परस्म गुणान् शुभान्

आकृतिं वा न बुध्येत स्वश्लाघाहतमानसा

प्रेमिकानुपहस्यैषा गर्हयेत समन्ततः ॥

उरुशीला—ममापि तादृशो भावः सत्यं त्वेदं हितं भवेत्

यद्येषा प्रणयं तस्य जानीयात्सेलयेत तम् ।

हीरा - सत्यमेवात्थ, संसारे यावान् विज्ञो भवत्वसौ

अभिजातस्तथोदारो युवा सौम्याकृतिश्च सः

अदृष्टपूर्वमेधावी, तथाप्येनं प्रदूषयेत्त

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सौम्याननश्चेत्तमिमं स्वसेत्युपहसेदसौ
कृष्णंकायं हसेदेषा हास्यकारं वदन्ती तम्,
प्रकृत्या निर्मितं मोहात्कदाकारं विसंष्ठुलम् ।।
कृष्णवर्णं नरं सौम्यं हसन्ती सा विवर्णयेत्
शालग्रामशिलाखण्डैः कल्पितं विकृताकृतिम् ।
मुखरश्चेद्धसेदेषा वदन्ती ऋतुकुक्कटम्
सदा सर्वत्रसंचारं चाक्रोशन्तं मुहुर्मुहुः
मूकं न गणयेदेषा ड़वित्थं निश्चलाकृतिम् ।।
गर्हयन्ती जनान् सर्वान्, न गुणान् बहुमन्यते,
नापि तेषां प्रशस्ति वा सर्वलोकाभिनन्दिताम्
अवज्ञाध्मातचित्ता सा स्वीकरोति कदाचन ।।
उरुशीला—सख्यं नाचरणं तस्याः स्पृहणीयं कदाचन ।
हीरा—नैषा साधारणी नाम भावेषु सकलेष्वपि
विरूप प्रकृतिश्चेयं स्पहणीया कथं भवेत् ?
नैषाऽऽत्मानं विजानाति, को वा साहसमाचरेत् ?
वक्तुमेनां ? यदि ब्रूयां हासेनैषा विमोहयेत्
विद्रूपैर्वचनैर्घोरैर्मारयेन्मां, न संशयः ।
ततोऽन्तर्निहितैर्दुःखैश्छन्नोऽग्निरिव सीदतु
विनोदको म्रियतां वा, वरं तन्मरणं भवेत्
शूलैरिवान्तर्विध्यद्भिर्मृत्योर्हासैः प्रकल्पितात् ॥
उरुशीला—तथाप्येषा वोधनीया, श्रोतव्याश्च तदुक्तयः ।।
हीरा—न तथा पारयिष्येऽहं वरं यामि विनोदकम् ।
दमनार्थं मनोवृत्ते र्बोधयामि सदुक्तिभिः ।।
नवान् मार्गान् श्रयिष्येऽहं कल्याणाय ससुश्च मे
एको दुरुदितः शब्दो, न कोऽपि ज्ञातु मर्हति,
कथं प्रदूषयेन्नाम चिरार्जितमपि क्षणात् ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उरुशीला – मा प्रमादात्तथा कार्षीर्भगिन्याः शुभचिन्तया ॥
चातुर्येण च सा ख्याता, प्रज्ञा ह्यस्य गरीयसी
सर्वातिशायिनी क्षिप्रा न विवेकच्युता भवेत् ॥
एवं सुचतुरा विज्ञा सा प्रत्याख्यातु मर्हति
न तादृशं वरं योग्यं विनोदकसमं क्वचित् ॥
उरुशीला – प्रार्थये त्वामहं भद्रे नासूयां कर्तुमर्हसि ।
पक्षपातं विना वच्मि, संशयो नैव वर्तते,
रूपे गुणे तथाऽऽलापे साहसे च पराक्रमे
एको विनोदको ह्यस्यामिटाल्यां प्रथमः स्थितः ॥
हीरा – सत्यमेतत् प्रसिद्धं हि तस्य नाम समन्ततः ॥
उरुशीला – इतः प्रागेव तस्यैतत्प्राप्यमासीत् स्वचेष्टितैः ॥
(विषयं परावर्तयन्ती)
कदा त्वं परिणीता स्याः ?
हीरा – प्रत्यहं कलयाम्यहम् ।
आगामिनि दिने भद्रे गच्छ त्वं पुरतो मम ॥
गृहे ते दर्शयिष्यामि परिधेयान्यशेषतः,
तेभ्यः समधिकं रम्यं परिधेयं विवेचय
यदहं परिधास्यामि शुभे परिणयोत्सवे
(गन्तुमीहते)
उरुशीला – (जनान्तिकम्) सिक्थलिप्ता बराकीयं सत्यं वच्मि नियन्त्रिता ।
हीरा – तथा चेत्प्रणयोऽवश्यं भावी, नात्र विडम्बना,
कामः कांश्चिच्छरैर्हन्ति कांश्चिद्यन्त्रैर्निपीडयन् ॥
(निष्क्रान्ता सहोरुशीलया)
विचित्रा – (बहिरागत्य)
केयमग्निमयी ज्वाला कर्णौ मे दहति स्फुटम् !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किमेतत्सकलं सत्यं ? न्यक्कृताऽस्मि विशेषतः
दर्पस्य चाभिमानस्य पराभूतेः प्रभावतः ॥
देवि निर्घृणते ! भद्रं, दर्पदेव ! नमोऽस्तु ते
न परोक्षे प्रशस्येत वां प्रसादीकृतो जनः ॥
विनोदकः सकामोऽस्तु प्रीतिं सन्तर्पयानि ते
हृदयं मेऽश्मसंकाशं कोमलस्य करस्य ते
अनुरूपं विधास्यामि प्रेमामृतनिषेचनैः ॥
यदि कामयसे त्वं मां, कामं सफलयामि ते।
आवयोः प्रणयग्रन्थिः पूतः स्याद् दृढवन्धनैः ॥
विनोदक, वदन्त्यन्ये प्रणयं मे त्वमर्हसि।
स्वयं चानुभवामि त्वां कामयेऽहं ततोऽधिकम् ॥

(प्रस्थिता)

❀द्वितीयं दृश्यम् ❀

स्थानं लीलानाथस्य प्रासादः।

ततः प्रविशन्ति दानापीडः, कुमुदकः, विनोदको लीलानाथश्च।

दानापीडः—अहमत्र तिष्ठामि यावत्तव विवाहः सम्पद्यते ! तत आरागणं गमिष्यामि ।

कुमुदकः—अहमपि देवमनुगमिष्यामि, यदि देवः अनुमन्येत ।

दानापीडः - नैतत् समुचितं, विवाहस्य नवीनमुन्मादकत्वं ह्रासयितुं सुमहत् साधनं च भवेत्। तदिदं बालकाय नवीनपरिच्छदस्य प्रदर्शनं, तस्य धारणस्य निवारणमिव । अहं केवलं विनोदकस्यैव साहचर्यं कामये, यतोऽसावापादचूलं विनोदकः। द्विस्त्रिर्वारान् कामस्य धनुषो गुणानच्छिनत्। नासौ कामहतको

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेद्धु मेनं साहसते। एष घण्टामिव गभीरं हृदयं धारयति, एतस्य च जिह्वा प्रखरा। यदस्य हृदयं कामयते, तदनुवदति।

विनोदकः—ननु वीराः, नाहमिदानीं तादृशः, यादृशः प्रागासम्।

लीलानाथः--अहमपि तथैव तर्कयामि, त्वमत्यन्तमवसन्नो विलोक्यसे।

कुमुदकः—मन्येऽसौ प्रणयी संजातः।

दानापीडः—दूरे भव, किमेवमसदृशं मन्त्रयसि। न चास्य गात्रे विशुद्धस्य शोणितस्य विन्दुरप्यस्ति, यः किल प्रणयेन सं-सृज्येत। यद्यवसन्नः तर्हि धनार्थी भवेत्।

विनोदकः—दन्तपीडया व्यथितोऽस्मि।

दानापीडः—तर्हि उद्धर एतं दुष्टं दन्तम्।

विनोदकः—उन्नमय एतम्।

कुमुदकः—ननु त्वमेव प्रथमत एतमुन्नमयितु मर्हसि, अनन्तरमुद्धर्तुम्।

दानापीडः—किमिति? दन्तपीडया दुःखम्?

लीलानाथः—तद्दन्ते आन्तरो दोष आहोस्वित् कोऽपि कीटः स्यात्।

विनोदकः—तिष्ठतु प्रणयः। स एव एतद् दुःखं जानाति, य एतमधि-गच्छति।

कुमुदकः--तथाप्यहं वच्मि एष प्रणयी।

दानापीडः—प्रणयी! न काऽपि प्रणयस्य छाया अस्मिन् परिदृश्यते। अवश्यमेष विभिन्नेषु वेशेषु प्रणयी भवितुमर्हति। अद्य डाचदेशीयः-श्वश्च फ्रान्स देशीयः,अथवा एकदैवोभय देशीयः। मध्यभागादधः-शिथिलं परिच्छदं धारयन् शर्मण्य देशीयः अथवा आपादा-स्यपर्यन्तं प्रलम्बं कञ्चुकमूर्द्धवंभागे धारयन् स्पेनीयो भवेत्। यदि प्रणयी, तर्हि एषु परिच्छदेषु विमुग्ध इति,यथाऽस्य भावतः प्रतीयते, न तु त्वदुक्तरीत्या प्रणयी भूत्वा विमुग्धो भवेत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानापीडः--किमसौ नापितस्यापणे नकेनाप्यवलोकितः ?

कुमुदकः--नासौ। परन्तु नापितस्य जन एतेन सह चरन्नवलोकितः। अये गण्डस्याभरणं प्राकृतनं श्मश्रु च कृतवपनं दृश्यते, मुखं च 'टेनिस' कन्दुकमिव चिक्कणं भाति।

लीलानाथः--अये यत्सत्यं, श्मश्रुविरहादसौ किशोरतरः प्रतिभाति !

दानपीडः--अये, एष गन्धमार्जारकस्तूरीतैलेन लिप्तगात्रो दृश्यते, किमस्मात्सौरभात् किमपि प्रतीयते ?

कुमुदकः--अये तदेवेदं सौरभं, यत्किल तरुणाः प्रणयिनः श्रद्दधति।

दानापीडः--तस्यावसादस्तु समधिकं संसूचकः प्रणयस्य।

कुमुदकः--अपि च किमसावभ्यस्त आसीत्पूर्वं मुखं मार्जयितुम्

दानापीडः--आम। अपि चासौ सुभगङ्करणैर्योगैर्मुखमालिम्पति, शरीरं च प्रसाधयति। श्रूयते--जना एवं कथयन्ति।

कुमुदकः--किञ्च तस्य तथा प्रखरा परिहासप्रवृत्तिरिदानीं बीणाथास्तन्त्री संजाता, छेदविशिष्टा च। !

दानापीडः--यत्सत्यं तानीमानि वहूनि निदर्शनानि तस्य हृद्गतं भावं प्रकटयन्ति। तैः प्रमाणितं भवति स प्रणयीति।

कुमुदकः--स प्रणयीति सन्देहो नास्ति। अपि च अहं जाने कातं कामयते।

दानापीडः--तदपि मया ज्ञातव्यम्। विश्वसिमि सैषा तादृशी कापि, यैनं स्वरूपतो न जानाति।

कुमुदकः--एवमेतत्। नैषा एतमेतस्य च दुर्गुणानपि जानाति। तथापि एतस्य प्रेम्णा म्रियमाणा वर्तते।

दानापीडः--सैषा समाधावूर्द्ध्वमुखी पूरणीया।

विनोदकः--तदेतत् सर्वं नैव प्रतीकारोपायो दन्तपीडायाः। अये तात वीर, क्षणं मया साकं निभृतमन्तरमायाहि। अष्टौ वा नव वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मधुराणि वचनानि त्वदर्थं कल्पितानि, यानि एते चित्रमृगाः नैव श्रोतुमर्हन्ति।

(लीलानाथेन साकं प्रस्थितः)

दानापीडः--जीवितेन शपामि--विचित्राविषयमेव प्रकटयितुं गतः।

कुमुदकः-तथैव तत्। हीरा मार्गरीतिश्च तत्वता कालेन धिचित्रया सह स्वां स्वां भूमिकामवश्यमभिनीतवत्यौ भवेताम्। इतः परं द्वौ भल्लूकौ नैव परस्परं दशेतां यदा मिलितौ स्याताम्।

दानयक्षस्य प्रवेशः।

दानयक्षः--भ्रातर्देव, ईश्वरस्ते परिरक्षतु।

दानयज्ञः-सुप्रदोषमः, भ्रातः।

दानयज्ञः--यद्यवकाशः किञ्चिद् निवेदयामि।

दानापीडः--किं निभृतम् ?

दानयक्षः-यथा ते रोचते। तथापि सामन्तः कुमुदकः श्रोतुमर्हति यतो मम वक्तव्यं तमेव विषयीकरोति।

दानापीडः-को वा विशेषः ?

दानयक्षः-(कुमुदकं प्रति) श्वः किल तत्रभवतो विवाहो भविता।

दानापीडः-एवमेव। त्वमपि जानासि।

दानयज्ञः-नाहं विश्वसिमि, यदि स जानीयात् यन्मया ज्ञातम्।

कुमुदकः-यदि किमपि प्रतिबन्धकं, प्रार्थये प्रकाशय तत्।

दानयक्षः-त्वं तावद्भावयसि, नाहं त्वयि स्निह्यामि इतःपरं तत्प्रभाणितं भवतु। यदहं प्रकटयामि तेन मम प्रकृतिमाचरणं च सम्यगेव अनुमातुमर्हसि। मम भ्राता तु त्वामत्यन्तमाद्रियते, स्नेहवशाच्च तमिममागामिनं विवाहं निष्पादयितुं साहाय्यमकार्षीत्। परन्तु स एष समयस्य परिश्रमस्य च अपव्ययो नाम।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानापीड–किमर्थम् ? को वा विशेषः ?

दानयक्षः--तदेव वक्तुमागतोऽस्मि । समयं संक्षेप्तुकामो वदामि, सा सर्वेषां बहुधा गर्हणाया विषयो भवति । परिणेष्यति स्वामिनि च अविश्वस्ता ।

कुमुदकः--का ? हीरा ?

दानयक्षः–सैव । लीलानाथस्य हीरा, तव हीरा, सर्वेषां च हीरा ।

कुमुदकः–अविश्वस्ता !

दानयक्षः--नायं शब्दः तस्याः प्रकृतिगतं कौटिल्यं चित्रयितुं पर्याप्तो भवति । अहं कथयामि–सा न केवलमविश्वस्ता, ततोऽप्यधिकं निन्दनीया । इतोऽधिकं निन्दापरं शब्दं चिन्तयमहमनुरूपं कलयामि । मा विस्मितो भव यावदेतन्न प्रमाणितं भवति । सकृदद्य रात्रौ मया सह आगच्छ, द्रक्ष्यसि कथं तस्या अवरोधवातायनं विवाहदिवसस्य पूर्वस्यां रात्रावपि अन्येषां प्रवेशायोन्मुक्तम् । यदि ततोऽपि त्वं तां कामयसे, परिणयस्व । तदिदं समुचितं भवेत्, यदि तत्रभवान् मतेः परिवर्तनं कुर्यात् ।

कुमुदकः–किमिदं सत्यं भवितु मर्हति ?

दानापीडः–नाहं तथा विचारयामि ।

दानयक्षः--यदि विश्वसितुं न प्रभवसि तर्हि प्रत्यक्षीकुरु चक्षुषा यत् न जानासि तत्र निर्णयं मा कुरु । यदि मामनुसरिष्यसि, तर्हि इतोऽधिकं बहु दर्शयिष्यामि । यदा बहु द्रक्ष्यसि, बहु च श्रोष्यसि, तदा निर्णयं करिष्यसि ।

कुमुदकः–यद्यहमद्य रात्रौ तथा किंमपि कारणं, येन तां न परिणेष्यामि, द्रक्ष्यामि तर्हि श्वो विवाहमण्डप एव तां विलज्जितां करिष्यामि ।

दानापीडः--त्वदर्थं मया एषा आवर्जितेति तामपमानयितुमहमपि त्वया सहयोगं करिष्यामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानयक्षः--नाहं तामितोऽधिकं लघुं करोमि यावत् त्वं सर्वं न प्रत्यक्षं करोषि । मध्यरात्रिं यावत् शान्तशिष्टः तिष्ठ । प्रकृतं रूपं प्रदर्शितं भवतु ।

दानापीडः-मधुरमुपक्रान्तोऽयं दिवसः कथं विषमपरिणामः संजातः !

कुमुदकः–अये अत्याहितम् ! अद्भुततया विपर्यासं गता आशा आकाङ्क्षाश्च ।

दानयक्षः–दुर्नीतिः प्रतिकरणीयेति त्वमेव वदिष्यसि, यदा त्वं सर्वं द्रक्ष्यसि ।

* तृतीयं दृश्यम् *

स्थानम्– महीशानाया राजवीथी

ततः प्रविशन्ति दुर्गतारिः (१) वीर्यशाली (२) रक्षिणश्च ।

दुर्गतारिः – अपि नाम यूयं सुजना विश्वस्ताश्च ?

वीर्यशाली – एवमेव । अन्यथा ते धर्मतः शरीरत आत्मतश्च निपीडिता भवेयुः ।

दुर्गतारिः – नहि नहि । सोऽयं समधिको दण्डः यदि ते राज्ञि कामपि भक्तिमावहन्ति । राज्ञा किल ह्येते रक्षित्वेन नियुक्ताः ।

वीर्यशाली – अस्तु नाम । भ्रातर्दुर्गतारे, एतेषां स्वं स्वं नियोगं निर्दिशतु भवान् ।

दुर्गतारिः - प्रथमतो वक्तव्यं के नम योग्यतमा राजभटेषु ।

प्रथमो रक्षी – भट्टारक, ह्यूफउदकाकः (३) जर्ज श्रीकोलश्च (४) यत एतौ लिखितुं पठितुं च जानीतः ।

---

(१) दुर्गतारिः—Dogburιy

(२) वीर्यशाली – Verg ɔs

(३) ह्यूफउदकाकः – Hugh Otcoke

(४) जर्ज श्रीकोलः—George Scaclole

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गतारिः—भ्रातः श्रीकोल, अत्र आर्याहि । सुन्दरेण नामधेयेन भगवता प्रसादीकृतोऽसि । सुदर्शनीयत्वम् अदृष्टस्य अवदानम्, लिखनं पठनं तु प्रकृतेः ।

द्वितीयो रक्षी—भट्टारक, उभयं तु—

दुर्गतारिः—त्वयि वर्तते । जानामि—तदेव तवोत्तरं भवेदिति । साधु । तव सुदर्शनत्वमधिकृत्य भद्र, ईश्वरं स्तुहि, आत्मनि नैव श्लाघामावह । लिखनपठने तु आसाताम् । यदा योग्यताया आवश्यकता न भवेत्, तदा तयोरुपयोगः प्रदर्शितो भविष्यति । इदानीं त्वमत्यन्तं निर्बोधो राजभटो भवितुं योग्योऽसि । तदिमं प्रदीपं गृहाण । अयमेव ते नियोगः । सर्वेऽपि दुर्वृत्ता जनास्त्वया संरोधनीयाः, राज्ञो नाम्ना यः कोऽपि जनः स्थापनीयः ।

द्वितीयो रक्षी—अथ यदि स न स्थास्यति ?

दुर्गतारिः—किमर्थम् ? तर्हि त्वया ततो दृष्टिः प्रत्यावर्तनीया । यथेच्छं गमनाय अवकाशो दातव्यः । निर्गते च तस्मिन् स्वसहचरान् रक्षिण आहूय बोधय—ईश्वरस्य प्रसादेन एकस्माद् दुर्विदग्धात् रक्षितोऽस्मीति ।

वीर्यशाली—कृतादेशोऽपि यदि स न तिष्ठति, स तु राज्ञो न कोऽपि भवति ।

दुर्गतारिः—सत्यम् । तादृशा राज्ञो न केष्वपि विषयेषु संसृज्येरन् । अपि च त्वया रथ्यासु न कोऽपि शब्दः करणीयः । यतो रक्षिणः पक्षे रथ्यासु शब्दापनं कथोपकथनं च नितान्तमसहनीयम्, वर्जनीयं च भवति ।

रक्षी—वरं वयं स्वपिमो न पुनरालापं कुर्मः । जानीमो वयं रक्षिणः कर्तव्यम् ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गतारिः—किमर्थम् ? त्वं तु चिरन्तन उदासीनश्च रक्षीव प्रजल्पसि। नाहं विभावयामि कथं त्वं स्वप्तुं प्रभवेः । सावधानो भव यथा तत्र उपकरणानि न मुषितानि भवन्ति भवतु। अपि च त्वया सर्वेऽपि मद्यापणा अवेक्षणीयाः । ये किल तत्र मदमत्ताः स्युः, सर्वेऽपि ते शय्या ग्रहितुम् आदेष्टव्याः ।

रक्षी अथ यदि ते शय्या न गृह्णन्ति ?

दुर्गतारिः- कथमेतत् ! तर्हि ते एकान्ते वर्जनीयाः, यावन्मद-विमुक्ता भवन्ति । अथ यदि ते तव वचनं न शृणुयुः, तर्हि तान् न परिगणय, यतस्ते साधवो भवन्ति।

रक्षी—साधु। भट्टारक, तथैव करिष्यामः ।

दुर्गतारिः—यदि त्वं चौरमेकं कदाचित् पश्यसि तर्हि त्वं स्वकर्तव्य-मनुस्मरन्-तं तथा संशयितुमर्हसि नासौ सुजन इति । परन्तु तादृशानां जनानां सम्पर्कः सर्वथा परिहरणीयः, ते च दूरतः परिवर्जनीयाः ।यावदल्पं परिहारः तावत् तव गौरवम् ।

रक्षी—यदि वयं तं स्तेनं जानीयामः, किं तं न ग्रहीष्यामः ?

दुर्गतारिः—सत्यम्, तव कर्तव्यानुरोधेन ग्रहणीयः। परन्तु अहं विभावयामि यदि ते स्खलिताः अवश्यं गर्हणीया भवन्ति अतस्तवेदं शिष्टसाम्मतं कर्तव्यं भवेत्। यदि स चौरो भवति, तर्हि तव समक्षं निभृतपदक्षेपेण गच्छन् तथा प्रमाणयतु । तदर्थं त्वया अवकाशो देयः ।

वीर्यशाली – भाव, त्वं सततं दयालुरित्यभिधीयसे ।

दुर्गतारिः—कोऽत्र सन्देहः । नाहं कदाचित् कुक्कुरमपि नाभियुनज्मि किं पुन र्मानुषं यः कामपि साधुतामावहति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वीर्यशाली—यदि रात्रौ कमपि वालं क्रन्दन्तं श्रृणुयाः, तर्हि तत्र धात्रीमाह्वयेः, ब्रूयाश्च तमुपसान्त्वयितुम् ।

रक्षी--अथ यदि धात्री प्रसुप्ता भवेत्, न चास्मान् उपश्रृणुयात् ?

दुर्गतारिः—तर्हि शान्तशिष्ठः प्रतिष्ठस्व । स वालः स्वयमेव क्रन्दनैस्तां वोधयतु । नहि क्रन्दत् स्वमपत्यमवधीरयन्ती मेषी जातुचित् क्रन्दन्तः वत्सतरमुपश्रृणुयात् !

वीर्यशाली—अविलथमाह भट्टारकः ।

दुर्गतारिः—-अवसितमुपदेशनम् । ननु रक्षिणः यूयं राजभटा नूनं राज्ञः प्रतिनिधयो भवत । अथ यदि राजा रात्रौ दृश्येत तमवस्थापयत ।

वीर्यशाली—देव्या नाम्ना शपामि । अहं विभावयामि—न तथा कर्तुं शक्यते ।

दुर्गतारिः—पणामि पञ्च कार्षापणान् अस्मिन् विषये, यः कोऽपि विधानज्ञो मया सहमतो भवेत् । देव्या नाम्ना शपामि—राजभटा अवश्यं राजानमवस्थापयितुमर्हन्ति, अवश्यं यदि राजा न वारयति । न रक्षिणः कमपि अवमन्तुमर्हन्ति । तस्य इच्छाविरोधेन निरोधनमपराधो भवति ।

वीर्यशाली—देव्या नाम्ना शपामि । अहं तत् तथा भावयामि ।

दुर्गतारिः—हाः ! हाः !! हाः !!! । साधु साधु । सुरजनी भवतु । यदि किमपि गुरुतरमापतति तर्हि मामाह्वयत । स्वस्य सहचराणां च शपथं सर्वथा पालयत । सुरजनी युष्माकं भवतु, आगच्छ वयस्य—

रक्षी—स्वनु भट्टारकाः, साधु साधु । गृहीता उपदेशाः, अवधारितं कर्तव्यम् । गच्छामो वयम् । मठस्य पुरोवर्तिनि फलकासने उपविशामो यावत् द्वितीया घटिका भवति । ततः शय्यामाश्रयिष्यामः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गतारिः—अये सुजना राजभटाः ! एकः शब्दोऽवशिष्यते । प्रार्थये—सततं सामन्तस्य लीलानाथस्य द्वारदेशमवेक्षध्वम् । श्वो विवाहो भविता । अद्य रात्रौ सुमहान् संघर्षः सम्भाव्यते । आपृच्छामि । आशासे, सावधाना निर्वहत स्वं नियोगम् ।

(निष्क्रान्तौ दुर्गतारिः वीर्यशाली च)

(ततः प्रविशतो वैरोचकः कर्णादश्च)

वैरोचकः—अये कर्णाद !

रक्षी—(स्वगतम्) शान्तिः ! स्थिरो भव ।

वैरोचकः— कर्णाद ! नन्वहं त्वामाह्वयामि ।

कर्णादः—एषोऽस्मि । तव कफोणिकामनु तिष्ठामि ।

वैरोचकः—अये भारेण मे कफोणिका उपद्रुता । मन्ये, कोऽपि व्रणो भवेत् ।

कर्णादः—समये तवैव भाषया उत्तरं दास्यामि ! इदानीं ब्रूहि—किं प्रष्टुकामोऽसि ?

वैरोचकः—वर्षकणाः पतन्ति । गृहस्यास्योपान्तदेशे तिष्ठावो यावदहं मदमत्त इवोन्मुक्त हृदयः सकलं तथ्यं प्रकाशयामि ।

रक्षी—(स्वगतम्) किमप्यत्याहितम् । भट्टारकाः, आरात् तिष्ठत ।

वैरोचकः—प्रथममवधेहि—मया दानयक्षात् सहस्रं स्वर्णमुद्राः समासादिताः ।

कर्णादः—किमेतत् सम्भवति यदेको धूर्तस्तावद् घनं सम्पादयेत् !

वैरोचकः—वरमेतत् त्वया प्रष्टव्यं कथमेको धनिकस्तावद्धनं दातुं प्रभवेत् ! यदा हि धूर्ता धनिकाः स्वाभीष्टसिद्धये दीनानामधमानां साहाय्यमर्थयन्ते तदा दीना अधमा यथेष्टं शुल्कं याचन्ते ।

कर्णादः—अहं तु विस्मयेन परवशो भवामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैरोचकः—तेन तत्र अनभिज्ञता प्रमाणिता भवति। त्वं तु केवलं जानासि—परिच्छदस्य, उष्णीषस्य कञ्चुकस्य चाडम्मरः मनुष्यस्य पुरतः अकिञ्चित्करः।

कर्णादः—एवमेव। सर्वोऽप्येष परिच्छदः।

वैरोचकः—अनु वदामि आडम्बरमधिकृत्य।

कर्णादः—भवतु। आडम्बरस्तु आडम्बर एव।

वैरोचकः—धिक्। तर्हि अहं वच्मि मूढा मूढा एव। परन्तु त्वं नावधारयसि कीदृशः कदाकृतिः पश्यतोहरोऽयमाडम्बरो नाम।

रक्षी-(स्वगतम्) अहं जानाम्येनं कदाकृतिं पश्यतोहरम्। सोऽयमधमः कदाकृतिः पश्यतोहरः सप्ताधिकेषु वत्सरेषु प्रख्यातः भद्रजन इव इतस्ततः प्रचलति। स्मराम्यस्य नामधेयम्।

वैरोचकः—किं कमप्यालपन्तं शृणोषि ?

कर्णादः—न हि। गृहस्थायं कोलाहलः।

वैरोचकः—न त्वं जानासि यदहं वच्मि कीदृक् कदाकृतिः पश्यतोहरोऽयमाडम्बरः। अयं हि चतुर्दशतः पञ्चत्रिंशति वर्तमानान् सकलानपि तत्पशोणितान् तरुणान् अतीवविचित्रतया परिणमयति। कदाचित् तान् रक्तसागरं तितीर्षतां चित्रार्पितानां धूमधूषरितानां फेरवीयानां (१) सौनिकानां रूपेण, कदाचित् मठस्य वातायनकपाटेष्वङ्कितानां बिल्वदेवतायाः (२) पुरोहितानां रूपेण, कदाचिच्च कृतश्मश्रुवपनस्य महिलायमानस्य कलङ्कितं कीटदृष्टं कौषेयकं परिदधानस्य हर्क्युलसस्य (३) रूपेण चित्रयति तान्।

---

(१) फेरवीय=Pharaoh सम्बन्धी

(२) बिल्वदेवता=God Bel

(३) हर्क्युलास=Hercules.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्णादः—जानामि तत्सर्वम् । अपि च जानामि यदयमाडम्बरो मनुष्यापेक्षया समधिकानि रूपाणि धारयति । अपि च किं त्वं स्वयं नानेन आडम्बरेण प्रभावितोऽसि ? यत् त्वं वृत्तान्तं कमयितुकामो विषयान्तरमाडम्बरमवतरसि ।

वैरोचकः—न तथा, नोभमया । अवधारय त्वम् अद्य रात्रौ हीरायाः सहचरी मार्गरीति रार्वजिता मया हीराया नामधेयेन । सा हि स्वमिन्याः परिच्छदं परिधाय अन्तः-पुरवातायनमाश्रित्य मां सहस्रशः सुरजनीत्वज्ञापनेन * सभाजितवती । तदिदं गर्हितं कर्म तुभ्यं निवेदयामि । प्रथमं त्वामावेदयामि--अत्र राजा, कुमुदको, मम च स्वामी सम्पृक्ताः । मम स्वामिना दानयक्षेण निवेदितपूर्वौ, उपवने च स्थापितौ सर्वमिदं रमणीयं प्रीति प्रेक्षणकमपश्यताम् ।

कर्णादः--किं तौ स्वगतं मार्गरीतिर्हीरेति ।

वैरोचकः—राजा कुमुदकश्च हीरेत्येव अजानीताम्, पिशाचो मे स्वामी तु मार्गरीतिरिति । अंशतः पूर्वकृतैः शपथैः, अंशत-स्तेषां नेत्राणि प्रतारयन्त्या अन्धकार रजन्या, विशेषतश्च मम दौरात्म्येन निवेदितपूर्वं दानयक्षस्य वितथं छलं प्रमाणयता, कुमुदकः समधिकं प्रकुपितो निष्क्रान्तः, अशपच्च—श्वः प्रात-र्मन्दिरे निर्दिष्टे समये तां द्रक्ष्यामि, अद्य रात्रौ प्रत्यक्षीकृतं सकलमपि कर्म समवेतानां भद्रजनानां पुरतः प्रख्याप्य तां विलज्जितां करिष्यामि, विना च पतिं स्वगृहं प्रत्या-वर्तयिष्यामि ।

प्रथमो रक्षी—राज्ञो नाम्ना त्वा मभियोजयामः, स्थिरो भव ।

---

* सुरजनीत्व = Goodnight

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीयो रक्षी–आह्वय अस्माकमधिकारिणं सुजनं राजपुरुषम्। समग्रेऽपि भूमण्डले अविदितपूर्वं भीषणतमं षड्यन्त्रमस्माभिरत्राविष्कृतम्।

प्रथमो रक्षी–कदाकृतिश्च तेष्वन्यतमो भवति, जानाम्यहं तम्। स किल वामकर्णे प्रणयकेशगुच्छं (१) धारयति।

कर्णादः–भो भो भट्टारकाः, भो भो भट्टारकाः!

प्रथमो रक्षी–त्वया अवश्यं झटिति स कदाकृतिरानेतव्यः। अहं त्वां सावहितं करोमि।

कर्णादः—भो भो भट्टारकाः!

प्रथमो रक्षी—न किमपि वक्तव्यम्। वयं युवामभियुक्तौ कुर्मः। निर्दिशामो वयम्, अस्मान् अनुसरतम्।

वंरोचकः—वयं तावत् सलोप्त्रकमेभिः राजपुरुषैः गृहीता अपराधिन इव भवामः।

कर्णादः–युष्माकं पुरतो दृढं प्रतिपादयामि। सन्देहेनैव वयं निगृहीता न तु अपराधेन। गच्छत, एते वयं युष्माननुसरामः।

(निष्क्रान्ताः सर्वे)

* चतुर्थं दृश्यम् *

स्थानम्–हीराया उदवसितम्

ततः प्रविशन्ति हीरा, मार्गरीतिः, उरुशीला च।

हीरा—सखि उरुशीले, सकृदुद्बोधय मम भगिनीं विचित्राम्, उत्थापयैनां शयनतः।

उरुशीला–यथा आदिशति भट्टिनी।

---

(१) प्रणयकेशगुच्छ=Love lock

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हीरा– ब्रूहि चैनां मदन्तिकमुपगन्तुम् ।

उरुशीला - यथा आज्ञापयसि । (प्रस्थिता)

मार्गरीतिः—यत्सत्यम् , मन्ये—अपरं ते ग्रैवेयकं चारूतरं भवेत्

हीरा—नहि । एतदेव मे रोचते, अहमेतदेव परिधास्ये ।

मार्गरीतिः—यथार्थतो नेदं तथा चारुतरम् । विश्वसिमि, तव भगिन्यपि मामेवानुवदेत् ।

हीरा—मम भगिनी एका मूढा, त्वमप्यपरा । एतद् विना नान्यदहं परिधास्यामि ।

मार्गरीतिः—उत्तंसोऽयमतीवभासुरस्तव केशपाशस्य चानुरूपः । तव कञ्चुलिका तु विरला सुप्रशस्ता च । मिलनेश्वर्याश्च ❀ कञ्चुलिका अत्यन्तं सुप्रशस्था, सर्वे च जनास्तामिमां प्रशंसन्ति ।

हीरा—सा हि सर्वातिशायिनीति वदन्ति ।

मार्गरीतिः—परन्तु तव कञ्चुलिकायाः पुरतः सा रात्रि परिधेयेव विभाव्यते ! अवश्यं सा कञ्चुलिका सुवर्णसूत्राकलिता प्रान्तेषु रजतसूत्रैराभूषिता, मुक्तेभिरलङ्कृता, बहिः । तव तु परमरुचिरा नेत्रप्रीतिकरी, अत्यन्तं विलसानुगुणा ततो दशगुणं रमणीया ।

हीरा—भगवान् मे शक्तिं वितरतु तामिमां धारयितुम् , हृदयं मे समधिकतया भाराक्रान्तं भवेत् ।

मार्गरीतिः—न चिराच्च पुरुषस्य भारेण ततोऽप्यधिकं भाराक्रान्तं भवेत् ।

हीरा—अपेहि । एवं वदन्ती किं न जिह्रेषि ?

मार्गरीतिः—किमिति जिह्रेमि देवि, विवाहविषयमुदारतयो ल्लिखन्ती ? किमयं विवाहो न महितः समाजेषु

❀ मिलनेश्वरी—Duchess of Milon.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्ततो भिक्षुकेऽपि ? अवश्यं तव प्राणेश्वरो विनापि विवाहं जगति सुमहितो वर्तते ! अये इदानीमवगच्छामि मम प्रमादम् ! 'पत्युर्भारेण' इत्यनुक्त्वा पुरुषस्य भारेण इत्युक्तम् । क्षन्तव्याऽस्मि । न कोऽपि मे कश्मला मनोवृत्तिस्तथाऽभिधाने । विश्वसिहि नाहमपवदितुं तथोक्तवती ! 'ललना पत्युर्भारमावहति' इत्युक्तौ मन्ये न कोऽपि दोषो वर्तते अवश्यं यदि पतिः पत्नी चोदारे भवतः । अतादृशः पतिस्तु लघुरेव, नैव भारः। विचित्रादेवीं प्रष्टुर्महसि यद्यहमसदृशभाषिणी । सेयमित आपतति ।

(विचित्रायाः प्रवेशः)

हीरा--सुप्रभातं भगिनि !

विचित्रा–सुप्रभातं प्रियतमे हीरे !

हीरा—अये किमेतत् ! किमिति त्वमीदानीमवसन्नेन स्वरेणालपसि !

विचित्रा--मन्येऽहं नापरेण स्वरेण वक्तुं प्रभवामि ।

मार्गरीतिः–तेन हि 'प्रणय विकाशनृत्यं', (१) कुर्मः । तेन ते भार उपशमितो भविष्यति । रागमनुसर, यावन् नृत्यामि ।

विचित्रा–अये प्रणयविकाशनृत्यपरायणे! त्वं पादौ चालयितुं शक्नोषि भवतु नाम ते पति दोंषाणाम।करः, न परिहीयेत स फलभरणे ।

मार्गरीतिः–अन्याय्योऽयमुपसंहारः ! पदाघातेनावधीरयामि ।

विचित्रा--पञ्चमी होरा आपतति । इयं किल वेला तव प्रसाधनाय । अहं तु, यत्सत्यं नितरामसुस्थाऽस्मि । ह ह हा

मार्गरीतिः–किं वाहाय वाहनाय उत विवाहाय ।

विचित्रा–वकारेणोपक्रान्ताय सर्वस्मा अपि ।

मार्गरीतिः—साधु । यदि त्वं तार्कीया न परिणमसि, नक्षत्रबलं

(१) प्रणयविकाशनृत्यं—Light of love.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयं न विश्वसिमः ।

विचित्राः—किमेषा दुर्जाता अभिप्रैति—अपि जानासि?

मार्गरीति—न किमपि । परन्तु प्रार्थये–भगवान् प्रत्येकं जनाय स्वहृदयाभिलषितं प्रेरयतु ।

हीरा—आर्यपुत्र इमे करत्राणे प्राहिणोत्, नितान्तं सुवासिते एते । सकृदाजिघ्र ।

विचित्रा—निरुद्धघ्राणाऽस्मि ? नाहमाघ्रातुं प्रभवामि ।

मार्गरीतिः—कथम् ? ललना ! निरुद्धघ्राणाऽसि । सम्भाव्यते शीतबाधा ।

विचित्रा—भगवन्, परित्रायस्व, भगवन् परित्रायस्व । अथ कियदवधि त्वयैषा चातुरी अभिशिक्षिता ?

मार्गरीतिः—यदवधि त्वया परित्यक्ता एषा ! किमियं चातुरी न मामत्यन्तं विलक्षणां करोति ?

विचित्रा - नैतावता पर्याप्तम् । तामिमामुत्तंसे धारयितुमर्हसि । यथार्थतोऽहं पीडिताऽस्मि ।

मार्गरीतिः—तर्हि कमपि विमलं विनोदकं लेपं संगृहाण, हृदयं च तेनोद्वर्तय : अयमेव ते पीडायाः प्रतीकारोपायः ।

हीरा—अये तामेनां शङ्कुना विध्यसि !

विचित्रा-कोऽयं विनोदको लेपः ? किमर्थश्चायं विनोदको लेपः ? किमत्र त्वं कमप्यन्तर्निगूढमर्थं न्यदधाः ?

मार्गरीतिः -न कमपि निगूढमर्थम् । मन्ये मदीयं भाषणं प्राञ्जलमास्ते । स एव संजीवनौषधिरिति मया अभिहितम् । मन्ये–त्वं विभावयसि—अहं त्वां कामासक्तां विभावयामीति । देव्या नाम्ना शपामि नाहं तथा दुर्विदग्धा तथा विभावयितुम् । यदहं चिन्तयामि यदहं चिन्तयितुमिच्छामि, यदहं चिन्तयिष्यामि यद्धाहं न चिन्तयामि, स सर्वोऽपि मे हृदयस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्प्रधारणाया विषयः। यद्यहं विभावयामि, तर्हि हृदयेन साकं सम्प्रधार्यैव। तेनाहं वच्मि--त्वं कामासक्ता आसीः, इदानीमपि भवसि, भविष्यसि, तथा भवितुं चार्हसीति। एवमेव विनोदकः। सोऽयमसकृदशपन्न परिणेष्यामीति। इदानीं प्रकृतिस्थः प्रेमाहतो वर्तते। निस्सङ्कोचं चेतरनिर्विशेषं मांसं भुञ्जानो वर्तते। कथं त्वं परिवर्तिता भविष्यसि नाहं जाने। परन्तु, अहं मन्ये, इतरललनानां छाया तव नेत्रयोः प्रतिभाति।

विचित्रा--कया धारया ते जिह्वा प्रसरति ?

मार्गरीतिः—नाप्राकृतया धोरण्या।

(प्रविशति सम्भ्रान्ता उरुशीला)

उरुशीला – आर्ये, सत्वरं प्रविश प्रसाधनागारम्। एष राजा, सामन्तो विनोदकः अन्ये च महनीया नागरिकास्त्वां ससत्कारं मठं प्रापयितुमापतन्ति।

हीरा - (ससम्भ्रमम्) भगिनि, सुशीले मार्गरीते, सुशीले उरुशीले, सकृदागच्छत, प्रसाधने च सहायकमाचरत।

(निष्क्रान्ताः सर्वाः)

❀ पञ्चमं दृश्यम् ❀

स्थानम् - लीलानाथस्य प्रासादस्य अपरमपवरकम्।

ततः प्रविशन्ति लीलानाथः, दुर्गतारिः, वीर्यशाली च।

लीलानाथः—भद्र प्रतिवेशिन्, किं मां वक्तुकामोऽसि ?

दुर्गतारिः – देव, काऽपि मन्त्रणा भवता साकं करणीया, या भवन्तमेव विषयीकरोति।

लीलानाथः– प्रार्थये, समासेनाभिधेहि यतोऽहं नितरां कार्यव्यस्तः।

दुर्गतारिः–देव्या नाम्ना शपामि–देव, सोऽयं विषयः—

वीर्यशाली–देव, एवमेतद्, [illegible] विषयः —

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लीलानाथः–सोम्यौ सखायौ, कोऽयं विषयः ?

दुर्गतारिः–देव, महाभागोऽयं वीर्यशाली विषयमधिकृत्य स्वल्पं वदति, वृद्धोऽसौ, देव, परन्तु तस्य सरसता तथा नापगता देव, यथा मया विभाविता । यत्सत्यमेष भ्रूलतयोरन्तरालत्वगिव सरलः ।

वीर्यशाली--एवमेतत् । भगवन्तमभिनन्दामि अन्यो वृद्ध इवाहं सरलो भवामि । नान्यः सरलतरो वर्तते ।

दुर्गतारिः–जघन्येयं तुलना । जोषमेधि प्रतिवेशिन् वीर्यशालिन् ।

लीलानाथः – प्रतिवेशिनौ, युवामुद्वेजयितारौ भवतः ।

दुर्गतारिः – यत्तत्रभवते रोचते । किन्तु वयं राज्ञोऽधिकारिणः । सत्यं वच्मि अन्ततो मम पक्षे-यद्यहं सम्पन्नोऽभविष्यमिदमपि उपादेयं वस्तु हृदा साकं तत्रभवते उपायनमकरिष्यम् ।

लीलानाथः–तव सम्पद उपायनं मह्यम् ?

दुर्गतारिः – एवमेतत् । एतद्धि द्वादशसाहस्रीतोऽप्यधिकं यन्मया समासादितम् । शृणोमि अन्यो नागरिक इव तत्रभवान् सहस्रशउपायनानि लभते । अहं तु दीनो भवामि । केवलं शृण्वन् आनन्दमनुभवामि ।

वीर्यशाली—तथैवाहमपि ।

लीलानाथः – किं वक्तुमभिलषसि, झटिति सरलतया प्रकाशय ।

वीर्यशाली – देव्या नाम्ना शपामि – ह्यस्तने निशीथे अस्माकं रक्षिणो देवस्य सेवायां निरता द्वौ दुर्वृत्तौ वन्दीकृतवन्तः । तावेतौ महीशानायाः पामरा अधिवासिन इव नितरां पामरौ भवतः ।

दुर्गतारिः–देव, वीर्यशाली वर्षीयान् साधुः । ते वदन्ति – स इदानीं तादृशे वयसि, यत्र प्रज्ञा तिरोदधाति । ईश्वरोऽस्मान् दयताम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोऽयं संसारो द्रष्टव्यः । वयस्य वीर्यशालिन्, जनश्रुतिरियम्—ईश्वरः साधु प्रकृतिकः यदा द्वौ घोटकमेकमारोहतः, तदा तयोरन्यतरः पश्चादवतिष्टेत । सत्सत्यं देव, एष सरलप्रकृतिः। सत्यं शपामि स एष आदित एव सरलोऽन्नादः। ईश्वरोऽभिनन्दनीयः, न द्वौ समानौ भवतः। अये भद्र वीर्यशालिन्, त्वदर्थमहमनुशोचामि ।

लीलानाथः—भद्र, यथार्थत एष त्वत्तोऽवहीयते ।

दुर्गतारिः—अवदानानि किल ईश्वरकृतानि ।

लीलानाथः—अधुना अहं युष्मान् परिहरामि ।

दुर्गतारिः-एकः शब्दः । देव अस्माकं रक्षी द्वौ पुरुषौ संदेहेन निरग्रहीत्। तावेतावद्य प्रभाते भवता परीक्षणीयौ भवतः ।

लीलानाथः—स्वयमेव परीक्षस्व। ततो मदन्तिकं प्रापय। अधुनाऽहं नितरां कार्यव्यस्तः, स्वयमेव पश्यसि खलु ।

दुर्गतारिः—अस्तु, पर्याप्तम् ।

लीलानाथः—किञ्चित् पीत्वा गच्छतम्। आपृच्छामि वाम्।

(दूतस्य प्रवेशः)

दूतः—सर्वेऽपि ते तव दुहितरं विवाहयितुं त्वां प्रतीक्षमाणा वर्तन्ते ।

लीलानाथः—एषोऽहं सन्नद्धः। यावत् तान् सम्भावयामि ।

(दूतो लीलानाथश्च निर्गच्छतः)

दुर्गतारिः—भद्र, वीर्यशालिन् । गच्छ श्रीकोलस्य सविधम्। अङ्ग मषीपात्रं लेखनीं च कारागारं प्रापय । इदानीं वयं तौ परीक्षामहे ।

वीर्यशाली—अपि च सुचतुरं निरूपयामः ।

दुर्गतारिः—अवश्यम् । सकलामपि प्रज्ञां व्यापारयामः । जानीहि तावत् न किमपि परिहीयेत । विज्ञमेकं लेखकं समानय यः अस्माकं निर्णयान् लिखिष्यति। कारागारे मामुपसर्प ।

(निष्क्रान्तः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थोऽङ्कः

प्रथमं दृश्यम्

स्थानम्--चर्चालयः

ततः प्रविशन्ति दानापीडः, दानयक्षः, लीलानाथः स्फारप्राज्ञेशः(१) कुमुदकः, विनोदकः, हीरा, विचित्रा विभवतश्च परिवारः।

लीलानाथः—आगच्छ स्फारप्राज्ञेश, संक्षिप्तो भव। विना आडम्बरं विवाहविधिं निर्वर्तय। अनन्तरं तयोः कर्त्तव्यानि विवरिष्यसि।

स्फारप्राज्ञेशः—अये स्वामिन्, किमेनामुद्वोढुमत्रायातोऽसि ?

कुमुदकः—न हि।

लीलानाथः—एवमेव। एतां विवाहविधिना स्वीकर्तुमायातः। आर्य, एतया सह अस्य विवाहं निर्वर्त्तयितुं त्वमायोजितोऽसि।

स्फारप्राज्ञेशः—भद्रे, किमेनमुद्वोढुं त्वमायाताऽसि ?

हीरा—एवमेव।

स्फारप्राज्ञेशः-युवामुभावपि पृच्छामि। किं युवयोरन्यतरस्य किमपि तादृशं प्रतिबन्धकं विज्ञातमस्ति येन युवां न मिलितौ स्याताम्। प्रत्येकमुत्तरयतु।

कुमुदकः—अपि नाम जानासि किमपि हीरे,

हीरा—न किमपि देव,

प्राज्ञेशः—अपि जानासि किमपि त्वं वीर,

लीलानाथः—तत्पक्षतो दृढं वच्मि—न किमपि।

कुमुदकः—नाहं विभावयामि मानवः किं कर्म कर्तुं प्रभवति किमकरोत, किं कुर्यात्, किं करोति चाज्ञातसारम्।

---

(१) स्फारप्राज्ञेशः—Friar Francis

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः – मठाचार्य क्षणं तिष्ठ, ताताहं प्रष्टुमुत्सहे
विनाऽऽशङ्कां विना बाधां किं दातुमभिवाञ्छसि
स्वच्छेन मनसा मह्यं तनयां ते यशस्विनीम् ?
लीलानाथः– तथा स्वच्छहृदा तुभ्यं तामहं दातुमुत्सहे
यथेमां भगवान् मह्यं प्रागयच्छच्छुचिस्मताम् ॥
कुमुदकः – समृद्धस्य महार्घस्य दानस्यास्यानुरूपतः ।
प्रभवामि न निश्चेतुं किं वा तुभ्यं प्रदीयताम् ॥
दानापीडः—प्रतिदानं विना तस्या नान्यत्तुल्यं निरीक्ष्यते ॥
कुमुदकः– देव, त्वं परमोदार, उपदेशश्च ते महान् ।
तदर्थमभिनन्दामि, लीलानाथ ब्रवीमि ते ।
प्रतिगृह्णीष्व ते कन्यां न पर्युषितमीदृशम्
लकुचं बन्धवे, देयं पश्यैषा राजते कथम् !
औदार्यस्य पराच्छाया संकेतश्च विभासते ।
परं पतिव्रतोदारा बहिर्भाति समन्ततः ।
न कोऽपि वक्तुं शक्नुयाद्रूपस्यास्यान्तरात्मनि
पापं समावृतं तिष्ठेत्तथा चैषा प्रकाशते ॥
सौजन्यस्य तथा पातिव्रत्यस्य महिमा स्फुटम् ।
प्रत्यङ्गं प्रतिभात्यस्याः, शपथं कर्तुमर्हसि ।
आकृत्या परमोदारा विश्वस्तेति न संशयः ।
परं नैतादृशीह येषा, तापं चानुभवत्यसौ
सुसज्जितायाः शय्याया, निर्बाधेव प्रकाशते ॥
आडम्बरोऽस्या निर्दोषश्चरित्रं तु न तादृशम् ॥
लीलानाथः – देव, किं त्वमभिप्रैषि ?
कुमुदकः – विवाहं नानया सह ॥
नाहं ममान्तरात्मानमुद्बन्धयितु मुत्सहे
एकया दृष्टचारित्र्यदोषया भ्रष्टया कदा ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लीलानाथः – त्वमेव प्रथमं देव, मधुरैः स्वस्य चेष्टितैः ।
पातिव्रत्यं च तारुण्यमभिभूयाति वर्तसे ॥
कुमुदकः–जानेऽहं त्वं तथा ब्रूयाः सम्बन्धस्य स्थिरत्वतः
पतित्वेनाश्लिषत्सा मां पथस्तेन न विच्युता ॥
लीलानाथ, तथा नैवं, न मया सा प्रलोभिता ।
कदाचिद्वतथेनैकवाक्येनापि वरानना ॥
भ्रात्रा स्वसेव सा दृष्टा स्निग्धविश्वस्तचक्षुषा
स्नेहः समुचितः प्रेमाऽकृत्रिमश्च प्रदर्शितः ॥
हीरा— कदाचित्किमहं देव, त्वया दृष्टा ततोऽन्यथा ?
कुमुदकः–दर्शनेन तथा किं ते ? विरोधं कलयाम्यहम्
दायना त्वं ममाभासि मञ्जरी मातरिश्वना.
अनीतसौरभा चासि, परं भिन्नाऽसि रक्ततः ॥
अतिशेषे रतिं किं वा श्वापदान् बहुभोजितान् ।
विश्रामावसरे गाढं रमन्ते ये विशृङ्खलाः ।
हीरा– किंस्विद् देव प्रकृत्याऽसि येनोच्चैरपलप्यते ?
लीलानाथः–किं जोषमास्यते देव,
दानपीडः– न मे वाक्यं प्रवर्तते
सम्बद्धुं मे प्रियं बन्धुं साधारण्यैकया क्रिया ।
तदर्थं प्राक्कृतोद्योग स्तिष्ठामि दूनमानसः ॥
लीलानाथः – किं वाक्यानि प्रयुक्तानि ? तानि स्वप्ने शृणोमि वा ?
दानयक्षः– देव, तानि प्रयुक्तानि यथार्थानि च कार्यतः ॥
विनोदकः – नेयं वैवाहिकी रीतिः
हीरा सत्यं देवाव मां प्रभो !
कुमुदकः – लीलानाथात्र तिष्ठामि, देवस्तत्र विराजते ।
तस्य भ्राता पुरो भाति, नेत्राणि च निजानि नः ।
लीलानाथः–सन्तीमानि यथार्थानि किं त्वमेव प्रभाषसे ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः--पृच्छामि पुत्रिकां तेऽहं प्रश्नमेकं समासतः ।
त्वं पिता पालकस्तस्या स्तेनेमां प्रतिबोधय ॥
ददातु तस्य ते कन्या सरलं तथ्यमुत्तरम् ।

लीलानाथः -यथेष्ट प्रष्टुमर्हस्त्वं वत्स, त्वं मे सुतो यतः ।

हीरा-- भगवन् मां परित्राहि कुतो वाऽहं नियन्त्रिता ?
परीक्षेयं किमर्था स्यात्कीदृशी वाथ सा भवेत् ?

कुमुदकः - उपयुक्तस्य तथ्यस्य तथा नामानुसारिणः ।
उत्तरस्य हि लाभाय प्रश्नोऽयं क्रियते मया ।

हीरा-- किं मे नाम न हीरा स्यान् न हीरा क्रियतेऽन्यथा
नामेदं दोषरहितं दूषणीयं न वा भवेत् ॥

कुमुदकः -देव्या नाम्नाऽभिशप्ताऽसि हीरे, सत्यं प्रकाशय ।
स्वकलङ्कं गुणान्, वाऽपि हीरे ! त्वं वक्तुमर्हसि ॥
गतरात्रौ निशीथेऽथ गते यामे द्वितीयके
को वाऽऽलतत्त्वया सार्द्धं त्वद्गवाक्षान्तिके रहः,
इदानीमुत्तरं देहि त्वं यदि स्याः पतिव्रता ॥

हीरा-- सत्यं मया तदा देव, नालापः केनचित्कृतः ।

दानापीडः--तेन त्वं सरला नासि विमला ब्रह्मचारिणी ।
लीलानाथात्मनो नाम्ना सत्यां वाचं ब्रवीमि ते
मया, भ्रात्रा मदीयेन सासन्तेनामुना त्रिभिः ।
तद्गवाक्षान्तिके दृष्टा गतरात्रौ निशार्द्धके,
पुंसैकेन कृतालापा परुषाकृतिना खलु ॥
योऽसौ जिज्ञासितोऽस्माभिः स्वीचक्रे निजकल्मषम् ।
रहः सहस्रशो ह्यासन् मिलनानीति चाब्रवीत् ॥

दानयक्षः --अये ! तानि न वाच्यानि नानिर्देश्यानि वा क्वचित्
नालमेषा भवेद्भाषा विनाऽश्लीलतयेरितुम् ।
अनुशोचामि ते भद्रे, बहुचारित्रदोषतः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदक:--वाह्यायाः सुषमायास्ते हीरेऽद्ध यदि ते हृदि।
भावनासु च विन्यस्तामभविष्यत् तदा पुनः।
कीदृशी ललना ख्याताऽभविष्य. पृथिवीतले।
स्वस्त्वस्तु ते वरारोहे रूपलावण्यशालिनि।
कृत्रिमेऽकृत्रिमाभासे स्वस्त्यस्तु तव सर्वथा।।
अनिर्मला निर्मलाऽपि पूताऽपि नैव पावनी।
त्वदर्थं प्रणयद्वारं रुणध्मि मम सर्वतः।
पश्यामि सकलाः कान्ता रूपलावाण्यपूरिताः।
सन्दिग्धचक्षुषा नूनं गर्हयामि च ताः सदा।।
अपवादै रसंख्यातैः, सौन्दर्यं यत्प्रभावतः,
नाकर्षकं तथा भूयान् निन्दनीयं यथा भवेत्।
लीलानाथ: -किं तीक्ष्णेनासिना सार्द्धं घातुकोऽत्र न विद्यते ?
(हीरा मूर्च्छति)
दानयक्षः -आगच्छन्तु महाभागाः सावयाम इतो द्रुतम्।
प्रकटीभावमापन्ना अपवादा समन्ततः।
जृम्भयन्ति मुहुश्चित्रान् भावान् लज्जापुरस्कृतान्।
सम्मोहयन्ति ते बालां खेदयन्तो विशेषतः।
(दानापीडो दानयक्षः कुमुदकश्च निष्क्रांताः)
विनोदकः-- कीदृगास्ते वरारोहा ?
विचित्रा- मृतेति भावयाम्यहम्।
पितृव्य, सान्त्वयनां त्वं विनोदक, किमीक्षसे ?
मठाचार्य, प्रसीद त्वं हीरे, त्वं चेतिता भव।
लीलानाथ:—नोपसंहर ते हस्तं दैव त्वं परुषं दृढम्।
अस्याः श्लाघ्यो भवेन्मृत्युर्लज्जायाश्छादकः परम्।
विचित्रा—प्रिय भगिनि हीरे किमित्येवं भवसि ? समाश्वसिहि
समाश्वसिहि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मठाचार्यः—भद्रे ! समाश्वसिहि । समाश्वसिहि । अखण्डं सुखमाप्नुहि

लीलानाथ—किमेवं त्वं प्रगल्भोऽसि ?

मठाचार्यः— कुतो नो सुखमाप्नुयात् ?

लीलानाथः—किमर्थं सकला पृथ्वी गर्हयेत न तां सदा
तं कलङ्कं निराकर्तुं शोणितेऽस्या निवेशितम् ।
हीरे ! नातः परं जीव, नोन्मीलय स्वचक्षुषी,
न मयाऽऽशासितं हीरे ! शीघ्रमेवं मरिष्यसि ।
अन्यथाऽहं च ते प्राणान् तिरस्कारैरसंख्यकैः
दग्ध्वा दग्ध्वा हृतान् कुर्यामपमानविडम्बितः !
एका सतन्तिरित्येवं विषण्णः प्रथमं स्थितः ।
पक्षपातक्रियां स्रष्टुर्गर्हयन्नविचारिणः ॥
बह्वपत्यस्वरूपां त्वां मन्यमानो व्यनोदयम् ।
कुतस्त्वमेका पुत्र्यासीः कुतो वा मम नेत्रयोः ।
आसिञ्चन्ती सुधाधारां प्रीत्या संवर्धिता मया ?
कुतो नासादिता चैका भिक्षुकस्य सुता मया ?
गृहद्वारं समायाता वर्धिता नैव भावतः ?
तस्यामेवं कलङ्किन्यामभ्यधास्यमहं पुनः ।
न कोऽपि भाग एतस्या मदीयः, परमन्यतः ।
अज्ञातः पुरुषः कोऽपि पापीयस्याः पिता भवेत् ।
परं ह्येषा मदीयैव मम प्रीतेर्निबन्धनम् ।
भाजनं मे प्रशंसाया मम गर्वस्य कारणम्
तथा मे प्रेम सर्वस्वं निधिश्च स्नेहसम्पदः ।
सैषा कर्दमिता तेन कलङ्केनाम्भसांपतिः
यं न क्षालयितुं शक्तः सकलैरपि वारिभिः,
दूषणाद्विग्रहं चास्या लवणै रक्षितुं क्षमः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनोदकः–क्षणं तिष्ठत भो शान्ता किंकर्तव्यविमूढधीः।
विस्मयेनाभिभूतोऽस्मि न किञ्चिद्वदितुं क्षमः ॥
विचित्रा -अपराधं विना ह्येषा दूषिता, नात्र संशयः ।
विनोदकः–किं सुप्ताऽस्येकशय्यायां गतरात्रौ तया समम् ?
विचित्रा–नाहमासं परं तस्याः शय्यायाः सङ्गिनी सदा ।
अहमासं गतां रात्रिं यावद्द्वादशमासकम् ॥
लीलानाथः--दृढीकृतो मे विश्वासो विचित्रावचनेन हि
यः पूर्वमाहितः कीलैर्बद्धोऽस्याः कल्मषं प्रति ॥
मिथ्या किमिति तौ ब्रूतां राजानौ च विशेषतः ।
कुतः कुमुदको ब्रूयाद् यो रक्तोऽस्यां तथा दृढम् ॥
कालुष्यं कीर्तयित्वाऽस्याः क्षालयंस्तत्स्वलोतकैः ।
नियतं पतिता ह्येषा वर्जनीया समन्ततः ।
वराकी म्रियतामत्र यतः सा मृत्युमर्हति ॥
मठाचार्यः–ईषच्छृणुत भो विज्ञास्तूष्णीमासमहं स्थिरः
एतावत्कालपर्यन्तं रहस्यभेदनोद्यतः ।
निध्यायिंस्तामिमां भद्रां, लक्षिताश्च सहस्रशः ।
सारल्यस्य च मौग्ध्यस्य सङ्केतास्तन्मुखे मया ॥
अकृत्रिमस्य क्षोभस्य विलासाः परिशीलिताः ।
भाति कापि शिवाच्छाया स्वर्गीया मुखमण्डले
नेत्रयोः किमपि ज्योतिर्यं दग्धुं प्रभयेत् स्फुटम्
तांस्तान्दोषान् वृथा तस्यां विन्यस्तान् राज पुत्रकैः ॥
आह्वायध्वं न मां मूर्खं न विश्वासित मे वचः ।
गणनां नाद्रियध्वं वाऽनजानीत निरीक्षणम्,
यःसाधितं बहुविधैरनुभावैः परीक्षणैः
दृढीकृतं, फलं यच्च शास्त्रपाठस्य चासकृत् ।
वयो मे वाऽनजानीत गौरवं चार्जितं मया,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आध्यात्मिकं प्रभावं च, तिरस्कुरुत साम्प्रतम् ,
यदि न स्यादियं बाला निर्दोषा वीतकल्मषा,
आरोपितापवादा च भूमौ पतति निश्चला ॥

लीलानाथः—मठाचार्य न तत् तथ्यं पश्येमां जोषमाश्रिताम्
श्लाघनीयमिदं चास्या यदेषाऽनृतवाणीभिः
आत्मरक्षापराभिः स्वं न वर्धयति पातकम
न च प्रत्यादिशत्यैषा दोषांस्तैर्विनिवेशितान्
किं त्वं निगूहसे पापं सत्यस्यावरणैर्वृथा ।
प्रकाशयन्निजं रूपं नग्नं यत्प्रतिभासते ॥

मठाचार्यः—भद्रे कोवाऽपराधी स्याद्येन त्वनपवादिता ?

हीरा - न हि कमप्यहं जाने, यदि जानेऽपरं ततः,
यं नार्यो ज्ञातुमर्हन्ति, पापानि दण्डयन्तु माम् ।
प्रार्थये त्वामहं ताय प्रमाणीक्रियतां पुरः,
केनास्म्यहं कृतालापा, केन वाऽऽलपितास्म्यहम् ?
निशीथसमये तस्मिन् गतरात्रौ, ततः परम् ।
तिरस्कुर्वन्नजानीहि प्राणैर्वाऽपि वियोजय ॥

मठाचार्यः— राज्ञि कुमुदके नास्ते काऽपि कश्मलधारणा ।

विनोदकः—उभौ तौ परमोदारौ स्पृहणीयगुणाकृती
तयोः प्रज्ञा विकृता चेत् तत्र हेतुर्नृपानुजः ॥
जारजोऽसौ प्रकृत्या च परुषः कूटनीतिमान् ,
षड्यन्त्रकरणे ख्यातो मिथ्यावादधुरन्धरः ।

लीलानाथः—नाहं किमपि जानामि यदि ते सत्यवादिनः
दारयेतामिमां हस्तावथ तेऽपात्रदन् वृथा,
नूनं प्रतिकरिष्यामि महत्तीया भवन्तु ते ।
प्रभावितं सत्कालेन रक्तं न शुष्कतां गतम्
नापि मानसिकीं शक्तिमाजहार वयो मम ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नापि विसंष्ठुलं भाग्यं समृद्धेर्मां व्ययोजयत्,
न मे जीवनमद्यापि मित्राणां सङ्गवर्जितम्
परन्तूज्जृम्भितानि रयुरङ्गानां मे वलं तथा
अपि मानसिकी शक्तिः सामर्थ्यं कार्यसाधने !
परिग्रहश्च मित्राणां, येनाहं गतमत्सरः
सर्वात्मना निराकुर्यां संश्रवं तैः सहानिशम् ।

मठाचार्यः-विरम त्वं क्षणं भद्र, शृणु मे चिन्तितं वचः ।
मृतेतीमां परित्यज्य निर्गतास्ते स्थलादितः ।
सैषा रहसि संस्थाप्या, न प्रकाश्या कदाचन,
मृतेत्येव घोषणीयं यावत्कार्यस्य साधनम्
कुलक्रमोचिता चापि कर्तव्या परिवेदना ।
समाधिरपि निर्मेयो यथास्थानं यथाक्रमम्
सकलोऽपि विधिः कार्यो मृते यो यो विधीयते ॥

लीलानाथः--किं कार्यं तावता सिध्येत् परिणामश्च को भवेत् ?

मठाचार्यः--एतस्या मृत्युसंवादी यदि स्यात्सुसमाहितः ।
अपवादं तिरोधाय दयां संचारयिष्यति ।
भद्रं चेदं समासेन, केवलं च तदर्थतः
नाद्भुतो मे समारम्भस्ततो भद्रतरं भवेत् ।
आकर्ण्यैवापवादं सा मृतेति यदि साध्यते
श्रोतारः कृपयाऽविष्टाः सानुकम्पा द्रुतान्तराः ।
तामेनां बहु मन्येरन् क्षमेरंश्च न संशयः ॥
मूल्यं तस्य न जानीमो वहु मन्यामहे न तत् ।
यदनुभूयतेऽस्माभिः, परं तस्य व्यपाश्रये
अभावे चावगम्येत स्वरूपं तस्य वस्तुनः ।
गुणाश्चापि प्रकाश्येरन् न विख्याताश्च ये पुरा ।
एवं कुमुदकस्यापि परिवृत्तिर्भविष्यति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तद्भाषितं समाकर्ण्य मृतेति शृणुयाद्यदा ।
तदाऽस्या जीवितं यावद् धृत्वा मधुपरिच्छदम् ।
विवेश्य हृदयं चास्य संस्काराग् बोधयिष्यति ।
येनैतस्या गुणा रूपमाकृतिश्चेष्टितानि च ।
पूर्वतोऽभ्यधिकं चारु प्रतिभास्यन्ति तत्पुरः ॥
स्यात्तदाऽनुशयाक्रान्तं प्राणयि हृदयं शुचा,
कदाचित्सोऽभिमन्येत वृथैव मारिता मया,
तथागुणवती कान्ता स्थिरचित्तोऽपि गर्हणे ॥
एवमेतत्समाभाति, फलं चेतोऽधिकं भवेत्
प्रयासा विफलाः सन्तु यदि नाम, तथाप्ययम्
संवादो रवयेन्मूकान् निन्दुकानपभाषणः ॥
सर्वात्मना भवामश्चेद्विफलास्तामिमां तदा
संस्थापय क्वचिद्धर्म्ये संस्थानेऽन्यैरलक्षिताम् ।
यथा सा रक्षितुं शक्ता खण्डितं शीलमात्मनः ॥
न च पात्रं भवेत्क्वापि तीव्राणां लोकचक्षुषाम्,
रसनायाः खरायाश्च पराभूते विवातनः ॥

विनोदकः—लीलानाथ, परामर्शो मठाचार्यस्य शोभनः ।
तमिमं हृदये कृत्वा कार्यं साधय सम्प्रति ॥
यद्यप्यहं दृढं रक्तो राज्ञि कुमुदके तथा ।
यथा त्वमभिजानासि तयोः सन्निहितः सदा,
गूढं तथापि रक्षामि रहस्यं संयतेन्द्रियः ।
यथा त्वं निजमात्मानं शरीरे परिरक्षसि ॥

लीलानाथः—शोकसागरमग्नोऽहं किं कर्तव्यविमूढधीः ।
तृणेनेव त्वया नीतस्तितीर्षामि तमम्बुधिम् ।

मठाचार्यः—सम्मतिः श्लाघनीया ते, साधयामो द्रुतं यतः
दुर्द्धर्षा आमया घोराः प्रतीकार्याः समन्ततः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एहि भद्रे, मृता तिष्ठ जीवन्त्युद्वाहवासरः ।
मन्ये विलम्बितः किञ्चित्सहिष्णुधृ तिमावह ।'

(विनोदकं विचित्रां च वर्जयित्वा सर्वे निष्क्रान्ताः)

विनोदकः--सौम्ये विचित्रे, किं त्वमेतावत् विरुदन्ती अवर्तथाः ?

विचित्रा--आसम् , चिरं च स्थास्यामि ।

विनोदकः--नाहं तदभिलषामि । न च तत्र कमपि हेतुं कलयामि ।

विचित्रा--मा नाम ते हेतुरस्तु । अहं तु स्वत एव रोदिष्यामि ।

विनोदकः-दृढमहं विश्वसिमि--सा ते भगिनी नूनं तेरपवादिता ।

विचित्रा--किं वा स मत्तो न लभेत, यः किल मे भगिनीमपवादा-त्परित्रायेत ।

विनोदकः--अपि नाम वर्तते कोऽपि अभ्युपायः तव सौहृदलाभाय ?

विचित्रा--अभ्युपायस्तु सुलभ एवास्ते । साधयिता तु नोपलभ्यते ।

विनोदकः--कश्चिदसौ मनुजेन साधनीयो भवति ?

विचित्रा--मनुजेनैव । न तु त्वया ।

विनोदकः--जगति न मे त्वत्तोऽधिकं किमपि प्रियतरं वर्तते । किमेतत् तव न विस्मयावहम् ?

विचित्रा--एतत्तथा विस्मयावहं यदहं नाभिजानामि । ममाप्येतत् प्रसङ्गतो वक्तव्यमापतितं यन्मम त्वामन्तरा नान्यत् प्रियतरं वर्तते जगति । परन्तु न मां विश्वासिहि । तथापि नाहं मिथ्या वदामि । नाहं किमपि स्वीकरोमि नापि निराकरोमि । भगिन्याः कृते परं विषीदन्ती तिष्ठामि ।

विनोदकः--खड्गेनाहं शपामि विचित्रे, त्वं मां कामयसे ।

विचित्रा--मा शपथं कुरु । गलादधः कुरु तम् ।

विनोदकः--अहं खड्गेन मदीयेन शपामि त्वं मां कामयसे । तं चाहं गलादधः करोमि यो ब्रूयाद् यदहं त्वां कामये ।

विचित्रा--न कोऽपि शक्तिर्मां प्रत्याहारयितुं प्रभवति । दृढमहं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घोषयामि--अहं त्वां कामये।

विचित्रा--तर्हि भगवान् मां क्षाम्यतु--

विचित्रा--सौम्ये विचित्र ! कीदृशादपकर्मणः ?

विचित्रा--त्वं मां वारितवानसि यदा हि शुभे मुहूर्ते 'अहं त्वां कामये' इति दृढमुद्घोषयितुं समुद्यता आसम्।

विनोदकः--कुरुष्व इदानीं सकलेन हृदयेन।

विचित्रा--हृदयसर्वस्वेनाहं त्वां कामये। न चावशिष्यते किमपि उद्घोषयितुम्।

विनोदकः--एहि माम्। आदिश यत्ते प्रियं करवाणि।

विचित्रा--मारयैनं कुमुदकम्।

विनोदकः--सम्भ्रम्भवम् अये ! न भूमण्डलस्य समग्रस्यापि कृते।

विचित्रा तेन त्वं मां मारयसि निराकरणेन। स्वस्त्यस्तु, गच्छामि।

विनोदकः--सौम्ये विचित्रे ! क्षणमपेक्षस्व।

विचित्रा--स्थितामपि मां गतामवधारय। न कोऽपि प्रेमा त्वयि विद्यते। प्रार्थये गन्तुमनुजानीहि--गच्छामि।

विनोदकः--विचित्रे--

विचित्रा--यत्सत्यम्, अहं गमिष्यामि।

विनोदकः--एहि, प्रथमतः सख्यं करवाव।

विचित्रा--अहो विचित्रवीर्योऽसि ! अये मम सखा भवितुं साहससे, न पुनर्मम शत्रुणा साकं योद्धुम्।

विनोदकः--अपि नाम कुमुदकस्ते शत्रुर्भवति ?

विचित्रा--कोऽत्र सन्देहः ? किमसौ न सर्वात्मना प्रमाणितो नृशंसः, यः किल मम भगिनीमपवादितवान्, तिरस्कृतवान् अपिच दूषितवान्। अये ! किमित्यहं पुरुषो नाभविष्यम् ? किमित्येष तां शुष्काशाग्रस्तामस्थापयत् यावदुभौ पाणिग्रहणार्थमुपस्थितौ ? किमिति च स तदा सर्वेषां समक्षं तामभियोजित-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वान् पराभूतवान् , अपि चापमानितवान् ? किमर्थमहं तदा पुरुषो नाभविष्यम् । आपणभूमौ तस्य हृदयमखादयिष्यम् ।

विनोदकः—शृणु विचित्रे शृणु--

विचित्रा--गवाक्षसविधे पुरुषेण साकमालापः ! अद्भुतं परिकल्पनम् !

बिनोदकः—अये तथा किन्तु विचित्रे --

विचित्रा—हा सौम्ये हीरे ! त्वमपवादिताऽसि ! परिभाविताऽसि ! !

विनोदकः—अयि विचित्रे !—

बिचित्रा—ते किल राजानः ! ते किल सामन्ताः अये अविकला राजानः ! अविकलाः सामन्ताः ! तदेतत्सामन्तकूटम् ! तदेतद्राजकूटम् ! अये यद्यहं तदा पुरुषोऽभविष्यम् , मदीयो वा कोऽपि सखा मदर्थं तत्रोपास्थास्यत ! अये मनुष्यत्वं केवलं व्यवहारार्थम् ! बलं केवलमभिनन्दनार्थम् ! ! जनाश्च केवलमालापार्थाः शुष्कशब्दमात्रोपयोगिनः । अये यो मिथ्या अपवदति, विना कारणं शपथं करोमि, स हर्क्युलिस इव वीरत्वेन परिगण्यते । इच्छामात्रेणैव नाहं पुरुषो भवामि । अतोऽहं खिद्यमाना भगिनीव मरिष्यामि !

विनोदकः - क्षणमवधेहि विचित्रे ! अनेन हस्तेन शपामि--अहं त्वां कामये ।

विचित्रा—तर्हि मम प्रणयलाभाय तमिमं हस्तं शपथादन्यत्र व्यापारय ।

विनोदकः--किं त्वमन्तरात्मना मन्त्रयसे-सामन्तः कुमुदकः हीरामपवादितवान् ?

विचित्रा--हृदयेन आत्मना च मन्त्रयामि--तथैव सः ।

विनोदकः—पार्याप्तम् ! एष व्यापारितोऽस्मि तवेप्सितसाधनाय । तमहं द्वन्द्वार्थमाह्वयामि । प्रसारय ते करम् , सकृत् चुम्बामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततो गच्छामि । एतेनैव हस्तेन कुमुदको बहु देयं निर्यातयिष्यति । यथा त्वं मां शृणोषि, तथा अवधारय। याहि समाश्वासय ते भगिनीम् । अवश्यमहं तां मृतां कीर्तयामि । स्वस्त्यस्तु, एष गच्छामि ।

(निष्क्रान्तः)

❀ द्वितीयं दृश्यम् ❀

स्थानम्— वन्दिशाला

(ततः प्रविशन्ति दुर्गतारिः वीर्यशाली, कञ्चुकावृतो नागरिकः, रक्षिणश्च सह वैरोचकेन कर्णादेन च)

दुर्गतारिः—अपि नाम अस्माकं सकला अपि संहतिः (समितिः संगता (समवेता) ?

वीर्यशाली—एकं लेखाधानम्, एकं च भद्रासनं नागरिकस्य कृते !

नागरिकः—के नामात्र अभियुक्ताः ?

दुर्गतारिः देव्या नाम्ना शपामि । अहं मदीयश्च सहकर्मा ।

वीर्यशाली—नहि । अवितथमेव तत् । एते वयमत्र परीक्षणाय आज्ञापिताः ।

नागरिकः—परन्तु के नामाऽत्र आपराधिनः ? ये परीक्षणीयाः । उपसर्पन्तु ते प्रधानराजभटस्य सन्निधिम् ।

दुर्गतारिः—अये मातः ! आगच्छन्तु ते मम पुरः । भाव, का ते संज्ञा ?

वैरोचकः—वैरोचकः ।

दुर्गतारिः—प्रार्थये—वैरोचक इति लिखतु । अये तव च का संज्ञा ?

कर्णादः—अहमेको भद्रलोकः । कर्णाद इति मम नाम ।

दुर्गतारिः—लिखतु तावत् । अयं श्रीमान् भद्रलोकः कर्णादः । भद्रमुखाः ! किं यूयमीश्वरस्योपासकाः ?

वैरोचकः
कर्णादः } एवमेव । महाभाग, तथा आशास्महे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गतारिः – लिखतु तावत् – ते आशासते ते ईश्वरोपासकाः । प्रथमत ईश्वरस्य नाम लिखतु यतः स सर्वेषां संरक्षको भवति । किमसौ एषां नृशंसानामपि संरक्षक उपतिष्ठेत । भद्रमुखाः, इदमेतन्निश्चितपूर्वं यद् युवां मृषाभियुक्तेभ्यः किञ्चिद-धिकौ भवथः । न चिराच्च तथा प्रमाणितौ भविष्यथः । आत्मरक्षार्थं किं किमपि युवयोर्वक्तव्यमास्ते ?

कर्णादः–देव्या ना ना शपामि महाभाग, नावामपराधिनौ भवावः ?

दुर्गतारिः–अत्यद्भुतोऽयं चतुरः । अहं त्वदर्थं निश्चितं विभावयामि । परन्तु तं नियतमभियोजयामि । आगच्छ ममान्तिकम् अयमेकः शब्दस्तव श्रवणयोः ! अहं त्वां ब्रवीमि इदमिदं चिन्तितं यद् युवां मिथ्याऽभिशस्तौ भवतम् ।

वैरोचकः – महाभाग, अहं त्वां निवेदयामि न आवामपराधिनौ भवावः ।

दुर्गतारिः--भवतु, दूरे तिष्ठ । ईश्वरस्य नाम्ना उभावपि एकवाचौ भवतः । अपि नाम लिखितं यदेतौ नापराधिनौ भवत इति ?

नागरिकः – अये प्रधान राजभट, नैतादृशीं परीक्षां कुरु । आह्वय रक्षिणः ये किल अभियोजका भवन्ति ?

दुर्गतारिः – सत्यम् । अये मातः, अयम् असमञ्जसो (सुसमञ्जसो) मार्गः आगच्छत हे रक्षिणः । अये भद्रमुखाः, राज्ञो नाम्ना युष्मान् आदिशामि । यूयमेतौ अभियोजयत ।

प्रथमो रक्षी–(वैरोचकं निर्दिश्य) अयं जनोऽवोचत्–राज्ञो भ्राता दानयक्षः कश्चन नृशंसः ।

दुर्गतारिः–लिखतु–राज्ञो भ्राता दानयक्षः नृशंसः । अये राज्ञो भ्रातुः नृशंसत्वेन कीर्तनं नियतं सुमहान् अनुयोगः (अभियोगः) भवति !

वैरोचकः–अधिकृत प्रधानराजभट !–

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गतारिः—प्रार्थये त्वाम् । भद्र, शान्तो भव । नाहं तव दृष्टिं सहेय । सत्यं ते कथयामि ।

नागरिकः किमपरं त्वया तस्मात् श्रुतम् ?

द्वितीयो रक्षी—देव्या नाम्ना शपामि—यदेष दानवयक्षात्सहस्रं स्वर्ण-मुद्रा अग्रहीत् तत्रभवतीं हीरामयथा कलङ्कयितुम् ।

दुर्गतारिः—अये समुन्नतं विड्यन्त्रम् (षड्यन्त्रम्) एतावदवधि असाधितपूर्वम् !

वीर्यशाली-आम । स्थूलतस्तथैव ।

नागरिकः—किमपरं श्रुतम् ?

प्रथमो रक्षी—अस्य वचनैरावर्जितः सामन्तः कुमुदकः अभिप्रैति स्म यत् स विवाहदिवसे समवेतानां सर्वेषां समक्षं हीरामपमानयिष्यति, न च परिणेष्यति ताम् ।

गुर्गतारिः--अये कोऽयं जघन्यः ! एतदर्थमसौ यावज्जीवं संदर्शितः (सन्दूषितः) स्थास्यति ।

नागरिकः—किमपरम् ?

रक्षिणी—अवसितम् , नापरमत्रशिष्यते ।

नागरिकः—अलमेतत् । भद्रौ, न किमप्यत्र युवाभ्यां निराकरणीयं वर्तते । राजभ्राता दानयक्षः अद्यैव प्रभाते कैरप्यलक्षितः अन्तरधात् । एतद्गीत्यैव अभियुक्ता. तेन च प्रत्याख्याता हीरा दुःखावेगेन तत्रैव संहसा प्राणान् अहासीत् । भद्रा राजभटाः ! दृढमेतौ संयमयत, लीलानाथस्य चान्तिकं प्रापयत । अहमग्रतो गत्वा परीक्षाफलं निवेदयामि ।

(प्रस्थितः)

दुर्गतारिः - आगच्छतम्--सुगृहीतौ (निगृहीतौ) भविष्यथः ।

वीर्यशाली--हस्तयोरेतौ बध्नीत ।

कर्णादः--अपेहि रे धूर्त !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुर्गतारिः--अये ! ईश्वरैकजीवितोऽहम् । क्वासौ नागरिकः ? लिखतु—
एष राज्ञः अधिकारिणं धूर्तं वदति । आगच्छ रे आगच्छ दृढं बध्नीत एनम् । परं दुर्विनीतोऽसि ।

कर्णाद--अपेहि । दूरे भव । गर्दभस्त्वम् गर्दभस्त्वम् ।

दुर्गतारिः--अये त्वं मदीयं पदमपि नावधीरयसि (नावधारयसि) मम वयोऽपि नावधीरयसि । अये ! नात्र नागरिकः यो मां गर्दभ इति विलिखेत् । परन्तु भद्र, मनसि धारय--अहं गर्दभो भवामि यद्यपि नागरिकेण न लिखितः । मा विस्मर यदहं गर्दभ इति निर्दिष्टः । न हि । अरे धूर्त, त्वं विगीतानाम् (अवगीतानाम्) आकरोऽसि तथा प्रमाणैः साधयिष्यते । अहं तु चतुरो भवामि । अपि च अहमधिकारी । विशेषतश्चाहमुदारो गृहस्थो भवामि, अपि च विशेषतः महीशानायाः साधुर्नागरिक इव साधुर्नागरिको भवामि । अपिच विशेषतः विधिविधानज्ञो भवामि । गच्छतु तत्, अत्यन्तं समृद्धो भवामि । तद् गच्छतु अहं क्षतिग्रस्त आयतिमपेक्षमाणस्तिष्ठामि । अपि च मम द्वे कञ्चुके वर्तेते । अपि च सकलमपि मम मनोहरमास्ते । आनय तम् । अये अनेनाहं गर्दभः कीर्तितः !

(निष्क्रान्तः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चमोऽङ्कः

प्रथमं दृश्यम्

स्थानम्—लीलानाथस्य गृहम् ।

ततः प्रविशतो लीलानाथः अनन्तश्च ।

अनन्तः—त्वमेव यदि वर्तेथा नियतं मृत्युमेष्यसि ।
नैतादृक् सुमतेः कार्यं यद्दुःखाय सहायकम्
ददन्नरो विपद्येत स्वयं, तेन न शोचय ।
लीलानाथः—विरम त्वं प्रार्थयेऽहमुपदेशो निरर्थकः
श्रोत्रयोर्मे पतेन्नैव जालिन्यां सलिलं यथा ॥
न कस्यापि परामर्शः कर्णौ मे तर्पयिष्यति
विषादो यस्य नो तीव्रो ममेव हृद्विदारकः ॥
यदि स्याज्जनकः कश्चिन्मादृशः पृथिवीतले
यस्यापत्येऽभवत्प्रेमाऽसीमा मोदश्च तादृशः ।
खण्डितो दुष्टदैवेन स आयातु मदन्तिकम्
ब्रवीतु सान्त्वनावाचं परिमातु च सर्वतः ।
आवेगं मम शोकस्य, तुलनां कर्तुमर्हति ॥
शोकोच्छ्वासं तदीयं मे शोकोच्छ्वासेन सन्ततम् ।
तस्य दुःखं प्रवृत्तिं च चेष्टितं चरितं तथा,
दुःखेन मे प्रवृत्या च चेष्टितेनेङ्गितेन च,
विविनक्तु स्वरूपेण प्रत्येकं परिमाणतः ॥
एतादृशो जनः कोऽपि स्मयितुं प्रभवेद्यदि ।
परामृशेन्निजश्मश्रु पुरावादेश्च सा त्वयेत्
लघुं कुर्याद्विषादं मे ख्यापयन् समवेदनाम्
सुभाषितैश्च विज्ञानां, यातनां दवयेच्च सः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तादृशो हि जनः खिन्नं दुर्दैवेन पराहतम्
समदुःख पदैर्वाक्यैं र्मां सान्त्वयितुमर्हति।
परं नैतादृशो लोको लक्ष्यते पृथिवीतले
किन्तु भ्रातनं ये साक्षादनुभूयेतरं जनम्
उपदेष्टुं समीहन्ते दुःखं सोढुं, यदि स्वयम्।
दुःखानां भाजनानि स्युस्तदा खिन्ना भवन्ति ते ॥
शान्तिवाणी तदा तेषामन्तरिक्षे विलीयते।
परोपदेशपाण्डित्यं तिरोधत्ते, परं शुचा
अभिभूताः खरान् श्वासान्, यातनां हृद्विदारिणीम्
विषादभरितांश्छब्दान् दिवारात्रौ प्रयुञ्जते।
सन्तु तेषां वृथालापा ग्रथिताः पट्टसूत्रकैः ॥
सैषा साधारणी रीतिर्यज्जनाः पृथिवीतले
दुःखाग्निना दह्यमानान् बोधयन्ति निजान् सखीन्।
सन्तु नाम गुणाः सर्वे सहिष्णुत्वं परं तथा
न शक्ता मानवाः सोढुं यातनां मर्मभेदिनीम्
शोकवेगाद्यदा दुःखान्यापतन्ति समन्ततः।
न विधेयस्ततो भ्रातरुपदेशो निरर्थकः
उपदेशादत्यधिकं दुःखानि रोदयन्ति माम्।

अनन्तः—प्रौढानां च शिशूनां च तयाचेन्नान्तरं भवेत् ॥

लीलानाथः—शान्तो भवार्थये चाहं रक्तमांसशरीरकः
सर्वथा प्रकृतेर्दासो न स्थिरो भवतुं क्षमः ॥
स्वयं दार्शनिकः सोढुं न शक्तो दन्तवेदनाम्
परं तूद्बोधयत्येष देववाण्या जगत्त्रयम्।
पुस्तकैः शोक सम्पात दुःघं तत्सहन क्रमान्।

अनन्तः तेन नोद्वहते मूर्ध्ना यन्त्रणाः सकलाः स्वयम्
लभन्तां शत्रवः कश्चिद्योऽपावुर्बन्मृषैव नः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लीलानाथः—सत्यमुक्तं त्वया भ्रातः, प्रतिकुर्वे न संशयः
हीरा निरपराधेयं मृषाऽऽरोपितदूषणा ॥
अन्तरात्मा तथा ब्रूते तेनाहं कृतनिश्चयः ॥
विदन्त्वेतद्वत राजा तथा कुमुदकोऽपरे
य एनां व्यदधुर्मूढामपमानजडां तदा ।

अनन्तः — राजा कुमुदकश्चापि पश्यायातः ससम्भ्रमम् ।

(ततः प्रविशतो राजा कुमुदकश्च)

दानापीडः—सुखाय वां भवेत्सन्ध्या

कुमुदकः— सुदिनं चास्तु वां द्वयोः ।

लीलानाथः—को वा विशेषो भो राजन्,

दानापीडः— संभ्रमेऽवस्थिता वयम् ।
लीलानाथ,

लीलानाथः — कथं देवः, सम्भ्रान्तस्त्वं, ! ततो व्रजं,
स्वस्त्यस्तु ते द्रुतं याहि न किञ्चित्परिहीयते ।

दानापीडः —साधु वृद्ध न च क्रोधं कलहं कर्तुमर्हसि-

अनन्तः— अप्रियस्य प्रतीकारं कर्तुं चेत्कलहायते ।
तदास्मासु भविष्यन्ति केचिन्निपतिता भुवि ॥

कुमुदकः—को वापाकुरुतैतस्य

लीलानाथः— मातुर्नाम्ना शपाम्यहम्
त्वमेवापाकृथा नूनं बृथाभिनवकारक !

(कुमुदकः खड्गे हस्तं व्यापारयति)

मा करं करवाले धा न बिभेमि त्वदप्रियात् ॥

कुमुदकः—निन्दनीयो भवेद्धस्तो यद्येष भीपयेन्नरम् ।
वयसा तुल्यरूपं ते मातुर्नाम्ना शपाम्यहम् ॥
यथार्थतोऽसौ खड्गेन न संसृष्टः क्रुधा करः ॥

लीलानाथः—स्थिरो भव वृथाऽवज्ञामुपहासं च मा कृथाः ।
न यथाऽहमकर्मण्यो वृद्धो वापि विदूषकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयसो वा प्रभावेण न स्पर्द्धामावहाम्यहम् ।।
न प्रशंसामि मे कार्यं यौवने यत्कृतं मया
करिष्यामि च यत्कार्यं सम्भविष्यं युवा यदि ।।
कुमुदकावधेहि त्वं नस्तिष्के चावधारय ।
कन्याया मे निरीहाया मम च त्वं तथाऽकृथाः
अपमानं यदेतस्मिन् वयसि पक्वकेशकः ।
लोतकेनाप्लुतो नित्यं हिताहितविमूढधीः,
सन्नद्धोऽस्मि प्रतीकर्तुं द्वन्द्वाय चाह्वयामि ते ।।
पुनर्वच्मि मृषैव त्वं सरलां मम कन्यकाम्,
प्रतारितां व्यधा नूनं वृथाऽऽरोपितदूषणैः ।।
अपवादस्तथाऽविध्यद्धृदयस्यान्तरं दृढम् ।
येन साऽद्य समाधिस्था शेते पितृगणैः सह ।।
नापवादः परः कोऽपि समाधिमस्पृशत् कदा
विनैतं तव नैष्ठुर्यं कल्पितं हृद्विदारकम् ।।

कुमुदकः–मम नैष्ठुर्यं कल्पितं !

लीलानाथः– तव नैष्ठुर्यंकल्पितम् ।
न कोऽपि संशयस्तत्र दृढं चाहं ब्रवीमि ते ।

दानापीडः-तथ्यं नाभिदधासि त्वं

लीलानाथः– तदिदं तस्य विग्रहे
मञ्जुलावरणोपेते व्यायामपरिशीलिते
तारुण्यमधुनाऽऽध्माते शौर्यवीर्यविभासिनि
यदि साहसते योद्धुं, प्रमाणायितुमुत्सहे,
वृद्धोऽपि तरुणस्पर्द्धी जराजीर्णं वपुर्वहन् ।।

कुमुदकः– दूरे भव न खड्गो मे वृद्धेनाहन्नमीहते ।।

लीलानाथः–किमेवमुपहासेन विडम्बयितुमिच्छसि
वीरायसेऽत्रलां बालां हत्वा मे कन्यकां छलात् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदि मां तत्वतो हंसि बाल, वीरोऽसि सर्वथा ।

अनन्तः—हत्वावां द्वौ स्वहस्तेन वीरो भवतु सर्वथा ।
अकिञ्चित्करमेतद्धि, हन्त्वेकं पुरतो रणे ॥
जय वाथ जहि त्वं मां सन्नद्धोऽस्मि पुरस्तव
आगच्छ देहि मे युद्धं बाल भद्रोपसर्प माम् ।
अहं त्वामाहनिष्यामि सत्यपि तव कौशले
धीरोऽहमवदातोऽहं स्वं वचः प्रतिपालये ।

लीलानाथः—भ्रात—

अनन्तः— स्तिष्ठात्मना तृणाः, प्रभुर्मे वेत्ति कीदृशः
स्नेहो भ्रातृकुमार्यां, या मृता संदूषिता खलैः ।
ये चाह्वानं न शृण्वन्ति नरस्य प्रतिकुर्वतः ॥
न विद्यते च जिह्वायां यस्य कोऽपि विलेशयः
त एते भीरवो बाला जम्बूका मर्कटाः खलाः ॥

लीलानाथः--अनन्त, शृणु मे भ्रात –

अनन्तः— भ्रातस्तुष्टोऽधुना भव ।
विचित्रा हि नरा नाम, मूल्यहीना न संशयः
प्रत्येकमभिजानामि निर्लज्जा भीरवः शठाः ।
मिथ्यावादरता नित्यं प्रवञ्चनपरायणाः ॥
उपहासैककुशला निन्दकाः परदूषकाः,
उच्छृङ्खला भ्रमन्त्येते बाह्याडम्बरशालिनः ।
वीराणां वेषमास्थाय तर्जनै र्भीषयन्ति ते
कथं तेऽपकरिष्यन्ति विरुन्धन्ति जना यदि ।
एवमेते शठा धूर्ता दुरात्मानः प्रतारकाः ! ॥

लीलानाथः –अस्तु नाम, शृणु भ्रात—

अनन्तः— स्तिष्ठत्वं माऽन्तरा भव ।
अहं सर्वं समाधास्ये प्रभुर्मे सम्मतः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानापीडः– भद्रौ द्वौ युवयोः क्रोधं नोद्दीपयितुमागतौ
यद्यप्यन्तर्विषीदामि दुहितुस्ते मृतौ भृशम् ।
तथापि ते दृढं वच्मि शपामि चात्मगौरवे ।
यैर्दोषैर्दूषिता कन्या, ते यथार्थाः प्रमाणिताः ।

लीलानाथः–देव, देव,

दानापीडः– न ते वाक्यं किमपि श्रोतुमुत्सहे

लीलानाथः–न श्रोष्यसि ? तदागच्छ, भ्रातर्यामः स्थलादितः श्रोतव्यान्येव वाक्यानि

अनन्तः– विषीदामोऽन्यथा वयम् ।

(लीलानाथः अनन्तश्च निष्क्रान्तौ)

दानापीडः–पश्य, सोऽयं समायाति यदर्थं प्रस्थिता वयम् ।

(विनोदकस्य प्रवेशः)

कुमुदकः--सखे सामन्त, को वा विशेषः ?

विनोदकः–सुदिनम् । देव, सुदिनम् ।

दानापीडः--वीर, स्वागतं ते । तदा त्वमन्तरोपस्थितः यदा वयमेकस्मिन् विवादे व्यापृताः ।

कुमुदकः--अये 'अद्य अस्माकं घ्राणद्वयं गलित–दशनाभ्यां वृद्धाभ्यां भग्नप्रायमासीत् !

दानापीडः--तावेतौ लीलानाथस्तदीयश्च भ्राता । कथं वा त्वमभिमन्यसे ? अयोत्स्यावहि चेदावां तदा नितान्तं बालावभविष्याव ।

विनोदकः–न खलु शुष्ककलहे सामर्थ्यस्य परिचयो भवति । युवां मार्गयन्नहमागतः ।

कुमुदकः–आवामपि त्वामन्विष्यन्तावितस्ततो भ्राम्यावः । अवसादस्य चरमसीमायामुपनीतावावां किञ्चित् स्मयितुमभिलषावः । आवयोर्विनोदनाय सकृत् ते चातुरीं व्यापारयितुमर्हसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनोदकः--करतलगतैव सा। किमहं तां प्रयोजयामि ?

दानापीड़ः--करवालवत् किं चातुर्यमपि करे स्थापयसि ?

कुमुदकः--न कोऽप्येतदधात्, यद्यपि बहवोऽनेन संश्लिष्टाः। अभ्यर्थये तत्र कोषात् निष्काशय एतत्, यथा गायका संगीतं वाद्यय-त्रादुत्तोलयन्ति प्रीणय चास्मान्।

दानापीडः--यत्सत्य मन्तरङ्गेण ब्रवीमि—अयं पाण्डुरो विभाव्यते। भद्र, किं त्वं रुग्णः, आहोस्वित् कुपितः ?

कुमुदकः--किम्! भद्र निर्यातय अवसादम्, धृतिं बधान यत् तत्वावधानं मार्जारमवधीत्, तदपि हन्तुं त्वयि समधिका धृतिर्वर्तते।

विनोदकः-भद्र, त्वच्चातुरीमहं यथायथं समयान्तरे समाधास्यामि, या किल ममाभियोगे प्रयुक्ता। प्रार्थयेऽहं, विषयान्तरमवगाहस्व।

कुमुदकः--तथा चेदपरमुपकरणं योजय, यतः पूर्वं शल्यं भग्नम्।

दानापीडः--दिव्येन ज्योतिषा शपामि--सोऽयमनुक्षणं परिवर्तते। मन्ये नूनमयं कुपितः।

कुमुदकः--तथाचेत् स चक्रं परिवर्तयितुं जानाति।

विनोदकः--कर्णे ते किमपि विवक्षुरस्मि।

कुमुदकः--सर्वथा ईश्वरो मामाह्वाना-परित्रायताम्!

विनोदकः-(जनान्तिकम्, कुमुदकं प्रति) त्वं नृशंसोऽसि, नाहं परिहासेन ब्रवीमि। तदर्थं त्वां शासितुमिच्छामि द्वन्द्वसम्प्रहारेण। कदा केन प्रकारेण कुत्र केन साधनेति त्वं निरूपयितुमर्हसि। प्रस्तुतो भव, सन्तर्पय याम्। अन्यथाऽहं त्वां भीरुकमुद्घोषयामि। काचन सौम्या ललना त्वया व्यापादिता। तस्य फलं त्वया अनुभवनीयम्। त्वदभिमतं शुश्रूषुरस्मि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः--साधु । तथैव त्वामभियोत्स्ये । परन्तु समीचीने समये, कमप्यवकाशं देहि ।

दानपीडः—अये किमिदम् कोऽपि भोजनोत्सवः! कोऽपि भोजनोत्सवः!

कुमुदकः–सर्वात्मनाहं तमभिनन्दामि । स किल मां भोजनोत्सवाय आमन्त्रितवान्, यत्र मया विदूषकस्योष्णीषमुद्राङ्कितं वत्सतरस्य मस्तकम् आस्वादनीयम् । यद्येतदहं न कौशलेन भिनद्मि, तर्हि मदीयं करवालमकर्मण्यं कलय । किं कमपि वन्यकुक्कुटं नास्वादयेयम् ?

विनोदकः भद्र, त्वदीया चातुरी ललनानामश्वधाटीव चारु मन्द्रं च वल्गति ।

दानापीड---अहं तु तुभ्यं निवेदयामि-कथं विचित्रा आर्येद्युस्ते चातुरी प्राशंसितवती । मया यदोक्तं तव काचन ललिता चातुरीं वर्तते, तदा सा अभिहितवती--'सत्यम्, 'ललिता परन्तु ह्रस्वा' यदा अहमवोचम्, 'नहि नहि महती' तदा सा अवोचत्–अवितथं, प्रखरा'। यदा अहमवोचम्, 'नहि नहि, न प्रखरा, परन्तु साधीयसी।' तदा सा अवोचत् 'सत्यम्, न कस्यापि अनिष्टकारिणी यदा मयोक्तं 'भद्रोऽयं चतुरो भवति' तदा सा अवादीत् 'अवश्यं, चतुरोऽयं भद्रः' मयोक्तं 'स खलु प्रखरजिह्वः' सा अवोचत् 'तदहं विश्वसिमि यदेष सोमवासरे रात्रौ विपयमेकमङ्गीकरोति, मङ्गलवासरे च प्रातस्तमेव पुनरावर्तयति । तेनासौ द्विगुणितजिह्वो भवति, अथवा तस्य जिह्वाद्वयं वर्तते' । एवं सा होरामेकां तव विशिष्टान् गुणान् चित्रितवती । तथापि परिशेषे सायासोच्छ्वासमुपसंहृतवती यत्त्वमिटाल्यां योग्यतम इति ।

कुमुदकः– यदर्थं सा अन्तररोदीत् प्राकाशयच्च यत्सा त्वत्कृते न किमपि गणयति स्म ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानापीडः--आम । तथा सा कृतवती । यदि सा तं गाढ़ं नासूयिष्यत, तदाऽवश्यमेनमेकान्ततोऽकामयिष्यत । तथैव वृद्धस्य कन्यका अस्मान् वदति स्म ।

कुमुदकः—सर्वमवितथम्, सर्वमवितथम् । उपवने लुक्कायितमेनं भगवानवालोकयत् ।

दानापीडः--कदा वा वयं दुर्धर्षस्य वलीवर्दस्य शृङ्गं चेतनावतो विनोदकस्य मूर्ध्नि निवेशयामः ?

कुमुदकः--तथैव कुर्मः । अपि च 'सोऽयं विवाहितो विनोदक' इत्युल्लेखमपि कुर्मः ।

विनोदकः--स्वस्त्यस्तु । इदानीमपि त्वं बालोऽसि । जानास्येव प्रकृतिम् । यथेष्टं मन्त्रयस्व, उपहासान् प्रकल्पय । यतस्ते, ईश्वरोऽभिनन्दनीयो भवति, न कस्मा अपि अनर्थाय प्रकल्पन्ते । यथा आत्मश्लाधिनः खड्गमयथातथं संचाल्य आत्मना तृप्तिमधिगच्छन्ति, तथैव त्वम् देव, असकृत् तव अनुकम्पायाः पात्रमस्मीति त्वामभिनन्दामि । सर्वथा तव साहचर्यं परिहरामि । तव जारजो भ्राता महीशानातस्तिरोहितोऽस्ति त्वं किन्तु तेषु, ये किल काञ्चन सरलां सौम्यामबलां निहतवन्तः । श्मश्रु विरहितेन चामुना तरुणेन नचिरादहं द्वन्द्वसम्प्रहारे मिलितास्मि । तावदसौ शान्ति भुञ्जानोऽस्तु ।

(प्रस्थितः)

दानापीडः– स तु संरम्भे—

कुमुदकः– आम अत्यन्तं गभीरे संरम्भे । अहं दृढं प्रतिपादयामि स तथा वर्तते विचित्रायां प्रेमवशात् ।

दानापीडः–स किल द्वन्द्वसम्प्रहाराय त्वामाहूतवान् !

कुमुदकः–समधिकविश्वस्ततया ।

दानापीडः–अये ! अतीवविचित्रोऽयं मानवः ! विना दीर्घकञ्चुकं द्वन्द्वार्थं सन्नद्धो भ्राम्यति, चातुरीं च परिहरति !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः – ततोऽसौ कोऽपि राक्षसाकृतिर्मर्कटः। परन्तु मर्कटोऽप्यस्मा-ज्जनात् विज्ञतरो भवति।

दानापीडः–शान्ता भवत। एकाकिनं मां कुरुत। हृदय, जागृहि, विषमं परिणामं सोढुं सनद्धो भव। मम भ्राता तिरोहित इति किमसौ नावादीत् ?

(ततः प्रविशन्ति दुर्गतारिः, वीर्यशाली, रक्षिणश्च सह वैरोचकेन कर्णादिन च)

दुर्गतारिः आगच्छ भद्र आगच्छ। यदि न्यायस्त्वां न नियमयति, तर्हि स तुलायां नोर्ध्वमुत्तिष्ठेत्। अपि च त्वमेकदा अभिशप्तो दोषीति सर्वदा सावधानं विलोकनीयो भवसि।

दानापीडः–अये किमेतदधुना ? मम भ्रातुर्द्वावपि अनुचरौ शृङ्खलाबद्धौ! वैरोचकस्तयोरन्यतरः!

कुमुदकः–देव, तयोरपराधस्य स्वरूपमवधारय।

दानापीडः–अधिकृताः, कोऽयमपराध एताभ्यां कृतः ?

दुर्गतारिः–मातुर्नाम्ना वच्मि। भद्र, एतौ मृषाप्रचारमकार्ष्टाम्, अपि च मिथ्या अवोचताम्। द्वितीयतः, एतौ मिथ्या प्रवञ्चकौ। षष्ठतोऽन्तिमतश्च एतौ काञ्चन ललनामभिशस्तवन्तौ। उपसंहारे च एतौ मिथ्यावादिनौ मूर्खौ भवतः।

दानापीडः प्रथमतः किमेताभ्यां कृतमिति पृच्छामि। तृतीयतः क एतयोरपराध इति पृच्छामि। षष्ठतोऽन्तिमतश्च किमर्थमेतौ तादृशमपराधं कृतवन्ताविति पृच्छामि। उपसंहारे च एतयोः को वाऽभियोगस्त्वया कृत इति पृच्छामि।

कुमुदकः–अये अवितथं तस्यैव वाण्या क्रमेण च प्रस्तुताः प्रश्नाः। अपि च यत्सत्यमेक एवार्थः विभिन्नैः परिच्छदैर्जिज्ञासितः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दानापीड:--भद्रौ, कस्य जनस्यापराधो युष्माभ्यां कृतो येन न्यायालयस्य पुरतो युवाभ्यामुत्तरं दीयेत ? अत्यन्तं दुर्बोधोऽस्य विज्ञस्य चतुरस्य च राजभटस्य वचनोपन्यासः । कीदृशो वा युवयोरपराधः ?

वैरोचकः--सौम्य प्रभो, नाहमधिकमात्मानमपराधयितुमिच्छामि । शृणु सावहितः । सामन्तोऽपि तदर्थं मां हन्तु नाम । अहं तवाऽपि इमे चक्षुषी प्रासारयम् । यत्तव प्रज्ञाचक्षुर्द्रष्टुं नापारयत्, तदेतै मूंढ़ै लोकगोचरीकृतम् । एकस्यां रात्रावहमनेन साकं कथं तव भ्राता दानयक्षः तत्रभवतीं हीरामयथा दूषयितुं मां प्रालोभयत, कथं त्व मुपवनं समानीतोः हीरायाः परिच्छदेन वर्तमानां मार्गरीतिमावर्जयन्नहमवलोकितः कथं चासौ सामन्तो विवाहावसरे तामपमानयिष्यतीत्यादिआलपन् एतैः श्रुतः । तत्सर्वं नृशंसाचरणम् एभिः पत्रार्पितं कृतम् । तत्सर्वमहमात्मनो मरणेन द्रढयामि न पुनरस्वीकारेण आत्मानं समधिकं विलज्जितं करोमि । अहो हन्त तत्रभवती हीरा मम स्वामिनश्च निष्ठुरेणाचरणेन भर्तुश्च मिथ्याभियोगेन मृत्युं प्रापिता । संक्षेपतोऽहं धातुकस्य समुचितं पुरस्कारमभ्यर्थये ।

दानापीडः--किमिदं वचनं शल्यमिव ते हृदयं वेद्धुं न धावति ?

कुमुदकः--विषेणेवाहमर्दितो, यदा स वदति स्म ।

दानापीडः--किं मे भ्राता एतत्त्वर्जुं त्वां व्यापारयत् ?

वैरोचकः--अथ किम् । एतत्कार्यसाधनाय समाधिकमुपायनमप्ययच्छत् । स एव अस्यानर्थस्य कल्पयिता कारकश्च । सम्प्रति स्वनृशंसाचरणस्य प्रकाशनभिया अन्तर्हितो वर्तते ।

कुमुदकः--सौम्ये हीरे ! स्वरूपं ते प्रतिभाति पुरो मम ।
अपूर्वंमुपमाक्रान्तं यथाऽऽसीदाद्यदर्शने ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गुर्गतारिः--आगच्छ। अभियोजकान् (अभियुक्तान्) समानय। एतावता कालेन नूनं सामन्तो लीलानाथो नागरिकेण प्रतिवेदित पूर्वः (निवेदित पूर्वः) अभविष्यत्। अधिकृताः! नचेदं विस्मरणीयम् यथादेशे यथासमये च उल्लिखितुम् — यथाऽहमनेन गर्दभः कीर्तितः।

वीर्यशाली – अये! इत एतौ देवौ अनन्तो लीलानाथश्च सह नागरिकेण समायतः।

(पुनः प्रविशतः सामन्तो लीलानाथः अनन्तश्च सह नागरिकेण)

लीलानाथः—कतरो वां नृशंसोऽस्ति? तन्नेत्रे द्रष्टुमुत्सहे
येनाहमभिजानीयमपरं पापिनं सुखम्।

वैरोचकः—यदि त्वमीहसे द्रष्टुं यस्तवापकृतिं व्यधात्
पश्य मां—

लीलानाथः— त्वमेवाहः कन्यकां सरलां शुचिम्

वैरोचकः—आमाहमेक एवास्मि।

लीलानाथः— मिथ्या वदसि घातक।
अत्र द्वौ परमोदारौ तृतीयश्च पलायितः
एते त्रयोऽपि संश्लिष्टा दुहितुर्मे मृतौ ध्रुवम्॥
देव, त्वामभिनन्दामि महनीयं त्वया कृतम्।
धैर्योद्रेकात्कृतं नाम मम कल्यानिपातनम्।
तवावदातकार्येषु प्रशस्तेषु यथायथम्
तदिदं सम्यगुल्लेख्यं चिन्तनीयं तदा तदा॥

कुमुदकः—एवं कृत महापापः सर्वथा शरणं गतः
कया वाचा बोधयेयं याचेयं वा क्षमां तव।
नाहं ज्ञातुं पारयामि, प्रतिकर्तुं त्वमर्हसि।
यथेष्टं धीयतां दण्डो नतमूर्ध्ना वहाम्यहम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दोषस्तु मे भ्रमो जातो न पापं कृतवानहम् ।

दानापीडः – तथाऽहं विभ्रमादेव कृतवानस्मि तत्तथा।

तथापि तृप्तिमाधातुं वृद्धस्य शुद्धचेतसः ।

यावान् गुरुर्भवत्वेष यमेष परिकल्पयेत् ।

तं दण्डं शिरसा बोढुं सन्नद्धोऽस्मि गतव्यथः ।।

लीलानाथः – उज्जीवयेति मे कन्यां न वक्तुं प्रभवास्म्यहम् ।

यतस्तत्सर्वथाऽशक्यं ततो वामिदमर्थये-

युवां सर्वान् बोधयतमत्रस्थान् पुरवासिनः ।

कथं सा शुद्धचारित्रा निष्पापाऽम्रियताबला

यद्यस्यां युवयोः स्नेहः कियानपि भवेत्तदा,

प्रशस्ति शोकसम्भिन्नां युवाभ्यां परिकल्पिताम्

उल्लिखतं समाधेश्च गात्रे चोद्गायतं च ताम् ।

यथाऽस्थीनि सुतृप्तानि भवेयुरद्य यामिनीम् ।।

(कुमुदकं प्रति) श्वः प्रभाते समागच्छ देवेन सह मे गृहम्

यतस्त्वं न भवेः साक्षज्जामाता मे कथंचन

यतः सैका मृता कन्या, ततस्तत्सदृशो भव ।।

ततो ममानुजस्य त्वं पुत्रिकां चारुहासिनीम् ।

साक्षाद्विम्ब हि हीरायाः सम्भावयितुमर्हसि ।

सा दायादाऽऽवयोरेष प्रतिशोधस्तत्राहितः ।।

कुमुदकः–देव, त्वं परमोदारो दया तेऽनुपमा ध्रुवम् ।

हृदयं मे स्पृशत्येषा प्रमार्ष्टि नेत्रयोर्जलम् ॥

दानं ते प्रतिगृह्णामि यथेच्छं मां नियोजय ।

पुत्रस्थाने, सदैवाहमाश्रवः स्थातुमुत्सहे ।।

लीलानाथः–श्वः शुभागमनं प्रातस्तवाहं प्रतिपालये ।

अद्य रात्रौ च विश्रान्तः स्थास्यामि विगत व्यथः ।।

परीक्षा चास्य धूर्तस्य मार्गरीतेः पुरो भवेत् ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्ये व्यापारितो ह्येष तव भ्रात्रा प्रलोभनैः ।
नृशंसेष्वेषु कार्येषु दानयक्षेण दुर्धिया ॥

वैरोचकः—न सा अत्र सम्पृक्ता । हृदयेन शपामि सा मह्यं किमवादीत्, न स्वरूपतो जानाति स्म । यावदहं जानामि—सा न्याय्ये पथि अवर्तत, धर्मं चान्ववर्तत ।

दुर्गतारिः—यद्यपि न पत्रार्पितं कृतं, तथापि एषः अभियोक्ता (अभियुक्तः) मां गर्दभं निरदिशत् । प्रार्थयेऽहम्—अस्य दण्डविधानावसरे नैतत् विस्मरणीयम् । अन्यच्च रक्षिणः अशृण्वन् यदेतेषु कश्चिद् दुष्कीर्तिर्वर्तते । लोकाः कथयन्ति—एष कर्णे कुञ्चिकां, तां निकषा च प्रणयकेशगुच्छं धारयति । ईश्वरस्य च नाम्ना एष धनं संगृह्णाति वहोः कालादवधि न च परिशोधयति, येन जनाः कठिनहृदयाःनेश्वरस्य नाम्ना किमपि दातुं श्रद्दधते । अतः प्रार्थये सोऽयं विषयोऽपि विचारणीयतामर्हति ।

लीलानाथः—सर्वथा ते कर्तव्यावधानं साधुतां चाभिनन्दामि ।

दुर्गतारिः—तत्रभवान् अत्यन्तं कृतज्ञोऽभ्यर्थनीयश्च युवक इव प्रवदति । भवदर्थमीश्वरं स्तवीमि ।

लीलानाथः—इदं ते परिश्रमस्य पारितोषिकम् ।

दुर्गतारिः—ईश्वरस्त्वां परिरक्षतु सुतीर्थम् ।

लीलानाथः—गच्छ त्वम् : वन्दिनोऽस्य रक्षणप्रयासात् त्वां मोचयामि । अहमेतस्य तत्त्वं गृह्णामि । बहवो धन्यवादाः ।

दुर्गतारिः—अहमेकं विदितचरं धूर्तं तत्रभवते अर्पयामि । तमेतं तत्रभवान् स्वयमेव नियमयतु, अन्येषां चादर्शं दर्शयतु । भगवान् तव स्वास्थ्यं करोतु क्षेमं च साधयतु । भगवाँस्तव स्वास्थ्यं विपरिवर्तयतु । सविनयमहं तुभ्यं निर्गन्तु मवकाशं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ददामि । पुनः सुमिलनमिष्यते । ईश्वरो निराकरोतु (करोतु) आगच्छ प्रतिवेशिन् , साधयामः ।

(दुर्गतारिः वीर्यशाली च निष्क्रान्तौ)

लीलानाथः—देवाः, श्वः प्रभाते मिलनम् । स्वस्त्यस्तु ।

अनन्तः - स्वस्त्यस्तु । देवाः, श्वः प्रभाते भवतः आशास्महे ।

दानापीड़ः—नान्यथा कुर्मः ।

कुमुदकः—अद्य रात्रौ हीरामनुशोचिष्ये ।

लीलानाथः—(रक्षिणं प्रति) एतावानय । मार्गरीतिं पृच्छामः कथमनेन नीचेन सह तस्याः परिचयः समजनि ।

(निष्क्रान्ताः सर्वे)

—○—

❀ द्वितीयं दृश्यम् ❀

स्थानम्—लीलानाथस्य वृक्षवाटिका

(विनोदको मार्गरीतिश्च परस्परमभिमुखमापततः)

विनोदकः अये सौम्ये देवि मार्गरीते, अभ्यर्थये त्वाम् विचित्रया सह समालापने साहायकमाचरन्ती मम परितोषस्य पात्रं भवितुमर्हसि ।

मार्गरीतिः—किं तदा त्वं मम सुषमां वर्णयन् कामपि विरुदावलीं लिखिष्यसि वा ?

विनोदकः—अवश्यं मार्गरीते, तयोन्नतया श्रेण्या येन जीवन् न कोऽपि तामतिशयीत. तदेतदुदारं सत्यम् , त्वं तामर्हसि ।

मार्गरीतिः—किं न कोऽपि मामतिशयितुमापतेत् ? किमहं सततं प्रासादादधस्तिष्ठामि ?

विनोदकः--तव चातुरी अत्यन्तं प्रखरा, मृगयाश्वानस्य मुखमिव झटिति वस्तु ग्रहीतुं प्रभवति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मार्गरीतिः--तवापि वृतिलात्रिका गतधारा कुठारिकेव सा आहन्ति, न चानिष्टं जनयति ।

विनोदकः--पुरुषस्येव ते चातुरी अतीव मुग्धा नाबलानामनिष्टं साधयेत् । एषोऽहं त्वत्तः पराजयं स्वीकरोमि । मेखलामुन्मुच्य ते ददामि – सकृत् विचित्रामाह्वय ।

मार्गरीतिः–बहवो मे मेखला वर्तन्ते । करबालान्यर्पय ।

विनोदकः–यदि त्वं तानि व्यवहरेः, तर्हि कीलकाविद्धा भविष्यसि, तानि खलु अबलाया भीषणान्यायुधानि ।

मार्गरीतिः--अस्तु । एषाऽहं तां त्वदन्तिकमाह्वयामि । जानामि च सा त्वरितपदा भविष्यति ।

विनोदकः–अतः समागमिष्यति ।

संगीतम्

प्रेम्णो देवः सर्वदेवातिशायी
ऊर्द्ध्वं चास्ते दुष्प्रधर्षः समन्तात् ।
जानीते मां कीदृशः प्रेमिकोऽहं
नाहं शक्तः प्रेमगीतीः प्रगातुम् ॥
गाढप्रेम्णा सर्वलोकाञ्जयामि ।
ख्याताः प्रेम्णा गीतिबद्धाश्च काव्ये
तेषां कीर्तेः केतनं बृन्धयेऽहम् ॥
लावेन्द्रो* यः प्रेमराज्येऽभिषक्तो
रात्रौ रात्रावा ?वाहु?ये?
तीर्त्वा सिन्धुं प्रेयसीं पश्यति स्म।
त्रैलेशोऽग्र्यः+ पाण्डराणां नियोक्ता
गीतः काव्ये क्लेशदाप्रेममुग्धः !
सर्वेऽप्येते कामदेवेन राज्ञा
वाचोक्ता हि प्रेमराज्यस्य वीराः ॥

† लावेन्द्रः–Leander, the good swimmer.

* त्रैलेशः–Troilus.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेषां प्रेमा वर्णितोऽस्तु प्रकामं
न मे प्रेम्णस्तुल्यकक्षां प्रयान्ति ॥

अये मातर्जीवामि । नाहं स्वकीयं प्रेम सानुप्रासेन छन्दसा प्रकाशयितुं प्रभवामि । कृत एव प्रयत्नः, प्रासास्तु न सम्वदन्ति । 'कामिनी' 'यामिनी' 'ललना' अङ्गना' त एते नेव मसृणाः प्रासाः । "कामः' 'वामः' सोऽयं प्रासः शिथिलो भाति 'विधुरः' 'मधुरः' सोऽयं प्रासो विकलो भवति । नाहमुत्पन्नः नर्तनलग्ने । नाहं प्रभवामि ललितललितैर्वचोविन्यासैः प्रेमालापं कर्तुम् ।

(विचित्रायाः प्रवेशः)

सौम्ये विचित्रे ! आगताऽसि । एवमेवागन्तासि अनु ममाह्वानम् !

विचित्रा—अथ किम् । प्रस्थास्ये च तथा तवादेशे ।

विनोदकः—तेन तिष्ठ तावत् –

विचित्रा--तावदभ्युचितम् । स्वस्त्यस्तु ते सम्प्रति । एषा गच्छामि । गमनात्प्राग् यदर्थमहमागता, तेन सहाहं गन्तुमिच्छामि । तव कुमुदकस्य चान्तरा कीदृशो वाग्व्यवहार आसीदिति जिज्ञासमानाऽत्र आगताऽस्मि ।

विनोदकः--केवलं कलुषितानि पदानि । तेनाहं त्वां चुम्बामि ।

विचित्रा—कलुषितानि पदानि नाम कलुषितो वातः । कलुषितो वातो नाम कलुषितः श्वासः । कलुषितःश्वासश्च विरक्तिजनकः ततोऽहमचुम्बिता प्रतिष्ठे ।

विनोदकः—अये त्वया भाषितं कलुषितपदं संज्ञाहीनं जातम् । एतादृशी ते चातुरी ! ततोऽहं ते सरलतया बोधयामि कुमुदको मया द्वन्द्वसंप्रहाराय कृताह्वानो वर्तते । न चिरादस्मादुत्तरमधिगमिष्यामि नतु... तं भयालुत्वेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घोषयिष्यामि । इदानीमहं त्वामभ्यर्थये—कतमेन खलु मे चरित्रस्य दुर्भगेन भागेन त्वं मयि प्रीत्यासक्ता

विचित्र--मिलितैः सकलैरपि तैः यत्सत्यं विमलास्ते च दुर्गुणाः स्वकीयं साम्राज्यं तथा निर्वहन्ति येन सुगुणेभ्यो नागरिकत्वेन वसितुमवकाशं न प्रयच्छन्ति । इदानीं ब्रूहि कतमेन मे चरित्रस्य सुभगेन भागेन त्वं मदर्थं प्रथयं प्रेम्णा आहृतोऽसि ?

विनोदकः--प्रेम्णा आहृतः ! साधीयसी ते भावप्रकाशनचातुरी सत्यमहं प्रेम्णैवाहृतः ! अये, यतोऽहं त्वां मम इच्छायाः प्रतीपं कामये ।

विचित्रा—हृदयस्य विरोधेऽपीति मन्ये । हन्त अनुशोचामि ते हृदयम् । यदि त्वं मदर्थं तदवधीरयसि, तर्हि अहमपि त्वदर्थं तदवधीरयामि यन्नाहं तदाद्रिये यन्मे मित्रमवधीरयति ।

विनोदकः—तेन त्वमहं चातीव विज्ञौ परस्परावर्जनाय ।

विचित्रा—न चेदं विज्ञत्वं तव प्रेमनिवेदने संदृश्यते । विंशतावपि नैक उपलभ्यते य आत्मानः स्तुतिमात्मनैव कुर्वीत ।

विनोदकः—विचित्रे, सेयं पुरातनी गाथा । प्रागियं प्रचलिता ! आस्त, यदा किल मानुषा निरसूयाः साधनेऽवर्तन्त । अद्यतने युगे तु जनो यदि मरणात्प्राक् जीवद्दशायां स्वसमाधिं स्वयं न निर्माति, तदा यदा घण्टा न परं नदिष्यति, विधवायाश्चा तरोदनं न श्रूयेत, तदा नैव जनानां स्मृतिस्तम्भे स्थानं लभेत ।

विचित्रा--कियच्चिरं वासौ स्मृतिस्तम्भे स्थास्यतीति त्वमभिमन्यसे ?

विनोदकः--अये तदेव चिन्तनीयम् । ममोत्तरं तु किमिति वयमुदास्महे । विलपायो नाम होरामेकां रोदिमश्च होरापादम् । ततश्चतुरा जना स्वगुणान्डिण्डिमेनाहमिवोद्घोपयन्तु यावद्वासनाकीटो नान्तरा भवति प्रतिबध्नाति च । अहं तु आत्मगुणान्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वयं कीर्तयामि, स्वयं च साक्षी भवामि यदहं स्तवनार्हो भवामीति। अधुना ब्रूहि कथं ते भगिनी वर्तते ?

विचित्रा—परं दीना।

विनोदकः—अथ त्वम् ?

विचित्रा—अत्यन्तं दीना अहमपि।

विनोदकः—भगवन्तं भज। मां कामय, दैन्यस्य च प्रतीकुरु अयं अहं त्वां तत्रैव स्थापयामि यदेकस्त्वयाऽत्रोपतिष्ठते।

(उरुशीलायाः प्रवेशः)

उरुशीला—भद्रे, पितृव्येनादिष्टाऽसि सत्वरं तमुपसर्पितुम। अस्य प्रासादस्याभ्यन्तरे काऽपि समस्या आस्ते। प्रमाणितमिदं यदस्माकं भर्तृदारिका तत्रभवती हीरा मिथ्याऽभिशस्तेति राजा कुमुदकश्च मिथ्यैव तां तथैच्चैरपावादयताम्। दानयक्षो हि अस्य सकलस्यापि प्रणेता। स चेदानीं मनर्हितो गतश्च। किमिति त्वमागच्छसि ?

विचित्रा—वीर, किमीहसे तत्र गन्तुं श्रोतुं च तमुदन्तम् ?

विनोदकः— तिष्ठेयं ते मानसे चारुशीले
म्रियेयाङ्के शोभने न्यस्तशीर्षः।
प्रत्यक्षं ते चाश्रयिष्ये समाधिं
त्वन्निर्दिष्टो यामि ते तातपार्श्वम्॥

(निष्क्रान्तः)

—०—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* तृतीयं दृश्यम् *

स्थानम्—चर्चालयः—समाधिक्षेत्रम् ।

(ततः प्रविशन्ति दानापीडः, कुमुदकः, अन्ये च त्रिचतुरा वर्तिधारिणः ।)

कुमुदकः–किमिदं लीलानाथपरिवारस्य समाधिक्षेत्रम् ?

एकः प्रभुः—देव, एवमेव ।

कुमुदकः—(समाधिस्तम्भ उल्लिखितुं पठति)

"हीरा शेतेऽत्र शुद्धा सुविमलचरितोदारशीला विनीता
मृत्युं याता खलानामशनिनिपतनोद्दामभिथ्याभियोगैः ।
अस्या यस्यापनुत्त्यै विचशितमतिना मृत्युदेवेन दत्ता
या कीर्तिः कुन्दशुभ्रा सततविजयिनी सा तया भ्राजतेऽलम् ।।

या जीविता ह्रीयुता मृत्युमाप
सा कीर्तिभी राजते मृत्युनाऽद्य ।
स्तुत्वा गुणानर्चयध्वं समाधिं
मूकस्त्वहं निर्विकारो निरीक्षे ।।

संगीतज्ञा, मृदुस्निग्धैः स्वरैः संगायताऽधुना
आवर्तयत मृत्योश्च मन्त्रान् पूतान् समाहिताः ।

गीतम्

निशीथाधिष्ठिते देवि,
क्षमस्व करुणाप्लुता
येऽघ्नन् हीरां विनीतां ते
सेविकां ब्रह्मचारिणीम् ।
ततो येऽनुशयैस्तप्ताः
समाधिं परितोऽधुना
अवसादमयीं गीतिं
गायन्तः पर्युपासते ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

निशीथिनि, प्रसीद त्वं
वरदा भव शोभने ।
एतेऽनुशयसंतप्ता
भृशं दुःखाहता हृदि
देबि संवर्धस्वैतान्
कृपणानर्थिनः शुभे ।
उद्बुध्यध्वं समधिस्था
मिलतैतान् समर्चने
यावन्न प्रतिवुध्येत
हीरा मृत्योर्निदेशतः
तावद्भृशं विषादं स्वं–
ख्यापयामः समन्ततः ।

कुमुदकः–वीराङ्गने, समर्धि ते प्रतिवर्षं समर्चये
प्लावयेयं च तेऽस्थीनि कवोष्णैर्नयनाम्बुभिः ॥

दानापीडः–सुप्रभातमये वीरा
निर्वापयत वर्तिकाः,
रजनी च प्रभातेयं
संचारं जहते वृकाः ।

आरक्ता दृश्यते प्राची रथचक्रं रवेः पुरः
गमनायोन्मुखं रौति त्यजताह्मान् शुभं च वः ।

कुमुदकः सुप्रभातं समे वीरा यथेच्छं गच्छताधुना ॥
दानापीडः–साधयाम इतो वीर, परिवर्त्य परिच्छदम्
सत्वरमुपसर्गामो लीलानाथस्य मन्दिरम् ॥
कुमुदकः–अनुष्ठिता विषादेष्टिरधुनोद्वाहदेवता
हयमानः (१) शुभं धेयात्पाणिपीडनकर्मणि ॥

(निष्क्रान्ताःसर्वे)

(१) हयमानः=Hymen ,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

* चतुर्थं दृश्यम् *

स्थानम्–लीलानाथस्य प्रासादस्यैकमपवरकम् ।

(ततः प्रविशन्ति लीलानाथः, अनन्तः, विनोदकः विचित्रा, मार्गरीतिः, उरुशीला, मठाचार्यः प्राज्ञेशः, हीरा च)

मठाचार्यः–उक्तं खलु मया पूर्वं निर्दोषा ते कुमारिका ।

लीलानाथः–तथा कुमुदको राजा, याभ्यामेषा प्रदूषिता ।।

अपवादैर्मृषोत्कीर्णैर्यथावत्तत्त्वयेरितम् ॥

मार्गरीतिस्तु सम्पृक्ता कियतांशेन दोषिणी

यद्यनीच्छाविरोधेन सा तथाऽकुरुतावशा ॥

पृच्छ्यमाना बहुविधमनुसन्धानकर्मणि

प्रत्यपादयदात्मानं निबोधं वीतकिल्विषम् ॥

अनन्तः– प्रसीदामि यतः सर्वे विषयाः पूर्ववत् स्थिताः ।

विनोदकः–तथाऽहं दोषमुक्तोऽस्मि शपथैः प्रतिबोधितः

द्वन्द्वायाहूतवानस्मि वीरं कुमुदकं वृथा ॥

लीलानाथः–शुभं, वत्से, समा भद्रा नार्यो गच्छत साम्प्रतम् ।

अवतिष्ठत तद्गेहे यावदाकारयामि वः

तिरस्करणिकायुक्ता आगच्छत मदन्तिकम् ॥

(महिलाः प्रस्थिताः)

राजा कुमुदकश्चापि सम्प्रत्यत्रागमिष्यतः

भ्रातस्त्वमभिजानासि करणीयं च यद्भवेत् ।

साक्षात् त्वं जनको भूत्वा भातुष्पुत्र्यास्तवाधुना

कुमुदकाय तां देहि पत्नीत्वेन यथायथम् ॥

अनन्तः एष सर्वात्मना वर्ते निर्वोढुं यत्तवेप्सितम् ।

विनोदकः–मठाचार्यं, तव क्लेशमर्थये चैककर्मणि ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मठाचार्यः – सादरं तत्समाधाय्ये प्रकाशयितुमर्हसि ।

विनोदकः – मां योजयानया सार्द्धं स'थवाऽऽम्यां वियोजय ।

लीलानाथ महाभाग सत्यमेतत्प्रकाशये

भ्रातुः कुमारिका ते मां पश्यति स्निग्धचक्षुषा ॥

लीलानाथः–तच्चक्षुर्मे सुता तस्यास्त्वयि व्यापारयद् ध्रुवम् ॥

विनोदकः–सम्भावयास्म्यहं तां च प्रेमपूर्णेन चक्षुषा ॥

लीलानाथः– मया कुमुदकेनापि राज्ञा ते तत्तथा कृतम् ।

किं तवाभीप्सितं वीर, ?

विनोदकः— तवानुमतिमर्थये ।

मन्ये मम हृदा सार्द्धं त्वदीयं हृदयं मिलेत् ।

यतो मे हृदयं जातु त्वदीयान्नैव भिद्यते ॥

महोत्सवे चाद्यतने पवित्रोद्वाहकर्मणि,

विचित्रया तव भ्रातुः कुमार्या विधिपूर्वकम्,

मां योजय, मठाचार्यः स्वं कृत्यं कर्तुमर्हति ॥

लीलानाथः—मदीयं हृदयं नाम त्वय्यावर्त्तं विभावय ॥

मठाचार्यः – सन्नद्धोऽस्मि, समायातो राजा कुमुदकस्तथा ।

(ततः प्रविशति राजा कुमुदकः, त्रिचतुराश्च प्रभवः)

दानापीडः–सुप्रभातं समेतानां समेषां वोऽर्थये हृदा ।

लीलानाथ–युवामपेक्षमाणाः स्मः किं कुमुदक, निश्चितम्

परिणेतुं मम भ्रातुः पुत्रिकामिह साम्प्रतम् ?

कुमुदकः–एथियोपोद्भवा साऽस्तु परिणेया मया ध्रुवम् ।

लीलानाथः—सन्निहितो मठाचार्यः भ्रातराकारयस्व ताम् ॥

(अनन्तः प्रस्थितः)

दानापीडः–शोभनं सुप्रभातं ते ? को विशेषो विनोदक,

किं फेब्रवरिमासस्य जलदैः कृतसंभ्रमाम् ।

झञ्झाकुज्झटिकाक्रान्तां शोभां धत्ते तवाननम् ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः-नूनं विभेत्ययं दुष्टाद् बलीवर्दाच्च दुर्दमात् !

न भेतव्यं सखे, शृङ्गं सुवर्णेन विभूषितम्

सम्पादयेम येन त्वां विलोक्य मुदिता भवेत् ।

समग्रा युवरूपेयं (१) युवरूपा (२) यथा पुरा ।

वृषरूपधरं प्रेम्णा द्याव (३) संश्लिष्य सादरम् ॥

विचुम्ब्य तृप्तिमायासीत्, नात्र कार्या विचारणा ॥

विनोदकः--वृषरूपधृतो द्यावो विचित्रः सुभगो वृषः

मन्ये तव पितुर्धेनोः पृष्ठमारुह्य चादरात् ।

प्रासूत त्वादृशं वत्सं येन रौषि तयाऽधुना ॥

कुमुदकः–ऋणी वर्ते, यथाकालं समाधास्ये यतोऽधुना

विषयान्तरमायाति, वीक्षणीयं मया च तत् ॥

(तिरस्करणिकावृताभिर्महिलाभिः सह अनन्तस्य प्रवेशः)

परिणेया मया काऽऽसु ग्रहणीया च या भवेत् ?

अनन्तः--इयं सा दीयते तुभ्यं पाणिनाऽऽदातुमर्हसि ॥

कुमुदकः–अये तर्हि मदीयैषा, कान्ते, प्रेक्षे तवाननम् ॥

लीलानाथः--न पाणिग्रहणात्पूर्वं न विवाहाच्च धीमतः ।

मठाचार्यस्य सान्निध्ये नैनां त्वं द्रष्टुमर्हसि ।

कुमुदकः -प्रसारय करं कान्ते, बुभूषामि पतिस्तव ।

यदि ते रुचितो नाम समक्षं चास्य धीमतः ॥

हीरा–जीविताऽऽसं यदा नाम परभार्याऽभवं तदा ।

(तिरस्करणिकामपनीय)

यदा कामयसे त्वं मां तदा त्वमपरः पतिः ॥

---

१ युवरूपा–Europe

२ युवरूपा–Europa daughter of Agenor king of Phoenicia.

३ द्यावम्--Jove--Jupiter corresponding Vedic द्यौः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमुदकः -इयं साक्षात्परा हीरा !

हीरा-- न किञ्चिद्विस्मयावहम्

सापवादा मृता हीरा जीवामि त्वहमक्षता ।
अपवादैरसंश्लिष्टा कन्यका वीतकल्मषा ।।

दानापीडः–याऽम्रियत पुरा हीरा सैवेयं नात्र संशयः !

लीलानाथः—अम्रियत तदा हीरा ह्यपवादा यदा स्थिताः ।

मठाचार्यः—प्रभवामि निराकर्तुं भद्रा वो विस्मयं तदा
यदा समाप्तिमेष्यन्ति पवित्रोद्वहनक्रियाः ।।
विस्तरेणाभिधास्यामि हीराया मरणं यथा ।
विस्मयः खेलतात्तावत्साधारणतयाऽधुना,
विवाहमण्डयं यामो मिलिताः कार्यसिद्धये ।।

-भद्र मठाचार्य, कतमा आसु विचित्रा भवति ?

विचित्रा--(तिरस्करणिकामपनीय) अहं तन्नामभाग् भवामि । किं तवाभिलषितम् ?

विनोदकः–किं त्वं मां न कामयसे ?

विचित्रा--अये न ततोऽधिकम्, यथा साधारणो जनः कामयते ।

विनोदकः–तर्हि तव पितृव्यो राजा कुमुदकश्च प्रतारिता भवन्ति । तैः सशपथमुक्तं त्वं मां कामयस इति ।

विचित्रा – किं त्वं मां न कामयसे ?

विनोदकः–यत्सत्यम्, न ततोऽधिकं कामये यत्साधारणतयाऽपेक्ष्यते ।

विचित्रा–तर्हि मम भगिनी मार्गरीतिरुरुशीला च प्रतारिता भवन्ति । ताभिः सशपथमभिहितं त्वं मां कामयसे इति ।

विनोदकः–तैः सशपथमभिहितं यत् त्वं मयि प्रेम्णा पीडिता आसीः

विचित्रा–ताभिः सशपथमभिहितं यत् त्वं मयि प्रेम्णा मृत्योरासन्न आसीः ।

Vidyabhawan Sanskrit Mahavidyalaya
Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विनोदकः–न तदवितथम् । तर्हि किं त्वं न मां कामयसे ? अप्येतत् सत्यम् ?

विचित्रा--नहि । यत्सत्यमहं त्वां कामये तथा परस्परं प्रेमनिश्चयेन ।

लीलानाथः--भातुष्पुत्रिके, तिष्ठ, निश्चितमहं जानामि यत् त्वमेनं भद्रं कामयसे ।

कुमुदकः -प्रसङ्गेऽस्मिन् अहं सशपथं प्रतिपादयामि यदेष तां कामयते । तदेतत्तस्य स्वहस्ताङ्कितं पत्रम्, यत्र किल तेन विचित्रामधिकृत्य स्वकपोलकल्पिता काऽपि विच्छन्दा गीतिकाऽस्ति ।

हीरा– अत्राप्यपरं पत्रं मम भगिन्या स्वहस्तलिखितं यत्र विनोदकमुद्दिश्य तस्या प्रेम्णश्चित्रणमास्ते, तदिदं तस्या कञ्चुलिकाया स्थगिकातोऽपहृतम् ।

विनोदकः--आश्चर्यम् आश्चर्यम् । आवयोरिच्छाविरोधेऽप्यावयोः प्रेमप्रकाशकं पत्रद्वयम् । एहि विचित्रे एहि, दिव्येन ज्यौतिषा शपामि । केवलं अनुकम्पया त्वां पत्नीत्वेन परिगृह्णामि ।

विचित्रा--नाहमत्र प्रतिबध्नामि । परन्तु तव दयनीयया अवस्थया आवर्जिता तव च प्राणान् रक्षितुकामा त्वामहं परिणयामि यदहमुक्ता त्वं मदर्थं क्षयप्राप्तोऽभूः ।

विनोदकः -शान्तम् शान्तम् । मा भूदतिप्रसङ्गः मुखं, ते निरुणध्मि । (चुम्बति ताम्)

दानापीडः--अये कृतोद्वाह विनोदक, कथमिदानीं वर्तसे ?

विनोदकः–राजन्, अहं त्वां निवेदयामि न कापि उपहासकानां गोष्ठी मां मम विनोदनात् चालयितुं प्रभवति । किमिति त्वं विभावयसि–अहं व्यङ्गं विद्रूपं वा गणयामि ? न हि । यदि कोऽपि विद्रूपैर्व्यङ्गैश्च मनसाऽभिभूतो भवति, न स

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रभवति स्वच्छन्दं सुखमवस्थातुम्। संक्षेपतो निवेदयामि। अहं विवाहार्थं कृतनिश्चयः विश्वस्य भूमण्डलस्यापि विरोधं न गणयामि। पूर्वं मया विवाहस्य विरोधमकरवमिति नाहमुपहसनीयो भवामि, यतो मानवश्चलप्रकृतिरिति मे सिद्धान्तः। कुमुदक, अवश्यमहं त्वामाहन्तुं कृतमतिरासम्, परन्तु त्वमिदानीं मम सन्निहितो बन्धुर्भवसि, तदर्थं त्वामक्षतं स्थापयामि, प्रार्थये च मम श्यालिकां प्रीणयितुम्।

कुमुदकः--आशासितं मया यत् त्वं मम श्यालिकां विचित्रां प्रत्यादेक्ष्यसि येनाहं त्वामायोध्य एकाकिनं त्वां द्विहृदयं करिष्यामि। परन्त्वेतत् पुनर्ब्रवीमि, यदि मम श्यालिका सावहिता त्वां नोपचरति त्वमवश्यं कश्चन शठो भर्ता भविष्यसि।

विनोदकः--आगच्छत आगच्छत। वयमिदानीं सखायः। विवाहात्पूर्वं सकृत् नृत्यामो येनास्माकं हृदयानि विनोदयामः, प्रेयसीनां च चरणान् धिनुमः।

लीलानाथः--अनन्तरं तावत् नृत्यं प्रचलतु।

विनोदकः--नहि नहि। प्रथमत एव नृत्यं भवतु अयं ममाभिसन्धिः। संगीतज्ञा, वाद्यानि वादयत। राजन्, त्वमिदानीं खिन्न:पत्नीमेकां वृणुष्व। शृङ्गेण प्रसाधिता हि यष्टिः परमादरणीया भवति।

(दूतस्य प्रवेशः)

दूतः--देव, पलायमानो भवतो भ्राता निगृहीतः सायुधैश्च भटैरिह महीशानां समानीतः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.
विनोदकः--श्वो यावत्तस्य विषयो न मनसा करणीयः । अहमस्य

समुचितं दण्डं कल्पयामि । वाद्यकाराः, वादयत वाद्यानि ।

वयमिदानीं संगीतेन नृत्येन च विनोदयामः ।

(संगीतं नृत्यं च प्रवर्तते)

निष्क्रान्ताः सर्वे ।

समाप्तम् ।

Bhawan's Sri Sankaracharya Sanskrit Mahavidyala · Bharatiya Vidya
820

Printed by Sri A. T. Sarma, Siromani Press
P. O. Berhampur, Dt. Ganjam (Orissa)
Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE